Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

卐 श्रीविजयनेमिसूरीश्वरग्रन्थमालारत्नम्-४६ 卐

कलिकालसर्वज्ञ-भूपालावलिमौलिमालालालितललितचरणारविन्दद्वन्द्व-
वादिवृन्दारकवृन्दवारणनिवारणपञ्चानन-श्रीहेमचन्द्रसूरिभगवद्भिरचितं
स्वोपज्ञालङ्कारचूडामणिव्याख्यासमलङ्कृतं—



# काव्यानुशासनम् ॥

[ तस्य प्रथमाध्यायात्मकः प्रथमो विभागः ]



तदुपरि-
शासनसम्राट्-सूरिचक्रचक्रवर्ति-तपोगच्छाधिपति-श्रीमद्विजयनेमिसूरीश्वरपट्टा-
लङ्कारेण 'व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्न' इति पदा-
लङ्कृतेन श्रीविजयलावण्यसूरिणा विरचिता
प्रकाशनाम्नी वृत्तिः ।

सम्पादकः-
पन्न्यासश्रीसुशीलविजयो गणिः

卐 卐 卐 卐 卐

प्रकाशकम्-
श्रीविजयलावण्यसूरीश्वरज्ञानमन्दिरम्
बोटाद, सौराष्ट्र

वीरसं० २४८२ ] नेमिसं० ७ [ विक्रमसं० २०१२

मुद्रणस्थलम्-निर्णयसागर प्रेस, २६/२८ कोलभाट स्ट्रीट, मुंबई. २

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीविजयनेमिसूरीश्वरग्रन्थमालारत्नम्-४६

कलिकालसर्वज्ञ-भूपालावलिमौलिमालालालितललितचरणारविन्दद्वन्द्व-
वादिवृन्दारकवृन्दवारणनिवारणपञ्चानन-श्रीहेमचन्द्रसूरिभगवद्भिरचितं
स्वोपज्ञालङ्कारचूडामणिव्याख्यासमलङ्कृतं—



# काव्यानुशासनम् ॥

[ तस्य प्रथमाध्यायात्मकः प्रथमो विभागः ]



तदुपरि-
शासनसम्राट्-सूरिचक्रचक्रवर्ति-तपोगच्छाधिपति-श्रीमद्विजयनेमिसूरीश्वरपट्टा-
लङ्कारेण 'व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्न' इति पदा-
लङ्कृतेन श्रीविजयलावण्यसूरिणा विरचिता
प्रकाशिका

सम्पादकः

पन्न्यासश्रीसुशीलविजयो गणिः

प्रकाशकम्-
श्रीविजयलावण्यसूरीश्वरज्ञानमन्दिरम्
बोटाद, सौराष्ट्र

वीरसं० २४८२ ] नेमिसं० ७ [ विक्रमसं० २०१२

मुद्रणस्थलम्- निर्णयसागर प्रेस, २६/२८ कोलभाट स्ट्रीट, मुंबई. २

R 15.00

- परिवर्धित मुल्य -

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सहायक –

गुजरात–

पाटणनिवासी ज्ञानरसिक

शा० साराभाई नगीनदास

ठे० ऑफीस गली, मुलजी जेठा-

मार्कीट, मुंबई नं. २

प्रकाशक –

'श्रीविजयलावण्यसूरीश्वर

ज्ञानमन्दिर'

ना

कार्यवाहक –

शा० ईश्वरदास मूलचंद

[ बोटाद, सौराष्ट्र. ]

प्राप्तिस्थान –

[ १ ]

श्रीविजयलावण्यसूरीश्वरज्ञानमन्दिर

बोटाद, सौराष्ट्र.

[ २ ]

सरस्वतीपुस्तकभंडार,

ठे० रतनपोल, हाथीखाना.

अमदावाद

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

શાસનસમ્રાટ્-તપોગચ્છાધિપતિ-નરપતિતતિ પ્રતિબોધક-સૂરિચક્રચક્રવર્ત્તિ-શ્રીકદમ્બ-
ગિરિ-પ્રમુખ-તીર્થોદ્ધારક-પ્રૌઢપ્રભાવશાલિ-પરમપૂજ્ય બાલબ્રહ્મચારિ-

## આચાર્ય મહારાજાધિરાજ શ્રીમદ્‌વિજયનેમિસૂરીશ્વરજી મહારાજ સાહેબ.

જન્મ : વિ. સં. ૧૯૨૯ કાર્તિક શુદ ૧ શુક્રવાર મહુવા (સોરઠ)



દીક્ષા : વિ. સં. ૧૯૪૫ જ્યેષ્ઠ શુદ ૭. ભાવનગર.

ગણિપદ : વિ. સ. ૧૯૬૦ કાર્તિક વદ ૭. વળા-વલ્લભીપુર
પંન્યાસપદ : વિ. સ. ૧૯૬૦ માગશર શુદ ૩. વળા-વલ્લભીપુર
સૂરિપદ : વિ. સ. ૧૯૬૪ જ્યેષ્ઠ શુદ ૫. ભાવનગર
સ્વર્ગવાસ : વિ. સ. ૨૦૦૫ આસો વદ અમાસ. શુક્રવાર મહુવા.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अलङ्कारचूडामणिसहित-

## काव्यानुशासनप्रथमाध्यायस्य

संक्षिप्त-

# विषयाऽनुक्रमणिका


| विषयः | पत्रम् |
|---|---|
| [ १ ] मूलमङ्गलाचरणम् ... | १ |
| [ २ ] अलङ्कारचूडामणि-मङ्गलाचरणम् ... | ४ |
| [ ३ ] प्रयोजनभूमिका ... | १० |
| [ ४ ] अभिधेयप्रयोजनम् ... | १२ |
| [ ५ ] काव्यस्य कारणम् ... | १९ |
| [ ६ ] सहजा प्रतिभा ... | २६ |
| [ ७ ] औपाधिकी प्रतिभा ... | २७ |
| [ ८ ] प्रतिभासंस्कारः ... | २८ |
| [ ९ ] व्युत्पत्तिनिरूपणम् ... | ३० |
| [ १० ] अभ्यासनिरूपणम् ... | ५७ |
| [ ११ ] शिक्षानिरूपणम् ... | ५९ |
| [ १२ ] काव्यस्वरूपम् ... | १२० |
| [ १३ ] गुण-दोषलक्षणम् ... | १३७ |
| [ १४ ] अलंकारलक्षणम् ... | १४५ |
| [ १५ ] रसोपकारप्रकारः ... | १५१ |
| [ १६ ] शब्दार्थस्वरूपम् ... | १७२ |
| [ १७ ] मुख्यार्थनिरूपणम् ... | १७४ |
| [ १८ ] गौणार्थनिरूपणम् ... | १८२ |
| [ १९ ] शक्तिभेदस्वरूपम् ... | २२५ |
| [ २० ] व्यञ्जकत्वनिरूपणम् ... | २२६ |
| [ २१ ] व्यङ्ग्यस्य भेदाः ... | २३८ |
| [ २२ ] शब्दशक्तिमूलम् ... | २४१ |
| [ २३ ] अर्थशक्तिमूलव्यङ्ग्यम् | २६८ |
| [ २४ ] अर्थशक्तिमूलकरसादि-ध्वनिनिरूपणम् ... | २८६ |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# પ્રકાશકીય નિવેદન

કલિકાલસર્વજ્ઞ ભગવાન્ **શ્રીમદ્ હેમચંદ્રસૂરીશ્વરજી મહારાજાએ** રચેલા સાહિત્યના આ અદ્ભુત ગ્રંથ **કાવ્યાનુશાસનને 'શ્રીવિજયનેમિ-સૂરીશ્વર-ગ્રંથમાલા'**રત્ન-૪૬ મા તરીકે પ્રકાશિત કરતાં અમને અત્યંત આનંદ થાય છે.

આ ગ્રંથમાં કલિકાલસર્વજ્ઞ ભગવંતની સ્વોપજ્ઞ 'अलङ्कारचूडामणिटीका' મૂકવામાં આવી છે. તદુપરાંત તેમની 'विवेकवृत्ति' ના સમ્પૂર્ણ ભાવને પ્રદર્શિત કરતી અને તે સિવાયના વિવિધ વિચારોને જણાવતી, શાસનસમ્રાટ્-સૂરિચક્રચક્રવર્ત્તિ-તપોગચ્છાધિપતિ-ભારતીય ભવ્યવિભૂતિ-દિવ્યતેજોમૂર્ત્તિ-સર્વતન્ત્રસ્વતન્ત્ર-શ્રીકદમ્બગિરિપ્રમુખાનેકતીર્થોદ્ધારક-ભૂપાલાવલિનતપાદપદ્મ-પંચપ્રસ્થાનમયસૂરિમન્ત્ર-સમારાધક-બાલબ્રહ્મ-ચારિ-પ્રૌઢપ્રતાપિ-પરમોપકારિ-જગદ્ગુરુ-પરમકૃપાલુ-પરમપૂજ્ય-આચાર્યમહારાજાધિરાજ શ્રી શ્રી શ્રી ૧૦૦૮ **શ્રીમદ્વિજયનેમિસૂરીશ્વરજી મહારાજસાહેબના** પટ્ટાલંકાર-વ્યાકરણવાચસ્પતિ-કવિરત્ન-શાસ્ત્ર-વિશારદ-નિરુપમવ્યાખ્યાનસુધાવર્ષિ-સપ્તલક્ષશ્લોકમાનનૂતનગ્રન્થનિર્માતૃ-બાલબ્રહ્મચારિ-પૂજ્યપાદ-આચાર્યદેવ શ્રી શ્રી ૧૦૦૮ **શ્રીમદ્ વિજય-લાવણ્યસૂરિજી મહારાજસાહેબે** રચેલી 'प्रकाश' નામની નૂતન ટીકા પણ આમાં મૂકવામાં આવી છે.

આ ગ્રંથના સંપાદક પ્રખરવક્તા વિદ્વદ્વર્ય બાલબ્રહ્મચારી પૂજ્ય **પન્યાસ-પ્રવર શ્રીસુશીલવિજયજી ગણિવર્ય** છે. તેઓશ્રીએ લખેલ 'મૂળનો સંક્ષેપાર્થ' પણ આમાં આપેલ છે.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



આ ગ્રંથની પ્રસ્તાવના વડોદરા–નિવાસી જૈનવિદ્વાન્ ધર્મરસિક પ્રખ્યાત પંડિત **શ્રીયુત લાલચંદ્ર ભગવાનદાસ ગાંધીએ** સુંદર લખેલી છે.

આ ગ્રંથનું મુદ્રણકાર્ય મુંબઈના સુપ્રસિદ્ધ **નિર્ણયસાગર પ્રેસે** અને પ્રુફ-સંશોધન તે પ્રેસના **પ્રધાનપંડિત નારાયણ રામ આચાર્યે** સુંદર રીતે કરેલ છે.

આ ગ્રંથના પ્રકાશનમાં પાટણનિવાસી જ્ઞાનપિપાસુ ધર્મરસિક **શા. સારાભાઈ નગીનદાસે** રૂ. ૩૫૦૦) ની ઉદાર સખાવત કરી છે. આ બદલ સર્વેનો સહર્ષ અમે આભાર માનીએ છીએ. આ રીતે આ ગ્રંથનો પ્રથમાધ્યાયવાળો આ પ્રથમ વિભાગ પ્રકાશિત કરવામાં આવ્યો છે. એ જ રીતે આગળના ભાગો પણ ક્રમશઃ પ્રકાશિત કરાશે.

સાહિત્યજ્ઞો, વિદ્વાનો અને સંસ્કૃતના અભ્યાસીઓ આદિ આ ગ્રંથનો સદુપયોગ કરે એજ શુભેચ્છા......

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# પ્રસ્તાવના

ગૂજરાતને વિવિધ વિશાલ વિશિષ્ટ વાઙ્મયથી વિભૂષિત કરનાર, ગૂજરાતને સુશિક્ષિત સુસંસ્કાર-સંપન્ન રચનાર, ગૂજરાતને વાસ્તવિક ગૌરવશાલી બનાવનાર, ગૂજરાતના સન્માનનીય સ્વનામધન્ય સુપુત્ર મહાન્ સૂરીશ્વર **શ્રીહેમચંદ્રાચાર્યનું** નામ સર્વદા સંસ્મરણીય છે, કર્તવ્ય-પરાયણ જે મહાન્ આચાર્ય વિક્રમની બારમી-તેરમી સદીને સુયશસ્વી બનાવી ગયા. લોકોપકાર-સજ્જ ભારત-ભૂષણ જે વિદ્વચ્છિરોમણિએ પ્રતાપી ગૂર્જરેશ્વર **સિદ્ધરાજ જયસિંહની** પ્રાર્થનાને માન આપી '**સિદ્ધહેમચંદ્ર**' જેવા પ્રખ્યાત શબ્દાનુશાસનની-ષડ્ભાષામય શબ્દશાસ્ત્રની રચના કરી અનુપમ ભેટ સમર્પણ કરી. એના અનુસંધાનમાં **નામ-લિંગાનુશાસન, ધાતુપારાયણ**( ધાતુમાલા ) અને દેશીશબ્દસંગ્રહ-**દેશીનામમાલા, અભિધાનચિંતામણિ** નામમાલા, **અનેકાર્થસંગ્રહ, નિઘંટુશેષ** જેવા શબ્દકોશો વિશ્વને સમર્પણ કર્યા. એ સાથે **કાવ્યાનુશાસન,** છંદોડનુશાસન અને '**ચૌલુક્યવંશ**'ને યશસ્વી બનાવતું, ગૂજરાતના ગૌરવનો ખ્યાલ કરાવતું સંસ્કૃત-પ્રાકૃત **દ્વ્યાશ્રય** જેવું અદ્ભુત મહાકાવ્ય રચી જગત્‌ના વિદ્યાભ્યાસીઓને-સાહિત્ય-સમુપાસકોને અન્તઃકરણથી કૃતજ્ઞ બનાવ્યા છે. ધર્માત્મા પરમાર્હત રાજર્ષિ ગૂર્જરેશ્વર **કુમારપાલ** ભૂપાલની પ્રાર્થનાને માન્ય રાખી તેઓએ સ્વોપજ્ઞ વિવરણ સાથે **અધ્યાત્મોપનિષદ્ યોગશાસ્ત્ર** અને **ત્રિષષ્ટિશલાકાપુરુષચરિત્ર** મહાકાવ્ય, **પરિશિષ્ટપર્વ** સાથે ભેટ ધર્યાં, તથા ઉત્તમ ગંભીર ભાવ ભરેલ **વીતરાગસ્તોત્ર** અને **દ્વાત્રિંશિકાઓ**, તેમ જ '**પ્રમાણમીમાંસા**' જેવું પ્રમાણશાસ્ત્ર અને **અર્હન્નીતિ** આદિ અન્ય પણ અનેક ઉપયોગી વિશિષ્ટ રચનાઓ રચી ગૂજરાતને વિદ્યા-વિજ્ઞાનમાં સ્વાશ્રયી બનાવ્યો છે-સાહિત્ય-સમૃદ્ધિથી સુસમૃદ્ધ બનાવ્યો છે અને અલ્પ માત્રાથી ગર્વિષ્ઠ બનતા વિદ્યોન્મત્ત માનવોને પણ સાચું ઉચ્ચ શિક્ષણ આપ્યું છે. જન-સમાજને અનેક રીતે અનુગૃહીત કરી અત્યન્ત ઋણી બનાવનાર એ મહાન્ આચાર્યને મેં ૧૭

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[illegible] અર્ધ્યાંજલિ આપી છે, જે **'આચાર્ય શ્રીહેમચન્દ્ર'** (ઐતિહાસિક પ્રામાણિક પરિચય) નામથી સં. ૧૯૯૫માં 'સુવાસ' માસિકના શ્રીહેમચંદ્રાચાર્ય–વિશેષાંકમાં તથા હૈમસારસ્વતસત્ર–નિબન્ધ-સંગ્રહમાં પણ ગૂજરાતી સાહિત્યપરિષદ્ તરફથી પ્રકાશિત થયેલ છે, એથી એ સંબંધમાં અહિં તેની પુનરુક્તિ કરતો નથી.

**'કલિકાલ–સર્વજ્ઞ'** ઉપનામથી પ્રખ્યાત, દીર્ઘદર્શી, કર્તવ્યનિષ્ઠ એ આચાર્યવર્યે એ રીતે જ્ઞાન–ગંગાને આપણા આંગણામાં વહેવડાવી છે. ગૂજરાતમાં અને અન્યત્ર સર્વત્ર સરલતાથી વિદ્યા–વૃદ્ધિ થાય, સુગમતાથી વિદ્વત્તા વિકસિત થાય, જન–સમાજમાં વક્તૃત્વ અને કવિત્વ–શક્તિ વિશેષ પ્રકારે ખીલે–એવી ઉચ્ચ સાહિત્યની સાધન–સામગ્રી આપણી સમક્ષ ઉપસ્થિત કરી છે. આવા અમૂલ્ય અખૂટ વારસાનો આપણે સદુપયોગ કરી શકીએ, પ્રમાદનો પરિત્યાગ કરી આવાં સુવિહિત શાસ્ત્રોનું યથાશક્તિ પઠન–પાઠન, મનન–પરિશીલન કરીએ તો તેમાં આપણું જ પરમ હિત–શ્રેયઃ સમાયેલું છે. એ જ ઉચ્ચ ઉદ્દેશથી શબ્દ–વ્યુત્પત્તિ-શાસ્ત્રનું અનુશાસન–શિક્ષણ આપ્યા પછી તેઓએ કાવ્યશાસ્ત્રનું યથાયોગ્ય શિક્ષણ આપવા પ્રસ્તુત **કાવ્યાનુશાસનની** સંસ્કૃત સૂત્રાત્મક અષ્ટાધ્યાય–વિશિષ્ટ રચના કરી હતી અને અભ્યાસીઓને વિશેષ ઉપકારક થાય એ દૃષ્ટિથી એને **'અલંકારચૂડામણિ'** નામની વ્યાખ્યાથી, તથા **'વિવેક'** નામના વાર્તિક–ન્યાસ જેવા વિવેચનથી વિભૂષિત કર્યું છે. વાસ્તવિક કવિ, કવીશ્વર, કવિરત્ન, કવિકુલ–તિલક, કવિકુલ–કિરીટ કે મહાકવિ થવા માટે આવાં શાસ્ત્રોનો યથાયોગ્ય અભ્યાસ કરવો જોઈએ.

નામ સાથે આડંબરી મોટાં વિશેષણો જોડવાં, ભારે બિરૂદો કે ટાઈટલો લગાડવાં એ જૂદો વિષય છે અને સંસ્કૃત, પ્રાકૃત, અપભ્રંશ આદિ ભાષાના તેવા વાસ્તવિક કવિ થવું એ જૂદો વિષય છે. કવિ થવા માટે કાવ્ય-શાસ્ત્રના મર્મજ્ઞોએ જે કેટલાક નિયમો સમજાવ્યા છે, તે પ્રમાણે તેવી વિશેષ યોગ્યતા તેણે કેળવવી જોઈએ. કવિ થવા ઇચ્છનારમાં સહજ પ્રતિભા–પટુતા હોવી જોઈએ, તેને તેણે વ્યુત્પત્તિ અને અભ્યાસ દ્વારા સંસ્કારિત કરી ખીલ-વવી જોઈએ. કવિ થવા ઇચ્છનારમાં લોકનું–લોક–વૃત્તનું જ્ઞાન–વ્યવહાર–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



કૌશલ હોવું જરૂરી ગણાય, તેમ જ તેનામાં શબ્દશાસ્ત્ર, કાવ્યશાસ્ત્ર, છંદઃશાસ્ત્ર, અભિધાનકોશો, શ્રુતિ, સ્મૃતિ, પુરાણ, આગમશાસ્ત્ર, તર્કશાસ્ત્ર, નાટ્યશાસ્ત્ર, ધર્મશાસ્ત્ર, અર્થશાસ્ત્ર, કામશાસ્ત્ર, યોગશાસ્ત્ર, આયુર્વેદ આદિ વિવિધ વિષયોનું વિશાલ જ્ઞાન હોવું આવશ્યક ગણાય. કાવ્યોનાં લક્ષણો, સ્વરૂપો, પ્રકારો કેવા કેવા હોય છે? તે સર્વ તેણે જાણવું જોઈએ. ગદ્ય-પદ્ય, પાઠ્ય, ગેય, પ્રેક્ષ્ય (નાટ્ય-પ્રકારો) અને શ્રવ્ય કાવ્યોનું સ્વરૂપ તેણે સમજવું જોઈએ. પૂર્વે થઈ ગયેલા મહાકવિઓનાં મહાકાવ્યો, આખ્યાયિકા, કથા, નાટક, ચંપૂ આદિનો તેણે અભ્યાસ કરવો જોઈએ, કાવ્યતત્ત્વજ્ઞ વિદ્વાનોનો પરિચય-સંપર્ક તેણે સાધવો જોઈએ.

કાવ્યોમાં ગુણો, દોષો, રસો, અલંકારો, ભાવો કેવા હોય? તેની શૈલી, રીતિ-પદ્ધતિ, ઉક્તિઓ કેવી હોય? તેમાં વર્ણન કરાતા નાયકો, નાયિકાઓ આદિના ભેદ-પ્રભેદ કેવાં હોય? તેના ગુણ-દોષ આદિનું પરિજ્ઞાન તેને હોવું જોઈએ. કેવા કાવ્યો જીવનમાં આનંદ-કારક, ઉપદેશાત્મક, ઉપકારક થાય? જન-મન-રંજનકારક થાય, રાજા-મહારાજાઓને જ નહિ, દેવોને પણ પ્રસન્ન કરનાર થઈ શકે, યશઃકારક થાય-અવિનશ્વર કીર્તિ કરનાર થાય? એ તેણે સમજવું જોઈએ. કાવ્યશાસ્ત્રના વિનોદથી જીવન-કાલને સફલ બનાવનારા વિશાલ ભારતના પ્રાચીન અનેક વિદ્વદ્-રત્નોએ એ વિષયનું રહસ્ય સમજાવવા ભારે પ્રયત્નો કર્યાં છે, તેનું પરિશીલન કરવું જોઈએ. **ભરતે નાટ્યશાસ્ત્ર**માં, **દંડીએ કાવ્યાદર્શ**માં, **રુદ્રટ**, **ભામહ**, **વામન**, **ઉદ્ભટ** આદિએ વિવિધ **કાવ્યાલંકારો**માં, **આનંદવર્ધને ધ્વન્યાલોક**માં, **કુન્તકે વક્રોક્તિજીવિત**માં, **રાજશેખરે કાવ્યમીમાંસા**માં, **મમ્મટે કાવ્યપ્રકાશ**માં, **મહિમભટ્ટે વ્યક્તિવિવેક**માં, મહારાજા **ભોજે સરસ્વતીકંઠાભરણ**, **શૃંગારપ્રકાશ** આદિમાં વિવિધ દૃષ્ટિબિંદુથી અને વિવિધ શૈલીથી ગહન કાવ્યતત્ત્વનું જે નિરૂપણ કર્યું છે અને તેના વિવેચકોએ-વ્યાખ્યાકારોએ જે વિવેચનો કર્યાં છે, તે સમજવાં જોઈએ. આચાર્ય શ્રીહેમચન્દ્રે પૂર્વે થઈ ગયેલા એ શાસ્ત્રકારોના વિશદ વિચારોનો સમન્વય કરી પોતાની વિશિષ્ટ સુગમ શૈલીથી રચના કરી નવનીતરૂપ પ્રસ્તુત **કાવ્યાનુશાસન** આપણને આપ્યું છે.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



માત્ર કાશ્મીરના અને માલવા આદિ દેશોના વિશેષજ્ઞ વિદ્વાનોએ જ નહિ, ગૂજરાતના ગૌરવરૂપ વિદ્વાનોએ પણ એ વિષયમાં એવા વિશદ પ્રયત્નો કર્યા છે-એમ આથી જણાશે. વિદ્યા–વ્યાસંગી જૈન વિદ્વાનોએ–આચાર્યોએ એ દિશામાં પણ પ્રશંસનીય પ્રયાસો કર્યા છે, તેમ તેનો અભ્યાસ કરતાં સમજાશે અને વાઙ્મયના વિવિધ પ્રકારોની એમની સેવા લક્ષ્યમાં આવશે.

શ્રીહેમચન્દ્રાચાર્યના સમકાલીન અને પશ્ચાત્કાલીન કેટલાય જૈન વિદ્વાનોએ તેમના માર્ગને અનુસરવા અનેક પ્રયત્નો કર્યા છે. કેટલું ય એવું સાહિત્ય હજી અપ્રકાશિત સ્વરૂપમાં પ્રાચીન જ્ઞાનભંડારોમાં છે, સંક્ષિપ્ત પ્રાકૃત અલંકારદર્પણ જેવા ગ્રંથો પણ હજી પ્રકાશમાં આવી શક્યા નથી.

સિદ્ધરાજ જયસિંહના સમકાલીન સોમ–સૂનુ મહામાત્ય વાગ્ભટનો કાવ્યાલંકાર ગ્રંથ સિંહદેવગણિની વ્યાખ્યા સાથે પ્રસિદ્ધ છે, પરંતુ તેના પર જિનવર્ધનસૂરિ, ક્ષેમહંસગણિ, જ્ઞાનપ્રમોદગણિ, વાદિરાજ, રાજહંસ, ઉપાધ્યાય સમયસુન્દર વગેરે જૈન વિદ્વાનોએ રચેલી સં. વ્યાખ્યા-વૃત્તિઓ અને વાચક મેરુ સુંદરનો બાલાવબોધ વિગેરે હજી અપ્રકાશિત છે.

નેમિકુમારનંદન બીજા એક વાગ્ભટ વિદ્વાને 'અલંકારતિલક' વ્યાખ્યા સાથે બીજા એક અન્ય કાવ્યાનુશાસનની રચના કરી છે, જે પ્રકાશિત છે.

ગૂર્જરેશ્વર – મંત્રીશ્વર વસ્તુપાલની પ્રાર્થના – પ્રેરણાથી નરચંદ્રસૂરિના આજ્ઞાંકિત શિષ્ય નરેન્દ્રપ્રભસૂરિએ સ્વોપજ્ઞ વૃત્તિ સાથે 'અલંકાર – મહોદધિ' નામના ગ્રંથની રચના સં. ૧૨૮૨ માં કરી હતી, જે પ્રસ્તાવના, પરિશિષ્ટો સાથે અમ્હારી દ્વારા સંપાદિત થઈ ચૌદેક વર્ષ પહેલાં–સં. ૧૯૯૮ માં ગાયકવાડ – પ્રાચ્યગ્રંથમાલામાં ( ગ્રં. ૯૫ ) પ્રકાશિત થઈ ગયેલ છે.

આચાર્ય શ્રીભાવદેવનો કાવ્યાલંકારસાર પણ ઉપર્યુક્ત ગ્રંથના પરિશિષ્ટ (૧) માં અમે સંપાદિત કર્યો છે.

ગૂર્જરેશ્વર વીસલદેવની રાજસભાના અને કવિ-સભાના માન્ય શીઘ્રકવિ અમરચંદ્રસૂરિની કાવ્ય–કલ્પલતા નામની 'કવિ – શિક્ષા' પ્રસિદ્ધ થઈ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ગયેલ છે, પરંતુ તે પર રચાયેલાં પલ્લવ, વિવેક, મંજરી, પરિમલ, મકરન્દ (શુભવિજયકૃત) આદિ હજી પ્રકાશમાં આવ્યાં નથી, તેમ જ તેમનો 'અલંકાર-પ્રબોધ' પણ હજી અપ્રકાશિત છે.

જયમંગલાચાર્યની 'કવિ - શિક્ષા' અને વિનયચંદ્રસૂરિની વિનયાંકા 'કવિ - શિક્ષા' અદ્યાવધિ અપ્રકાશિત છે.

મંત્રી **મંડને** કાવ્યમંડન, અલંકારમંડન, ચંપૂમંડન આદિ ગ્રંથો દ્વારા કવિ - કલાનું મંડન કર્યું છે.

દિ૦ કવિ જિન(? અજિત)સેને અલંકાર-ચિંતામણિ આપેલ છે. વિદ્યા - વ્યાસંગી કેટલાય જૈન વિદ્વાનોએ કાવ્યાલંકાર-શાસ્ત્રના ગ્રંથો પર વિવેકભરી વ્યાખ્યાઓ રચી, તે ગ્રંથો અભ્યાસીઓને અભ્યાસ કરવા યોગ્ય સરલ બનાવ્યા છે—

રુદ્રટના કાવ્યાલંકાર પર **નમિસાધુએ** વિ. સં. ૧૧૨૫ માં વિશદ ટિપ્પન રચ્યું છે, તે પ્રકાશિત છે, પરંતુ દિ૦ **આશાધરે** તે પર રચેલ નિબન્ધન હજી અપ્રકટ છે.

દંડીના કાવ્યાદર્શ પર આચાર્ય વાદિસિંહ - નામાંકિત ત્રિભુવનચંદ્રે રચેલી ટીકા હજી અપ્રસિદ્ધ છે.

મમ્મટના કાવ્યપ્રકાશ પર **માણિક્યચંદ્રસૂરિએ** સં. ૧૨૪૬ (?) માં રચેલી '**સંકેત**' વ્યાખ્યા પ્રસિદ્ધ છે, પરંતુ ગુણરત્નગણીની વિસ્તૃત ટીકા '**સારદીપિકા**' હજી પ્રકાશ આપતી નથી. તથા મહોપાધ્યાય **ભાનુચંદ્ર** અને **સિદ્ધિચંદ્રની** 'દૂષણ - ખંડન' વિવૃતિ અને ઉ૦ શ્રી **યશોવિજયજીની** વૃત્તિ હજી અપ્રકટ છે.

મહારાજા **ભોજના** સરસ્વતીકંઠાભરણ પર વિષમપદોપનિબંધરૂપ '**પદ-પ્રકાશ**' ભાંડશાલી(ભણશાલી) પાર્શ્વચંદ્ર-સૂનુ **આજડ** વિદ્વાને રચેલ છે, જે હજી અપ્રકાશિત છે.

બૌદ્ધ વિદ્વાન્ ધર્મદાસના વિદગ્ધમુખમંડન પર **શિવચંદ્ર**, **વિનયરત્ન** અને **વિનયસાગરે** રચેલી વ્યાખ્યા, અવચૂરિ અને **મેરુસુંદરગણિનો** બાલાવબોધ વગેરે હજી પ્રકાશમાં આવ્યાં નથી.

— અલંકાર મહોદધિના સંપાદન - પ્રસંગે ત્યાં સંસ્કૃત પ્રસ્તાવનામાં અમે વિદ્વાનોનું લક્ષ્ય એ સાહિત્ય તરફ ખેંચ્યું છે.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



પ્રસ્તુત શ્રીહેમચંદ્રાચાર્યનું **કાવ્યાનુશાસન,** તેમની સ્વોપજ્ઞવૃત્તિ **'અલંકાર-ચૂડામણિ'** અને તેમના **'વિવેક'** સાથે આજથી ૫૫ વર્ષો પહેલાં-ઈસ્વીસન ૧૯૦૧ માં નિર્ણયસાગર પ્રેસ, મુંબઈની પ્રસિદ્ધ કાવ્યમાલામાં [ગ્રં. ૭૦] પ્રકાશિત થયું હતું, તેનું બીજું સંસ્કરણ ૭ પરિશિષ્ટો અને કેટલીક વિશેષતા સાથે સંસ્કૃત અને અંગ્રેજી બે ગ્રંથરૂપે સન ૧૯૩૮ માં શ્રીમહાવીરજૈનવિદ્યાલય, મુંબઈ તરફથી પ્રકાશિત થયેલ છે.

અહિં પ્રાસંગિક સૂચન કરવું આવશ્યક છે કે—**ભરતના નાટ્યશાસ્ત્ર** પર પ્રાચીન અનેક વિદ્વાનોએ વિદ્વત્તાભર્યાં વ્યાખ્યા-વિવરણો રચ્યાં હતાં, જેમાંથી **અભિનવગુપ્તની અભિનવભારતી** વ્યાખ્યા વિદ્વજ્જનોમાં વિશેષ માનનીય થયેલ જણાય છે, જેનો મુખ્ય ભાગ ગાયકવાડ-પ્રાચ્યગ્રંથમાલામાં [નં. ૩૬, ૪૮, ૧૨૪] પ્રકાશિત થયેલ છે, તેના સાત અધ્યાયવાળા પ્રથમ ભાગનું નવું સંસ્કરણ પ્રકાશમાં આવી રહ્યું છે. તેના છઠ્ઠા અધ્યાયમાં રસ-વિષયની રસપ્રદ ચર્ચા આવે છે, આચાર્ય શ્રીહેમચંદ્રે પ્રસ્તુત કાવ્યાનુશાસનના બીજા અધ્યાયમાં રસની માન્યતા સંબંધમાં મત-મતાન્તરો દર્શાવતાં **અભિનવગુપ્તાચાર્યના** માન્ય મતનું સમર્થન કરવા માટે એમને **અભિનવભારતીમાંથી** વિવેકમાં વિસ્તારથી અવતરણો કરવાં પડ્યાં છે, તેમણે ત્યાં તે સ્પષ્ટ શબ્દોમાં સૂચિત કર્યું છે કે- **'इति श्रीमान् अभिनवगुप्ताचार्यस्तन्मतमेव चास्माभिरुपजीवितं वेदितव्यम् ।'** આમ હોવા છતાં ઉપરછલ્લી દોષદષ્ટિથી જોનારા આજ-કાલના કેટલાક સાક્ષરો શ્રીહેમચંદ્રાચાર્ય જેવા સમર્થ અદ્વિતીય વિદ્વદ્રત્ન પર આક્ષેપ કરવા સજ્જ થઈ જાય છે! એમાં પોતાની જ બાલિશતા પ્રકાશિત કરે છે.

—અહિં પ્રકાશિત થતું કાવ્યાનુશાસનનું આ નૂતન સંસ્કરણ **'પ્રકાશ'** નામના નવીન વિવરણ સાથે પ્રથમવાર પ્રકાશમાં આવે છે અને આ ગ્રંથમાં(પ્રથમ ભાગમાં) હજી માત્ર તેના એક પ્રથમ અધ્યાયનો જ સમાવેશ કરી શકાયો છે, તેમ છતાં તેનાં પૃ. ૩૦૦ થઈ ગયાં છે, તે પરથી તેના આગળના ભાગોનો ખ્યાલ આવશે.

આ સંસ્કરણમાં શ્રીહેમચન્દ્રાચાર્યનો વિવેચન કરનાર **'વિવેક'** જૂદો પ્રકાશિત થયો નથી, તેમ છતાં અહિં પ્રકાશિત થતા **'પ્રકાશ'**માં તે અન્ત-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ભાવિત થયેલો જણાશે, આમાં તે અવિભક્ત રીતે વણી લેવાયેલો કિંવા વિકસ્વર થયેલ સ્વરૂપમાં વિચારી શકાશે. આચાર્ય શ્રીહેમચન્દ્ર પછી થયેલા અનેક સાહિત્યકારોના ગ્રન્થોનો પણ આધાર અને તેમના વિચારોનો સમન્વય આ '**પ્રકાશ**'માં જોઈ શકાશે. પં. **વિશ્વનાથના 'સાહિત્ય-દર્પણ'**નાં, પં. જગન્નાથના 'રસ-ગંગાધર'નાં અને એવા બીજા અનેક ગ્રંથોનાં અવતરણો, ઉદાહરણો પણ આમાં જોઈ શકાશે. મૂલ ગ્રંથને અને **અલંકાર**-ચૂડામણિ વ્યાખ્યાને વિશેષ સ્પષ્ટ કરવામાં **પ્રકાશ**વિવરણકારે પ્રશંસનીય પ્રયત્ન કર્યો જણાય છે. અભ્યાસીઓને પ્રત્યેક પદ, વાક્ય, સમાસ, ઉદાહરણ આદિ સરલતાથી સમજાય, તે રીતે સ્વચ્છ પ્રકાશ આપતો આ વિવરણ-ગ્રંથ '**પ્રકાશ**' નામને સાર્થક કરે છે. આમાં પ્રસંગાનુસાર પાઠાન્તરોમાંથી ખાસ પાઠની પસંદગી કરવામાં કેટલોક વિવેક કરેલો જણાય છે. આમાં ઉદાહરણ તરીકે ઉદ્ધૃત કરેલાં પદ્યોની પણ વિશદ વ્યાખ્યા કરેલી હોઈ તે પર પણ ઉજ્જવલ પ્રકાશ ફેંકેલો જોઈ શકાય છે. એ રીતે આ ગ્રંથદ્વારા સેંકડો રસપ્રદ સુભાષિતોનો રસાસ્વાદ માણતાં કાવ્યતત્ત્વનું ઉચ્ચ શિક્ષણ મેળવી શકાય તેમ છે. એક **પ્રકાશ**દ્વારા અનેક ગ્રંથોનું જ્ઞાન મળી શકશે. આમાં ઉદ્ધૃત કરેલ વિવિધ વિષયોના સેંકડો ગ્રંથોની અને ગ્રંથકારોની સૂચી જોવાથી પણ આ '**પ્રકાશ**' વ્યાખ્યા પાછળ લેવાયેલ પરિશ્રમની મહત્તા સમજાશે.

## પ્રકાશ-કાર આચાર્ય શ્રીવિજયલાવણ્યસૂરિજી

—આ '**પ્રકાશ**' વ્યાખ્યા રચનાર આચાર્ય **શ્રીવિજયલાવણ્ય-સૂરિજીનો** અહિં સંક્ષેપમાં પરિચય કરાવવો જોઈએ. તેઓ વીસમી સદીના વિદ્વાન્ છે, એથી એમની કિંમત ઓછી આંકી શકાય નહિ. **સૌરાષ્ટ્રે** જે જે વિદ્વદ્રત્નો અને સૂરિરત્નો આપ્યાં છે, તેમાં તેમનું ગૌરવભર્યું ઉચ્ચ સ્થાન છે. તેમની જન્મ-ભૂમિ **બોટાદ**(સૌરાષ્ટ્ર) છે, તેમણે સં. ૧૯૫૩ માં પોતાના જન્મથી **વીસા**શ્રીમાલી વણિક્જ્ઞાતિને, પિતાશ્રી જીવણલાલને અને માતુશ્રી **અમૃત**ને ધન્ય બનાવ્યાં છે. ૧૮ વર્ષની વયમાં **સૌરાષ્ટ્ર**-રત્ન પ્રસિદ્ધ સદ્ગુરુ આચાર્ય શ્રીવિજય**નેમિસૂરીશ્વરજી**નો સમાગમ થતાં વૈરાગ્ય-વાસિત થઈ, **સાદડી** (મારવાડ)માં જઈને સં. ૧૯૭૨માં આષાઢ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



શુ. ૫ ના દિવસે તેમણે જૈન પ્રવ્રજ્યા સ્વીકારી હતી, ત્યારથી **લવજીભાઈ** **'લાવણ્યવિજયજી'** નામથી ઓળખાયા. તેઓ ગુરુ-સાન્નિધ્યથી વિદ્યા-ભ્યાસમાં દિન-પ્રતિદિન આગળ વધ્યા, વિદ્વાનોના સમાગમે અનેક શાસ્ત્રોમાં વિશારદ થયા. સંસ્કૃત-પ્રાકૃત વ્યાકરણ, પ્રાચીન-નવ્ય ન્યાય-શાસ્ત્ર, કાવ્ય-સાહિત્યશાસ્ત્ર, જૈન આગમ-શાસ્ત્ર આદિમાં તેમણે સારી નિપુણતા પ્રાપ્ત કરી છે.

ગુરુજીએ તેમની સુયોગ્યતા વિચારી તેમને ક્રમશઃ અનેક પદ-પ્રદાનો કર્યાં છે. સં. ૧૯૮૭ માં (કા. વ. ૨) અહમ્મદાવાદ (ગૂજરાત)-માં તેમને **પ્રવર્તક**પદ આપ્યું, સં. ૧૯૯૦ માં (માર્ગશીર્ષ શુ. ૮, ૧૦) **ભાવનગર**(સૌરાષ્ટ્ર)માં તેમને ગણિ અને **પંન્યાસ** - પદ અપાયાં. તથા સં. ૧૯૯૧માં (જેઠ વ. ૨) ગુરુજીની જન્મભૂમિ **મહુવા**(સૌરાષ્ટ્ર)-માં તેમને **ઉપાધ્યાય** - પદ આપવામાં આવ્યું હતું. એટલું જ નહિ, ગુરુજીએ તેમની વિશેષ યોગ્યતા વિચારી, પ્રસન્ન થઈ તેમને સંઘ - સમક્ષ **'વ્યાકરણ - વાચસ્પતિ' 'કવિરત્ન' 'શાસ્ત્રવિશારદ'** એવી ત્રણ પદવીઓથી પણ પ્રખ્યાત કર્યા હતા અને સં. ૧૯૯૨ માં (વૈ. શુ. ૪) અમદાવાદમાં તેમને **આચાર્ય**-પદવીથી વિભૂષિત કર્યા હતા. પ્રૌઢ વિદ્વત્તા સાથે સુજનતાથી શોભતા પ્રસ્તુત આચાર્ય શ્રીવિજય**લાવણ્ય**સૂરિજીએ સતત વિદ્યા - વ્યાસંગથી, સાહિત્ય-સમુપાસનાથી, પરોપકારમય પ્રવૃત્તિથી એ પદવીઓને ઉચ્ચ પ્રકારે શોભાવી છે. દીર્ઘદર્શી પ્રતાપી પ્રભાવક ગુરુવર્ય આચાર્ય શ્રીવિજય**નેમિ**સૂરીશ્વરજી પોતાના દિગ્ગજ - સમાન આઠ શિષ્યવર્યોને - સૂરિઓને પોતાના પટ્ટ પર સ્થાપી સ્વર્ગે સંચર્યા, તેમના ૮ પ્રતિનિધિ પટ્ટ - પ્રભાવકોમાં આચાર્ય શ્રીવિજય**લાવણ્ય**સૂરિજીનું વિશિષ્ટ સ્થાન છે.

પ્રસ્તુત આચાર્ય શ્રીવિજય**લાવણ્ય**સૂરિજીએ ૫૯ વર્ષ જેટલી વયમાં, ૪૦ વર્ષ જેટલા ચારિત્ર - પર્યાયમાં **સૌરાષ્ટ્ર**, **ગૂજરાત**, **મારવાડ**, **મેવાડ**, દક્ષિણ આદિ દેશોમાં વિચરી વ્યાખ્યાનાદિ-શક્તિથી ચતુર્વિધ જૈનસંઘને અને અન્ય શ્રદ્ધાળુ વિશાલ જન - સમાજને પ્રભાવિત-અનુગૃહીત કરેલ છે. એ સાથે પૂર્વાચાર્યોના - વિશિષ્ટ વિદ્વાનોના ગહન ગ્રંથોની સરલ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



વ્યાખ્યાઓ રચી વર્તમાન અને ભવિષ્યના અભ્યાસીઓને વિદ્યાભ્યાસમાં સુગમતા કરી આપી છે. એ રીતે પોતાની અસાધારણ વિદ્વત્તાનો જન-સમાજને લાભ આપ્યો છે. તેમણે રચેલી **વ્યાખ્યાઓ**—

### વ્યાકરણશાસ્ત્રમાં—

(૧) શ્રીસિદ્ધહેમચંદ્ર - શબ્દાનુશાસનના **બૃહન્ન્યાસનું** અનુસંધાન, સાથે સંપાદન. (પ્રથમ ભાગ પ્રકાશિત છે.)

(૨) **ધાતુરત્નાકર** (સમસ્ત ધાતુઓનાં સમસ્ત પ્રક્રિયાઓનાં રૂપાખ્યાન-ક્રિયાપદો આઠ ભાગમાં અને નવમાં ભાગમાં કૃદન્તચક્ર)

(૩) '**ન્યાયસમુચ્ચય**' પર **સિન્ધુ**વૃત્તિ અને '**તરંગ**' વિવરણ.

### કાવ્ય-સાહિત્યમાં—

(૪) શ્રીહેમચંદ્રાચાર્યના **કાવ્યાનુશાસન** પર પ્રસ્તુત '**પ્રકાશ**' વૃત્તિ(જેનો પ્રથમ અધ્યાય અહિં પ્રકાશિત છે)

(૫) **માલવાના** મહારાજા **મુંજ અને ભોજના** માન્ય મહાકવિ શ્રીધનપાલે રચેલી પ્રસિદ્ધ **તિલક**મંજરી(ગદ્યકથા) **પર** '**પરાગ**' વ્યાખ્યા. (જેનો પ્રથમ અને બીજો ભાગ પ્રકાશિત છે.)

### તાર્કિક-તત્ત્વજ્ઞાનમાં—

(૬) સુપ્રસિદ્ધ તાર્કિક કવિરત્ન શ્રીસિદ્ધસેનદિવાકરે રચેલી ગહન દ્વાત્રિંશદ્ દ્વાત્રિંશિકાઓ પર '**કિરણાવલી**' ટીકા. (જેમાંથી ૩ પ્રકાશિત છે.)

(૭) ઉત્કૃષ્ટ સંગ્રહકાર વાચક-પ્રવર શ્રીઉમાસ્વાતિએ રચેલ '**તત્ત્વા**-ર્થાધિગમનાં ત્રણ સૂત્ર પર '**પ્રકાશિકા**' ટીકા. (જે પ્રકાશિત છે.)

(૮) સુપ્રસિદ્ધ આચાર્ય શ્રીહરિભદ્રસૂરિએ રચેલ '**શાસ્ત્રવાર્તા-સમુચ્ચય**' પર '**સ્યાદ્વાદ-વાટિકા**' ટીકા. (બે ભાગ પ્રકાશિત છે.)

(૯) ઉ. શ્રીયશોવિજયજીના જૈનતર્ક-પરિભાષા-'**અનેકાન્ત-વ્યવસ્થા**' પર '**તત્ત્વબોધિની**' વૃત્તિ.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(૧૦) ઉ. શ્રીયશોવિજયજીના **'નય-રહસ્ય'** પર **'પ્રમોદા'** વૃત્તિ.

(૧૧) „ સપ્તભંગી **'નય-પ્રદીપ'** પર **'બાલ-બોધિની'** વૃત્તિ.

(૧૨) „ નયોપદેશ'ની **'નયામૃત-તરંગિણી'** પર **'તરણિ'** ટીકા.

—ઉપર્યુક્ત ધાતુરત્નાકર મૂળગ્રંથ અને અનેક ગ્રંથોનું વિવરણ મળીને લગભગ ૭ લાખ શ્લોક-પ્રમાણ સંસ્કૃત સાહિત્યના રચનાર આચાર્ય શ્રીવિજય-**લાવણ્યસૂરિજીની** કાવ્યાનુશાસનની પ્રસ્તુત **'પ્રકાશ'** વ્યાખ્યાનું પ્રથમ અધ્યાયનું આ નૂતન સંસ્કરણ સંપાદક પં. શ્રી**સુશીલવિજય**ગણિની યથાશક્ય સાવધાનતાથી શુદ્ધ પ્રકાશિત થયું છે. તે વિદ્યાભ્યાસીઓને, તથા વિદ્વજ્જ-નોને આનંદ-પ્રમોદ સાથે અપૂર્વ પ્રકાશ આપનાર થાય-તેમ ઇચ્છીએ અને આશા રાખીએ કે આગળના સર્વ ભાગો નિર્વિઘ્ને જલ્દી પ્રકાશમાં આવે. વ્યાખ્યાકાર આચાર્ય શ્રીવિજયલાવણ્યસૂરિજી, પોતાના સુવિનીત સુશિક્ષિત આશાસ્પદ શિષ્યરત્ન પં. દક્ષવિજયજી ગણી, તથા પં. સુશીલવિજયજી ગણી આદિ મુનિ-મંડલ સાથે હાલ શાંતાક્રુઝ (મુંબઈ) તરફ વિચરી રહ્યા છે; તેઓ ચિરકાલ વિજયવંત રહી અનેક પ્રકારે સાહિત્ય-સેવા સાથે શાસન-સેવા બજાવવા શક્તિમાન્ થાય-એવી પરમાત્માને પ્રાર્થના કરતાં વિરમું છું.

સં. ૨૦૧૨ ફા. શુ. ૭ સોમ
લિંબડા પોળ, વડોદરા.

વિદ્વજ્જનાનુચર
**લાલચંદ્ર ભગવાન્ ગાંધી.**
[ નિવૃત્ત જૈનપંડિત-વડોદરારાજ્ય ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

卐 ॐ अर्हं नमः 卐

કલિકાલસર્વજ્ઞ–કુમારપાલભૂપાલપ્રતિબોધક–સુન્દરસાહિત્યસર્જક–પરમશાસનપ્રભાવક–સૂરિપુરન્દર **શ્રીહેમચન્દ્રસૂરિભગવદ્વિરચિત** **'કાવ્યાનુશાસન'નો સંક્ષેપાર્થ:—**

કર્ત્તા—પન્યાસજી મહારાજ શ્રીસુશીલવિજયજી ગણી.

**મંગલાચરણ—**

**अकृत्रिमस्वादुपदां, परमार्थाभिधायिनीम् ।**
**सर्वभाषापरिणतां, जैनीं वाचमुपास्महे ॥ १ ॥**

અકૃત્રિમ (વાસ્તવિક) સ્વાદુ પદો છે જેમાં એવી અથવા અકૃત્રિમ અને માધુર્યયુક્ત પદો છે જેમાં એવી, પરમ અર્થને કહેનારી એવી, અને સર્વભાષામાં પરિણામ પામેલી એવી જિનેશ્વર વિભુની વાણીની ઉપાસના કરીએ છીએ. (૧)

**પ્રસ્તાવના—**

**शब्दानुशासनेऽस्माभिः साध्व्यो वाचो विवेचिताः ।**
**तासामिदानीं काव्यत्वं यथावदनुशिष्यते ॥ २ ॥**

શબ્દાનુશાસનમાં (સિદ્ધહેમવ્યાકરણ શાસ્ત્રમાં) અમારા વડે અસાધુ-શબ્દોથી સાધુ શબ્દોને જુદા પાડેલા છે, તેનું હવે કાવ્યપણું જે રીતે હોય તે રીતે કહેવાય છે. (૨)

**પ્રયોજન—**

**काव्यमानन्दाय यशसे कान्तातुल्यतयोपदेशाय च ॥ ३ ॥**

'કાવ્ય' આનંદને માટે, યશને માટે, અને નારીની સરખા ઉપદેશને માટે છે. લોકોત્તર જે કવિની રચના તે કાવ્ય કહેવાય છે. (૩)

**કાવ્યનું કારણ—**

**प्रतिभाऽस्य हेतुः ॥ ४ ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



નવનવા ઉલ્લેખવાળી જે બુદ્ધિ તે **'પ્રતિભા'** કહેવાય છે. આ પ્રતિભા કાવ્યનું કારણ છે.

**પ્રતિભાના ભેદ—**

**सावरणक्षयोपशममात्रात् 'सहजा' ॥ ५ ॥**

આવરણના ક્ષયોપશમમાત્રથી સહિત જે હોય તે **'સહજા પ્રતિભા'** કહેવાય છે. (૫)

**मन्त्रादेरौपाधिकी ॥ ६ ॥**

મંત્ર તથા દેવતાદિકના અનુગ્રહ વગેરેથી થનાર જે હોય તે **'ઉપાધિકી પ્રતિભા'** કહેવાય છે. (૬)

**પ્રતિભા સંસ્કાર—**

**व्युत्पत्त्यभ्यासाभ्यां संस्कार्या ॥ ७ ॥**

વ્યુત્પત્તિ અને અભ્યાસથી (બન્ને પ્રકારની પ્રતિભા) સંસ્કાર પમાડવાને લાયક છે. (૭)

**વ્યુત્પત્તિ—**

**लोकशास्त्रकाव्येषु निपुणता व्युत्पत्तिः ॥ ८ ॥**

લૌક, શાસ્ત્ર અને કાવ્યમાં જે નિપુણતા તે **'વ્યુત્પત્તિ'** કહેવાય છે. (૮)

**અભ્યાસ—**

**काव्यविच्छिक्षया पुनःपुनः प्रवृत्तिरभ्यासः ॥ ९ ॥**

કાવ્યને જાણતાં અથવા વિચારતાં હોય તે કાવ્યવિદ્ (કવિઓ–સહૃદયો) કહેવાય છે. તેની શિક્ષા વડે વારંવાર જે પ્રવૃત્તિ તે **'અભ્યાસ'** કહેવાય છે. (૯)

**શિક્ષા—**

**सतोऽप्यनिबन्धोऽसतोऽपि निबन्धो नियमश्छायाद्युपजीवनादयश्च शिक्षाः॥ १०॥**

વિદ્યમાન એવા જાત્યાદિકનું (જાતિ દ્રવ્ય ગુણ ક્રિયા વગેરેનું) જે અવર્ણન તે, અવિદ્યમાન એવા જાત્યાદિકનું જે વર્ણન તે, અતિપ્રસક્ત એવા જાત્યાદિકનું એક ઠેકાણે જે અવધારણ કરવું તે, અને છાયાદિકનું જે ઉપજીવનાદિ (અવલંબનાદિ) તે, **'શિક્ષા'** કહેવાય છે. (૧૦)

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**કાવ્યસ્વરૂપ—**

**अदोषौ सगुणौ सालंकारौ च शब्दार्थौ काव्यम् ॥ ११ ॥**

દોષરહિત, ગુણ અને અલંકારસહિત, તથા અલંકારરહિત જે શબ્દ અને અર્થ તે '**કાવ્ય**' કહેવાય છે. (૧૧)

**ગુણ-દોષનું સામાન્ય લક્ષણ—**

**रसस्योत्कर्षापकर्षहेतू गुणदोषौ भक्त्या शब्दार्थयोः ॥ १२ ॥**

રસનો જે ઉત્કર્ષ (વૃદ્ધિ) અને અપકર્ષ (હાની), તેના હેતુભૂત જે હોય તે ક્રમશઃ (અનુક્રમે) ગુણ અને દોષ કહેવાય છે. આ બન્ને રસના જ ધર્મ છે, છતાં પણ ઉપચારથી શબ્દ અને અર્થના પણ કહેવામાં આવે છે. (૧૨)

**અલંકારનું સામાન્ય લક્ષણ—**

**अङ्गाश्रिता अलंकाराः ॥ १३ ॥**

અંગને (શબ્દાર્થને) આશ્રીને રહેનાર જે હોય તે '**અલંકાર**' કહેવાય છે. (૧૩)

**રસના ઉપકારક પ્રકાર—**

**तत् परत्वे काले ग्रहत्यागयोर्नातिनिर्वाहे निर्वाहेऽप्यङ्गत्वे रसोपकारिणः ॥१४॥**

રસના ઉપકારકપણાએ કરીને અલંકારનો પ્રવેશ થયે છતે, અવસરે ગ્રહણ કરે છતે, અવસરે ત્યાગ કરે છતે, અત્યંત અનિવાર્ય હોય ત્યારે, અને નિર્વાહમાં પણ અંગપણું હોય ત્યારે, અલંકાર રસનો ઉપકારી થાય છે. (૧૪)

**શબ્દાર્થનું સ્વરૂપ—**

**मुख्यगौणलक्ष्यव्यङ्ग्यार्थभेदात् मुख्यगौणलक्षकव्यञ्जकाः शब्दाः ॥ १५ ॥**

મુખ્ય ગૌણ લક્ષ્ય અને વ્યઙ્ગ્યરૂપ અર્થ ભેદથી ક્રમશઃ (અનુક્રમે) મુખ્ય[1] ગૌણ[2] લક્ષક[3] અને વ્યંજક[4] શબ્દો બને છે. (૧૫)

---

૧ – 'मुख्यार्थविषयो मुख्यः' મુખ્ય અર્થ છે વિષય જેનો તે 'મુખ્ય' કહેવાય છે.
૨ – 'गौणार्थविषयो गौणः' ગૌણ અર્થ છે વિષય જેનો તે 'ગૌણ' કહેવાય છે.
૩ – 'लक्ष्यार्थविषयो लक्षकः' લક્ષ્ય અર્થ છે વિષય જેનો તે 'લક્ષક' કહેવાય છે.
૪ – 'व्यङ्ग्यार्थविषयो व्यञ्जकः' વ્યંગ્ય અર્થ છે વિષય જેનો તે 'વ્યંજક' કહેવાય છે.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



### મુખ્યાર્થનું લક્ષણ—

**साक्षात्संकेतविषयो मुख्यः ॥ १६ ॥**

સાક્ષાત્ સંકેતના વિષયભૂત જે પદાર્થ તે '**મુખ્ય**' કહેવાય છે. (૧૬)

### ગૌણાર્થનું લક્ષણ—

**मुख्यार्थबाधे निमित्ते प्रयोजने च भेदाभेदाभ्यामारोपितो गौणः ॥ १७ ॥**

મુખ્ય અર્થના બાધમાં નિમિત્ત અને પ્રયોજન રહેતે છતે ભેદ અને અભેદથી આરોપિત જે અર્થ તે '**ગૌણ**' અર્થ કહેવાય છે. (૧૭)

### લક્ષ્યાર્થનું લક્ષણ—

**मुख्यार्थसंबद्धस्तत्त्वेन लक्ष्यमाणो लक्ष्यः ॥ १८ ॥**

મુખ્ય અર્થના બાધમાં નિમિત્ત અને પ્રયોજન રહેતે છતે-મુખ્ય અર્થની સાથે જોડાએલો (સંબન્ધવાળો), અને મુખ્યાર્થપણાએ કરીને અર્થાત્ મુખ્ય અર્થના અભેદે કરીને જણાતો જે અર્થ તે '**લક્ષ્ય અર્થ**' કહેવાય છે. (૧૮)

### વ્યઙ્ગ્યાર્થનું લક્ષણ—

**मुख्याद्यतिरिक्तः प्रतीयमानो व्यङ्ग्यो ध्वनिः ॥ १९ ॥**

મુખ્ય ગૌણ અને લક્ષ્યથી ભિન્ન એવો જણાતો જે અર્થ તે '**વ્યઙ્ગ્ય અર્થ**' કહેવાય છે. અને પૂર્વાચાર્યોએ ધ્વનિ એવી તેની સંજ્ઞા માનેલી છે. (૧૯)

**मुख्याद्यास्तच्छक्तयः ॥ २० ॥**

મુખ્યાદિ શબ્દોનો મુખ્યા ગૌણી લક્ષણા અને વ્યંજના રૂપ શક્તિઓ વ્યાપાર સ્વરૂપ છે. (૨૦)

**वक्त्रादिवैशिष्ट्यादर्थस्यापि व्यञ्जकत्वम् ॥ २१ ॥**

વક્ત્રાદિકના વૈશિષ્ટયથી અર્થને પણ વ્યંજકપણું છે. (૨૧)

### વ્યઙ્ગ્યાર્થના ભેદ—

**व्यङ्ग्यः शब्दार्थशक्तिमूलः ॥ २२ ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



શબ્દ-શક્તિમૂલક અને અર્થ-શક્તિમૂલક વ્યઙ્ગ્યાર્થ છે. (અર્થાત્ શબ્દ-શક્તિ છે મૂલ જેનું અને અર્થશક્તિ છે મૂલ જેનું એમ બે પ્રકારે વ્યઙ્ગ્ય અર્થ છે.) (૨૨)

## શબ્દ-શક્તિમૂલક વ્યઙ્ગ્યાર્થ—

**नानार्थस्य मुख्यस्य शब्दस्य संसर्गादिभिरमुख्यस्य च मुख्यार्थबाधादिभिर्नियमिते व्यापारे वस्त्वलंकारयोर्वस्तुनश्च व्यञ्जकत्वे शब्दशक्तिमूलः पदवाक्ययोः ॥ २३ ॥**

અનેક અર્થવાળા મુખ્ય શબ્દનો સંસર્ગાદિકથી[1] નિયંત્રિત (નિયમિત) વ્યાપાર રહેતે છતે, અને અમુખ્ય શબ્દનો મુખ્ય અર્થના બાધાદિકથી નિયંત્રિત વ્યાપાર રહેતે છતે, ક્રમશઃ વસ્તુ અને અલંકારના વ્યંજક-પણામાં અને વસ્તુના વ્યંજકપણામાં શબ્દ-શક્તિમૂલક વ્યઙ્ગ્યાર્થ સમજવો. અને તે [વ્યઙ્ગ્યાર્થ—] પ્રત્યેક પદમાં અને વાક્યમાં હોય છે.

## અર્થ-શક્તિમૂલક વ્યઙ્ગ્યાર્થ—

**वस्त्वलंकारयोस्तद्व्यञ्जकत्वेऽर्थशक्तिमूला प्रबन्धेऽपि ॥ २४ ॥**

વસ્તુ અને અલંકારને પ્રત્યેકને (અર્થાત્ કેવલ વસ્તુને અને કેવલ અલંકારને) વસ્તુ અને અલંકારના વ્યંજકપણામાં અર્થશક્તિમૂલક વ્યઙ્ગ્ય અર્થ છે. અને તે પદમાં વાક્યમાં અને પ્રબન્ધમાં પણ હોય છે. (૨૪)

### रसादिश्च ॥ २५ ॥

રસ વગેરે અર્થશક્તિમૂલક વ્યઙ્ગ્યાર્થ છે. (અર્થાત્ રસ, ભાવ, રસાભાસ, ભાવાભાસ, શાન્તિભાવ, ઉદયભાવ, સ્થિતિભાવ, અને સંધિ-ભાવ, આ બધાનું મિશ્રપણું એ અર્થશક્તિમૂલક વ્યઙ્ગ્યાર્થ છે.) અને તે પદમાં વાક્યમાં અને પ્રબન્ધમાં પણ હોય છે. (૨૫)

---

૧. સંસર્ગ, વિપ્રયોગ, સાહચર્ય, વિરોધિતા, અર્થ, પ્રકરણ અન્ય=બ્દનું સાન્નિધ્ય, સામર્થ્ય, ઉચિતતા, દેશ, કાલ, વ્યક્તિ અને સ્વર વગેરેથી.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ઇતિ શ્રીતપોગચ્છાધિપતિ–શ્રીમદ્વિજયનેમિસૂરીશ્વર–પટ્ટાલઙ્કાર–
**શ્રીમદ્વિજયલાવણ્યસૂરીશ્વર** – શિષ્યરત્ન – પન્યાસપ્રવર – **શ્રીદક્ષ-
વિજયગણિવર** – શિષ્યરત્ન – પન્યાસ–**શ્રીસુશીલવિજયગણિના**
ગુમ્ફિતઃ **કાવ્યાનુશાસનસ્ય પ્રથમાધ્યાયસ્ય સંક્ષેપાર્થઃ** ॥

વીર સં. ૨૪૮૨,
વિક્રમ સં. ૨૦૧૨ ના
પોષ શુદિ ૧૫ ને
શુક્રવાર.
તા. ૨૭–૧–૫૬.

સ્થળ—
કચ્છી જૈન દશા ઓસવાળ
સેનેટરિયમ.
આગ્રારોડ, ભાંડુપ.
સેન્ટ્રલ રેલ્વે (મુંબઈ નં. ૪૦)

**॥ शुभं भवतु ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ગુજરાત-પાટણ શહેરના સુપ્રસિદ્ધ



શ્રેષ્ઠિવર્ય શ્રી નગીનદાસ મંગલચંદ

[ જેઓશ્રીના સ્મરણાર્થે આ ગ્રંથ મુદ્રિત કરવામાં આવ્યો છે. ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# શેઠ નગીનદાસ મંગલચંદનો ટૂંક પરિચય.

ગુણવંતી ગુજરાતના સોહામણા **પાટણશહેરમાં** જેઓશ્રીનો જન્મ નગરશેઠ કુટુમ્બમાં વિ૦ સં૦ ૧૯૪૭ ના ફાગણ વદ ૬ ને દિવસે થયો હતો.

જેમના પિતાશ્રીનું નામ **મંગલચંદ ઉત્તમચંદ** અને માતાનું નામ **ચુનીબાઈ** હતું.

જેઓશ્રીને સંતતિમાં હાલ મુંબઈ સીક્કાનગરમાં વસતા સુસંસ્કારી જ્ઞાનપિપાસુ **સારાભાઈ** નામના પુત્ર અને સ્વ૦ થયેલ **તારાબેન** પુત્રી હતાં.

જાતે વિશાશ્રીમાળી જૈનવાણીયા હતા, અને અભ્યાસ ગુજરાતી સાત ચોપડીનો હતો.

જેઓશ્રી નાતના અને સમાજના એક આગેવાન સદ્‌ગ્રહસ્થ અને વડોદરા સ્ટેટના ઇનામદાર હતા.

જૈન સમાજ અને પાટણશહેરના એક પ્રેમી સજ્જન હતા.

ધાર્મિક અને સામાજિક કાર્યો નિડરપણે કરી તેનો ઉકેલ લાવતા હતા.

મણીયાતી પાડામાં એમના કુટુમ્બના દેરાસરમાં **સહસ્રકોટી શ્રી પાર્શ્વનાથ પ્રભુની** પ્રતિદિન પૂજા કરતા હતા.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



જેઓશ્રીએ આપ બળે ગરીબાઈમાંથી આગળ વધી અનેક વાર શુભદાનાદિ કર્યાં હતાં.

જેઓશ્રી વિ૦ સં૦ ૨૦૧૧ ના ચૈત્ર વદ ૮ ને દિવસે સ્વર્ગસ્થ થયા હતા.

તેઓશ્રીના સ્મરણાર્થે તેમના સુપુત્ર **સારાભાઈએ** કલિકાલ-સર્વજ્ઞ **શ્રીહેમચંદ્રસૂરિ ભગવંતે** રચેલ **કાવ્યાનુશાસન** ના આ પ્રથમવિભાગને અભિનવ ટીકા સાથે મુદ્રિત કરવામાં રૂપિઆ ૩૫૦૦ ની ઉદાર સહાયતા કરેલ છે.

એ બદલ તેઓશ્રીને અમારા ધન્યવાદ ઘટે છે.

આ રીતે ભવિષ્યમાં પણ પોતાની લક્ષ્મીનો સુકૃતમાં સદ્વ્યય કરે એવી આશા રાખીએ છીએ.

卐

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ગુજરાત-પાટણ શહેરના નિવાસી હાલ મુંબઈમાં
વસતા જ્ઞાનપિપાસુ



શ્રેષ્ઠી શ્રી સારાભાઈ નગીનદાસ

[ જેઓશ્રીએ પોતાના સ્વ૦ પૂજ્ય પિતાશ્રીના સ્મરણાર્થે આ ગ્રંથના પ્રકાશનમાં રૂ. ૩૫૦૦ ની ઉદાર સહાયતા કરી છે. ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

વ્યાકરણવાચસ્પતિ-કવિરત્ન-શાસ્ત્રવિશારદ-

અનુપમવ્યાખ્યાનસુધાવર્ષિ-શાસનપ્રભાવક-



પૂ. આ. મ. શ્રીવિજયલાવણ્યસૂરીશ્વરજી

પૂજ્યપાદ આચાર્ય શ્રીમદ્-

વિજયલાવણ્યસૂરીશ્વરજી મહારાજ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ अर्हम् ॥

आशैशवशीलशालिने श्रीनेमीश्वराय नमः ।

कलिकालसर्वज्ञ–भूपालावलिमौलिमालालालितललितचरणारविन्दद्वन्द्व-
वादिवृन्दारकवृन्दवारणनिवारणपञ्चानन–श्रीहेमचन्द्रसूरिभगव-
द्विरचितं स्वोपज्ञालङ्कारचूडामणिव्याख्यासमलङ्कृतं

# काव्यानुशासनम् ।

प्रथमोऽध्यायः ।

प्रणम्य परमात्मानं, निजं काव्यानुशासनम् ।
आचार्यहेमचन्द्रेण, विद्वत्प्रीत्यै प्रतन्यते ॥ १ ॥

तपोगणगगनाङ्गणगगनमणि – शासनसम्राट् – सर्वतन्त्रस्वतन्त्र – श्रीविजय-
नेमिसूरीश्वरपट्टालङ्कारेण व्याकरणवाचस्पति – शास्त्रविशारद –
कविरत्नेतिपदालंकृतेन श्रीविजयलावण्यसूरिणा विरचितः

## प्रकाशः ।

समं सर्वत्रैव स्फुरदमृतगुः कौशिकमुदं,
विधत्ते सत्तेजःकुमुदवनसौभाग्यरसिकः ।
न मन्देनापेक्ष्यः क्षपयतितरामान्तरतमो,
जिनेन्द्रो भव्यानामभिनवदिनेन्द्रो विजयते ॥ १ ॥ [ शिखरिणी । ]
येनोदञ्चति कौमुदच्छवितातिर्यस्तारकोपासितः,
सर्वाशासुखसम्पदां प्रथयिता शश्वत् सुधामाश्रयन् ।
यश्चञ्चद्धरिणाङ्कितः शमनिधिः सद्वृत्तसौभाग्यभू-
र्वन्देऽज्ञानतमोहरं बुधवरं वीरं तमिन्दुं सदा ॥ २ ॥ [ शार्दूलविक्री० । ]
अमन्दं दीव्यन्ती सरससुमनोमानसमिता,
जडोल्लासी भङ्ग्या विलसितमरुत्पक्षकृतया ।
कलध्वाना सम्यग्गतिरुपचिता मौक्तिकफलै-
र्जिनोक्ता गीराली विलसति मरालीव जगति ॥ ३ ॥ [ शिखरिणी । ]
यत्कृत्यध्ययनेन मन्दमतयोऽप्यस्मादृशो व्याकृतौ,
काव्ये तत्त्वविमर्शशास्त्रनिचये चाप्तप्रवेशा वरम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तान् सूरिप्रवरान् नमामि सततं स्वाध्यायसम्पादकान्,
स्मृत्याऽभीष्टफलप्रदान् नवकृतौ श्रीहेमचन्द्राभिधान् ॥ ४ ॥
[ शार्दूल० । ]

श्रीवृद्धिचन्द्रो मतिमच्चकोरमुद्वृद्धिचन्द्रो द्युतिपूर्णचन्द्रः ।
सिद्धान्तसारोदधिवृद्धिचन्द्रश्चकास्ति भव्यामृतवृद्धिचन्द्रः ॥ ५ ॥
[ उपजातिः । ]

मान्यो मेरुरिव क्षमाधरवरो मध्यस्थतामाश्रितः,
श्रद्धाबन्धुरवैबुधाञ्चितपदः श्लाघ्यादिगन्तस्थितिः ।
जैनेन्द्रागमजातचारुविभवः सौवर्णरूपः सदा,
भव्यानां वितनोतु मङ्गलततिं श्रीनेमिसूरीश्वरः ॥ ६ ॥ [ शार्दूलवि० । ]

वर्णवर्गान्त्यवर्गान्त्यौ निजनामावलम्बिनौ ।
नमौ गुणश्रियोद्भास्य स्पर्शख्यातिं नयन्ति ये ॥ ७ ॥
तेषां श्रीनेमिसूरीणां गुरूणामनुकम्पया ।
सम्भवन्ति न किं दक्षा मादृक्षा जडशेखराः ॥ ८ ॥ युग्मम् ।

आलम्ब्य दुर्गमपि चारुविवेकवर्त्म प्राचां कृतीर्निजधियं च चिरं निषेव्य ।
लावण्यसूरिरधिगम्य गुरुप्रसादं चूडामणेरभिनवं तनुते प्रकाशम् ॥ ९ ॥
[ वसन्ततिलका । ]

सपरिकरं काव्यस्वरूपं निरुरूपयिषुराचार्यवर्यो भगवान् श्रीहेमचन्द्रसूरिः काव्यानुशासनं निर्मिमाणस्तत्सुबोधताविधानविधया बुभुत्सुजनोपकृतये तत् स्वोपज्ञालङ्कारचूडामणिव्याख्ययोपबृंहयितुकामस्तदविघ्नतासिद्धये मङ्गलमारचयति—**प्रणम्येति** । 'आचार्यहेमचन्द्रेण परमात्मानं प्रणम्य विद्वत्प्रीत्यै निजं काव्यानुशासनं प्रतन्यते' इत्यन्वयः । **आचार्यहेमचन्द्रेण** आचर्यते—सेव्यते, आचारान् गृह्णाति परं च ग्राहयतीति निरुक्तेर्वा आचार्यः, शास्त्रविधिना गुरुणा स्वयं प्रतिष्ठित इत्यर्थः, यद्वा आ–सामस्त्येन, शास्त्रार्थाश्चर्यन्ते—ज्ञायन्तेऽनेन अस्माद् वेति आचार्यः, शास्त्रार्थानां ज्ञाता उपदेष्टा चेत्यर्थः, अस्यैवात्र ग्रहणं शास्त्रप्रस्तावात्, एवं च विशेषणत्वात् पूर्वनिपातो भवति, आचार्यहरिभद्रेतिवत्, अन्यथा तु परनिपातप्रसङ्गः संज्ञाशब्दत्वेन विशेष्यत्वात्; हिनोति—गच्छति स्वगुणैरादेयतामिति हेमः स्वर्णम्, तद्गुणत्वाद् हेमः, चन्दति—आह्लादयतीति चन्द्रः शशी, तत्समत्वात् चन्द्रः, ततो मयूरव्यंसकादित्वात्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्रन्थारम्भे शिष्टसमयपरिपालनाय शास्त्रकारः समुचितेष्टदेवतां प्रणिधत्ते—

---

समासः, तेन तथा, अत्र प्रणेत्रा स्वस्मिन् 'आचार्य' इति विशेषणोपनिबन्धनेन स्वोक्तीनामनुपहसनीयत्वं सारवत्त्वं चावेदितम्। अस्य 'प्रतन्यते' इत्यनेन सम्बन्धः। **परमात्मानम्** अव्याहतज्ञानाद्यतिशयशालिनं देवताविशेषम्, अथवा परम् आत्मानं चेति व्यस्तम्, आत्मनोऽपि ध्येयत्वात्, तस्मिन् हि प्रसन्ने तत्त्वं प्रसीदति, वीतदोषकलुषः पुरुषविशेषः परः, अपरश्चात्मा, उभयपरिज्ञानाच्च मिथ्याज्ञानादिनिवृत्तिः, यतः—

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि, तस्मिन् दृष्टे पराऽवरे ॥ १ ॥"

यदुक्तम्—"द्वे ब्रह्मणी वेदितव्ये परमपरं च" "अपरे ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति"। **विद्वत्प्रीत्यै** इत्यनेनात्रातिसरलवस्तुजातानुक्तेः सम्यक्त्वमुक्तम्। **निजम्** इति विशेषणोपादानेन स्वस्य व्याख्यानविधावधिकारः समर्थितः। **काव्यानुशासनम्** अनुशिष्यते-काव्यं प्रतिपाद्यतेऽनेनेति अनुशासनम्, काव्यस्यानुशासनं काव्यानुशासनम्, आचार्यस्य कर्तुः प्रयोजनाभावाद् अनुपादानाद् उभयप्राप्त्यभावान्न "द्विहेतो०" [२. २. ८०.] इति षष्ठीपक्षे तृतीयेति "तृतीयायाम्" [३. १. ८४] इति समासप्रतिषेधाप्रसङ्गाद् इध्मव्रश्चनवत् समासः, 'आचार्यहेमचन्द्रेण' इत्यस्य तु 'प्रतन्यते' इत्यनेन सम्बन्धः। '**प्रतन्यते**' इत्यनेन विस्तरस्य तत्र तद्वस्तुसत्त्वाधीनतया व्याख्योक्तानामर्थानां सूत्राक्षरलभ्यत्वमुच्यते, तेन च संक्षिप्तबह्वर्थतया सूत्राणां सारभूतत्वं व्यक्तम् ॥ १ ॥

सूत्रात्मककाव्यानुशासनग्रन्थस्य मङ्गलपद्यस्य व्याचिख्यासिषया तदवतरणिकामाह—**ग्रन्थारम्भ** इति—ग्रन्थस्य आरम्भो ग्रन्थारम्भस्तस्मिंस्तथा, आरम्भशब्दश्चात्राऽऽद्यकृतिरूपस्य स्वमुख्यार्थस्य बाधितत्वाल्लक्षणया स्वप्राक्कालमाह, त्वरितविघ्नविघातसामर्थ्यप्रतिपत्तिश्च लक्षणायाः प्रयोजनम्, यत् तु केचित् आरभ्यतेऽस्मिन्नित्यधिकरणघञन्ततामास्थायाऽऽरम्भशब्दस्य लक्षणामन्तरेणैव तत्प्राक्कालपरत्वमभिप्रयन्ति, तन्न रुचिरम्—तथा सत्यारम्भकालस्यैव वाच्यतया लाभसम्भवात् तत्प्राक्कालस्य कथमप्यसंस्पर्शात्, यदपि केचिद् 'आरम्भे' इत्यत्र 'निमित्तात् कर्मयोगे' इति वार्तिकमाश्रित्य निमित्तार्थक-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अकृत्रिमस्वादुपदां, परमार्थाभिधायिनीम् ।**
**सर्वभाषापरिणतां, जैनीं वाचमुपास्महे ॥ १ ॥**

**रागादिजेतारो जिनास्तेषामियं जैनी जिनोपज्ञा, अनेन**

---

सप्तम्या आश्रयेण निर्वाहमुशन्ति, तदपि न युक्तम्–निमित्तं क्रियाफलम्, योगः संयोग-समवायान्यतरसम्बन्धः, तत्र निमित्तस्य [प्रत्यासत्त्या] स्वान्वयि-क्रियाकर्मणा योगे सति निमित्तवाचकात् सप्तमी भवतीति वार्तिकार्थः, तथा चात्र ग्रन्थाऽऽरम्भस्य क्रियाफलत्वेनाविवक्षितत्वात्, तादृशक्रियाफलस्य चेष्टदेवतारूपकर्मणाऽन्वयाभावाच्च प्रकृतवार्तिकाप्रवृत्तेः, तस्माल्लक्षणामूलकं व्याख्यानमेव ज्यायः । **शिष्टसमयेति**–फलसाधनतांशे भ्रान्तिरहिताः प्राक्तना आचार्या व्याख्यातारः पण्डिताश्च शिष्टाः, तेषां समयः–'शिष्टाः कचिदभीष्टे वस्तुनि प्रवर्तमाना इष्टदेवतानमस्कारलक्षणं मङ्गलं कृत्वैव प्रवर्तन्ते' इत्येवं य आचारः, तस्य परिपालनाय–रक्षणाय, ग्रन्थकारो यदि शिष्टाचारं न परि-पालयेत् तर्हि अपरिपालितशिष्टाचारस्यास्याशिष्टत्वभ्रान्तिविषयीकृतस्य वचसि शिष्टानामध्ययनादौ न प्रवृत्तिः स्यात्, अतः शिष्टाचारपरिपालनं न्याय्यमिति तदर्थं मङ्गलाचरणमावश्यकमित्याशयः; एवं शिष्टाचारपरिपालनं तदादृते वर्त्मनि स्वहितसाधनबुद्धेर्दृढिमानमादधानं तेषु श्रद्धाविशेषं प्रकटयति, शिष्टानां च विफलेषु कर्मसु प्रवृत्तेरसम्भवेनास्यापि व्यापारस्य सफलतांशे संशयस्यानवकाश इत्यपि बोध्यम् । **शास्त्रकारः** आचार्यश्रीहेमचन्द्रसूरिः, अत्र नामनि निर्देश्ये 'शास्त्रकार' इत्युक्त्या ग्रन्थकर्तुः पाण्डित्यप्रौढिः, प्रतिपाद्यस्य विषयस्य च शास्त्ररूपतया सर्वाङ्गसम्पन्नता च व्यञ्जिता । **समुचितेति**–समुचितां–ग्रन्थप्रतिपाद्यविषयानुरूपतया अधिकृतां जिनवाणीरूपसरस्वतीम्, अत एव इष्टाम्–आराध्याम्, यद्वा इष्टां–रागादिजेतृत्वगुणेन अभीष्टां सम्बन्धितया आक्षिप्तां जिनरूपां च देवताम् । **प्रणिधत्ते** ध्यायति, विशेषतः प्रणिधान-स्वरूपमग्रे वक्ष्यते ।

जैनीशब्दो जिनशब्दात् तद्धितेऽणि ङीप्रत्यये च निष्पद्यते, जिनशब्दो जिधातोः कर्त्तरि औणादिके नप्रत्यये भवति, तदर्थश्च जयति–रागादीन् आन्तर-रिपून् पराभवतीति, एतदावेदनायाह–**रागादिजेतार** इति-रागादीनां जेतार इति रागादिजेतारः, आदिपदाद् द्वेषादेरुपग्रहः, इह कर्मणि षष्ठीस्वीकारे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**कारणशुद्ध्योपादेयतामाह। उच्यत इति वाक्, वर्णपदवाक्यादि-भावेन भाषाद्रव्यपरिणतिः, तामुपास्महे, उपासनं योगप्रणिधानम्।**

तृच्प्रत्ययान्तेन जेतृशब्देन सह समासो नोपपद्येतेति शेषषष्ठी बोध्या। **जिनो-पज्ञेति**–उपज्ञायत इति उपज्ञा, जिनस्योपज्ञा जिनोपज्ञा, केवलज्ञानेन विलोक्य जिनेनोच्चारिता, "आद्ये धर्मकथाविधौ जिनपतेः" [तिलकमञ्जरी श्लो० ४] इत्यादिमहाकविवचनसंवादितया अश्रुतपूर्वत्वेनापूर्वविस्मयरसजनकतया च प्राथमिक्येव वाणी यदा विवक्षिता तदा उपजानन्तीति के उपज्ञाः, जिना उपज्ञा आदिवक्तारो यस्याः सा तथेति बहुव्रीहिः, अन्यथा "आदावुपक्रमोपज्ञे०" [हेमलिङ्गानुशासने नपुंसके श्लो० ११] इति लिङ्गानुशासनवचनान्नपुंसकत्वे जिनोपज्ञमिति स्यात्, केवलज्ञानमासाद्य समवसरणे निषद्य तेन तेन जिनेन प्रथमं निगदिता वाणीत्यर्थः। **अनेन** वाचि 'जैनी' इति विशेषणोपादानेन। **कारणशुद्ध्या** कारणस्य–निमित्तकारणरूपस्य प्रथमप्रयोक्तुः श्रीमतो जिनस्य, शुद्ध्या–रागादिकलङ्कविकलत्वेन निर्मलतया, तदुदीरितवाचोऽपि निर्मलताया लाभेन सकलजनादरभाजनत्वेन। **उपादेयतां** प्रेक्षावतां ग्राह्यताम्, **आह** आवेदयति, तथा च तदुपासनाया युक्तत्वमावेदितम्। **उच्यते इति वाक्** "वचंक् भाषणे" इत्यस्य "दिद्यु०" [५. २. ३.] इति क्विपि निपातनात् 'वाच्' इति। ननु किमियं वाग् गुणस्वरूपा? द्रव्यस्वरूपा वा? यतो नैयायिकाः शब्दं गगनगुणे गणयन्ति, वैयाकरणा मीमांसकविशेषाश्च द्रव्ये इत्यपेक्षायामाह–**भाषाद्रव्यपरिणतिरिति**–भाष्यते–अभिप्रायप्रकाशनाय प्रयुज्यते इति भाषा, तस्या द्रव्याणि भाषामयत्वेन परिणामार्हाणि द्रव्याणि भाषाद्रव्याणि, तेषां परिणतिः–भाषारूपेण परिणमनं भाषाद्रव्यपरिणतिः, परिणाम-परिणामिनोरभेदमवलम्ब्येत्थं निर्देशः, भेदावलम्बने तु प्रयत्नविशेषाद् भाषारूपेण परिणतानि द्रव्याणि वाग् इत्यर्थः फलति। वाक् शब्दात्मिका, शब्दश्च ध्वनि-वर्णभेदेन द्वैविध्यमादधाति, तत्र द्वितीयायां विधायां क्रमशः श्रोतृकृतमवधानमपेक्ष्य वर्णपदवाक्यादिस्वरूपतामाश्रयन्ती वागिह विवक्षितेत्यावेदनायाह–**वर्णपदेति**। **'उपास्महे'** इत्यस्य 'उपासनं कुर्महे' इत्यर्थः, तत्रोपासनं किंस्वरूपमित्याह–**उपासनं योगप्रणिधानमिति**–योगानां–"काय-वाङ्-मनःकर्म योगः" [तत्त्वार्थ० ६. १] इति वचनाद् मनो-वचो-वपुर्व्यापाराणाम्, प्रकर्षेण–ऐकाग्र्यलक्षणोत्कर्षेण, निधानं–ध्येये स्थापनं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अकृत्रिमस्वादून्यनाहार्यमाधुर्याणि पदानि-नामिकादीनि यस्यां सा तथा, स्वच्छ स्वादु-मृदुप्रभृतयो हि गुणमात्रवचना अपि दृश्यन्ते, अथवा अकृत्रिमाणि-असंस्कृतानि, अत एव स्वादूनि-मन्दधियामपि पेशलानि पदानि यस्यामिति विग्रहः, उक्तं हि—**

---

योगप्रणिधानम्, जिनवाणीरूपे ध्येये ऐकाग्र्येण मनो-वचो-वपुर्व्यापारान् आयोजयाम इति भावः। उपासनाकर्मतयाऽभिमतां जैनीं वाचमेव विशिनष्टि-अकृत्रिमेति-क्रियया निर्वृत्तं कृत्रिमम्, यच्च न तथा तद् अकृत्रिमम्, प्रयत्ननिरपेक्षं स्वाभाविकं सहजमिति यावत्, स्वादु-स्वादुत्वं माधुर्यं येषां तादृशानि पदानि यस्यां तां तथा, एतद्व्याख्यानमाह-**अकृत्रिमस्वादूनी**-त्यादि। **अनाहार्यमाधुर्याणि** आहार्यम्-आरोपितमागन्तुकं वा, यच्च न तथा तद् अनाहार्यं वास्तविकं सहजमित्यर्थः, तादृशं माधुर्यं येषां तानि तथा। **नामिकादीनि** नामिकानि-नामनिष्पन्नानि, आदिपदाद् आख्यातिकानि स्याद्यन्तरूपाणि त्याद्यन्तरूपाणि च पदानीत्यर्थः। ननु स्वादुशब्दस्य "स्वादु मृष्ट-मनोज्ञयोः" [ मेदिनी ] इति कोशे गुणिवाचकतैव दृश्यते, प्रकृते तु स्वादु माधुर्यमिति वदता या गुणमात्रवाचकता दर्श्यते, सा च कथं विरोधं नावहतीत्याह-**स्वच्छे**त्यादि। गुणिवाचकस्यापि स्वादुशब्दस्य प्रकारमुद्रया गुणवचनत्वमस्त्येवेति ततो गुणवचनस्यास्य को विशेष इत्यारेकामपनेतुं 'गुणवचनाः' इति वक्तव्ये "**गुणमात्रवचनाः**" इत्युक्तम्, मात्रशब्देन गुणिव्यवच्छेदः। अपिशब्देन गुणिवचनसमुच्चयः। **दृश्यन्ते** इत्यनेन प्रयोगप्रविरलत्वम्, तादृशप्रयोगश्चात्र गुणमात्रवचने प्रमाणमित्यावेदितम्। गुणिवचनं स्वादुशब्दमाश्रित्य व्याख्यातुमाह-**अथ**वेति। **असंस्कृतानि** संस्कृतानि-पुरुषप्रयत्नविशेषापादितसंस्काराणि, संस्कृतभाषामयानीत्यर्थः, यानि च न तथा तानि असंस्कृतानि प्राकृतभाषामयानीत्यर्थः, [ अर्धमागधीभाषामयानि, तस्यां प्राकृतबाहुल्यात् प्राकृतेति निर्देशः ]। **अत एव** प्राकृतभाषामयत्वादेव। **मन्दधियामपि** मन्दमतीनामपि, आस्तां प्रतिभासम्पन्नानाम्। **पेशलानि** सुखदोच्चारणश्रवणादिगुणगणेन मनोहराणि हृदयग्राहीणीति यावत्। शेमुषीशालिनो हि यथा प्राकृतभाषातस्तोषमासादयन्ति तथा तात्पर्यमात्ररसिकतया परुषबन्धसंस्कृतभाषातोऽपि, सुकुमारमतयस्तु प्राकृतभाषात एवेति प्राकृतभाषाकृततोषस्योभयसाधारण्यावेदनाय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**बाल-स्त्री-मूढ-मूर्खाणां नृणां चारित्रकाङ्क्षिणाम् ।**
**अनुग्रहार्थं तत्त्वज्ञैः, सिद्धान्तः प्राकृतः कृतः ॥**

**तदेतद् गीतादिसाधारणमिति विशिनष्टि-परमार्थो-निःश्रेयसम्, तदभिधानशीलां परमार्थाभिधायिनीम्, द्रव्याद्यनुयोगानामपि**

'मन्दधियामपि' इत्यत्रापिशब्दोपादानम्, प्राकृतभाषायाः पेशलत्वं "सरसाः प्राकृतबन्धाः" इत्यादिना राजशेखरादिभिः प्रपञ्चितम् ।

प्राकृतभाषा मन्दधियां तोषं जनयतीत्यत्र प्राचां वचनं दर्शयितुमाह–**उक्तं हीति** । प्राचां वचनमुल्लिखति–**बालेति** । **तत्त्वज्ञैः** "जीवा-ऽजीवा-ऽऽश्रव-बन्ध-संवर-निर्जरा-मोक्षाख्यास्तत्त्वम्" [ तत्त्वा० अ० १. सू० ४. ] इत्युक्त-लक्षणतत्त्वविद्भिर्गणधरादिभिः । **सिद्धान्तः** आचाराङ्गादिरागमः । **प्राकृतः कृतः** प्राकृतगिरा गुम्फितः । नानाभाषानिपुणैरपि प्राकृतगिरैव कथं गुम्फितः ? इत्याकाङ्क्षायामाह–**अनुग्रहार्थं** सुखपूर्वकग्रहणरूपोपकारार्थम् । केषामनु-ग्रहार्थम् ? **नृणां** मन्दमतीनां मानवानाम् । कीदृशानाम् ? **चारित्रकाङ्क्षिणां** चारित्राभिलाषवतां, चारित्राभिलाषविकलानां सिद्धान्ताध्ययनेऽनधिकारात् । मन्दमतित्वमनेकधा भवतीत्यावेदनाय विशेषणमाह–**बाल-स्त्री-मूढ-मूर्खाणा-मिति**–बाले वयोजनितं, नार्यां जातिजनितं, मूढे मोहदशाजनितं, मूर्खे ज्ञाना-वरककर्मकृतं, बोधापाटवलक्षणं मन्दमतित्वमत्रसेयमिति ।

न केवलं जिनोदीरितवाण्याः प्राकृतनिबद्धत्वमेव गौरवसमर्पकम्, तथा सति तद्भाषानिबद्धगीतप्रहेलिकादिसमानतापत्तेः, अतस्तत्परिहाराय सूत्रे विशे-षणमुक्तम्–**परमार्थाभिधायिनीमिति** । एतदेवावतारयितुमाह–**तदेतद् गीतादीति**–तदेतत्–प्राकृतभाषानिबद्धत्वम्, गीतादिसाधारणं–गीतप्रहेलिकादि-समानम् । अर्थ्यन्ते–लोकैः स्ववृत्तितया प्रार्थ्यन्ते ये तेऽर्था धर्माऽर्थ-काम-मोक्षाख्याश्चत्वारः, तेषु परमोऽर्थो मोक्ष एव, "यन्न दुःखेन संभिन्नं न च भ्रष्टमनन्तरम् । अभिलाषापनीतं च तज्ज्ञेयं परमं पदम् ॥" इत्यादिवचनात्, एतदेवाह–**परमार्थो निःश्रेयसमिति**–निःश्रेयसं मोक्षः । परमार्थमभिधत्त इत्येवंशीला परमार्थाभिधायिनी तां तथा, अत्र शीलार्थे णिन् प्रत्यय इत्याह–**तदभिधानशीलामिति** । ननु जिनवाणी द्रव्यनिरूपणाद् द्रव्यानुयोगमयी, गणितनिरूपणाद् गणितानुयोगमयी, धर्मकथानिरूपणाद् धर्मकथानुयोगमयी,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पारम्पर्येण निःश्रेयसप्रयोजनत्वात् । तथा सर्वेषां सुर-नर-तिरश्चां विचित्रासु भाषासु परिणतां-तन्मयतां गतां सर्वभाषापरिणताम्, एकरूपाऽपि हि भगवतोऽर्धमागधी भाषा, वारिदविमुक्तवारिवदाश्रयानुरूपतया परिणमते, यदाह—

चरणकरणनिरूपणाच्चरणकरणानुयोगमयीति चतुरनुयोगमयजिनवाण्याः कथं मोक्षाभिधायित्वमित्याकाङ्क्षायामाह—**द्रव्याद्यनुयोगानामपी**ति—आदिपदाद् गणितानुयोग—धर्मकथानुयोग-चरणकरणानुयोगानामुपग्रहः । **निःश्रेयसप्रयोजनत्वात्** मोक्षफलकत्वात् । भगवानाचार्यः स्वयमेव तद्भावनां विवेके प्राह—"इहानुयोगश्चतुर्धा-चरणकरण-धर्मकथा-गणित-द्रव्यभेदात्, तत्राऽऽद्यस्य सम्यग्ज्ञानदर्शनपवित्रिते नवकर्मानुपादानाऽतीतकर्मनिर्जरारूपे संयमतपसी प्रतिपाद्ये इति सर्वकर्मविमोक्षलक्षणमोक्षपरत्वात् परमार्थाभिधायित्वं प्रतीतमेव, शेषाणां तु पारम्पर्येण, द्रव्यस्य चोपायत्वेन प्रधानतया विवक्षितत्वात् पश्चानुपूर्व्याऽऽदावुपदेशः, तथाहि—नय-प्रमाणबलेन दुर्नयतिरस्कारात् स्याद्वादाधीनं सकलभावानामर्थक्रियाकारित्वलक्षणं सत्त्वं प्ररूप्यते चेतनाचेतनरूपसकलद्रव्याणां योनयश्चेति वस्तुतत्त्वनिरूपणेन द्रव्यस्य, गणितबलेन सुरादीनां सर्वदेहिनामायूंषि चन्द्राद्युपरागादयश्च निश्चीयन्त इत्यायुरादिज्ञानेन गणितस्य, वैराग्योपजननमितिवृत्तं प्रस्तूयत इत्यवदातकथनेन वैराग्योत्पत्तिहेतुत्वाद् धर्मकथायाः परमपुरुषार्थाभिधायकत्वं परम्परयाऽस्ति" इति । जिनवाचो विशेषणान्तरमाह—**सर्वभाषापरिणता**मिति कारिकायाम् । तद् विवृणोति—**सर्वेषा**मिति । सर्वशब्दस्य प्रस्तुतसकलवाचकत्वेऽपि वाणीश्रवणमननार्हाणामेव प्राणिनां ग्रहणौचित्यादाह—**सुर-नर-तिरश्चा**मिति—सुराः—भुवनपति-व्यन्तर-ज्योतिष्क-वैमानिका देवाः, नराः—मानवाः, तिर्यञ्चः—पशवः शकुनयश्च, तेषां तथा, नारकाणां दूरस्थत्वाद् एकेन्द्रिय-विकलेन्द्रिया-ऽसंज्ञिपञ्चेन्द्रियाणां श्रवणेन्द्रिय-मनोविकलत्वात् परिहारः । **विचित्रासु** नानाविधध्वनि-स्वरपाताऽर्थबोधन-प्रकारशालितयाऽनेकभेदभिन्नासु । नन्वेकदैकप्रयत्नोच्चारिता जिनवाणी कथं नानाभाषामयी स्यादित्यारेकामपनेतुं निदर्शनमुखेन परिणतिप्रकारमाह—**एकरूपाऽपी**ति । एकरूपत्वमर्धमागधभाषात्वधर्मेण बोध्यमित्यावेदनायाह—**अर्धमागधी**ति—यथा देवा अर्धमागधभाषया भाषन्ते तथा जिना अप्यर्धमागधभाषया धर्ममुपदिशन्ति, यदागमः—"सव्वभासाणुगामीए सरस्सईए जोयण-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देवा दैवीं नरा नारीं, शबराश्चापि शाबरीम्।
तिर्यञ्चोऽपि हि तैरश्चीं, मेनिरे भगवद्गिरम्॥

नह्येवंविधं भुवनाद्भुतमतिशयमन्तरेण युगपदनेकसत्त्वोपकारः शक्यः कर्तुम्॥ १॥

णीहारिणा सरेण अद्धमागहाए भासाए भासति अरिहा धम्मं परिकहेइ" ['सर्वभाषानुगामिन्या सरस्वत्या योजनगामिना स्वरेण अर्द्धमागध्या भाषया भाषते अर्हन् धर्मं परिकथयति' इति संस्कृतम्, औपपातिकसू० ३४] "रसोर्लशौ मागध्याम्" इत्यादि यद् मागधभाषालक्षणं तेनापरिपूर्णा प्राकृत-भाषालक्षणबहुला अर्धमागधी भाषेत्युच्यते। वारिदेति-यथा हि वारिदेन-मेघेन विमुक्तं यद् वारि-जलं तद् आश्रयस्य-निजनिपतनाधिकरणस्य भूप्रदे-शस्य अनुरूपतया-सदृशतया भूप्रदेशगतदैर्घ्य-वर्तुलत्व-गम्भीरत्वादिधर्मसादृश्येन परिणमति-तादृशदैर्घ्य-वर्तुलत्व-गम्भीरत्वादिपरिणामवद् भवति, यद्वा यथा स्वातिनक्षत्रीयमेघेन निर्मुक्तं जलं निजनिपतनाधिकरणे आम्रतरुमूले निपतित-माम्रफलतया कदलीमूले निपतितं कदलीफलतया शुक्तौ निपतितं च मौक्तिक-फलतया परिणमति तथा जिनवागपि लोकानुग्रहकामनया व्यापृतत्वात् स्वसंबो-ध्यलोकबोधसौविध्याय तत्तद्भाषारूपेण परिणमति, तत्तद्भाषामयी भवती-त्यर्थः। अत्रार्थे प्राचां संवादमाह-यदाहेति। देवा इति-इयं देवभाषेति देवाः, इयं मनुजभाषेति मानवाः, इयं भिल्लभाषेति भिल्लाः, इयं तिर्यग्भाषेति तिर्यञ्चः, जिनवाणीं मन्यन्ते स्म, आश्रयानुरूपतया परिणतत्वादिति मुकुलितोऽर्थः। 'सर्वभाषापरिणताम्' इत्यनेन भगवति जिने दिव्यशक्तिविशेषः, वाण्यां तादृश-शक्तिप्रभवा नानारूपेण परिणमनशक्तिः, तादृशपरिणमनशक्तितश्च युगपदनेक-सत्त्वोपकार आवेदितः। तादृशदिव्यशक्तिमन्तरा सकृदुच्चरिताया एकरूपाया वाचो विभिन्नश्रोतृजनार्थं नानारूपेणावतारो न सम्भवतीत्यतदाह-नह्येवमिति। एवंविधं सकृदुच्चरिताया अपि वाचो नानारूपेण परिणमनरूपम्। भुवनाद्भुतं जगति विस्मयसम्पादकम्। अतिशयं जगतोऽप्यतिशेते जिनोऽनेनेति अतिशयः सामर्थ्यविशेषस्तम्। अन्तरेण विना। युगपद् एकस्मिन्नेव काले। अनेक-सत्त्वोपकारः नानाविधजीवोपकारः। नहि कर्तुं शक्यः सामर्थ्यविशेषाभावे नानापरिणामाभावादेकरूपैव वागित्येकविधजीवोपकारमेव कर्तुं प्रभवेत्, न नानाविधजीवोपकारम्॥ १॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ प्रेक्षावत्प्रवृत्त्यङ्गं प्रयोजनं वक्तुं तत्प्रस्तावनामाह–

**शब्दानुशासनेऽस्माभिः, साध्व्यो वाचो विवेचिताः ।**
**तासामिदानीं काव्यत्वं, यथावदनुशिष्यते ॥ २ ॥**

द्वितीयपद्यमवतारयति–अथेति । अथ मङ्गलाचरणानन्तरम् । प्रेक्षावत्प्रवृत्त्यङ्गं प्रकर्षेण–प्रमाणादिना ईक्षा–प्रेक्षा, प्रेक्षा अस्त्येषामिति प्रेक्षावन्तः, विमृश्यकारिण इत्यर्थः, तेषां या प्रवृत्तिः–प्रस्तुतग्रन्थश्रवणादिगोचरः प्रयत्नविशेषः, तस्या अङ्गम्-उपायभूतं निमित्तभूतमिति यावत् । प्रयोजनं यमर्थमवलम्ब्य प्रवर्तते तत् प्रयोजनम्, प्रस्तुतग्रन्थफलमित्यर्थः । वक्तुं साक्षात्फलमिहैव सूचयितुम्, परम्पराफलमुत्तरत्र प्रतिपादयितुं च । तत्प्रस्तावनां प्रयोजनभूमिकाम् । आह द्वितीयपद्येन प्रतिपादयति ।

अभिधेय-सम्बन्ध-प्रयोजनाऽधिकारिरूपानुबन्धचतुष्टयज्ञानमन्तरा प्रेक्षावतां ग्रन्थश्रवणादौ प्रवृत्तिर्न भवतीति तत्प्रवृत्त्यर्थमनुबन्धचतुष्टयं प्रतिपादनीयम्, प्रस्तुते काव्यमभिधेयम्, प्रतिपाद्यप्रतिपादकभावः सम्बन्धः, प्रयोजनं द्विविधं–कर्तृगतं श्रोतृगतं च, तदपि प्रत्येकं द्विविधं–साक्षात् पारम्परिकं च, तत्र कर्तृगतं साक्षात् प्रयोजनं श्रोतृजनोपकारः पारम्परिकं च स्वर्गापवर्गादिकम्, श्रोतृगतं साक्षात् प्रयोजनं काव्यपरिज्ञानं पारम्परिकमानन्दादि, यतो हि काव्यानुशासनेऽधिगते काव्यमवधारयति, काव्यस्वरूपावधारणात् काव्यकरण-श्रवणादौ प्रवर्तते, ततश्च वक्ष्यमाणरीत्याऽऽनन्दादि लभते, काव्याधिगतिकामोऽधिकारीति, अनुबन्धचतुष्टयमध्ये प्रयोजनस्य प्राधान्यात् तस्येह प्रवृत्त्यङ्गतयोपादानम्, यदुक्तम्–"श्रुतार्थं श्रुतसम्बन्धं श्रोतुं श्रोता प्रवर्तते । ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः" ॥ इति, किञ्च, "सर्वस्यैव हि वाक्यस्य कर्मणो वाऽपि कस्यचित् । यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते ? ॥ " इति [ श्लोकवार्तिक० १. १२ ] तथा "नहि प्रयोजनमन्तरेण मन्दोऽपि प्रवर्तते" इति, अत्र मन्दोऽपीत्यपिना मन्दस्य यदाकदाचिदनपेक्षितप्रयोजनस्यापि कर्मसु प्रवृत्तिदर्शनात् तस्याप्यप्रवृत्तेरुक्तौ प्रेक्षावतां प्रवृत्तिः सुतरामसम्भविनीति प्रकाश्यते । यद्यपि साक्षात् प्रयोजनमिहोत्तरत्र च स्वशब्देनोक्तं तथापीह "काव्यत्वमनुशिष्यते" इत्यनेन काव्यात्माभिधेयाभिधानात् तत्परिज्ञानलक्षणं प्रयोजनमपि स्वयमूह्यत्वादभिहितप्रायत्वेन सूचितमवगन्तव्यम्, पारम्परिकं तु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शब्दानुशासने-सिद्धहेमचन्द्राभिधाने, विवेचिताः-असाध्वीभ्यो वाग्भ्यः पृथक्कृताः। इदानीं-शब्दानुशासनानन्तरं, तासां-वाचां,

"काव्यमानन्दाय०" इत्यादिना वक्ष्यते, अत एव "शास्त्रप्रयोजनमुक्त्वाऽभिधेयप्रयोजनमाह -" इत्येवंस्वरूपा उत्तरावतरणिका संगच्छते। नन्वानन्दादयस्तिलकमञ्जर्यादेः काव्यस्य प्रयोजनं, न तु काव्यस्वरूपप्रतिपादकस्य प्रस्तुतग्रन्थस्येति कथमानन्दादीनां प्रस्तुतग्रन्थीयपारम्परिकफलतयोपदर्शनमिति चेत् ? उच्यते-प्रकृतोऽयं ग्रन्थः 'काव्यं कीदृशम् ? तदङ्गानि च कानि ?' इत्यादि विवेचयितुं प्रवृत्त इति काव्यमिह वर्णनीयतया प्रधानम्, प्रधानस्य फले निर्णीतेऽङ्गभूतानां तत्प्रतिपादकानां तत्स्वरूपसम्पादकानां वा तेनैव फलेन फलवत्त्वमिति सर्ववादिसम्मतम्, तथाहि-शरीरस्य शोभया करादितदङ्गानां शोभैव, राज्ञः सम्पन्नतया तदीयपरिवाराणां सम्पन्नतैव, काव्यस्य सप्रयोजनतया तत्स्वरूपनिरूपणपरस्य शास्त्रस्यापि सप्रयोजनत्वमिति । एवमेव साहित्यदर्पणं टीकमानेन तर्कवागीशेन च "अस्य ग्रन्थस्य काव्याङ्गतया काव्यफलैरेव फलवत्त्वमिति" इति विवरणग्रन्थं व्याचक्षमाणेन "काव्यफलैरित्यत्राभेदे तृतीया धान्येन धनवानितिवत्, तथा च काव्यफलाभिन्नान्येतत्फलानि" इति प्रतिपादितम्, तथा दर्शपौर्णमासाङ्गानां प्रयाजादीनां दर्शपौर्णमासफलेनैव फलवत्त्वं तथास्यापीति। ननु प्रयाजादीनां इष्टाङ्गापूर्वजननद्वारा परमापूर्वं प्रत्युपकारः सम्भवतीति तत्र तथास्तु, प्रकृते तु शास्त्रस्य काव्यगुणदोषादिज्ञापनोपक्षीणत्वेन कथमानन्दादिकं प्रत्युपकारः सम्भवेत्, कथं वा तत्साधनत्वमिति चेत् ? न; काव्यं हि स्वरूपसद् नानन्दादिहेतुः, किन्तु कृति-ज्ञप्त्यन्यतरविषयतया, तत्रास्य ग्रन्थस्योपकारः सम्भवतीति न कापि विप्रतिपत्तिः। शब्दानुशासने साधुशब्दा विवेचिताः, तेषां साधुशब्दानामधुना काव्यत्वमनुशिष्यते, काव्यं चानन्दादिकृते भवतीत्याद्यर्थविवक्षायामस्य पद्यस्य भूमिकारूपत्वात् प्रस्तावनाभिधायकत्वमवगन्तव्यम्।

शब्दानुशासनं-व्याकरणस्यान्वर्थं नाम, तच्च प्रस्तावादिह सिद्धहेमचन्द्राभिधानं ग्राह्यमित्यावेदनायाह-**सिद्धहेमचन्द्राभिधान** इति। **अस्माभिः** हेमचन्द्रसूरिभिः, उपादेयताप्रकर्षपरिपोषकगुणबाहुल्यावेदनाय स्वस्मिन् बहुवचनेन निर्देशः। '**विवेचिताः**' इत्यस्य विवरणम्-'**असाध्वीभ्यो वाग्भ्यः पृथक्कृताः**' इति, जाते हि साधुत्वज्ञाने स्वयमेवासाधवः शब्दाः पृथगवभासन्ते,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



काव्यत्वं-काव्यीभावो, यथावत्-तात्त्विकेन रूपेण अनुशिष्यते। वाचां हि साधुत्वे निश्चिते सुकरः काव्योपदेशः। अनेन शब्दानुशासन-काव्यानुशासनयोरेककर्तृकत्वं चाह। अत एव हि प्रायोगिकमन्यैरिव नारभ्यते, शब्दानुशासनेनैव चरितार्थत्वात्॥ २॥

शास्त्रप्रयोजनमुक्त्वा अभिधेयप्रयोजनमाह—

---

यथा 'गौः' इत्यस्य साधुत्वे ज्ञाते गावी-गोणी-गोता-गोपोतलिकादीनां तत्त्वं निवर्तते, इदमेवासाधुभ्यो वाग्भ्यः साध्व्या वाचः पृथक्करणं बोध्यम्, साधुत्वं च पुण्यजनकतावच्छेदकधर्मवत्त्वम्। **काव्यीभाव** इति-अकाव्यस्य काव्यरूपेण भवनम्। **'यथावद्'** इत्यस्य विवरणम्-**तात्त्विकेन रूपेणेति**-अन्यथा श्रोतॄणामुन्मुखीकारासम्भवः, यत्किञ्चित्कथनेन हि तदिष्टसाधनताज्ञानजन्यस्य प्रवर्तनस्यासम्भवात्। **अनुशिष्यते** लक्षण-विधानादिना प्रतिपाद्यते। शब्दानुशासनरचनानन्तरं काव्यानुशासनरचनायां प्रयोजनमाह-**वाचां हीति**-अन्यथा प्रयोक्ष्यमाणशब्दराशिसाधुताज्ञानस्योपायाभावग्रहग्रस्तत्वेनाकाण्डताण्डवमिदं स्यात्, किञ्च 'साध्व्यो वाचो विवेचिताः' इत्यनेन प्रयोगयोग्यशब्दसमुदायानां साधुत्वप्रकारस्य पूर्वमुपदिष्टतया ज्ञातत्वेन काव्यस्वरूपोपदेशस्य प्राप्तावसरत्वमावेद्यते। **अनेन** 'यैरेवास्माभिः शब्दानुशासने साध्व्यो वाचो विवेचितास्तैरेवास्माभिस्तासां काव्यत्वमनुशिष्यते' इति कथनेन। **एककर्तृत्वं** 'विवेचिताः, अनुशिष्यते' इत्युभयक्रिययोरेककर्तृत्वम्, अर्थाद् य एव शब्दानुशासनस्य कर्ता स एव काव्यानुशासनस्यापि कर्तेति। आह बोधयति, एतेन स्वस्यैतादृशग्रन्थप्रणयनविधावुचिताधिकारित्वं समर्थितम्। **अत एव** शब्दानुशासनस्य कृतपूर्वत्वादेव। **प्रायोगिकं** प्रयोगव्युत्पादनम्। **अन्यैरिव** वामनादिभिरिव। कुतो नारभ्यते? इत्याह-**शब्दानुशासनेनैव चरितार्थत्वादिति**, एतेन यथा वामनादिभिरालङ्कारिकैः प्रयोगांशज्ञानस्यापि कृते काव्यस्वरूपनिर्णयप्रवृत्त एव ग्रन्थे प्रकरणविशेषोऽवतारितस्तथात्र ग्रन्थे किमिति न कृतमिति न्यूनता परिहृता, तदंशस्य स्वकृतशब्दानुशासने निरूपितत्वादिति॥ २॥

काव्यफलप्रतिपादकसूत्रं विवरितुमनास्तदवतरणिकामाह-**शास्त्रप्रयोजनमिति**-शास्त्रस्य-काव्यानुशासनाभिधानस्य प्रस्तुतग्रन्थस्य, प्रयोजनं-तदवगतिलक्षणम्, अनन्तरपद्ये काव्यात्मकाभिधानात् स्वयमूह्यत्वेनोक्तप्रायत्वात्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## काव्यमानन्दाय यशसे कान्तातुल्यतयोपदेशाय च॥३॥

लोकोत्तरं कविकर्म काव्यम् । यदाह—

"प्रज्ञा नवनवोल्लेखशालिनी प्रतिभा मता ।
तदनुप्राणनाज्जीवद्वर्णनानिपुणः कविः ॥
तस्य कर्म स्मृतं काव्यम् ॥" [ ] इति

सद्योरसास्वादजन्मा निरस्तवेद्यान्तरा ब्रह्मास्वादसदृशी प्रीतिरानन्दः । इदं सर्वप्रयोजनोपनिषद्भूतं कवि-सहृदययोः काव्यप्रयो-

---

उक्त्वा सूचयित्वा । अभिधेयप्रयोजनमिति-अभिधेयस्य-प्रस्तुतग्रन्थस्य प्रतिपाद्यस्य काव्यस्य, प्रयोजनं-फलम् । आह "काव्यमानन्दाय०" इत्यादिना दर्शयति ।

सूत्रोपात्तं काव्यं व्युत्पत्त्या लक्षयति-लोकोत्तरं कवेः कर्म काव्यमिति- 'लोकोत्तरं कवेः कर्म' इति लक्षणम्, 'काव्यम्' इति लक्ष्यम्, विशेष्यमात्रोपादाने कवेः व्यापारान्तराणामपि काव्यत्वं प्रसज्येतातो विशेषणोपादानम् । निरुक्तलक्षणे प्राचां संवादं दर्शयितुमाह-यदाहेति । प्राचां वचनमुल्लिखति-प्रज्ञेत्यादि-नवा नवाः-नित्यनूतनाः प्राचीनानामणीयसीभिरपि बुद्धिभिरनुन्मीलिता ये, उल्लेखाः-उन्मेषा अर्थसृष्टिसमुद्भवाश्चमत्कारविशेषास्तैः शालते-शोभत इत्येवंशीला या प्रज्ञा-बुद्धिः सा प्रतिभा मता, नित्यनूतनार्थसृष्टिप्रबन्धपाटवं हि प्रतिभायाः फलमिष्टम्, तथा च स्मर्यते-"अन्यदृष्टचरे ह्यर्थे महाकवयो जात्यन्धाः, तद्विपरीते तु दिव्यदृशः" [ काव्यमीमांसा ] इति, "तदनुप्राणनाज्जीवद्०" इति पाठे तया-प्रतिभया, अनुप्राणनाद्-जीवनाधानात् तत्कृतकृतार्थताभाजनत्वादित्यर्थः, कविः यः काव्यं करोति सः, जीवद्वर्णनानिपुणः जीवद्वर्णनायां-जीववर्णने चमत्कारविशेषाधायकशब्दार्थसन्दर्भसमुपस्थापने, निपुणः-दक्षो 'भवति' इति शेषः । तस्य तस्यैव च सजीववर्णनाकृताभ्यासस्य कवेः कर्म काव्यमाहुः । "तदनुप्राणनाजीवद्०" इति पाठे तु तदनुप्राणनया-प्रतिभाकृतोत्तेजनया जीवन्ती-चमत्कारविशेषशालिनी, या वर्णना-प्रतिपादनं तस्यां निपुणः कविर्भवतीति, तस्य निरुक्तस्वरूपस्य कवेः, कर्म काव्यम्, कर्म चात्र क्रिया, सा च योजनारूपा, न तूच्चारणात्मिका, मौनिपद्यासङ्ग्रहापत्तेः, परिनिष्ठि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जनम्, यशस्तु कवेरेव, यत इयति संसारे चिरातीता अप्यद्य

तस्य काव्यलक्षणस्य "अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यम्" [११] इति सूत्रेण वक्ष्यमाणत्वेऽपि फलप्रतिपादनद्वाराऽपेक्षितं काव्यं किमिति जिज्ञासोपशमनाय व्युत्पत्त्या काव्यमिह लक्षितम् । फलेषु प्रधानमानन्दं लक्षयति-**प्रीतिरानन्द** इति-'प्रीतिः' इति लक्ष्यम्, 'आनन्दः' इति लक्षणम् । कीदृशी प्रीतिरानन्दः? **सद्योरसास्वादजन्मा** सद्यः-तत्काले, रसस्य-विगतावरणचिदात्मकस्य सहृदयताभावनादिनाऽऽस्वादनीयस्य काव्यजीवातोः, आस्वादः-चर्वणाभिधानो भोगः, तस्माज्जन्म-प्रकाशो यस्याः सा तथा । पुनः कीदृशी प्रीतिः? **निरस्तवेद्यान्तरा** निरस्तं-तिरोहितं वेद्यान्तरं-ज्ञेयान्तरं यया यस्यां वा सा तथा, इदं रसास्वादिसमुत्थचमत्कारस्वरूपकथनम् । पुनः कीदृशी प्रीतिः? **ब्रह्मास्वादसदृशी** ब्रह्मास्वादेन-ब्रह्मानुभवेन, सदृशी-समा, सादृश्यं चात्र ज्ञान-स्वरूपत्वा-ऽखण्डत्व-स्वप्रकाशत्वादिधर्मैर्बोध्यम्, 'तद्भिन्नत्वे सति तद्गत-भूयोधर्मवत्त्वं सादृश्यम्' इति लक्षणलक्षितस्य सादृश्यस्य भेदघटितत्वेनात्र सर्वथैकरूपत्वे तदनुपपत्तिरिति शङ्कायां ब्रह्मास्वादस्याविशिष्टविषयकत्वम्, रसाऽऽस्वादस्य च विभावादिविशेषितस्य स्थायिन एव रसरूपतया परिणतेर्विशिष्टविषयत्वमित्युत्तरमूह्यम् । आनन्दादीनां त्रयाणां प्रयोजनानां मध्ये प्राधान्यादानन्दस्य प्रागुपन्यासः, प्राधान्यं चात्रोपनिषद्भूतत्वादिनेत्याह-**इदं सर्वप्रयोजनोपनिषद्भूतमिति**-इदम्-आनन्दाख्यं प्रयोजनम्, सर्वेषां प्रयोजनानाम्, उपनिषद्भूतम्-अन्तःप्रविष्टतया रहस्यभूतम्, सारांशभूतमिति यावत्, "उपनिषत् तु वेदान्ते रहस्य-धर्मयोरपि" इति हैमः, काव्यस्य यशो-व्युत्पत्तिफलकत्वेऽपि पर्यन्ते सर्वत्राऽऽनन्दस्यैव साध्यत्वात्, तथाहि-कवेस्तावत् कीर्त्याऽपि प्रीतिरेव सम्पाद्या, यदाह-"कीर्तिं स्वर्गफलामाहुः" इति, स्वर्गशब्दो देवानामावासस्थाने तत्सम्पादितानन्दे च वर्तते, तथा च स्वर्गः-स्वर्गसम्पादितानन्दः, प्रस्तावात् तादृशानन्दः फलं यस्यास्तां तथा, यद्यपि काव्यतः श्रोतृणां व्युत्पत्तिरस्ति, तथापि तत्र प्रीतेरेव प्राधान्यम्, अन्यथा प्रभुसम्मितेभ्यो वेदादिभ्यो मित्रसम्मितेभ्यश्चेतिहासादिभ्यः कोऽस्य काव्यस्य व्युत्पत्तिहेतोर्जायासंमितत्वलक्षणो विशेष इति, चतुर्वर्गव्युत्पत्तेरपि चानन्द एव पार्यन्तिकं मुख्यफलमिति । कवि-सहृदयोभयसाधारण्यादप्या-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यावत् कालिदासादयः सहृदयैः स्तूयन्ते कवयः। प्रभुतुल्येभ्यः

नन्दाख्यप्रयोजनस्य प्राधान्यमित्याह—**कवि-सहृदययो**रिति-आनन्दाख्यमाद्यं प्रयोजनं कवेः सहृदयस्य च, द्वितीयं यशश्च केवलस्य कवेरेव, चरमं च व्युत्पत्तिलक्षणं सहृदयानामेवेति युक्तमानन्दस्य प्राथम्यं प्राधान्यकृतमिति भावः। यः काव्यं कुरुते स कविः, यस्य तु काव्यानुशीलनाभ्यासवशाद् विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता सहृदयसंवादभाक् [सहृदयान्तरानुभवसंवादभाक्] स सहृदयः, काव्यकर्तृत्वलक्षणपूर्वावस्थापेक्षया कविशब्दनिर्देशः, यतः कवेरपि भावकावस्थायामेव-रसास्वादानुकूलविचारणाजनितावस्थायामेव सहृदयतायामेवेति यावत्, रसास्वादः सम्पद्यते, पृथगेव हि कवित्वाद् भावकत्वम्, यदाह-"सरस्वत्यास्तत्त्वं कवि-सहृदयाख्यं विजयते" इति, सरस्वत्याः-वाण्याः, तत्त्वं-सारः, विजयते-सर्वोत्कर्षेण वर्तते, किंस्वरूपं कतिभेदं वा तत्त्वमित्याह-कविसहृदयाख्यमिति-भावप्रधानोऽयं निर्देशः, धर्म-धर्मिणोरभेदं वाश्रित्येत्थं निर्देशः, तथा च कवित्वाख्यं सहृदयताख्यमिति द्विविधं सरस्वत्यास्तत्त्वमित्यर्थः। द्वितीयस्य फलस्य यशसः कविमात्रविषयकत्वमाह—**यश** इति। यदाह-"अमरसदनादिभ्यो भूता न कीर्तिरनश्वरी, भवति यदसौ संवृद्धाऽपि प्रणश्यति तत्क्षये। तदलममलं कर्तुं काव्यं यतेत समाहितो, जगति सकले व्यासादीनां विलोक्य परं यशः॥" [रु० का० १. २२.]

अमरसदनादिभ्यः-देवमन्दिरादिभ्यः, देवमन्दिरनिर्माणादिभ्य इत्यर्थः, भूता-संजाता, कीर्तिः-यशः, अनश्वरी-स्थायिनी, स्थिरेति यावत्, न भवति, यद्-यस्मात् कारणात्, असौ-कीर्तिः, संवर्धिताऽपि तदीयपूजादिपरम्परास्थापनेन वृद्धिमुपगताऽपि, आस्तां देवमन्दिरनिर्माणादिकालजनितत्वेन बाला, तत्क्षये-अमरसदनादिक्षये, कार्यमात्रस्य क्षयित्वनियमादमरसदनादौ क्षयमुपगते सतीत्यर्थः, प्रणश्यति-विनाशं याति, कीर्तेस्तत्कर्ममूलकत्वात् तस्मिन् क्षीणे तन्निमित्तायाः कीर्तेः प्रणाशोऽवश्यम्भावीति भावः, ततश्च कीर्तेरनश्वरत्वसम्पत्तये किमिह कर्तव्यमिति चेत्? अत्राह-तस्मात् कारणात्, समाहितः-सावधानः सन्, अमलं काव्यं कर्तुं यतेत, तेनैव कीर्तिः स्थिरा भवतीति भावः, तत्र हेतुमाह-सकले जगति व्यासादीनां परं यशो विलोक्येति-यतो व्यासादिभिरमलं काव्यं कृतमत एव तेषां यशो विलोक्यते, अतः काव्यकरणे स्थिरं यशो निश्चितमिति पद्यार्थः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शब्दप्रधानेभ्यो वेदागमादिशास्त्रेभ्यो मित्रसंमितेभ्योऽर्थप्रधानेभ्यः

कवेरेवेति—एवकारेण सहृदयस्य व्यवच्छेदस्तस्य निर्मातृत्वाभावात् । यशसः कविसम्बद्धत्वेनैव कविस्मारकत्वमित्याह-यत इयति संसार इति-यतः—काव्योद्भूतयशसः कारणात्, इयति-अतिमहति, गणनातीतजीव-राशिनिवासभूते संसारे, यत्र समानदेशकालविद्यमानानामपि जीवानां परस्परं परिचयो दुरूहस्तत्रेति भावः, चिरातीता अपि विप्रकृष्टतरपूर्व-कालगता अपि, कालिदासादयः सहृदयैः स्तूयन्ते, काव्यरसास्वादजुषामेव सहृदयानां तदीयकीर्तिकरत्वमुचितमेवेत्याशयेनोक्तम्-सहृदयैरिति । प्रभु-तुल्येभ्यः कर्तव्यमिदमित्याज्ञामात्रपरमार्थेभ्य इति विवेकः, परे त्वित्थमाहुः-शब्दस्त्रिविधः-प्रभुसम्मितः, सुहृत्सम्मितः, कान्तासम्मितश्चेति, तत्र प्रथमः शब्दप्रधानो वेदादिः, शब्दप्रधानत्वं च प्रवर्तनारूपशासनाप्रधानत्वम्, तथा च यथा प्रभुरिष्टसाधनेऽनिष्टसाधने निष्फले च कर्मणि यथेच्छं नियोजयति, तथा वेदोऽपि इष्टसाधने ज्योतिष्टोमादावनिष्टसाधने श्येनयागादौ निष्फले सन्ध्यावन्दनादौ च नियोजयतीति वेदादेः प्रभुसम्मितत्वमिति; समीहितार्थ-लाभायात्यज्यमानमुख्यार्थत्वं शब्दप्रधानत्वमिति नागेशः; अपरे तु-"शब्दपरि-वृत्त्यसहत्वं शब्दप्राधान्यम्, यथा 'रामः कामनाकल्पतरुः' इत्युच्यतामिति जाते प्रभोरादेशे 'अभीष्टसुरद्रुः' इत्युच्यमानेऽपि न यथोक्तं कृतं भवति, एवं वेदेऽपि "अग्निमीळे पुरोहितम्" इत्यस्य स्थाने तदर्थकमेव "हुताशं स्तौमि पुरोधसम्" इति, "ईळे वह्निम्" इति वा प्रयोगो न फलाय कल्पते" इत्याहुः । अत्र 'विल-क्षणम्' इत्यग्रिमपदयोगे पञ्चमी, तस्या भिन्नार्थत्वात्, भेदश्च स्वभावकृतः, काव्यस्य कान्तासम्मितत्वेन वक्ष्यमाणतया प्रभुसम्मितवेदागमादिशास्त्रेभ्यो भेदस्यौचित्यात् । मित्रसम्मितेभ्य इति-'अस्येदं वृत्तममुष्मात् कर्मणः' इत्येवं युक्तियुक्तकर्मफलसम्बन्धप्रकटनकारिभ्य इति विवेकः, परे तु "सुहृ-त्सम्मिताश्चार्थतात्पर्यवन्तः, अर्थतात्पर्यवत्त्वं च इष्टानिष्टार्थबोधमात्रपरत्वम्, यथा पुराणादयः, तथा च यथा सुहृद् 'एवं कृते इदं भवति' इति वस्तुमात्रमभिधाय विरमति, तथा पुराणादयोऽपि 'एवं कृते इदमभीष्टं भवति, एवं च कृते इदमनिष्टं भवति' इति वस्तुमात्रं बोधयन्ति, न तु प्रवर्तयन्ति निवर्तयन्ति वा" इत्याहुः । शब्दार्थयोर्गुणभावे शब्दो वाचकः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पुराण-प्रकरणादिभ्यश्च शब्दार्थयोर्गुणभावे रसप्राधान्ये च विलक्षणं काव्यं कान्तेव सरसतापादनेन संमुखीकृत्य रामादिवत् वर्तितव्यं न रावणादिवदित्युपदिशतीति सहृदयानां प्रयोजनम्। तथा चोक्तं हृदयदर्पणे—**

---

अर्थो वाच्यः, तयोर्गुणभावे-अप्रधानत्वे । **रसप्राधान्ये** रसस्य शृङ्गारादेः प्राधान्ये-मुख्यभावे । **विलक्षणं** विसदृशम्, वैधर्म्यभाजनमिति यावत्, वैलक्षण्ये बीजं च गुणीभूतशब्दार्थोभयकत्वमेव, वेदागमादौ शब्दस्य पुराणेतिहासादावर्थस्य काव्ये च रसस्य प्राधान्यमित्यस्ति भेद इति। **कान्तेव** कामिनीव, अत्र कान्तापदं बलादिव हृदयावर्जकत्वं प्रतिपादयति, अतथाविधा तु कुकाव्योपमानम् । **सरसतापादनेन** सरसता-स्निग्धहृदयता रसानुभवविजृम्भमाणचित्तस्फारता, तस्या आपादनेन-सम्पादनेन **सम्मुखीकृत्य** अभिमुखीकृत्य स्वप्रतिपाद्यार्थबोधानुकूलयत्नाश्रयीकृत्येति यावत् ।

यथा कमनीयकलेवरा सुवृत्ता च कान्ता प्रियं गुरुमित्रादिविषये समाश्रित-बहुमानमपि स्वेतरजनवैलक्षण्येन कटाक्षभुजाक्षेपभ्रूभङ्गिस्मितप्रकाशनादिना सरसमानसतामानीय स्वाभिमुखीकृत्य स्वविषये प्रवर्तयति तथैव काव्यमपि सुकुमारबुद्धिसुखिस्वभावाभ्यां कर्कशचाणक्यादिकृतनीतिशास्त्रादिपराङ्मुखान् राजपुत्रप्रभृतीन् ललितपदक्रमबन्धमनोज्ञार्थोपहृतशृङ्गारादिरसेनाकण्ठं तर्पयित्वा कटुकषायौषधपराङ्मुखान् बालकानिव मधुरभोजनं तत्पान इव सदुपदेशस्वरूपस्वार्थे प्रवर्तयतीति तात्पर्यम् । **उपदिशति** अप्रयासेन शिक्षयति, व्युत्पत्तिं करोतीति यावत् । अयमभिप्रायः—ये शास्त्रेतिहासेभ्योऽलब्धव्युत्पत्तयः, अथ चावश्यं व्युत्पाद्याः प्रजार्थसम्पादनयोग्यताक्रान्ता राजपुत्रादयस्तेषां जायासम्मितत्वेन परमप्रीतिकारिणः काव्याद् हृदयानुप्रवेशमुखेन चतुर्वर्गोपायव्युत्पत्तिराधेया, हृदयानुप्रवेशश्च रसास्वादमय एव, स च रसश्चतुर्वर्गोपायव्युत्पत्तिनान्तरीयकविभावादिसंयोगप्रसादोपनत इत्येवं रसोपचितविभावाद्युपनिबन्धे रसास्वादवैवश्यमेव स्वरसभाविन्यां व्युत्पत्तौ प्रयोजकमिति प्रीतिरेव व्युत्पत्तेः प्रयोजिकेत्यर्थः । नन्वेवं सुकुमारमतीनां व्युत्पादनाय काव्यमपेक्षितमित्यायातं, ततश्च परिपक्वबुद्धिभिः सत्सु वेदागमादिशास्त्रेषु किमिति काव्येषु यत्नः करणीय इति चेत्? न—कटुकौषधसितशर्करोभयशम्येन केनचिद् आमयेन पीडितस्य



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पृथग्विदुः ।**
**अर्थे तत्त्वेन युक्ते तु वदन्त्याख्यानमेतयोः ॥**
**द्वयोर्गुणत्वे व्यापारप्राधान्ये काव्यगीर्भवेत् ॥ इति ॥ [ ]**

**धनमनैकान्तिकं व्यवहारकौशलं शास्त्रेभ्योऽप्यनर्थनिवारणं**

---

रोगिणः सति फले विशेषलेशस्याप्यभावे सितशर्करां परित्यज्य कटुकौषधे कुतः प्रवृत्तिर्जायेत, तुल्ये लाभे मनोरमोपायस्य सर्वप्रियत्वात् । ननु "वयं बाल्ये डिम्भांस्तरुणिमनि यूनः परिणतौ, अपीप्सामो वृद्धान् परिणयविधिस्तु स्थितिरियम् । त्वयाऽऽरब्धं जन्म क्षपयितुममार्गेण किमिदं, न नो गोत्रे पुत्रि! क्वचिदपि सती लाञ्छनमभूत्" ॥ १ ॥ [ ] इत्यादिकाव्यमसदुपदेशकं दृश्यते, व्युत्पत्तिरपि च तस्मात् तादृग्विषया सम्भाव्यते, ततश्च तदनुपदेश्यत्वमायातम्, सत्यम्, अस्त्युपदेशः, किन्तु निषेध्यत्वेन, य एवंविधा विधयः परस्त्रीषु पुंसां सम्भवन्ति तानवबुध्य परिहरेदिति कवीनां भावः । प्राधान्यविषये प्राचां संवादमाह—**शब्दप्राधान्यमाश्रित्येति**—यत्र शब्दस्य प्राधान्यं तत् **शास्त्रं** वेदागमादि, अर्थे तु **तत्त्वेन** प्राधान्येन युक्ते सति, **आख्यानम्** इतिहासादि, वदन्ति, **एतयोर्द्वयोः** शब्दार्थयोः, **गुणत्वे** रसं प्रत्युपसर्जनभावे **व्यापारप्राधान्ये** व्यञ्जनात्मकव्यापारस्य संयोजनात्मकस्य विभावादिमेलनस्वरूपस्य वा व्यापारस्य, मुख्यत्वे, **काव्यगीर्भवेत्** काव्यं स्यात्, एतेन रसस्य काव्यात्मत्वमुक्तम् ।

एवमानन्द-यश-श्चतुर्वर्गोपायव्युत्पत्तीनां काव्यप्रयोजनतामसाधारणीं प्रतिपाद्य यत् कैश्चित् "श्रीहर्षादेर्धावकादीनामिव धनं राजादिगतोचिताचारपरिज्ञानमादित्यादेर्मयूरादीनामिवानर्थनिवारणं च" [का. प्र. उ. १] प्रयोजनत्रयमुपन्यस्तं तत् प्रतिक्षिपति—**धनमनैकान्तिकमिति**—काव्यकरणाद् धनं भवेदेवेति नैकान्तः, कृतकाव्यस्यापि धनादर्शनात्, अतो धनं प्रति काव्यकरणस्यानैकान्तिकत्वम्, तथा चाह—"उपशमफलाद् विद्याबीजात् फलं धनमिच्छतो, भवति विफलो यद्यायासस्तदत्र किमद्भुतम् । न नियतफलाः कर्तुं भावाः फलान्तरमीशते, जनयति खलु व्रीहेर्बीजं न जातु यवाङ्कुरम्" [ ] इति । **व्यवहारकौशलमिति**—व्यवहारस्य राजादावुचिताचारस्य, कौशलं परिज्ञानम्, तच्च **शास्त्रेभ्यः** चाणक्यादिप्रणीतेभ्यः, सम्भवतीति शेषः, अतश्च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रकारान्तरेणापीति न काव्यप्रयोजनतयाऽस्माभिरुक्तम्। प्रयोजनमुक्त्वा काव्यस्य कारणमाह—

**प्रतिभाऽस्य हेतुः ॥ ४ ॥**

प्रतिभा–नवनवोल्लेखशालिनी प्रज्ञा, अस्य–काव्यस्येदं प्रधानं

---

तदपि न काव्यफलतया प्रतिपादनीयं, तस्य तदन्यथा सिद्धत्वादिति भावः। **अनर्थनिवारणमिति**–अनर्थः पापं तत्फलं च, तत्फलमात्रस्य तथात्वाभिधाने मूलावशेषे पुनरपि प्ररोहापातात् फलमात्रस्य तथात्वं तु न सम्भावनीयमपि मूलनियतत्वात् फलस्य। **प्रकारान्तरेण** मन्त्रानुष्ठानादिना। धनस्य काव्यजन्यताव्यभिचारितया व्यवहारकुशलताया नीतिशास्त्रादितोऽपि सम्भवेन, अनर्थनिवारणस्य च मन्त्रानुष्ठानादिना विधेयत्वाच्च, नैतत् त्रितयं काव्यप्रयोजनतया मतमिति भावः ॥ ३ ॥

"काव्यमानन्दाय यशसे" इत्यादिना यत् काव्यप्रयोजनमुक्तं तद् व्यर्थं स्यात् काव्योत्पत्तिजनकस्योपायस्याप्रदर्शनादिति न्यूनतां परिहर्त्तुमाह– **प्रयोजनमुक्त्वा कारणमाहेति**–युक्तं चैतत्, प्रयोजनीयतया–अभीष्टतया परिज्ञातस्यैव वस्तुनः कर्त्तव्यतयाऽवधारितस्योपायजिज्ञासोदेतीति प्रयोजनकथनानन्तरमेव कारणकथनमुचितमिति। सूत्रस्थं प्रतिभापदं किमर्थबोधकमिति परिचाययितुमाह–**नवनवोल्लेखशालिनी प्रज्ञेति**–नवादपि नवः–परैः स्वेन वा पूर्वमनुद्भावितः, उल्लेखः–अर्थप्रकाशः, तेन शालते–शोभते या तथाभूता प्रज्ञा–बुद्धिः, प्रतिभापदव्यपदेश्येति। तदाह–'वाग्भटोऽपि—

"प्रसन्नपद-नव्यार्थयुक्त्युद्बोधविधायिनी।
स्फुरन्ती सत्कवेर्बुद्धिः प्रतिभा सर्वतोमुखी ॥" [ १-४ ]

सत्कवेः प्रसन्नपद-नव्यार्थयुक्त्युद्बोधविधायिनी स्फुरन्ती सर्वतोमुखी बुद्धिः प्रतिभेत्यन्वयः, प्रसन्नानि–प्रसादादिगुणयुक्ततया सुललितानि, पदानि–स्याद्यन्तत्याद्यन्तानि, नव्याः–पूर्वमनुद्भाविताः, येऽर्थास्ते च, तेषां युक्तिः– योजनम्, उद्बोधः– उल्लासश्च, तयोर्विधायिनी, स्फुरन्ती–प्रसरणशीला, सर्वतोमुखी–लौकिका-ऽलौकिकसर्वविषयव्यापिनी बुद्धिः प्रतिभेति तदर्थः। सूत्रस्थम् 'अस्य' इति पदं कस्य परामर्शकमित्याह–**काव्यस्येति**। परैः कारणान्तराणामप्युक्ततया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**कारणम्, व्युत्पत्त्यभ्यासौ तु प्रतिभाया एव संस्कारकाविति वक्ष्यते ।**

तत्र गौणतां प्रदर्शयन्नाह–**इदं प्रधानं कारणमिति** । कारणकोटौ परोक्तयोर्व्युत्पत्त्यभ्यासयोः परम्परया कारणतयाऽन्यथासिद्धिं दर्शयति–**व्युत्पत्त्यभ्यासौ** त्विति—प्रतिभाऽभावे सतोरपि व्युत्पत्त्यभ्यासयोः काव्यानुत्पादात्, सत्यां प्रतिभायां कृतयोर्व्युत्पत्त्यभ्यासयोः काव्येऽचिरप्रसरत्व–निर्दोषत्वादिदर्शनाच्च, तयोः कारणभूतप्रतिभाया एव संस्कारकत्वमास्थेयमिति भावः । **वक्ष्यते** अग्रिमसप्तमसूत्रे इति शेषः । अत्रेदं विचार्यते–काव्यकारणनिर्धारणपरैर्बहुभिः पूर्वैराचार्यैः कथितेषु तत्कारणेषु विभिन्नता दृश्यते तत्र किं तत्त्वमिति । तत्र तावद् दण्डी—

"नैसर्गिकी च प्रतिभा, श्रुतं च बहु निर्मलम् ।
अमन्दश्चाभियोगोऽस्याः, कारणं काव्यसम्पदः ॥"

[ काव्यादर्शे परि० १, श्लो०–१०३ ]

इत्याह, तदाशयः–पूर्वजन्मसंस्कारसम्पन्नायाः स्वाभाविक्याः प्रखरायाः प्रतिभाया उत्तमकाव्यजनकत्वम्, बहु–अनेकविषयं शब्दच्छन्दोऽनुशासनादिनोच्यमानम्, निर्मलं–भ्रमादिदोषविधुरं श्रुतम्, अमन्दः–तीव्रः, अभियोगः–काव्यकरणाभ्यासश्च, तदीयोत्कर्ष-सद्यःस्फुरणादिकृते तदीयकारणतया मन्तव्याविति । तदाह स एव—

"न विद्यते यद्यपि पूर्ववासना, गुणानुबन्धि प्रतिभानमद्भुतम् ।
श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम् ॥"

[ काव्यादर्शे परि० १, श्लो–१०४ ]

इति, एतेन पूर्ववासनाजनितप्रतिभाया अस्फुटत्वेऽपि शास्त्रश्रवणाऽभ्यासाभ्यां काव्यवाक् स्फुरत्येवेति प्रतिपादितम्, तथा च तन्मते त्रिष्वपि कारणत्वं पृथक् पृथगित्यायातम्, यद्यपि पूर्वपद्ये कारणमित्येकवचननिर्देशेन त्रिष्वपि कारणत्वं व्यासज्य वर्तत इत्यायाति, तथापि तत्र 'काव्यसम्पदः' इति कथनेन काव्यस्योत्तमतायामेव त्रयस्य कारणत्वमिति तदभिप्राय आस्थेयो द्वितीयपद्यार्थानुरोधात् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वाग्भटस्तु—"प्रतिभा कारणं तस्य व्युत्पत्तिस्तु विभूषणम्।
भृशोत्पत्तिकृदभ्यास इत्याद्यकविसङ्कथा॥" [ वाग्भटालङ्कारे १.३ ]

इत्याह, तस्य-काव्यस्य, प्रतिभा कारणम्, व्युत्पत्तिस्तस्य विभूषणम्, अभ्यासश्च भृशोत्पत्तिकृत्, इति, आद्यानां कवीनां संकथा-संभूयैकमत्येन कथनमुपदेशः, इति तदर्थः। एवं च तन्मते काव्यस्य कारणं प्रतिभैव, शास्त्रादिविषयिणी व्युत्पत्तिस्तु तां विभूषयति-चमत्करोति, अभ्यासश्च भृशं-बाहुल्येन झटिति च काव्योत्पत्तौ कारणमित्यायातम्, तथा चायं व्युत्पत्त्यभ्यासयोरतिशयाधायकत्वमाचार्यमतवदाह।

आनन्दवर्धनाचार्यस्तु—

"सरस्वती स्वादुतदर्थवस्तु निःस्यन्दमाना महतां कवीनाम्।
आलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभा विशेषम्॥"
[ ध्वन्यालोके १. ६. ]

इति ब्रुवाणः स्वादुवस्तुस्फुरणहेतुं प्रतिभामेव महाकवित्वस्यापि कारणमाह।

पीयूषवर्षजयदेवस्तु चन्द्रालोके—

"प्रतिभैव श्रुता-ऽभ्याससहिता कवितां प्रति।
हेतुर्मृदम्बुसम्बद्धबीजव्यक्तिर्लतामिव॥ [ १–६ ]"

लतां प्रति धरणि-सलिलसम्बद्धबीजमिव, श्रवणा-ऽभ्याससहिता प्रतिभा कवितां प्रति हेतुरिति तदाशयः। तथा च लतायां यथा न केवलस्य बीजस्य कारणत्वम्, अपि तु धरणि-सलिलसंयोगोऽपि तत्रावश्यमपेक्षित एवेति मुख्यतया बीज इव प्रतिभायामेव कारणत्वं, श्रवणाऽभ्यासौ तु सहकारिकारणे इति। यद्यपि धरणि-सलिलयोगं विना बीजेन यथा लता नोत्पद्यते तथा श्रुता-ऽभ्यासाभ्यां विना कविता नोत्पद्यत इत्यर्थवर्णने त्रिष्वपि सहैव कारणताऽऽयाति, तथापि धरणि-सलिलयोगस्य साधारण्येनाङ्कुरमात्रं प्रति सहकारितायाः क्लृप्ततया तत्तदङ्कुरं प्रति तत्तद्बीजस्यैव मुख्यं कारणत्वं कल्पनीयमिति श्रुता-ऽभ्यासयोः कार्यान्तरं प्रत्यपि सहकारितया दृष्टत्वेन कवितां प्रत्यपि तयोः सहकारित्वमेव मन्तव्यम्, प्रधानकारणत्वं तु प्रतिभाया एवेति सूचनायैव 'प्रतिभैव' इत्येवकारः प्रयुक्त इति प्रतिभाति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मम्मटेन तु काव्यप्रकाशे—

"शक्तिर्निपुणता लोक-शास्त्र-काव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे ॥ [ १. ३. ]" इत्युक्तम्,

प्रदीपकारगोविन्दठक्कुरेणेत्थमियं कारिका व्याख्यायि—"शक्तिः कवित्वबीजरूपो देवताप्रसादादिजन्मा संस्कारविशेषः प्रतिभापदव्यपदेश्यः; तस्याः कारणतायां किं मानमिति चेत्? निपुणतादिकारणान्तरसद्भावेऽप्यनुपहसनीयकाव्यप्रसरस्य कार्यस्य व्यतिरेकः, स च विशेष्यस्य काव्यप्रसरस्य विशेषणस्यानुपहसनीयत्वस्य वा व्यतिरेकात् सर्वत्रैवाविशिष्टः । न चैवं कारणान्तरं किंचिदायातु, न तु शक्तिरिति चेत्? प्रसिद्धातिरेकिण्येव तद्धेतौ शक्तिव्यपदेशात् । लोकः—स्थावर-जङ्गमात्मकलोकस्य वृत्तं, योगादुपचाराद्वा, धर्मिमात्रपरामर्शस्य व्युत्पत्त्यनाधायकत्वात् । शास्त्रं—छन्दःशास्त्रादि, काव्यं—महाकविप्रणीतं रघुवंशादि, आदिग्रहणादितिहासादि, तेषां विमर्शनाद् व्युत्पत्तिः—निपुणता । काव्यज्ञशिक्षा—काव्यं कर्तुं—रसानुगुणतया प्रबन्धादौ घटयितुं च ये जानन्ति तदुपदेशः, तया, करणे योजने च पौनःपुन्येन प्रवृत्तिरभ्यासः । इतिशब्दो मिलितोपस्थापनाय, अन्यथा तद्वैयर्थ्यमेव स्यात् । एवं च काव्यस्योद्भवः—उत्कृष्टोत्पत्तिः, तया कार्येण मिलितानामुपधानम्, दण्ड-चक्रादीनामिव घटेन, न तु मिलितत्वेन कारणतैवेति भ्रमः कार्यः" इति ।

अयमाशयः—शक्नोति काव्यं कर्तुमनयेति व्युत्पत्त्या देवताराधनादिजन्या विलक्षणा वासना संस्कारविशेषो वा प्रतिभापदव्यपदेश्यः लोकवृत्त-छन्दःशास्त्रादिविमर्शजन्या व्युत्पत्तिः, पूर्वेषां काव्यज्ञानां गुरूणामुपदेशेन पौनःपुन्येन योजनाऽभ्यासश्चेति त्रयः समुदिता दण्ड-चक्रादयो घटादीनामिव काव्यस्य हेतुः—कारणम् । ननु निपुणतयाऽभ्यासेन च काव्यं कर्तुं शक्यत एवेति किमिति शक्तिपदवाच्यं वस्त्वन्तरं कारणं कल्प्यत इति चेत्? न—अनुपहसनीयकाव्यप्रसराय तस्य कारणत्वस्वीकारस्यावश्यकत्वात्, क्वचित् तां विना काव्यं प्रसरत्येव नहि, कदाचित् प्रसृतमप्युपहासास्पदतां लभते, उभयथाऽप्यनुपहसनीयकाव्यप्रसराभावः फलित एव । नन्वेवमर्थापत्त्या किञ्चन कारणान्तरमायातु, शक्तिरेव कुतः कारणत्वेन कल्प्यत इति चेत्? न—यतो यत्र क्वचन वस्तुन्ययं विशेषोऽस्ति तदेव वयं शक्तिपदेन व्यपदिशामः, भवतां यदि तत्र विद्वेषस्तर्हि नामान्तरं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्य कल्प्यताम्, वस्तुस्वरूपस्य निर्णीतत्वे नाम्नि विवादस्याकिञ्चित्करत्वात्, तथा च शक्तेः कारणत्वमावश्यकम्। व्युत्पत्त्यभ्यासयोस्तु प्रत्यक्षनिर्णीतमेव कारणत्वम्। एषां च परस्परापेक्षत्वेन दण्ड-चक्रादीनामिव घटं प्रति काव्यं प्रति त्रयाणां मिलितानामेव कारणत्वम्, न तु तृणा-ऽरणि-मणिन्यायेन पृथक् पृथक् कारणत्वमिति ध्वनयितुमेव कारिकायां हेतुरित्येकवचनमुक्तम्, एकधर्माविच्छिन्न-कार्यतानिरूपितकारणत्वबोधकत्वात्। ननु मन्त्रादिजपजन्यकाव्यनिर्माणशक्तौ सत्यां निपुणता-ऽभ्यासयोरभावेऽपि काव्योत्पत्तिर्दृष्टेति तयोः कारणत्वं कथमिति चेत्? न–तत्र जन्मान्तरीयायाः पद-तदर्थादिवासनारूपाया निपुणतायाः पद-तदर्थस्मारकतयोपयोगस्यावश्यस्वीकार्यत्वात्, एवमभ्यासोऽप्यन्वयव्यतिरेकानु-विधानसिद्धो जन्मान्तरीय एव कल्प्य इति सिद्धान्तात्, यथा मन्त्राद्यनधीन-शिशुकाव्ये शक्त्यंशेऽपि जन्मान्तरीयशक्तेरपि कल्पनं तद्वद् मन्त्राधीनशक्तिस्थले जन्मान्तरीययोर्व्युत्पत्त्यभ्यासयोः कल्पनमिति निष्कर्षः।

रुद्रटोऽपि शक्त्यादित्रयस्य कारणतामाह, तथाहि—

"तस्यासारनिरासात्, सारग्रहणाच्च चारुणः करणे।
त्रितयमिदं व्याप्रियते, शक्तिर्व्युत्पत्तिरभ्यासः॥ [रुद्र० का० १. १४.]"

चारुणः काव्यस्य करणे, असारनिरासात् सारग्रहणाच्च 'शक्तिर्व्युत्पत्तिरभ्यासः' इदं त्रितयं व्याप्रियत इत्यर्थः।

वामनस्यापि प्रतिभैव कारणत्वेन संमता। तथाहि–तेनोक्तम्–"कवित्वबीजं प्रतिभानम्" [काव्यालङ्कारसूत्रे–अधिकरण १. अ० ३, सू. १६] कवित्वस्य बीजं–संस्कारविशेषः कश्चित्; येन विना काव्यं न निष्पद्यते निष्पन्नं वा हास्यायतनं स्यात्" इति।

नरेन्द्रप्रभसूरिणाऽलङ्कारमहोदधौ—

"कारणं प्रतिभैवास्य, व्युत्पत्त्यभ्यासवासिता।
बीजं नवाङ्कुरस्येव, काश्यपी–जलसङ्गतम्" [त–१, का० ६]

इत्युक्तम्,

तथा चैतन्मतेन व्युत्पत्त्यभ्याससंस्कृतप्रतिभायाः कारणत्वमित्यायाति, तथा च प्रतिभा मुख्यं कारणम्, व्युत्पत्त्यभ्यासौ प्रतिभायाः संस्कारकतया सहकारि-कारणे इति तदाशयः। तथा चास्य स्वमतेन साम्यम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



काव्यमीमांसायां राजशेखरेण चतुर्थेऽध्याये शक्तेरेव कारणत्वं व्यवस्थापितम्, प्रतिभा च शक्तितो भिन्नेति च तन्मतम्, तच्चाप्राकरणिकत्वान्न विवेच्यते।

पण्डितराजजगन्नाथस्तु—

"तस्य कारणं कविगता केवला प्रतिभा, सा च काव्यघटनानुकूलशब्दार्थोपस्थितिः, तद्गतं प्रतिभात्वं च काव्यकारणतावच्छेदकतया सिद्धो जातिविशेषः, उपाधिरूपं वा, तस्याश्च हेतुः क्वचिद् देवताप्रसादादिजन्यमदृष्टम्, क्वचिच्च विलक्षणव्युत्पत्ति-काव्यकरणाभ्यासौ, न तु त्रयमेव, बालादेस्तौ विनापि केवलाद् महापुरुषप्रसादादपि प्रतिभोत्पत्तेः । न च तत्र तयोर्जन्मान्तरीययोः कल्पनं वाच्यम्, गौरवान्मानाभावात्, कार्यस्यान्यथाऽप्युपपत्तेश्च, लोके हि बलवता प्रमाणेन आगमादिना सति कारणतानिर्णये पश्चादुपस्थितस्य व्यभिचारस्य वारणाय जन्मान्तरीयमन्यथानुपपत्त्या कारणं धर्माधर्मादि कल्पते, अन्यथा तु व्यभिचारोपस्थित्या पूर्ववृत्तकारणतानिर्णये भ्रमत्वप्रतिपत्तिरेव जायेत, नापि केवलमदृष्टमेव कारणमित्यपि शक्यं वदितुम्, कियन्तञ्चित् कालं काव्यं कर्तुमशक्नुवतः कथमपि संजातयोर्व्युत्पत्त्यभ्यासयोः प्रतिभायाः प्रादुर्भावस्य दर्शनात्, तत्राप्यदृष्टस्याङ्गीकारे प्रागपि ताभ्यां तस्याः प्रसक्तेः; न च तत्र प्रतिभायाः प्रतिबन्धकमदृष्टान्तरं कल्प्यमिति वाच्यम्, तादृशानेकस्थलगतादृष्टद्वयकल्पनापेक्षया क्लृप्तव्युत्पत्त्यभ्यासयोरेव प्रतिभाहेतुत्वकल्पने लाघवात्, अतः प्रागुक्तसरणिरेव ज्यायसी। तादृशादृष्टस्य तादृशव्युत्पत्त्यभ्यासयोश्च प्रतिभागतं वैलक्षण्यं कार्यतावच्छेदकम्, अतो न व्यभिचारः, प्रतिभात्वं च कवितायाः कारणतावच्छेदकम्, प्रतिभागतवैलक्षण्यमेव वा विलक्षणकाव्यं प्रतीति, तत्रापि न सः; न च सतोरपि व्युत्पत्त्यभ्यासयोर्यत्र न प्रतिभोत्पत्तिस्तत्रान्वयव्यभिचार इति वाच्यम्, तत्र तयोस्तादृशवैलक्षण्ये मानाभावेन कारणतावच्छेदकानवच्छिन्नत्वात् पापविशेषस्य तत्र प्रतिबन्धकत्वकल्पनाद् वा न दोषः। प्रतिबन्धकाभावस्य च कारणता समुदितशक्त्यादित्रयहेतुतावादिनः शक्तिमात्रहेतुतावादिनश्चाविशिष्टा, प्रतिवादिना मन्त्रादिभिः कृते कतिपयदिवसव्यापिनि वाक्स्तम्भे विहितानेकप्रबन्धस्यापि कवेः काव्यानुदयस्य दर्शनात्" [ रसगङ्गाधरे प्रथमानने ] इत्याह।

एवं चायमपि केवलां प्रतिभामेव काव्ये कारणं मन्यते, तस्यां च कारणं क्वचिददृष्टम्, क्वचिद् व्युत्पत्त्यभ्यासौ, तत्रादृष्टजन्या प्रतिभा विलक्षणा, व्युत्पत्त्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भ्यासजन्या च विलक्षणा; इति न परस्परं कार्यकारणभावव्यभिचारः, इति तन्मातसारांशः।

रसगङ्गाधरटिप्पण्यां गङ्गाधरशास्त्रिणा तु-"प्रतिभा कारणम्, तत्र व्युत्पत्तिस्तु विभूषणम्, भृशोत्पत्तिकृदभ्यासः" इति वाग्भटीयवचनमेव प्रमाणयता विशिष्टं काव्यं प्रति त्रितयस्य प्रागुक्तस्यैकसामग्रीघटकत्वम्, तथाहि-शक्तिर्द्विविधा-उत्पादिका व्युत्पादिका च, आद्यया पदसंघातस्य योजनेऽपि द्वितीयस्या अभावे विनेयसमवेतविलक्षणवाक्यार्थधियोऽसंभवेन लोकोत्तरवर्णनानैपुण्यस्य कविगतस्याभावाद् विशिष्टकविकर्मतायास्तत्सत्त्व एव संभवात् तत्र द्वितीयैव निपुणता नाम, अभ्यासो लोकोत्तरत्वं प्रत्येवोपयुज्यते, तथा च लोकोत्तरवर्णनानिपुणताविशिष्टकविकर्मरूपकाव्यं प्रति त्रितयस्यैव कारणत्वमुचितम्" इत्युक्तम्, किन्तु नैतद्युक्तम्-"रमणीयार्थप्रतिपादकः शब्दः काव्यम्" [ रसगङ्गाधरे आ० १, सू. १ ] इति लक्षणेन लोकोत्तरचमत्कारयुक्तस्यैव काव्यतया काव्ये विशिष्टं साधारणमिति च प्रकारद्वयं न युक्तम्, विशिष्टस्यैव काव्यत्वात्, त्रितयकारणतावादिना प्रकाशकारेणापि 'अनुपहसनीयकाव्यं प्रति कारणभूता शक्तिः' इति कथितम्। तथा च विशिष्टकाव्यकरणशक्तिरेव प्रतिभेति काव्यं प्रति तस्या एव कारणत्वमुचितम्, प्रतिभाविकासं प्रति चव्युत्पत्त्यभ्यासयोरिति, तथा च पण्डितराजोक्तमेव विचारचारु, इति।

अत्रेदं तत्त्वम्-पूर्वोक्तानां सर्वेषां मतानां समालोचनेन काव्यकारणविषये द्वयी विधा दृश्यते-त्रितयकारणतावादः प्रतिभामात्रकारणतावादश्च, तत्र त्रितयकारणतावादिनः-दण्डि-जयदेव-मम्मटप्रभृतयः, तत्रापि दण्डी त्रिषु पृथक् पृथगपि कारणतां मन्यते, उत्तमकाव्यसम्पत्तय एव त्रिषु संभूय कारणत्वमित्यभिप्रैति, जयदेवोऽपि व्युत्पत्त्यभ्याससहकृतायाः प्रतिभायाः कारणत्वं मन्वानो न त्रितयस्य मिलितत्वेन साक्षात् कारणत्वमभिप्रैति, तथा च त्रितयकारणतावादिषु मुख्यो मम्मटाचार्यः, सोऽपि मुख्यतया प्रतिभामेव तत्कारणत्वेनाभिप्रैतीति तदीयग्रन्थालोचनया स्पष्टम्, तथाहि-"शक्तिः कवित्वबीजरूपः संस्कारविशेषः, यां विना काव्यं न प्रसरेत्, प्रसृतं वोपहसनीयं स्यात्" इति मन्वानोऽनुपहसनीयकाव्योत्पत्तये शक्तिमेव प्रतिभापदव्यपदेश्यां कारणमाह, अग्रे च लोकवृत्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सा च सहजौपाधिकी चेति द्विधा, तत्र सहजामाह—**

**सावरणक्षयोपशममात्रात् सहजा ॥ ५ ॥**

**सवितुरिव प्रकाशस्वभावस्यात्मनोऽभ्रपटलमिव ज्ञानावरणीयाद्यावरणम्, तस्योदितस्य क्षयेऽनुदितस्योपशमे च यः प्रकाशा-**

---

च्छन्दःशास्त्रादिशीलनरूपां व्युत्पत्तिं काव्यज्ञशिक्षयाऽभ्यासं च निर्दिश्य "इति त्रयः समुदिता न तु व्यस्तास्तस्य काव्यस्योद्भवे-निर्माणे समुल्लासे च हेतुर्न तु हेतवः" इति ब्रुवाण उत्कृष्टकाव्यनिर्माण एव त्रयाणां समुदितत्वेन हेतुत्वमित्यभिप्रैतीति प्रतीमः । एवं चेदं पर्यवसितम्—केवला छन्दोबद्धता न काव्यपदप्रवृत्तिनिमित्तम्, लोकोत्तरचमत्कारकारिशब्दार्थोभयत्वमेव तथेति सर्वैरास्थेयमेव, तादृशशब्दार्थोपस्थापनाय प्रतिभैव शरणीकरणीया, तस्याः प्रकर्षाय व्युत्पत्त्यभ्यासौ कारणसंस्कारतयैव स्वीकार्यौ, विनापि तौ बहुश उत्तमकाव्यसृष्टेर्दृष्टत्वादिति ॥ ४ ॥

एवं प्रतिभायाः कारणत्वं स्थिरीकृत्य तस्या विभागमाह—**सा च सहजौपाधिकी चेति द्विधेति**—सा—प्रतिभा, सहजा सह—शरीरेण समं, जायते तादृशी-जन्मत एवान्तर्विद्यमाना; औपाधिकी—उपाधिभिः—आगन्तुकैर्मन्त्राद्यनुष्ठानादिकारणैर्जनिता, इयमेव कैश्चिदुत्पाद्येति कथ्यते, तदुक्तं रुद्रटेन—

"प्रतिभेत्यपरैरुदिता, सहजोत्पाद्या च सा द्विधा भवति ।
पुंसा सहजातत्वादनयोस्तु ज्यायसी सहजा ॥ [ रुद्रट. का० १. १६. ]" इति ।

तत्र यथोद्देशं प्रथमां लक्षयतीत्याह—**तत्र सहजामाहेति** । सूत्रे 'आवरणक्षयोपशममात्रात् सहजा सा' इत्यन्वयः । सूत्रं व्याचष्टे—**सवितुरिवेति**—प्रकाशस्वभावस्य सवितुरभ्रपटलमिव प्रकाशस्वभावस्यात्मनो ज्ञानावरणीयादि आवरणम्, तस्यावरणस्योदितस्य क्षये सति, अनुदितस्योपशमे च सति यः प्रकाशस्याविर्भावः—प्रकटनं सा सहजा प्रतिभेति सम्बन्धः, अयमाशयः—यथा प्रकाशस्वभावं सवितारं वियति वितता मेघमाला आच्छादयतीति तदीयः प्रकाशो न दृश्यते, तथैव ज्ञानस्वरूपतया स्वप्रकाशमप्यात्मानं दुष्कर्मरूपं ज्ञानावरणीयादि तमस्तदीयां प्रकाशमयतामावृणोति, पुनश्च घनापगमे सति सवितुः प्रकाश इव ज्ञानावरणीयादितमसि निवृत्ते तिरोधातुरभावादात्मनप्रकाशस्वरूपता प्रकटति; तस्यां च प्रादुर्भूतायां सर्वेऽर्थाः प्रतिभासमानाः सदर्थ—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विर्भावः सा सहजा प्रतिभा, मात्रग्रहणं मन्त्रादिकारणनिषेधार्थम्। सहजप्रतिभाबलाद्धि गणभृतः सद्यो द्वादशाङ्गीमासूत्रयन्ति स्म।

द्वितीयामाह—

**मन्त्रादेरौपाधिकी ॥ ६ ॥**

मन्त्रदेवतानुग्रहादिप्रभवौपाधिकी प्रतिभा, इयमप्यावरणक्षयो-

---

स्फूर्त्तिवर्त्मना काव्यात्मना परिणमन्ति। अत्र ज्ञानावरणीयाद्यावरणमपि द्विविध-मुदितमनुदितं च, तत्रोदितस्यावरणस्य क्षये सति, अनुदितस्य तस्योपशमे स्वकार्य-विमुखत्वे च सति, पूर्वोक्तः प्रकाशस्याविर्भावो भवति, स एव प्रकाशः सर्वार्थ-प्रतिभासकः प्रतिभा सहजा नाम। ननु "आवरणक्षयोपशमात् सहजा" एताव-देवोच्यताम्, तावतैवोक्तार्थलाभे मात्रपदं व्यर्थमिति चेत्? अत्राह—**मात्रपदं मन्त्रादिकारणनिषेधार्थमिति**—तथा च मन्त्रादिकारणजन्यौपाधिक्याः प्रति-भाया व्यावर्त्तनार्थं मात्रपदमिति भावः।

ननु किमियं सहजा प्रतिभा क्वचिद् दृष्टपूर्वा श्रुतपूर्वा च, उत शास्त्रमात्र-विषय इत्याकाङ्क्षायामाह-**सहजप्रतिभाबलाद्धीति**—'भगवतस्तीर्थङ्करस्य प्रधा-नशिष्या गणधरा उच्यन्ते, ते च प्रथमं तत्त्वं बुभुत्सवो भगवन्तं त्रिः प्रदक्षणी-कृत्य तत्त्वं पप्रच्छुः, भगवता च प्रतिप्रदक्षिणं क्रमेण "उत्पद्यते वा, विगच्छति वा, ध्रुवति वा" इति त्रिपदीमभिहिताः, तावतैव क्षीणानल्पज्ञानावरणीय-कर्माणः प्रतिभास्फूर्त्या सद्यो महत आगमराशेराचाराङ्गादीनि द्वादशाङ्गानि रचयामासुरिति हि जैनदर्शने प्रसिद्धमिति सूचयितुं हिः शब्दः प्रयुक्त ॥ ५ ॥

क्रमप्राप्तामौपाधिकीं प्रतिभां लक्षयितुमवतरणिकामाह-**द्वितीयामाहेति**। सूत्रस्थमादिपदं देवतानुग्रहादिकारणविशेषपरमित्याह—**देवतानुग्रहादीति**। **मन्त्रादेरित्यत्र** पञ्चमी जन्यजनकभाव इत्याह—**प्रभवेति**। उपाधेर्जाता—**औपाधिकी**। विशेष्यमाह—**प्रतिभेति**, तथा च मन्त्रादिजपप्रभवा, देवताऽनु-ग्रहप्रभवा, गुरुप्रसादजनिता वा प्रतिभा औपाधिकी प्रतिभेति कथ्यत इत्या-शयः। मन्त्रादेः प्रतिभोत्पत्तौ कथमुपयोग इत्याशङ्कामपनुदन् आवरणक्षयो-पशमयोरेव मन्त्रादेरुपयोग इत्याह-**इयमप्यावरणक्षयोपशमनिमित्तेति**—द्वितीयाऽपि प्रतिभा आवरणस्योदितस्य मन्त्रादिकृते क्षये, अनुदितस्य च तत्प्रयुक्ते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पशमनिमित्ता, एवं दृष्टोपाधिनिबन्धनत्वात्तु औपाधिकीत्युच्यते। सा चेयं द्विविधापि प्रतिभा

**व्युत्पत्त्यभ्यासाभ्यां संस्कार्या ॥ ७ ॥**

व्युत्पत्त्यभ्यासौ वक्ष्यमाणौ, ताभ्यां संस्करणीया, अत एव न

उपशमे सत्येव जायते इत्यर्थः। ननु तर्हि प्रथमायाः प्रतिभाया अस्याः का भिदेति चेत्?-एवं **दृष्टोपाधिनिबन्धत्वात्** त्विति-तुशब्दः पूर्वस्माद् भेदमाह, अयमाशयः-यद्यपि तत्रात्र चावरणक्षयोपशमयोरपेक्षा तुल्या, तथापि तत्रावरणक्षयादेः कारणं किमपि न दृष्टमिति तत्र स्वाभाविकत्वमास्थीयते, इह च मन्त्रादिकारणं दृष्टमित्येवेयमौपाधिकीति कथ्यते। यद्यपि सहजायामपि आवरणक्षयादिकृते कारणान्तरमपेक्षितम्, आवरणक्षयादेः कार्यत्वेन कार्यमात्रस्य च कारणजन्यत्वात्, तत्र च कारणजिज्ञासायां जन्मान्तरीयवासनादिकमेव कल्पनीयम्, अन्यथा सर्वेषामेव तदुदयप्रसङ्गः, तस्यैव व्यावृत्तये दृष्टपदमुपात्तं वृत्तौ, दृष्ट उपाधिर्निबन्धनं कारणं यस्य तस्य भावस्तस्मादित्यर्थः। एवं च साधारण्येन प्रतिभयोर्भेदाप्रतीतावपि सूक्ष्मेक्षिकया सहजौपाधिकरूपो भेदः स्वीकार्य एव पूर्वोक्तयुक्तेरित्यायातम्।

पण्डितराजजगन्नाथेनापि अदृष्टजन्यत्वेन व्युत्पत्त्यभ्यासजन्यत्वेन च प्रतिभायां द्वैविध्यमादृतमित्युक्तपूर्वम्, तन्मते मन्त्रादेरपि जनितायां प्रतिभायामदृष्टजन्यत्वमेव, मन्त्रानुष्ठानदेवताप्रसादादिभिर्हि अदृष्टमेव किमप्युत्पद्यते, येन प्रतिभा प्रकाशत इति तत्तात्पर्यम्; एवं च यैव स्वमते सहजा प्रतिभा कथ्यते सैव तन्मतेऽदृष्टजन्येति व्यवह्रियते, या च मन्त्रादिदृष्टकारणजन्यौपाधिकीत्युच्यते, सा च व्युत्पत्त्यभ्यासजन्या तन्मते। यद्यपि भेद-कारणयोर्भेदोऽस्ति, तथापि द्वैविध्यमात्रेण साम्यमुपलक्ष्य तन्मतस्येहोपन्यास इति विज्ञेयम्, तन्मतेऽदृष्टजन्यप्रतिभायां व्युत्पत्त्यभ्यासानपेक्षता, स्वमते च सहजायामपि प्रतिभायां संस्काराय व्युत्पत्त्यभ्यासयोरपेक्षेति च विशेष इत्यवसेयम्॥ ६ ॥

व्याख्याता द्विविधाऽपि प्रतिभा, तत्र विशेषं वक्तुं ते उद्दिशति-**सा चेयं द्विविधाऽपीति**। सूत्रे "व्युत्पत्त्यभ्यासाभ्यां संस्कार्या" इत्युक्तम्, तत्र व्युत्पत्तिर्नाम-विशिष्टा उत्पत्तिः, अभ्यासश्च-पौनःपुन्यम्, तौ चानियतविषयौ न किमपि कार्यं साधयितुमर्हाविति तयोर्विशिष्य स्वरूपवचनं विनन प्रकृतोपयोग इत्याशङ्कायामाह-**व्युत्पत्त्यभ्यासौ वक्ष्यमाणाविति**-वक्ष्या

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**तौ काव्यस्य साक्षात् कारणं, प्रतिभोपकारिणौ तु भवतः; दृश्येते हि प्रतिभाहीनस्य विफलौ व्युत्पत्त्यभ्यासौ।**

माणौ-अग्रिमसूत्रद्वयेन निरूप्यमाणस्वरूपौ, ताभ्यां **संस्कार्येति** पदं पर्यायेण निर्दिशति-**संस्क-रणीयेति**-संस्कारश्चेह व्युत्पत्त्यभ्याससंपादितगुणाधानेन विशेषविकास एव प्रतिभायाः। काव्यकारणनिर्वचनसमये व्युत्पत्त्यभ्यासयोः कार्यान्तरे विनियोगस्य "व्युत्पत्त्यभ्यासौ तु प्रतिभाया एव संस्कारकौ" इति वाक्येनोक्ततया कारणकोटिबहिर्भाव उक्तः, तमेव पुनर्दार्ढ्याय शब्दान्तरेणाह-**अत एव न तावित्यादिना**। अत एव प्रतिभासंस्कारे तयोरुपयोगादेव, **तौ** व्युत्पत्त्यभ्यासौ, **काव्यस्य साक्षात्** कारणान्तरव्यापाराव्यवधानेन, **कारणं** हेतुः, **न** भवत इति शेषः। क्वानयोरुपयोग इत्याह-**तु** किन्तु, **प्रतिभोपकारिणौ** प्रतिभासंस्कारकरौ, **भवतः** विद्येते। ननु किमिति काव्यं प्रति कारणतामपहाय तयोः प्रतिभासंस्कारकत्वमास्थीयत इति चेत्? अत्राह-**दृश्येते हि प्रतिभाहीनस्येत्यादि**-हि-यतः, प्रतिभाहीनस्य-द्विविधपूर्वोक्तप्रतिभारहितस्य, व्युत्पत्त्यभ्यासौ **विफलौ** सत्काव्योत्पत्तिरूपफलरहितौ, **दृश्यते** प्रत्यक्षमनुभूयते। ननु प्रतिभाहीनत्वं तस्यानुपहसनीयकार्यानुत्पत्त्यैवानुमेयं, नहि परात्मगता प्रतिभा साक्षात्कर्तुं शक्या, तत्र यथा सप्रतिभस्यापि कादाचित्कः सत्काव्यप्रसराभावो दृष्टः प्रतिबन्धकवशात् तथा तस्यापि सत्काव्यानुत्पत्तौ प्रतिबन्धकान्तरमेव न कुतः कल्प्यते, किमिति व्युत्पत्त्यभ्यासयोर्वैफल्यं निश्चीयत इति चेत्? परात्मगताऽपि प्रतिभा तदीयवाक्पाटवादिलौकिकसकलव्यवहारानुमेयेति सत्काव्यप्रसराभावदर्शनात् पूर्वमपि प्रतिभाहीनत्वेन निश्चितस्य पुंसः सततव्युत्पत्त्यभ्यासरतस्यापि तादृशकाव्यानुत्पत्तेर्वैफल्यस्य निश्चयात्, तदुपपत्तये प्रतिबन्धकादृष्टादिकल्पनाया अन्याय्यत्वात्, गौरवग्रस्तत्वाच्च। व्युत्पादितं चेदं रसगङ्गाधरकारेणेत्युक्तपूर्वम्। उक्तं च व्युत्पत्त्यभ्यासयोः प्रतिभासंस्कारकत्वं श्रीमज्जिनसेनाचार्येणाप्यलंकारचूडामणौ—

"व्युत्पत्त्यभ्याससंस्कार्या शब्दा-ऽर्थघटनाघटा।
प्रज्ञा नवनवोन्मेषशालिनी प्रतिभाऽस्य धीः॥ १।९॥" इति,

व्युत्पत्त्यभ्यासाभ्यां संस्कार्या, शब्दा-ऽर्थयोर्घटनायां घटनशीलानवनवोन्मेषशालिनी, अस्य-कवेः, प्रज्ञा-त्रैकान्तिकस्फूर्त्तिमतीधीः, प्रतिभा कथ्यत इति शेष इति तदर्थः॥ ७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्युत्पत्तिं व्यनक्ति—

**लोक-शास्त्र-काव्येषु निपुणता व्युत्पत्तिः ॥ ८ ॥**

लोके-स्थावर-जङ्गमात्मके लोकवृत्ते च, शास्त्रेषु-शब्द-च्छन्दो-

---

पूर्वत्र "व्युत्पत्त्यभ्यासौ वक्ष्यमाणौ" इत्युक्तम्, तत्र पूर्वोपस्थितत्वात् प्रथमं व्युत्पत्तिमाख्यातुमाह-**व्युत्पत्तिं व्यनक्ती**ति-व्यञ्जनं च विविधैः प्रकारैस्तस्याः प्रकटनमेव। **लोक-शास्त्र-काव्येषु** लोकश्च शास्त्राणि च काव्यानि चेति लोकशास्त्रकाव्यानि तेषु निपुणता व्युत्पत्तिरिति सूत्रार्थः। लोक्यते-दृश्यत इति व्युत्पत्त्या लोकशब्दो दृश्यमानसकलप्रपञ्चपरः, तदाह-**स्थावर-जङ्गमात्मके** इति-स्वाधीनक्रियाशून्यः स्थावरः, तदितरो जङ्गमः, तदात्मके-तत्स्वरूपे लोके, एतावानेव लोकः-स्थावरा जङ्गमाश्चेति। केवलं स्वरूपसतो लोकस्य दर्शनेन व्युत्पत्त्याधाने न विशेष उपकार इति लोकपदस्य लोकवृत्तपरत्वमप्यास्थायाह-**लोकवृत्ते** चेति-लोकानां-स्थावर-जंगमात्मकानां, वृत्ते-चरिते, यद्यपि स्थावरे क्रियारूपं वृत्तं न सम्भवि तथापि द्रव्यत्वेन तत्रापि क्रियाश्रयत्वमुपपन्नमेव, क्रियायां कर्तृत्वमेव हि तत्र व्याहतम्। नन्वेवं लोकपदस्य लोकवृत्तार्थकत्वं कथमिति चेत्? लक्षणयेति गृहाण। ननु पूर्वार्थस्य स्थावर-जङ्गमात्मकरूपस्य परिग्रहे किं फलमिति चेत्? लोकवृत्तस्याधिकव्युत्पादकत्वेऽपि लोकस्वरूपावलोकनस्यापि तत्तत्स्वरूप-स्वभावादिविषये व्युत्पादकत्वात्। न चैवमर्थद्वयं लोक-लोकवृत्तात्मकमेकेन लोकपदेन कथमर्पणीयं 'सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति' इति वचनविरोधादिति वाच्यम्, आवृत्त्याऽर्थद्वयबोधनस्य शक्यत्वात्, आवृत्तौ हि समानाकारं शब्दद्वयमङ्गीक्रियते, तस्य चार्थद्वयोपस्थापकत्वे बाधकाभावात्। काव्यप्रकाशकारेण च स्वकारिकास्थलोकपदं केवलं स्थावर-जङ्गमात्मकलोकवृत्तपरत्वेनैव व्याख्यातम्, तत्र लोकपदस्य तदर्थपरत्वं कथमित्याशङ्कायां प्रदीपकारेणोक्तम्-योगादुपचाराद्वेति, लोक्यत इति योगेन दर्शनविषयतया लोकवृत्तमप्याख्यातुं शक्यते, अस्य योगार्थस्य लोक-लोकवृत्तोभयसाधारण्येन लोकवृत्तमात्रार्थबोधायोक्तम्-उपचाराद् वेति, उपचारो लक्षणा, सा चेहोपादानलक्षणा, वृत्तानन्त्याद् वर्णनानन्त्यं लक्षणायां प्रयोजनम्, अन्यथा लोकानां नियतत्वेन पूर्वैरेव वर्णितत्वात्, आधुनिकवर्णना एकधर्मा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽनुशासना-ऽभिधानकोश-श्रुति-स्मृति-पुराणेतिहासा-ऽऽगम-तर्क-नाट्या-ऽर्थ-काम-योगादिग्रन्थेषु ।

वच्छिन्नकार्यतानिरूपितकारणत्वविषयैव स्यात् । लोकस्य लोकवृत्तस्य चानुशीलनं स्वत एव सम्भवति, आबाल्याच्च तदनुष्ठानं क्रमशो भवतीति प्राथम्येन तदुपादनम्, ततः शास्त्राण्युपात्तानि, तान्यपि काव्यकरणे काव्यार्थज्ञाने च परमुपयुज्यन्त इत्येव नहि किन्तु तदनुशीलनलब्धनैपुण्येन कोऽपि तादृशोऽतिशय आधीयते काव्यकरणे ज्ञाने च, यः सचेतसां हृदयान्यतीवावर्जयति, लोकापेक्षया बहिरङ्गत्वात् काव्यापेक्षया चान्तरङ्गत्वात् शास्त्राणि मध्ये उपात्तानि, काव्येषु नैपुण्याय तेषु नैपुण्यस्याप्यावश्यकतेतिद्योतनाय वोपजीव्यत्वेन शास्त्राणां काव्यतः प्रथममुपादानमिति वा । पूर्वपूर्वतरमहाकविप्रणीतकाव्यनैपुण्येन हि का तेषां काव्यकारणशैली, क्व कथं वर्णनाविन्यास इत्यादि परिज्ञायत इति तेषु नैपुण्यमप्यावश्यकमेव । एतत्रितयविषयकतत्त्वज्ञतारूपा निपुणतैव व्युत्पत्तिः प्रतिभासंस्कारककारणद्वये प्रथमेति सूत्रार्थो व्याख्यातः । तत्र लोकव्यवहारा अपि देशकालादिभेदेन बहुधा भिन्नास्तानिहाप्रदर्श्याग्रे तृतीयाध्याये प्रकृतिप्रस्तावे प्रदर्शयिष्यति । शास्त्राणि कानि? येषु नैपुण्यमर्जनीयमिति जिज्ञासायां तानि कानिचिन्नामतः संगृह्णाति— **शब्द-च्छन्दोऽनुशासना-ऽभिधानकोश-श्रुति-स्मृति-पुराणेतिहासे**त्यादिना, अनुशासनपदस्य द्वन्द्वान्ते श्रूयमाणतया शब्द–च्छन्दोभ्यामभिसम्बन्धः, तथा च शब्दानुशासनं च्छन्दोऽनुशासनं चेति गम्यते; तत्र शब्दानुशासनस्य सर्वशास्त्रोपकारित्वेन सर्वाभ्यर्हितत्वात् प्राथम्येनोपादानम्; उक्तं च पूर्वाचार्यैः "व्याकरणमूलत्वात् सर्वविद्यानाम्" इति ।

शब्दानुशासनत्वं च प्रकृति-प्रत्ययविभागनिश्चयपूर्वकशब्दव्युत्पत्त्याधायकशास्त्रत्वम्, तज्ज्ञानेन हि प्रयोक्ता स्वेच्छयाऽर्थानुसंधानपूर्वकं पदानि प्रयोक्तुमीष्टे। न केवलं पदप्रयोग एव तस्य प्राकाम्यमपि तु तद्विषयार्थमादाय श्लेषादिनिर्माणपाटवमपीति निश्चितम्, तथाहि—

"द्विगुरपि सद्वन्द्वोऽहं गृहे च मे सततमव्ययीभावः ।
तत् पुरुष कर्म धारय, येनाहं स्यां बहुव्रीहिः ॥" [ ]

क्वचित् 'द्वन्द्वो द्विगुरपि चाहम्' इति पाठः, स एव च सारल्येनार्थायोपयुज्यते, 'द्वन्द्वः-जायया सहितत्वेन परस्परं द्वित्ववान्, द्विगुः-गोद्वययुतः' इत्यर्थप्रतीतेः । प्रकृतपाठानुकूलोऽर्थश्च–द्वन्द्वेन–युग्मेन जाया-पुत्ररूपेण, सहि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तोऽहम्, इत्थं च व्यक्तित्रयमितो मे परिवार इति फलति, द्विगुः–धेनुद्वययुतः सन्नपि [न निर्वृतोऽस्मि] यतः–मद्गृहे सततम्, अव्ययीभावः–धनाभावादुदरपोषणादिकृते व्ययं कर्तुमसामर्थ्यात् तदभावः। ततः किमिच्छसीति चेत्? अत्राह–हे पुरुष! तत् कर्म धारय–कुरु, येनाहं बहुव्रीहिः–बहुधान्ययुतः स्यामिति। अत्र व्याकरणज्ञानवानेवैवं प्रयोक्तुमीष्टे, तज्ज्ञानवानेव चास्यार्थबोधे वैशिष्ट्यमवधारयेत्।

कैश्चित् तु व्याकरणज्ञानफलतयाऽयं श्लोक उदाह्रियते—

"यैरेकरूपमखिलास्वपि वृत्तिषु त्वां पश्यद्भिरव्ययमसंख्यतया प्रवृत्तम्।
लोपः कृतः किल परत्वजुषो विभक्तेस्तैर्लक्षणं तव कृतं ध्रुवमेव मन्ये॥"

[ ]

हे परमात्मन्! अखिलास्वपि वृत्तिषु–सृष्टि-स्थिति-लयादिषु, जगतः सर्वास्वेवावस्थासु, एकरूपम्–अपरिणामित्वाद् रूपान्तररहितम्, अन्यत्र [अव्ययसंज्ञकशब्दपक्षे–] अखिलास्वपि वृत्तिषु–प्रत्ययलोपसमासादिषु, एकरूपम्–अनन्यथाकारम्; तथा च अव्ययम्–न व्येति क्षयमेतीति अव्ययम्, अन्यत्र एतन्नामकम्; असंख्यतया–इयत्तारहिततया, प्रवृत्तं–विद्यमानम्, अन्यत्र संख्या–द्वित्वादिः, तद्रहिततया, प्रवृत्तं-व्यवहारपथमायातम्; त्वां पश्यद्भिः, यैर्जनैः, परत्वजुषः–भिन्नत्वाश्रितायाः, 'एतद्भिन्ना इमे पदार्थाः' एतादृशबुद्धिमाश्रितायाः, अन्यत्र प्रत्ययत्वेनाव्यवहितपरत्ववत्याः, विभक्तेः–विभागकरणस्य, अन्यत्र स्यादिविभक्तेः, लोपः–उच्छेदः, अन्यत्र अदर्शनम्, कृतः, तैः–जनैः, तव लक्षणं–स्वरूपावधारणं, ध्रुवं–निश्चितमेव, कृतं विहितम्, इति मन्ये। "सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥" इत्यव्ययलक्षणम्। इह श्रुतिप्रसिद्धे परमात्मनि व्याकरणशास्त्रप्रसिद्धाव्ययव्यवहारारोपात् समासोक्तिरलङ्कारः। अत्र "अशब्दमस्पर्शमरूपमव्ययम्" इत्यादिकठोपनिषत्प्रसिद्धे वस्तुनि वैयाकरणमतप्रसिद्धाव्ययत्वव्यवहारारोपो व्याकरणानुशासनज्ञानं विना कर्तुमशक्य एवेति तज्ज्ञानमपेक्षितमेव।

**छन्दोऽनुशासने**ति-छन्दोऽनुशासनं–छन्दोविचितिः, छन्दसां लक्षणादिबोधकं शास्त्रमिति यावत्, तस्मिन्नैपुणं। यथा—

"उष्णिहीव संसृतौ स्याद् ध्रुवं रजोगुरुः।
नो भवेद् यदि क्षितौ श्रीजिनेन्द्रशासनम्॥ [छन्दोनु० २-४८]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षितौ यदि श्रीजिनेन्द्रशासनं न भवेत् [ तर्हि ] संसृतौ, उष्णिहीव [ उष्णिक्छन्दसीव ] रजो गुरुः, ध्रुवं स्यादित्यन्वयः । उष्णिक्छन्दसो लक्षणं च– "जौ ग उष्णिक्" [ छन्दोनुशासने ४८ ] इति तत्र कृतम्, एवं च रगणजगणौ गुरुश्चेति तस्य छन्दसः स्वरूपम्, श्रीजिनेन्द्रशासनाभावे च सत्त्वस्यापचयापत्तौ रजोगुण एव, गुरुः–प्राधान्येन प्रतीतः स्यादिति ध्रुवमिति उष्णिक्छन्दोवत् संसृतिः स्यादित्यभिप्रायः । इदं च वर्णनं छन्दोऽनुशासनज्ञानोत्पन्नमेव । काव्यकरणाभ्यासमहाकविरचनापरिशीलनादिना जातेऽपि वृत्तानां सामान्यपरिचये छन्दोऽनुशासनेऽकृतश्रमा मात्रावृत्तादिपरिज्ञाने मुह्यन्त्येव, विशेषतः प्रस्तार-नष्टोद्दिष्ट-मेरु-पताकादिविवेके, ततश्च तज्ज्ञानमावश्यकमेव ।

अभिधानकोशेति-अभिधानानां–नाम्नां, कोशः–संग्रहः, नाममालेत्यर्थः, सा चामरसिंह–हेमचन्द्रसूरिप्रभृतिसंग्रहीता, तज्ज्ञानं हि पदार्थनिर्णयद्वारा काव्यकरणे उपकारमादधाति, तदर्थानुशीलने च साहाय्यमारचयति । केचित्तु कोशस्यापूर्वाभिधानलाभार्थत्वमाहुः, तन्न–अप्रयुक्तस्य शब्दस्य अभिधाकोशानुसारेणापि प्रयोक्तुमशक्यत्वात् । नन्वेवं यदि प्रयुक्तमेव प्रयुज्यते, तर्हि पदस्य सन्दिग्धार्थत्वं कथमाशङ्कितमिति चेत्? न–सामान्येनार्थमवगत्याप्रयुक्ते विशिष्टेऽर्थे प्रयुज्यमाने सति संशयो युक्त इत्याशयात्, यथा नीवीशब्दस्य सामान्यतो जघनवस्त्रग्रन्थिरिति कस्यचिन्निश्चयः, तत्र स्त्रियाः पुरुषस्य वेति संशयः सम्भवति, स च "नीविराग्रन्थनं नार्या जघनस्थस्य वाससः" । इति [ नाममाला ] कोशज्ञानेनैवापोहितुं शक्यः, "स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि च" इत्यमरकोशोऽपि [ ३ का. ना. २२२ ] तत्र निर्णायकः । एवं चार्थनिर्णयाय बन्धानुकूलतत्तदर्थवाचकशब्दोपस्थितये चाभिधानकोशः कवेरुपकाराधायकः, उक्तं च—

"वक्तृत्वं च कवित्वं च, विद्वत्तायाः फलं विदुः ।
शब्दज्ञानादृते तन्न, द्वयमप्युपपद्यते ॥" [ ]

शब्दाश्च कोशेनैव सुज्ञेया इत्यभिधानकोशे नैपुण्यमावश्यकमिति ।

श्रुतीति–अपौरुषेयं वाक्यं श्रुतिः, तत्र निपुणताऽपि तद्बोधितार्थपरिज्ञानाय तदनुकूलवर्णनाय चावश्यकी, यथा—

"उर्वशी हाप्सराः पुरूरवसमैडं चकमे" इति श्रुतिः ।

[ शतपथब्रा० का० ११, अ. ५, ब्रा. १ ]



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतदुक्तार्थवर्णनायां निपुणता यथा—

"चन्द्राद् बुधः समभवद् भगवान् नरेन्द्र-माद्यं पुरूरवसमैलमसावसूत ।
तं चाप्सराः स्मरवती चकमे किमन्यदत्रोर्वशीस्मितवशीकृतशक्रचेताः ॥"
[ काव्यमी० ८ मे उद्धृतम् ]

चन्द्राद् भगवान् बुधः समभवत्, असौ, आद्यं नरेन्द्रं–प्रथमं चन्द्रवंशीयं राजानम्, ऐलम्–एलायाः पुत्रम्, पुरूरवसम्–एतन्नामकम्, असूत जनयामास, तं च अत्र, स्मितवशीकृतशक्रचेताः–स्वस्मितेन यया शक्रचेतोऽपि वशीकृतं सा, उर्वशीनामा अप्सराः स्मरवती सती चकमे–कामयाञ्चक्रे, अत्रान्यत् किमित्यन्वयः । अत्र पूर्वोदाहृतश्रुतिविषयक एवार्थो विस्तरेण प्रतिपादितः, तथाप्रतिपादनं च श्रुत्यनुशीलनजन्यमेवेति तदनुशीलनमप्यावश्यकम् ।

**स्मृती**ति–श्रुत्यनुगता–तदर्थानुस्मरणरूपा स्मृतिर्धर्मादिचतुर्वर्गान्तर्गताचार-व्यवहारादिप्रतिपादकः शास्त्रविशेषः, स चैवमादिः—

"बह्वर्थेष्वभियुक्तेन, सर्वत्र व्यपलापिना ।
सम्भावितैकदेशेन देयं यदभियुज्यते ॥" [ नारदस्मृतिः ]

कश्चिद् बह्वर्थहरणेऽभियुक्तः–हर्तृत्वेनारोपितः, किमपि न मया कृतमित्याचक्षाणो, यदि तेष्वर्थेषु कस्यचिदंशस्य हर्त्ता सम्यग् भावितः स्यात्, तदा अभियोक्त्रा यत् सर्वमभियुक्तं, तत् तेन देयमिति व्यवहारनिर्णायकोक्तस्मृत्यर्थः । तदनुशीलनजातनिपुणतया कश्चिदेवं कवयति—

"हंस ! प्रयच्छ मे कान्तां गतिस्तस्यास्त्वया हृता ॥
सम्भावितैकदेशेन, देयं यदभियुज्यते ॥" [ विक्रमोर्व० ४।१७ ]

उर्वश्या हरणे तद्वियोगविक्लवो राजा, इतस्ततः पर्यटन्, हंसमालोक्याह–हे हंस ! मे कान्तां प्रयच्छ, त्वयैव मे कान्ता हृता, तां मे प्रत्यर्पय, केन लिङ्गेन त्वयैतज्ज्ञायत इति चेत्? तदाह–तस्या गतिस्त्वया हृता, इयं त्वयि दृश्यमाना मन्दललिता गतिस्तस्या एव, ततश्च सा त्वयैव हृता, सा चेद् भवता न हृता स्याद् इयं गतिस्त्वयि न दृश्येत, दृश्यते चातस्त्वयैव सा हृता, तां प्रयच्छ, नेदं मम प्रलपितमपि तु स्मृतिसिद्धमित्याह–सम्भावितैकदेशेनेत्यादि, अतश्च न्यायतस्त्वयाऽर्पणीयैव मे कान्तेति तदाशयः । न चैतत् स्मृतिनैपुण्यं विना निबद्धुं शक्यते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुराणेति-वेदगताख्यानोपनिबन्ध-तदुपबृंहणप्रधानः शब्दसन्दर्भः पुराणम्, तच्चाष्टादशधा, भागवते दशमस्कन्धे सप्तमाध्याये पुराणलक्षणमेवमुक्तम्—

"पुराणलक्षणं ब्रह्मन्! शृणु शास्त्रानुसारतः।
सर्गोऽस्याथ विसर्गश्च वृत्तिरक्षाऽन्तराणि च॥
वंशो वंशानुचरितं संस्थाहेतुरपाश्रयः।
दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः॥
केचित् पञ्चविधं राजन्! महदल्पव्यवस्थया।"

[महापुराणं दशलक्षणोपेतम्, पुराणं पञ्चलक्षणोपेतमित्याशयः] तानि यथा—

"सर्गश्च प्रतिसर्गश्च, वंशो मन्वन्तराणि च।
वंशानुचरितं चेति, पुराणं पञ्चलक्षणम्॥"
[काव्यमीमांसायामुद्धृतम्] इति।

अत्रत्यसर्गादीनां लक्षणमपि तत्र विस्तृतं, विशेषजिज्ञासायां तत एव विज्ञेयम्। तत्र यथा—

"हिरण्यकशिपुर्दैत्यो यां यां दिशमुदैक्षत।
तस्यै तस्यै नमश्चक्रुर्देवा ऋषिगणैः सह॥" [अग्निपुराणे]

पुराणवर्णितमिमं हिरण्यकशिपुवृत्तान्तं निपुणतया माघकविः काव्ये निबबन्ध, यथा—

"स संचरिष्णुर्भुवनान्तरेषु यां, यदृच्छयाऽशिश्रियदाश्रयः श्रियाम्।
अकारि तस्यै मुकुटोपलस्खलत्करैस्त्रिसंध्यं त्रिदशैर्दिशे नमः॥"
[शिशुपालव० स० १, श्लो० ४६]

श्रीकृष्णभवनमायातः सुरर्षिर्नारदः शिशुपालवधाय महेन्द्रप्रार्थनां प्रस्तुवन्, तेन सह तस्य [श्रीकृष्णस्य] बहुजन्मार्जितं वैरं दर्शयन् हिरण्यकशिपुभूमिकात एवारब्धवान् कथयितुम्, तस्यैव वर्णनमिदम्-'श्रियामाश्रयः स भुवनान्तरेषु सञ्चरिष्णुः यदृच्छया यां [दिशम्] अशिश्रियत्, तस्यै दिशे मुकुटोपलस्खलत्करैः त्रिदशैः त्रिसन्ध्यं नमः अकारि' इत्यन्वयः। हिरण्यकशिपुना सर्वे देवाः पराजितास्तस्य वशवर्तिन इवाभूवन्, ततश्च कामचारी स किमपि प्रयोजनमनभिसमीक्ष्यैव कांचिद् दिशं प्रति प्रचलितश्चेत् सा काऽपि दिग् भवतु, कोऽपि च सन्ध्यासमयो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽस्तु, किन्तु त्रिदशा भीतास्तदभिमुखाञ्जलित्वप्रख्यापनाय तामेव दिशं प्रति स्वशिरसि करमर्पयन्तस्तिष्ठन्ति स्म। प्रातःसन्ध्यायां पूर्वाभिमुखं वन्दनम्, मध्याह्नसन्ध्यायामुत्तराभिमुखम्, सायंसन्ध्यायां च पश्चिमाभिमुखमिति परिपाटी, किन्तु तामनादृत्य तदनुकूलनाय तदाश्रितामेव दिशं प्रति प्रणेमुरिति तद्रीत्याऽऽचारलङ्घनं देवानामिति श्रीकृष्णोद्वेगवर्धनाय नारदमुखेन ख्यापितं कविना। स चायमर्थः पूर्वोक्तपुराणप्रसिद्ध एवोपनिद्ध इति पुराणनैपुण्यपरिचायकः।

इतिहासेति "पुराणप्रतिभेद एवेतिहासः" इत्येके, अत्र 'इतिह+आस' इत्यक्षरानुगामी व्यतीतकथानिर्देश इत्यर्थोऽवगम्यते, स च द्विधा-परि (र)-क्रिया-पुराकल्पाभ्याम्।

यदाहुः-"परि(र)क्रिया पुराकल्प इतिहासगतिर्द्विधा।
स्यादेकनायका पूर्वा द्वितीया बहुनायका॥"
[काव्यमीमां० उद्धृतम्] इति,

तथा चैकनायक-बहुनायकभेदेनेतिहासद्वैविध्यमित्यायाति, तत्र प्रथमकोटौ रामायणम्, द्वितीयकोटौ महाभारतं च। तत्र रामायणं यथा—

"न स सङ्कुचितः पन्था येन वाली हतो गतः॥
समये तिष्ठ सुग्रीव! मा वालिपथमन्वगाः॥"
[रामायण-कि० ३४, १८]

ज्येष्ठभ्रात्रा वालिना वानरराजेन हृतराज्यस्तदीयः कनिष्ठो भ्राता सुग्रीवः श्रीरामस्य शरणं गतो 'वालिनं निहत्य मां राज्ये स्थापय कृपया, अहं सीतादेव्या मार्गणेन भवन्तमुपकरिष्यामि' इति प्रतिज्ञातवान्, भगवता रामेण च तमर्थमङ्गीकृत्य 'वाली अनुजवधूपरिग्रहपातकितः' इति तं निहत्यासौ सुग्रीवो राज्ये स्थापितः, एतावता कालेन च प्रावृट्समयः समायातो यत्र गमनागमनं निरुद्धम्, अतिक्रान्तायां प्रावृषि, राज्यभोगासक्तोऽसौ न सस्मार स्ववचनम्, न च तत्वरे रामकार्याय, ततो रामेण लक्ष्मणमुखेनायमादेशः प्रेषितस्तस्मै-हे सुग्रीव! समये तिष्ठ, वालिपथं न अन्वगाः, येन [पथा] हतो वाली गतः स पन्थाः न सङ्कुचितः-नैकजनमात्रगम्यः। अयमाशयः-समयस्य-आचारस्य लङ्घनेनैव वाली मया हतः, त्वयाऽपि समयस्य-प्रतिज्ञायाः, अथवा मया सहाचरितुं योग्यस्या-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चारस्य लङ्घनं क्रियत इति वालिपथानुगमनमिव त्वयाऽऽरब्धम्, तन्नारब्धव्यम्। विपरीते दण्डमाह–येन पथा–बाणमार्गेण, हतो वाली गतो यमालयमिति शेषः, स पन्था मम बाणप्रहाररूपः, न सङ्कुचितः किन्तु विस्तीर्ण एव, भवादृशाः समयलङ्घिनोऽसंख्यास्तेन पथा गन्तुं शक्नुवन्ति। इदमत्राकूतम्–त्वं "मया राज्यं प्राप्तम्, अतः परं सीतामार्गणेन मया किं लभ्यम्, रामः कुपितोऽपि कृतमैत्रीको मे किमपि नानिष्टं करिष्यति" इति मत्वा चेन्निष्क्रियोऽसि, तर्हि वालिवत् त्वमपि मया दुष्टतया वध्य एव, न मयि वालिहननमात्रसामर्थ्यम्, एवम्भूताः कोटिशोऽपि तेन मार्गेण यमालयं प्रेषयितुं मया शक्यन्त इति विज्ञाय यदुचितं तदाचरेति॥ एतस्यैवेतिहासप्रसिद्धवस्तुनो नैपुण्येन निबन्धो यथा—

"मदं नवैश्वर्यबलेन लम्भितं, विसृज्य पूर्वः समयो विमृश्यताम्।
जगज्जिघत्सातुरकण्ठपद्धतिर्न, वालिनैवाहिततृप्तिरन्तकः॥"
[जानकीह० स० १२, श्लो० ३६]

नवैश्वर्यबलेन लम्भितं मदं विसृज्य पूर्वः समयो जानकीसमन्वेषणविषयको विमृश्यताम्, किञ्चैतदपि विमृश्यताम्–'जगज्जिघत्साऽऽतुरकण्ठपद्धतिः, अन्तकः, वालिनैवाहिततृप्तिर्न' इति, जगतो–महतः संसारस्यैव, जिघत्सया भक्षयितुमिच्छया आतुरा कण्ठस्य पद्धतिः–मार्गो यस्य तादृशोऽन्तको–यमः, केवलवालिभक्षणेनैव, आहिता–साधिता तृप्तिर्यस्य तथाभूतो न। ऐश्वर्यमदं विसृज्य स्वप्रतिज्ञा स्मर्यताम्, अन्यथा वालिभोजनप्रज्वलिताग्नेर्यमस्य कण्ठपद्धत्या गमनं तव निश्चितमिति प्रत्यवेहि, इति पूर्वोक्त एवाशयो भङ्ग्यन्तरेण प्रतिपादितः॥

आगमेति–अथ क्रमप्राप्त आगमः, तत्सामान्यलक्षणमाप्तवचनमागम इति, तथा चोक्तम्–"सिद्धं सिद्धैः प्रमाणैस्तु, हितं चात्र परत्र च॥
आगमं शास्त्रमाप्तानाम्" [ ] इति,

तथा च शास्त्रमात्रमागमशब्देन लभ्यते, आगमस्याक्षरानुसारिणी च व्याख्येयमुपलभ्यते।

"आगतं शिववक्त्रेभ्यो, गतं च गिरिजाश्रुतौ॥
मतं च वासुदेवस्य, तस्मादागममुच्यते॥" [ ] इति,

किञ्च, "सृष्टिश्च प्रलयश्चैव देवानां च तथाऽर्चनम्।
साधनं चैव सर्वेषां पुरश्चरणमेव च॥
षट्कर्मसाधनं चैव ध्यानयोगश्चतुर्विधः।
सप्तभिर्लक्षणैर्युक्तं त्वागमं तद्विदो विदुः"॥ [ ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्युक्तलक्षणे तन्त्रशास्त्रे चास्य शब्दस्य प्रयोगः । एवं च साधारणोऽप्ययमाप्तवचनवाची शब्दः क्वचिद् विशेषवचनतयाऽपि सङ्केतितः, तथा च तत्तन्मतसिद्धान्त आगमपदेनोच्यते ।

शिवभाषित आचारादिबोधक आगमः शैवागमस्तत्र नैपुण्यं यथा—

"घोर-घोरतरातीतब्रह्मविद्याकलातिगः ।
परा-ऽपरपदव्यापी पायाद् वः परमेश्वरः ॥"
[ काव्यमी० अ० ८ उद्धृतम् ]

अत्र घोर-घोरतर-ब्रह्मविद्या-कलाशब्दास्तस्मिँस्तन्त्रे स्वातन्त्र्येण परिभाषिता इति तदागमनिपुण एवैवं निबन्द्धुं बोद्धुं च शक्नोतीति वैचित्र्यमावहत्येव तद्विषयिणी व्युत्पत्तिः ॥

एवं बौद्धागमनैपुण्योदाहरणमिदम्—

"कलिकलुषकृतानि यानि लोके, मयि निपतन्तु विमुच्यतां स लोकः ।
मम हि सुचरितेन सर्वसत्त्वाः परमसुखेन सुखावनीं प्रयान्तु ॥"
[ ]

अयं श्लोकस्तन्त्रवार्त्तिके कुमारिलभट्टेन बौद्धसिद्धान्तीयमहायानमार्गस्थानामुक्तिरूपेणोद्धृतः । लोके—तत्तज्जनेषु, यानि कलिकलुषकृतानि [ दुःखानि ] सन्ति, तानि मयि निपतन्तु स लोको विमुच्यताम्, किञ्च, न केवलमसौ कलिकलुषविमुक्त एव भवतु, अपि तु सर्वसत्त्वा मम सुचरितेन परमसुखेन सुखावनीं प्रयान्तु, इति । नागानन्दनाटके नायकस्य जीमूतवाहनस्यापीदृश्येवोक्तिर्दृश्यते । अत्र बौद्धा दशमीं भूमिकां सुखावतीनामिकां स्वर्गस्थानीयां मन्यन्ते, सैवेह सुखावनीशब्देनोक्ता, एतच्च तदागमनैपुण्यं विना दुर्बोधमेव, दुर्वाच्यं च ।

शक्त्यागमनैपुण्यं यथा—

"आविश्य मध्यपदवीं प्रथमे सरोजे, सुप्ताऽहिराजसदृशी विरचय्य विश्वम् ।
विद्युल्लतावलयविभ्रममुद्वहन्ती, पद्मानि पञ्च विदलय्य समश्नुवाना ॥ १ ॥
तन्निर्गतामृतरसैरभिषिक्तगात्रा, मार्गेण तेन विलयं पुनरप्यवाप्ता ।
येषां हृदि स्फुरसि जातु न ते भवेयुर्मातर्महेश्वरकुटुम्बिनि ! गर्भभाजः ॥"
[ भुवनेश्वरीस्तोत्रे ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अयमर्थः–हे मातः! महेश्वरस्य–परमात्मनः, कुटुम्बिनि!–गृहिणि!, येषां–साधकानाम्, हृदि एतत्पद्यद्वयवर्णितस्वरूपेण स्फुरसि–त्वं ध्यायसे निदिध्यास्यसे इति यावत्, ते साधकाः, गर्भभाजः–जन्मादिदुःखभाजः, जातु–जातुचित्, न भवेयुः–न भवन्ति, मध्यपदवीं–"पन्थानः पदवी सृतिः" इति वचनात् सुषुम्णा-मार्गम्, आविश्य–प्रविश्य, विद्युल्लतावलयविभ्रमं–विद्युत्पुञ्जप्रकाशानुरूप-विकाशम्, उद्वहन्ती–आदधाना, पञ्च पद्मानि–'स्वाधिष्ठानस्थषड्दल मणिपूरस्थ-दशदल अनाहतचक्रस्थितद्वादशदल विशुद्धिचक्रस्थषोडशदल आज्ञाचक्रस्थितद्वि-दल' इत्येवं पञ्च कमलानि, विदलय्य–विभिद्य, खम्–आकाशं "खं ब्रह्म" इति श्रुतेर्मस्तकस्थितपरमात्मानम्, अश्नुवाना–व्याप्नुवाना, तन्निर्गतामृतरसैः–शिरःस्थितशिवसन्निहितचन्द्रमण्डलस्रुतपीयूषैः, परिषिक्तगात्रा–सिक्तार्द्रतनुः, शिव शक्त्योर्दाम्पत्यवासनायां मिथस्तयोः संघट्टजामृतैवेति तान्त्रिकोपासना-रहस्यार्थः, विश्वं–क्षुद्रब्रह्माण्डकल्पं चेतनात्मकशरीरं तत्कार्यजातं बृहद्ब्रह्माण्डं तत्कार्यं वा, विरचय्य–निर्माय्य, यावन्तो ब्रह्माण्डे तावन्तः शरीरपिण्डे पिण्ड-ब्रह्माण्डयोरैक्यमिति सिद्धान्तात्, पुनरपि तेन [मध्यपदव्या] सुषुम्णामार्गेण, विलयमिति स्थाने निलयमिति पाठः सम्यक्, निलयं–गृहं मूलाधारम्, अवाप्ता–प्राप्ता, प्रथमे सरोजे–मूलाधारस्थचतुर्दलकमले, अहिराजसदृशी सुप्ता, इति येषामुपासकानां हृदये स्फुरसि निदिध्यासनेन उपासनया वा प्रत्यक्षवद् भाससे न जातु ते गर्भभाजः ॥

एतत्पद्यार्थज्ञानायादौ विज्ञेयम्—

गुद–मेढ्रान्तराले संकोचविकाशात्मिका सार्धत्रिवलयाकारा सर्पसाम्यात् कुण्डलीरूपा स्वयम्भूलिङ्गवेष्टिनी काचित् शक्तिरस्ति, स्वयम्भूलिङ्गमधिष्ठाय मध्यवर्तिनी सुषुम्णानाम्नी, वामे इडा–चन्द्रनाडी, दक्षे पिङ्गलानाडी सूर्यात्मिका, एषा त्रिवली मेरुदण्डाख्या, मस्तकावधि सुषुम्णा, इडा-पिङ्गले तु नासिकावधि-वर्तिन्यौ, एवमभितस्तत्र पादाङ्गुल्यौ हस्ताङ्गुल्यौ कर्णौ गुद-मेढ्रे चक्षुषी नाभिं जिह्वामवधीकृत्य चतुर्दश नाड्यः सन्ति, मस्तकं परमात्मनः स्थानम्, स च तेजःस्वरूपः, त्रिवल्या मूलाधाराद् गुद-मेढ्रान्तरालात् स्वयम्भूलिङ्गत आरभ्य मस्तकावधिस्थितायाः सुषुम्णाया मध्ये षट् चक्राणि क्रमश ऊर्ध्वोर्ध्वस्वरूपेण 'मूलाधारचक्र चतुर्दलस्वाधिष्ठानचक्र षट्दलमणिपुरचक्र दशदलस्वाधिष्ठानचक्र द्वादशदलविशुद्धचक्र षोडशदल-आज्ञाचक्रद्विदल' इति कमलानि भावनीयानि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सन्ति, चतुर्दशानां नाडीनां नामानि हस्तिजिह्वादीनि, यत्र जिह्वाग्रवर्तिनी सा सरस्वतीनाम्नी, तच्चिह्नं जिह्वामध्ये रेखाकृतिर्न तु रेखातिसौक्ष्म्यात्, १४ नाडीवर्धा अनन्तास्तरतमभावापन्नाः सूक्ष्मास्ता विस्तरभयादुपेक्ष्या वर्णितुम्, तथा चोक्तम्–"चैतन्यं सर्वभूतानां शब्दब्रह्मेति मे मतिः । तत् प्राप्य कुण्डलीरूपं प्राणिनां देहमध्यगम् ॥ वर्णात्मनाऽऽविर्भवति गद्यपद्यादिभेदतः ।" इत्यादि, अर्थात् मूलाधारस्था सा चेतनाशक्तिः प्रकाशात्मिका, 'स्वाधिष्ठानचक्र-मणिपूर-चक्र-अनाहतचक्र-विशुद्धिचक्र-आज्ञाचक्र, इति पञ्चपद्मपर्वा मध्यवर्तिनी सुषुम्णानाम्नी नाडी, मूलाधारस्थसार्धत्रिवलयाकारकुण्डलिन्याः साक्षान्निर्गमाग-ममार्गः सरलः, कुण्डल्यन्तस्तेजःकोटिसूर्यप्रकाशतुल्यं कोटिचन्द्रशीतलं वर्णितम्, तस्य प्रकाशस्य सम्बन्धोऽधिकाल्पभावेन १४ नाडीपूक्तासु परम्परयैतावन्नाडी-सम्बद्धानन्तसूक्ष्मसूक्ष्मतरसूक्ष्मतमशिरासु, अतः शरीरव्याधिचैतन्यमिति शक्त्या-गमवेदिनः ॥

पाञ्चरात्रागमनैपुण्यं यथा–

"नाद्यन्तवन्तः कवयः पुराणाः सूक्ष्मा बृहन्तो ह्यनुशासितारः ।

सर्वज्वरान् घ्नन्तु ममाऽनिरुद्ध-प्रद्युम्न-संकर्षण-वासुदेवाः ॥" [ हरिवंशे बाण-युद्धप्रकरणे ] पाञ्चरात्र [ वैष्णव ] तन्त्रे–"परमकारुणिको भक्तवत्सलो वासुदेवः परमपुरुषस्तदुपासकानुगुणतत्तत्फलप्रदानाय स्वलीलावशात् 'अर्चा-विभव-व्यूह-सूक्ष्मा-ऽन्तर्यामि, भेदेन पञ्चधाऽवतिष्ठते, तत्रार्चा नाम–प्रतिमादयो याः पूज्यन्ते लोकैः, विभवः–रामाद्यवताराः, व्यूहश्चतुर्विधः–वासुदेव-संकर्षण-प्रद्युम्ना-ऽनिरुद्ध-संज्ञकः, सूक्ष्मं–सम्पूर्णषड्गुणं वासुदेवाख्यं परं ब्रह्म, अन्तर्यामी–सकलजीवनिया-मकः, तत्र पूर्वपूर्वमूर्त्युपासनया पुरुषार्थप्रतिपन्थिदुरितनिचयक्षये सत्युत्तरो-त्तरमूर्त्युपास्त्यधिकारः" इति प्रतिपादितम् । तत्र प्रतिपादिताश्चत्वारो व्यूहाः श्रीकृष्णावतारसमयेऽपि प्रसिद्धाः, वासुदेवोऽसौ स्वयमेव, संकर्षणस्तद्भ्राता, प्रद्युम्नो वासुदेवपुत्रः, अनिरुद्धश्च प्रद्युम्नपुत्रः । एषां च ज्वरघ्नत्वं हरिवंशीय-बाणासुरसंग्रामे प्रसिद्धम्, तत्र हि बाणासुरस्य कन्या उषा स्वप्ने कमप्यतिसुन्दरं युवानमपश्यत्, जाता च तद्गतभावा, उत्थिता तमपश्यन्ती विह्वला विलपन्ती चित्रलेखया सख्या तत्कारणं पृष्टा स्वप्नवृत्तान्तमाख्यातवती, सा च परमचतुरा-ऽऽसुरीमायाभिज्ञा सकलसंसारवर्तियुवजनस्वरूपं चित्रे विलिख्य 'पश्य कोऽत्र तवेप्सितः' इत्युवाच, तया च श्रीकृष्णपुत्रमनिरुद्धं स्वाभिमतं कथयन्त्या

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथाकथञ्चित् तदानयनाय नियुक्ता सखी सुप्तमेव तं माययाऽविज्ञातमन्यैरानिनाय, स चान्तःपुर एव ताभिः स्थापितो यथेच्छं तया सह विजहार, न च शक्तोऽसुरप्रभावाद् बहिर्गन्तुम्, महता प्रयासेन विज्ञातवृत्तैश्च श्रीकृष्णादिभिर्बाणासुरस्य नगरी समाक्रान्ता, स च शिवभक्तः, शिवेन विविधज्वरास्तत्साहाय्याय प्रेरिताः, वासुदेवादिभिश्च ते सर्वे प्रतिहताः, ततः कालात् तेषां नामानि सर्वविधज्वरापहत्वेन सिद्धानि, तदेवात्र पञ्चरात्रहरिवंशपुराणोभयप्रसिद्धं वस्तु निबद्धम्। अत्र च नाद्यन्तवन्त इत्यादिविशेषणैस्तेषां पुराणप्रसिद्धानामपि कथापुरुषाणां परमेश्वरचतुर्व्यूहत्वरूपमेवेति प्रतिपादितम्, सर्वज्वरानिति च आधिभौतिका-ऽऽधिदैविका-ऽऽध्यात्मिकत्रिविधतापस्योपलक्षकम्। तथा चायमर्थः–अनादिनिधनाः कवयः सर्वज्ञाः, पुराणाः–सर्वेषां परमपुरुषांशत्वेन पुरातनाः, सूक्ष्माः–अप्रतर्क्याः, बृहन्तः–व्यापकाः, अनुशासितारः–जगदनुशासकाश्च, अनिरुद्धादयो मम सर्वज्वरान् पूर्वोक्तत्रिविधतापान्, घ्नन्तु–नाशयन्तु, इति। अत्र नाद्यन्तवन्त इत्यादिविशेषणदानैरेव तेषां पञ्चरात्रप्रसिद्धत्वमाख्यायते, इति तदागमनैपुण्यमवगमयति निबन्धुः कवेरिति॥

तर्केति–आगमानन्तरं तर्कः, स च तर्क्यन्ते–प्रमितिविषयीक्रियन्ते सिद्धान्ता यैस्ते तर्का इति योगस्वीकारे तत्तत्सिद्धान्तविचारपरशास्त्रवाची, तानि च शास्त्राणि दर्शननाम्नापि प्रसिद्धानि, दर्शनानि च षडेवेति केचित्, द्वादशेति परे-लोकायतिक-ऽऽर्हत-बौद्धचतुष्टय-सांख्य-योग-न्याय-वैशेषिक-पूर्वोत्तरमीमांसा भेदत इति।

तत्र शरीरपरिमाण आत्मेति आर्हतः समयः, अन्यथा–न्यूनातिरिक्तभावे शरीराफल्यमात्माफल्यं च स्यादिति, तत्र कौशलस्य निबन्धे उपयोगो यथा—

"शरीरमात्रमात्मानं, ये विदन्ति जयन्ति ते।
तच्चुम्बनेऽपि यज्जातः, सर्वाङ्गपुलकोऽस्य मे॥" [ ]

ये शरीरमात्रम्–शरीरपरिमाणम्, आत्मानं विदन्ति, ते जयन्ति–प्रामाणिकतया सर्वोत्कर्षेण वर्त्तन्ते, कुत एतदिति चेत्? अत्राह–यत् तच्चुम्बनेऽपि–तया सह मुखमात्रस्य स्पर्शेऽपि अस्य शरीरपरिमाणस्य, मे, सर्वाङ्गपुलको जातः, आत्मनः शरीरपरिमाणत्वाभावे येनाङ्गेन स्पर्शः कृतस्तत्रैव पुलकोद्गमो युक्तः, शरीरमात्रत्वे चात्मनः सर्वत्र व्याप्तत्वेन यौगपद्येन खिलात्मन आनन्दयोगादखिले शरीरे पुलको युज्यत एवेति भावः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विवक्षापूर्वाः शब्दास्तामेव विवक्षां सूचयेयुरिति बौद्धीयस्तर्कः । तत्र कौशलस्य काव्योपयोगो यथा—

"भवतु विदितं शब्दा वक्तुर्विवक्षितसूचकाः,
स्मरवति यतः कान्ते कान्तां बलात् परिचुम्बति ।
न न न म म मा मा मां स्प्राक्षीर्निषेधपरं वचो,
भवति शिथिले मानग्रन्थौ तदेव विधायकम्" [का. मी. ८·अ.]

'शब्दा वक्तुर्विवक्षितसूचका इति विदितं भवतु, यतः स्मरवति कान्ते कान्तां बलात् परिचुम्बति [सति], [यत्] मां न न न म म मा स्प्राक्षीः, [इति], निषेधपरं वचः, तदेव मानग्रन्थौ शिथिले [सति], विधायकं भवति' इत्यन्वयः। अयमाशयः–शब्दस्य सङ्केतितोऽर्थो यः कश्चिद् भवतु, किन्तु वक्तुर्यो विवक्षितोऽर्थस्तमेव स सूचयति, अन्यथा कामिना बलात् परिचुम्बिता कान्ता निषेधपरशब्दानपि वदति, किन्तु त एव विधायकत्वेन कथं परिणमन्ते ? निषेधार्थकनकारादेः वारंवारं कथनेन निषेधनिषेध एव पर्यवसानस्य युक्तत्वेन निषेधार्थकशब्दस्य विधायकत्वमिति मानिन्या हृदयगताभिलाषाप्रकटननैपुण्योपलक्षणायोपनिबद्ध्यमानमपि बौद्धसिद्धान्तपरिपुष्टतयोक्तमिति तन्नैपुण्यद्योतकम् ।

चार्वाकस्तु–'भूतेभ्य एव विलक्षणसंयोगाच्चैतन्यमुत्पद्यते, यथा मदशक्तिरहितानामपि द्रव्याणां विलक्षणसंयोगवशात्–कालदेशविशेषादिसंयोगवशाद् मदशक्तियुक्तत्वं भवति, तथैव भूतेभ्य एव तेषु अविद्यमानमपि चैतन्यं विलक्षणसंयोगाज्जायते' इति मन्यते । तदाह सः—

"तस्माद् भूतविशेषेभ्यो, यथा शुक्त-सुरादिकम् ।
तेभ्य एव तथा ज्ञानं, जायते व्यज्यतेऽथवा ॥" इति,
[शान्तरक्षितस्य तत्त्वसंग्रहे पृ. ५२०]

एवं चैतस्मिन् मतेऽनुशीलिते तस्य काव्योपयोगो यथा—

"बहुविधमिह साक्षिचिन्तकाः, प्रवदन्त्यन्यमितः कलेवरात् ।
अपि च सुदति ! ते सचिन्तकाः, प्रलयं यान्ति सदैव चिन्तया" ॥१॥
[का. मी. अ. ८ इति]

हे सुदति ! इह साक्षिचिन्तका, इतः कलेवराद् अन्यं बहुविधं प्रवदन्ति, ते सचिन्तका अपि सदैव चिन्तया प्रलयं यान्ति, अतश्च, शरीरादन्यं न किमपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्त्वमिति यथाभिलषितमाचरणीयं न कोऽपि साक्षी दण्डदायको वेत्यभिप्रायः। एतच्च चार्वाकमतस्यैवानुकूलम्।

सांख्यीयमते यथा—

"नासतो विद्यते भावो, नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥" [भ. गी. २-१६]

सांख्यमते सत्कार्यवादस्वीकारात् कारणात्मना अविद्यमानस्य वस्तुनो भावः—सत्ता-उत्पत्तिः प्राकट्यं नास्ति, सतश्चाभावः—सर्वथा तदसत्ता न भवति, नन्वेवं लोके भावाभावे व्यवहार एवोच्छिद्येतेति चेत्? अत्राह-उभयोरप्यनयोर्भावाऽभावयोरन्तः—तत्त्वम्, तत्त्वदर्शिभिः—वस्तुतत्त्वसमीक्षकैरेव—दृष्टः। अयमाशयः—भावाऽभावव्यवहारोऽवास्तविकाकृत्यादिपरिवर्त्तनकृत एव, कार्यात्म-कारणात्मान्यतररूपतया सर्वस्यैव वस्तुनः सर्वदा सत्त्वमिति।

तस्य नैपुण्येन बन्धो यथा—

"य एते यज्वानः प्रथितमसहो येऽप्यवनिपा,
मृगाक्ष्यो याश्चैताः कृतमपरसंसारकथया।
अमी ये दृश्यन्ते फलकुसुमनम्राश्च तरवो,
जगत्येवंरूपा विलसति मृदेषा भगवती" ॥ [ ]

अत्र सर्वेषां यज्व-राज-मृगाक्षी-तरु-गुल्मादीनां भौतिकत्वेन तत्र पार्थिवांशस्य सर्वेषु वैशेष्यात् सर्वेषां स्वकारणरूपत्वमेव वस्तुत इति सांख्यीयसत्कार्यवादानुगुण्येनोपनिबद्धम्।

न्याय-वैशेषिकीयस्तर्को यथा जगत्कर्तृत्वेनेश्वरसाधकान् प्रति स किंसामग्रीक ईश्वरः कर्तेति पूर्वः पक्षः, निरतिशयैश्वर्यस्य तस्य न प्राकृतपुरुषवच्च कार्यसिद्धये सामग्र्यपेक्षेत्युत्तरः पक्षः,

तस्य नैपुण्येन निबन्धो यथा—

"किमीहः किंकायः स खलु किमुपायस्त्रिभुवनम्,
किमाधारो धाता सृजति किमुपादान इति च।
अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः,
कुतर्कोऽयं काँश्चिन्मुखरयति मोहाय जगतः॥ [महिम्नस्तोत्रे-५]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स धाता किमीहः–किमभिसमीक्ष्य, केन प्रयोजनेनेत्यर्थः । किंकायः–कीदृशं शरीरमाश्रित्य, किमुपायः–केन सहकारिकारणेन, किमाधारः–क्व स्थितः, किमुपादानः-केन समवायिकारणेन, कस्मिन् समवायिकारणे वा, त्रिभुवनं सृजति ?, निरीहस्याशरीरस्य स्वभिन्नस्य कस्यचिदभावात्, सहकारिकारणान्तररहितस्य, त्रिभुवनस्यैव स्रष्टव्यतया निराधारस्य जगत्समवायिकारणरहितस्य च सृष्टिकर्तृत्वं कथमिति शङ्काशयः । कविरीश्वरमभिलक्ष्य कथयति–इति–पूर्वोक्तप्रकारेण, अतर्क्यैश्वर्ये त्वयि अनवसरदुःस्थस्तर्कः काँश्चित् हतधियो जगतो मोहाय मुखरयति । अयमाशयः–क्वचिद् वस्तुनि कारणान्तरासहकारेण कार्योत्पादनशक्तिमदृष्ट्वा हि त्वमेवमन्यत्र तर्कयसि किन्तु वस्तुशक्तेरीश्वरशक्तिर्विचित्रेति, ततस्तत्र तर्कावसर एव न । ईश्वरस्यानन्तशक्तित्वमित्थमुदयनाचार्येणोद्धृतम्—

"सर्वज्ञता तृप्तिरनादिबोधः, स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥"
[ कुसुमाञ्जलि० ६ स्त० ]

एवं च जगतः कर्त्तरि अनन्तातर्क्यैश्वर्यशालिनि, अतिपरिसीमितशक्तिकवस्तुदर्शनमूलस्तर्को न प्रवृत्तिमर्हतीति तदाशयः ॥

एवमेव वेदान्तागमनैपुण्यमिदमुदाहार्यं गोकुलनाथोपाध्यायस्यामृतोदयनाटकस्थम्—

"मयि परमविभौ विशुद्धसत्त्वे, यदिह शरीरतदात्मतामधास्त्वम् ।
निगमपुरुष ! तत्प्रतिक्रियायै, त्वयि निदधामि समस्तवस्त्वभेदम् ॥" इति ।

कुपित इव भक्त आह–हे निगमपुरुष ! त्वम्, इह–संसारे, परमविभौ विशुद्धसत्त्वे मयि यत् शरीरतदात्मताम्, अधाः, तत्प्रतिक्रियायै [ अहम् ] त्वयि समस्तवस्त्वभेदं निदधामि, अयमाशयः–अहं वस्तुतो विभुर्विशुद्धसत्त्वरूपश्चेति निश्चितम्, तत्र त्वया शरीरेण सह तादात्म्यबुद्धिः कारिता, इति महाननर्थः कृतः, परमविभोर्विशुद्धस्य परिच्छिन्नेनातिमलिनेन शरीरेण सह तादात्म्यं कथमुचितम् ? तच्चेत् त्वया कृतमेव तर्हि 'कृते च प्रतिकर्त्तव्यमेष धर्मः सनातनः' इति रीतिमनुसृत्य मयापि त्वयि न केवलं शरीराभेद एव; किन्तु समस्तवस्त्वभेदोऽप्यारोप्यत इति, शरीरेण सह जीवस्य तादात्म्यारोपो, ब्रह्मणि च जगतस्तद्विवर्त्तभूतस्यारोपितत्वमिति वेदान्तागमसिद्ध एवार्थो नैपुण्येनोपनिबद्धः । एवमन्यतर्केष्वपि नैपुण्यमुदाहर्तुं शक्यते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाट्येति–नाट्यशास्त्रं भरतादिप्रणीतम्, तन्निपुणतेत्थं निबद्धा—

"आतन्वत् सरसां स्वरूपरचनामानन्दिबिन्दूदयं,
भावग्राहि शुभप्रवेशकगुणं गम्भीरगर्भस्थिति।
उच्चैर्वृत्ति सपुष्करव्यतिकरं संसारविष्कम्भकं,
भिन्द्याद्वो भरतस्य भाषितमिव, ध्वान्तं पयो यामुनम् ॥"

[ ]

भरतस्य भाषितमिव यामुनं पयो वो ध्वान्तं भिन्द्यादिति सम्बन्धः। यामुनपयसो भरतवाक्यस्य च सामान्यधर्मवर्णनमुखेन साम्यमित्थम्–सरसां स्वरूपरचनाम् आनन्दिबिन्दूदयम् आतन्वत् भावग्राहि शुभप्रवेशकगुणम्, गम्भीरगर्भस्थिति, उच्चैर्वृत्ति, सपुष्करव्यतिकरम्, संसारविष्कम्भकं च, यामुनपयःपक्षे–सरसां–ह्रदानाम्, स्वरूपरचनाम्–आकृतिनिर्माणम्, आतन्वत्, आनन्दयति बिन्दूनां–शीकराणामुदयो यत्र तत्, प्रवाहवेगेन मध्ये मध्ये ह्रदानामाविर्भावो भवतीति स्वभावसिद्धम्; भावा इव ग्राहा यस्मिंस्तत्, भावस्य–हृदयधर्मस्य देवादिविषयकरत्यादेः, ग्राहि–आकर्षकं वा, यदवलोकनेन हृदये तद्विषयको भावः समुदेतीति भावः, शुभः प्रवेशकस्य-प्रवेशस्य स्वार्थे कः, गुणः–पापापहरण-मलशोधनस्वरूपो यस्य तत्; गंभीरा गर्भस्य–कुक्षेर्मध्यभागस्य स्थितिर्यास्मिंस्तत्, नद्याः कूलसमीपे एव चाञ्चल्यम, मध्यप्रदेशे जलस्य बाहुल्यात् स्थैर्यमेव वर्णनीयम्; उच्चैः–प्रवाहवेगादुच्चतरा, वृत्तिः–स्थितिर्यस्य तत्, उच्चैः–उत्कृष्टतरा वृत्तिः–पापापहरणरूपो व्यापारो वा यस्य तत्; पुष्करस्य–कमलस्य व्यतिकरेण–सम्बन्धेन शोभयेति यावत्, सहितम्; संसारस्य विष्कम्भकम्–अवरोधकम्, एतत्स्नानात् क्षीणपापतया मुक्तिप्राप्तेः, संसारस्य पुनःपुनर्जन्ममरणादेरवरोधो भवतीति भावः। भरतवाक्ये च स्वरूपरचना–वाक्यघटना सरसा भवति, बिन्दोः–नाट्याङ्गविशेषस्योदयः–उत्पत्तिः स्थितिरिति यावत्, आनन्ददायको भवति; भावस्य ग्रहणशीलमिति समं पूर्ववत्, भावाश्चात्र रत्यादय एव ये रसतामनापन्नाः; शुभप्रवेशकरूपो गुणो यत्र, अर्थोपक्षेपकत्वेनोक्तेषु विष्कम्भकादिपञ्चसु नाट्याङ्गेषु द्वितीयः प्रवेशकाख्यो गुणः, अङ्गमिति यावत्; गम्भीरा गर्भस्य—

"फलप्रधानोपायस्य प्रागुद्भिन्नस्य किञ्चन ॥
गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान् मुहुः ॥" [सा० द० ६-६५]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति लक्षणलक्षितस्य सन्धिविशेषस्य, स्थितिः–अवस्था यत्र तत्; उच्चैः–उत्कृष्टा वृत्तयो भारत्याद्या यत्र तत्; पुष्करस्य–मुखरूपसन्धेस्तूर्यवक्त्रस्य वाद्यविशेषस्य वा,

"मतङ्गजस्य हस्ताग्रे व्योम्नि खड्गफलेऽम्बुजे ।
जलभेषजयोस्तीर्थे तूर्यवक्त्रे च पुष्करम् ॥" [ शाश्वतकोशः ७९ ]

व्यतिकरेण–सम्मिश्रणेन सहितम्; सम्यक्साररूपो विष्कम्भो यत्र तत्, विष्कम्भाश्चादौ नाट्येऽर्थोपक्षेपकत्वेन प्रयुज्यते, तल्लक्षणं तु—

"वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥" [ ] इति,

अयमाशयः–भरतेनेमानि नाट्यशास्त्राङ्गानि लक्षितानि, तेन तद्वाक्यस्य तदुक्तत्वम्, यामुनपयसश्च तत्तद्गुणयोगः स्वाभाविक एवेत्युभयोः साम्यम् ।

अर्थेति–अर्थशास्त्रं द्विधा भिद्यते–मुद्रादिविषयकत्वेन राजनीतिविषयकत्वेन च, तत्र मुद्राविषयनैपुण्यं यथा—

"संशयितसर्वलोका, धृतबहुरूपा नियतमूल्या ।
राजादृताऽन्धयित्री, रूपाजीवेव मुद्रेयम् ॥" [ ]

इयं मुद्रा रूपाजीवेव–वेश्येव, कथंभूता? संशयितसर्वलोका धृतबहुरूपा नियतमूल्या, राजाहृता अन्धयित्री च; वेश्याऽपि संशयितसर्वलोका–संशयमारोपितः सर्वो लोको यया तथाभूता, संशयितः सर्वो लोकोऽपि वा यस्यां तथाभूता वा भवति; मुद्राऽपि तथैव, तद्विषयव्यवहारे सर्वो लोकः संशयित एव तिष्ठति; धृतानि बहूनि रूपाणि समयानुसारं कार्यानुसारं च यया तथाभूता वेश्या, मुद्राऽपि मानभेदेन बहुरूपा प्रसिद्धैव; नियतं मूल्यं पणो यस्यास्तथाभूता वेश्या, सा हि प्रतिकार्यमात्मनो मूल्यं नियतरूपेण गृह्णाति; मुद्रायाश्च मूल्यं नियतमेव; वेश्या राजाहृता विनोदाय, राजादरेणैव हि मुद्राणां मूल्यं स्थिरीक्रियत, इति साऽपि तथा; अन्धयित्री–कामोत्पादनेन विवेकादिनाशनपूर्वकमज्ञानरूपान्धकारजननी, मुद्राऽपि लोभोत्पादनेन तथाकार्यकारिण्येवेत्युभयोः साम्यम् ।

राजनीतिनैपुण्यं यथा—

"मद्भृत्यैः किल नाम पर्वतसुतो व्यापः प्रविष्टान्तरै-
रुद्युक्ताः स्वनियोगसाधनविधौ सिद्धार्थकाद्याः स्पशाः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृत्वा सम्प्रति कैतवेन कलहं मौर्येन्दुना राक्षसं,
भेत्स्यामि स्वमतेन भेदकुशलस्त्वेष प्रतीपं द्विषः ॥" [ मुद्रा०३।१३ ]

चाणक्यः स्वभवनगत एकान्ते चिन्तयन्नाह–पर्वतसुतः-मलयकेतुः, प्रविष्टान्तरैः–वशीकृतशत्रुहृदयैर्भागुरायणादिभिर्मद्भृत्यैः, व्याप्तः–अन्तर्बहिश्च पूर्णः, सिद्धार्थकाद्याः स्पशाः—चारपुरुषाः, स्वनियोगसाधनविधौ–शत्रोः प्रकृतिप्रकोपं प्रधानपुरुषभेदं च साधयितुम्, उद्युक्ताः-संलग्नाः, सम्प्रति मौर्येन्दुना–चन्द्रगुप्तेन सह, कैतवेन–कृतकं कलहं कृत्वा, प्रतीपं राक्षसं सम्प्रति मलयकेतोः प्रधानामात्यम्, द्विषः–मलयकेतोः, भेत्स्यामि–तयोर्विरोधं सम्पादयिष्यामीत्यर्थः, एष राक्षसः, स्वमतेन तु भेदकुशलः । अयमाशयः-एष राक्षसः स्वमतेन चाणक्यं चन्द्रगुप्ताद्भेत्स्यामीति जानातु, परं स न मया सह बुद्धिबले साम्यं यातुं योग्यो, मया सर्वं पूर्वमेव तथा प्रतिविहितं यथा तमेव मलयकेतोर्भेत्स्यामि, स च चन्द्रगुप्तान्मदीयं कृतकं कलहं ज्ञात्वा तावतैव कृतकृत्यम्मन्यो भविष्यतीति नाग्रे किमपि समुद्योगं विधास्यति, इत्थं च, मदीयं कार्यं सेत्स्यत्येवेति, अत्र च राजनीतिगूढविषयाः साधु निरूपिता एवेति । किञ्च–

"अणुरप्युपहन्ति विग्रहः प्रभुमन्तःप्रकृतिप्रकोपजः ।
अखिलं हि हिनस्ति भूधरं तरुशाखान्तनिघर्षजोऽनलः ॥"
[ कि० २ सर्गे ५१ ]

अन्तःप्रकृतिप्रकोपजः, अणुरपि विग्रहः, प्रभुं निहन्ति । हिः प्रसिद्धौ, प्रसिद्धमिदं यत्–तरुशाखान्तनिघर्षजोऽनलः, अखिलं भूधरं हिनस्ति इत्यन्वयः ।

कामेति–स्त्रीपुंभेदलक्षण-गुह्यक्रीडाप्रकार-वाजिकरणाद्यौषधादिवर्णनपरं शास्त्रं कामशास्त्रम् । तन्नैपुण्यं यथा–

"अधरे बिन्दुः कण्ठे मणिमाला, कुचयुगे शशप्लुतकम् ।
तव सूचयन्ति सुन्दरि ! कुसुमायुधशास्त्रपण्डितं रमणम् ॥"
[ कु० म० श्लो० ४०३ ]

अत्र 'सुन्दरि !' इत्यस्य स्थाने 'केतकि' इति पाठो मूलपुस्तके, हे केतकि ! [ सुन्दरि ! वा ] अधरे बिन्दुः–दन्तक्षतविशेषः, कण्ठे मणिमाला, सापि दन्तक्षतविशेष एव, कुचयुगे-स्तनयोः, शशप्लुतकम्, अयं नखक्षतविशेषः; तव रमणं–प्रियं कुसुमायुधशास्त्रपण्डितं सूचयन्ति । यथास्थानं चिह्नविशेषदानेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्य तच्छास्त्रपाण्डित्यं प्रकटयति । अत्र बिन्दु-मणिमाला-शशप्लुतकशब्दाः कामशास्त्रे इत्थं परिभाषिताः—

"मध्येऽधरं रदद्वन्द्वसंदंशेनाल्पखण्डनात् ।
जातं दशनविच्छेद्यं बिन्दुं वात्स्यायनोऽब्रवीत् ॥
रदनद्वयदंशेन मालाकाराश्च बिन्दवः ।
ऊर्वोर्ललाटे च कृता बिन्दुमालेति तां विदुः ॥
सिताग्रैर्दशनैः सर्वैर्युगपद् दंशना कृता ।
बिन्दुमालेव मुनिभिर्मणिमालेति सोदिता ॥" [ रतिरत्नदीपिका ]

शशप्लुतकं यथा—

"लेखाः स्तनास्ये विरला मयूरपदं नखाग्रैः सकलैर्निषक्ताः ।
शशप्लुतं पञ्च नखव्रणानि, सान्द्राणि तच्चूचुकचिह्नमाहुः ॥"
[ हरविजयमहाकाव्यटीकायां २७, ७० कस्यचित् ]

इत्थं च, अधरमवष्टभ्य तन्मध्ये राजदन्ताभ्यां–मध्यस्थिताभ्यां प्रधानदन्ताभ्यां निष्पादितः क्षतः–बिन्दुः, दन्तावलिभ्यां निष्पादिता दशनाङ्कावलिः–मणिमाला, चूचुकाग्रे सान्द्राणि–घनानि पञ्च नखव्रणानि–शशप्लुतकम्, इत्यवसेयम् । प्रकृते स्वरतिकलाचातुर्यज्ञापनाय कामिना बिन्दु-मणिमाले सर्वदृग्गोचरे अधरे गले च कृते, शशप्लुतं तु दीर्घकालास्थायि परोक्षेऽपि कामुकक्रीडास्मारकमिति कृतम् । तथा च तस्य कामशास्त्रनैपुण्यं स्पष्टमेव । तथा च—

"क्वचित् ताम्बूलाक्तः क्वचिदगुरुपङ्काङ्कमलिनः,
क्वचिच्चूर्णोद्गारी क्वचिदपि च सालक्तकपदः ।
वलीभङ्गाभोगैरलकपतितैः शीर्णकुसुमैः,
स्त्रियाः सर्वावस्थं कथयति रतं प्रच्छदपटः ॥" [ अमरुशतके १०८ ]

क्वचिद्–एकत्र, ताम्बूलाक्तः–ताम्बूलरसेन रञ्जितः, क्वचित्, अगुरुपङ्काङ्कमलिनः–अगुरोः पङ्कस्य अङ्केन–चिह्नेन मलिनः, क्वचित् चूर्णस्य–कर्पूरादिक्षोदस्य उद्गारो–गलनं यत्र तथाभूतः, क्वचिदपि सालक्तकपदः–अलक्तकेन–लाक्षया सहितम्, पदं–पादमुद्रा यत्र तथाभूतः, वलयः–प्रच्छदपटस्य संकोचाः, तासां भङ्गास्तरङ्गाः, ता एव वा भङ्गास्तेषामाभोगैः–विस्तारैः, अलकेभ्यः पतितैः, शीर्णानि–इतस्ततो विकीर्णानि, कुसुमानि, तैः, उपलक्षितः, प्रच्छदपटः–आस्तरणवस्त्रम्, स्त्रियाः सर्वावस्थं रतं कथयति–प्रकटयति । ताम्बूलाक्त इत्यनेन न्युब्जरतं यच्च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मार्जारकरणनाम्ना कामशास्त्रे प्रसिद्धम्, अगुरुपङ्काङ्कमलिन इत्यनेन पार्श्वरतं करिपदं नाम बन्धविशेषो वा, चूर्णोद्गारीत्यनेन धेनुकनामा बन्धः, सालक्तकपद इत्यनेनोत्थितावस्थं रतम्, वलीभङ्गाभोगैरित्यादिभिरतिशयोपमर्दपूर्वकं च रतं सूच्यते। तत्तद्बन्धानां लक्षणं रतिरहस्यादितोऽन्वेषणीयं जिज्ञासुभिः। एतादृशवर्णनेन वर्णयितुः कामशास्त्रनैपुण्यं ज्ञायते॥

योगेति–चित्तवृत्तिनिरोध-ध्यानादिनिरूपकं शास्त्रं योगशास्त्रम्, तन्नैपुण्यं यथा—

"पृथुशास्त्रकथाकन्थारोमन्थेन वृथाऽत्र किम्?।
अन्वेष्टव्यं प्रयत्नेन, तत्त्वज्ञैर्ज्योतिरान्तरम्॥" [चित्रभारते]

'अत्र वृथा पृथुशास्त्रकथाकन्थारोमन्थेन किम्?, तत्त्वज्ञैः आन्तरं ज्योतिः प्रयत्नेन अन्वेष्टव्यम्' इत्यन्वयः। विपुलशास्त्रकथासंभाराणां वारंवारमुद्गिरणनिगरणैः किमपि प्रयोजनं न सिद्ध्यति, तत्त्वज्ञैः, आन्तरं ज्योतिः–सर्वेषां हृदि प्रकाशमानं तेजः, अन्वेष्टव्यं–ध्यानादिना दर्शनीयम्, योगमार्गेणैवैतत् संभवतीति तन्नैपुण्यमत्र प्रकाशते॥

आदिशब्देनान्येष्वपि शास्त्रेषु नैपुण्यमाक्षिप्तम्। तत्रायुर्वेदशास्त्रनैपुण्यं यथा—

"अङ्गे चन्दनपङ्क-पङ्कज–बिसच्छेदावलीनां मुहु-
स्तापः शाप इवैष शोषणपटुः कम्पः सखीकम्पनः।
श्वासाः संवृतसारहाररुचयः संभिन्नचीनांशुका,
जातः प्रागनिदानवेदनमहारम्भः स तस्या ज्वरः॥"

[पद्यकादम्बरी]

'अङ्गे शाप इव एष तापः, चन्दनपङ्क-पङ्कज-बिसच्छेदावलीनाम्, मुहुः शोषणपटुः, एष कम्पः सखीकम्पनः, श्वासाः संभिन्नचीनांशुकाः संवृतसारहाररुचयः [इति] तस्याः स ज्वरः प्रागनिदानवेदनमहारम्भो जातः' इत्यन्वयः। कस्याश्चिन्नायिकाया विरहावस्थां वर्णयन् कविराह—

तस्याः, अङ्गे–सामस्त्येनाऽविकल एव शरीरे, न तु केषुचिदवयवेषु, शाप इव–देवगुर्वाद्याक्रोशजनित इव अतर्कितोपनतत्वात्, एष–प्रत्यक्षमनुभूयमानः, तापः, औष्ण्यं ज्वर इति यावत्, चन्दनपङ्कश्च पङ्कजानि च बिसच्छेदाश्च तेषामावलीनां–समूहानाम्, चन्दनपङ्कादिषु शरीरदाहशान्त्यर्थं मुहुर्मुहुर्दीयमा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नेष्वपि, तेषां शोषणे पटुः—समर्थः, कम्पः—शरीरे जायमानं कम्पनम्, सखीकम्पनः—सहचरीणां भीतिजनकः, कुत इयमित्थं कम्पते? किं भाव्यस्या इति शङ्कया सख्यो बिभ्यति, श्वासाः—नासिकावायवः, सम्भिन्नानि—विदारितानि, चीनांशुकानि—चीनदेशोद्भवसूक्ष्मवस्त्राणि यैस्तादृशाः, अथ च संवृताः—आच्छादिताः, सारहाराणां—सारभूतमुक्तामालानाम्, रुचयः—कान्तयो यैस्तथाभूताः, चीनांशुकं भेदयित्वा अन्तःप्रविशद्भिः श्वासैर्मुक्तामालानां रुचिराच्छाद्यते। एवं सर्वं दृष्ट्वा एतदवसीयते यत्, तस्याः स ज्वरः प्राक् अनिदानवेदनेन—निदानज्ञानाभावहेतोः, महारम्भः—अतिशयबद्धमूलः, जातः—सम्पन्नः। अस्या ज्वरस्य किं मूलकारणमित्यविज्ञाय चिकित्सार्थं चन्दनपङ्कादिलेपनं पङ्कजदलाद्याच्छादनं बिसच्छेदादिसन्निधापनमित्याद्या उपायाः कृताः, तेभ्यश्चायमधिकं दृढमूल एव जातः, न निवृत्त इति भावः। अन्योऽपि शारीरिको ज्वरो निदानमविज्ञायोपचर्यते चेत् तदा वातिके ज्वरे पैत्तिकज्वरोपयुक्तौषधप्रयोगे ज्वरस्य यथा वृद्धिसम्भावना भवति, तथा प्रियविरहजन्मा ज्वरः प्रियसंयोगातिरिक्तोपचारैर्न शाम्यति, प्रत्युत वर्धत एवेति भावः। अत्र चायुर्वेदविज्ञानेनैव ताप-कम्प-श्वासाधिक्याद्या ज्वरोपद्रवा विरहज्वरेऽप्युपनिबद्धास्तज्ज्ञाननैपुण्यं ध्वनयन्ति॥ तथा—

"यदतनुज्वरभाक् तनुते स्म सा, प्रियकथासरसीरसमज्जनम्।
सपदि तस्य चिरान्तरतापिनी, परिणतिर्विषमा समपद्यत॥"

[नैषधीये-४, २.]

दमयन्त्या विरहावस्थावर्णनमिदम्, 'अतनुज्वरभाक् सा यत् प्रियकथासरसीरसमज्जनं तनुते स्म, तस्य चिरान्तरतापिनी विषमा परिणतिः समपद्यत' इत्यन्वयः। अतनुः—महान् यो ज्वरः, तं भजति–धारयति, अथ च अतनोः—स्मरस्य, सम्बन्धी यो ज्वरः—तापः, तं भजति या सा दमयन्ती, यत् प्रियस्य—नलस्य, कथैव सरसी, तस्या रसः—विप्रलम्भशृंगाररूपः, जलं वा तत्र, मज्जनम्—अतिशयपरिशीलनम्, अथ च स्नानं तनुते स्म, तस्य चिरान्तरम्—अतिशयकालं यावत्, तापिनी—तापदायिनी, विषमा—दुःसहा, परिणतिः, अथ च चिरं बहुकालम्, आन्तरतापवती—हृदयदुःखदायिनी, विषमा परिणतिरिति सममुभयत्र समपद्यत। ज्वरयुक्तस्य कस्यचन सरोवरगाहनेन ज्वरस्य वृद्ध्या बहुकालार्थं दुःखं वर्धते, एवं स्मरज्वरयुक्ता सा यत् प्रियकथाया वारं वारं श्रवणं करोति स्म, तेन तद्विषयकवासनावृद्ध्या तापस्य चिरकालस्थायित्वमभूदिति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कवेराशयः । अत्र ज्वरवतः स्नानं प्रतिकूलमित्यायुर्वेदसिद्धान्तः स्वानुकूल्येनोपनिबद्धः ॥

एवं ज्योतिःशास्त्रनैपुण्यं यथा—

"द्यामालोकयतां कलाः कलयतां, छायां समाचिन्वतां,
क्लेशः केवलमङ्गुलीर्गणयतां मौहूर्त्तिकानामयम् ।
धन्या सा रजनी तदेव सुदिनं, पुण्यः स एव क्षणो,
यत्राज्ञातचरः प्रियानयनयोः सीमानमेति प्रियः ॥" [ विद्यानन्दस्य ]

शोभनमुहूर्त्तज्ञानाय द्यामालोकयताम्, एतेन नक्षत्रज्ञानं सूच्यते, कलाः—कालावयवरूपा नाडिकाः, कलयतां—गणयताम्, छायां—शङ्कुपादादिजनितामातपाभावरूपां, दिवसे समयज्ञानाय, समाचिन्वतां—पर्यालोचयताम्, अङ्गुलीर्गणयताम्—अङ्गुल्याः पर्वसु नक्षत्रादीनां समुचितां संख्यां ज्ञातुं गणनामाचरताम्, मौहूर्त्तिकानां—मुहूर्त्तावेदकानाम्, अयं-पूर्वोक्तप्रकारः, केवलं क्लेश एव, न तेन शुभो मुहूर्त्तः प्रत्यक्षीकर्तुं शक्य इत्यर्थः । तर्हि काऽन्या विधेति चेदत्राह—सा रजनी धन्या, तदेव सुदिनम्, स एव क्षणः पुण्यः, यत्र प्रियः, अज्ञातचरः—पूर्वमज्ञातागमनसमयः सन्, प्रियानयनयोः सीमानमेति । अत्र प्रियस्याकस्मिकमागमनं यत्र रात्रौ दिवसे क्षणे वा भवति, स एव समयः सर्वथा शुभः, तदर्थं मुहूर्त्तान्तरपर्यालोचना व्यर्थेति विवक्षया मौहूर्त्तिकाचारस्य वैयर्थ्योक्तिस्तच्छास्त्रपरिशीलनं गमयति ॥

गजलक्षणनैपुण्यं यथा—

"कर्णाभ्यर्णविकीर्णचामरमरुद्विस्तीर्णनिःश्वासवान्,
शङ्खच्छत्रविराजिराज्यविभवद्वेषी निलीनेक्षणः ।
स्मृत्वा राघवकुञ्जरः प्रियतमामेकाकिनीं कानने,
संत्यक्तां चिरमुक्तभोगकवलं क्लेशोष्मणा शुष्यति ॥"

[ कनकजानकी ]

राघवकुञ्जर एकाकिनीं प्रियतमां कानने संत्यक्तां स्मृत्वा चिरमुक्तभोगकवलं क्लेशोष्मणा शुष्यति । कीदृशो राघवकुञ्जरः । तत्राह—कर्णाभ्यर्णविकीर्णचामरमरुद्विस्तीर्णनिःश्वासवान्, शङ्खच्छत्रविराजिराज्यविभवद्वेषी, निलीनेक्षणः, राज्यस्थितस्य रामस्य सीतापरीवादश्रवणेन तां प्रजानुरञ्जनाय कानने संत्यज्य तस्या

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वृथापरीवाद-तज्जन्यतत्त्यागोभयकृते परितप्यमानस्य वर्णनमिदम्, राघवः कुञ्जर इव, एकाकिनीं-निःसहायाम्, प्रियतमाम्-अतिशयप्रेमास्पदभूतां सीताम्, अथ च करिणीं, कानने संत्यक्तां-वनं प्रेषिताम्, अथ च वने यूथभ्रष्टाम्, स्मृत्वा, चिराय मुक्तो भोगः-राज्यविभवास्वाद एव कवलो यस्मिन् तद् यथा स्यात् तथा, क्लेश एव ऊष्मा तेन शुष्यति-अन्तर्दह्यते। कथंभूतो राघवकुञ्जरः? कर्णयोरभ्यर्णे-समीपे, विकीर्णः, चामरयोर्यो मरुत्-वायुः, तेन विस्तीर्णो निःश्वासो यस्य सः, रामस्य राज्ञः कर्णयोः पार्श्वे चामरवीजनेन जायमानेन मरुता तस्य सीतावियोगजन्यो निःश्वासो विस्तीर्यते; शङ्खच्छत्राभ्यां विराजमानो यो राज्यविभवस्तं द्वेष्टीति तथा, दुःखितया स राज्यविभवमपि नाद्रियते; निलीने-निमीलिते ईक्षणे यस्य सः, दुःखात् कमपि न पश्यति नेत्रे निमील्य तिष्ठति; गजेऽपि पूर्वोक्तं विशेषणत्रयं तेनैव रूपेण घटते, तस्यापि कर्णयोः समीपे भ्रमरादिबाधावारणाय चामरादिवीजने प्रसरता मरुता निःश्वासवायुर्वर्धत एव, करिणी वियोगदुःखादसौ येन राज्यविभवेन पूर्वमानन्दित आसीत् तमेव द्वेष्टि, नेत्रे निमील्य स्थानं च तस्यापि स्वाभाविकमेव, विशेषतो मरणावस्थायाम्, दुःखेन च गजो भोजनादिकं त्यजति, इति यद् गजशास्त्रेण विज्ञातं तदेव रूपकेण राघवे समुपनिबद्धमिहेति ॥

तुरगशास्त्रनैपुण्यं यथा—

"आवर्त्तशोभः पृथुसत्त्वराशिः फेनावदातः पवनोरुवेगः।
गम्भीरघोषोऽद्रिविमर्दखेदादश्वाकृतिं कर्तुमिवोद्यतोऽब्धिः ॥"

[ अमृततरङ्गकाव्ये ]

आवर्त्तेन-पानीयभ्रमेण शोभते, अश्वपक्षे आवर्त्तेन-शिरःप्रदेशस्थितेन रोमावर्त्तेन शोभत इति। पृथूनां-महतां सत्त्वानां राशिः-समूहभूतः [आधारभूतः,] पृथोः-महतः सत्त्वस्य-बलस्य राशिरित्यश्वपक्षे, फेनेन जलोत्थितेन अवदातः-शुभ्रः, अथ च फेनवदवदातोऽश्वः; पवनेन वायुना [कारणेन] उरुः-महान् वेगो यस्य, अश्वे पवनवत् उरुर्वेगो यस्य; गंभीरो घोषः-शब्दो यस्येत्युभयपक्षे, एवंभूतोऽब्धिः, अद्रिविमर्दखेदात्-पर्वतघातपरिश्रमात्, अश्वाकृतिम्-अश्वानुकरणं कर्तुमुद्यत एवेति संक्षिप्तार्थः। अश्वस्याब्धेश्च सामान्येन विशेषणानि व्याख्यातान्येव, तथा चानुकरणमब्धेः प्रतीयते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रत्नपरीक्षानैपुण्यं यथा—

"द्वौ वज्रवर्णौ जगतीपतीनां, सद्भिः प्रदिष्टौ न तु सार्वजन्यौ।
यः स्याज्जपा-विद्रुमभङ्गशोणो यो वा हरिद्रारससन्निकाशः॥" [ ]

'सद्भिः द्वौ वज्रवर्णौ जगतीपतीनां प्रदिष्टौ न तु सार्वजन्यौ प्रदिष्टौ, [कौ तावित्यत्राह–] यः जपा-विद्रुमभङ्गशोणः स्यात्, वा यः हरिद्रारससन्निकाशः स्यात्' इत्यन्वयः। सद्भिः–रत्नपरीक्षानिपुणैः, द्वौ वज्रवर्णौ–वज्रस्य-हीरकादेर्वर्णौ-रूपे, जगतीपतीनां–राज्ञां कृते, प्रदिष्टौ–शुभप्रदतया धार्यत्वेन व्यवस्थापितौ, किन्तु तौ सार्वजन्यौ–सर्वजनीनौ सर्वसाधारणमनुष्यहितौ, अथवा सर्वसाधारण-प्राप्यौ, न प्रदिष्टौ, तौ चेमौ–यो जपाभङ्गशोणो विद्रुमभङ्गशोणश्च स्यात्-जपा-पुष्पखण्डवद् रक्तवर्णो वा, विद्रुमखण्डवद् रक्तवर्णो वा, अथ च हरिद्राया रसेन समानवर्णः। अत्र रत्नविशेषज्ञ एव तेषां तारतम्यं फलं च जानीयादिति तन्नै-पुण्यमत्रापेक्षितमेव॥

धातूनां हिरण्यादिपदार्थानां परिचयादौ नैपुण्यं यथा—

"नखदलितहरिद्राग्रन्थिगौरे शरीरे,
स्फुरति विरहजन्मा कोऽप्ययं पाण्डुभावः।
बलवति सति यस्मिन् सार्धमावर्त्य हेम्ना,
रजतमिव मृगाक्ष्याः कल्पितान्यङ्गकानि॥"

[विद्धशालभञ्जिका अ० ३ श्लो० १८]

नायक आह–मृगाक्ष्याः–मृगाङ्कावलीनाम्न्या नायिकायाः, नखदलितहरिद्रा-ग्रन्थिगौरे शरीरे, अयं विरहजन्मा–अभिलाषविषयप्रियतमसंगमाभावसंभूतः, कोऽपि पाण्डुभावः, स्फुरति–चन्द्रिकायामपि चकास्ति, यस्मिन् बलवति सति, हेम्ना सार्धं रजतम्, आवर्त्य कल्पितानीव अङ्गानि प्रतिभान्तीति शेषः। अत्र नखेन हरिद्राया दलने या स्वाभाविकी गौरतोदेति सा हेम्नो वर्णेन समा, विरह-जन्मा धवलिमा च रजतेन, उभयोश्चैकत्र विरहिवनिताङ्गे संमेलनाद् धातुद्वय-मिश्रणेनेवाङ्गकल्पनेति प्रतीतिरिति वर्णयितुराशयः। स च धातुप्रकृति-विकृति-तन्मेलनादिविशेषज्ञानं विना वर्णयितुमशक्यः, अत्र दरदलितेत्यपि पाठो दृश्यते॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्यूते निपुणतेयम्—

"यत्रानेके क्वचिदपि गृहे तत्र तिष्ठत्यथैको,
यत्राऽप्येकस्तदनु बहवस्तत्र नैकोऽपि चान्ते।
इत्थं नेयौ रजनि-दिवसौ तोलयन् द्वाविवाक्षौ,
कालः काल्या सह बहुकलः क्रीडति प्राणिशारैः॥"

[ चन्द्रकस्य ]

'यत्र क्वचिदपि गृहे अनेके [ प्राणिनः, शारा वा सन्ति ] अथ तत्रैकः, तिष्ठति, यत्रापि [ गृहे पूर्वम् ] एकः, तदनु बहवः, तत्र अन्ते एकोऽपि न, इत्थं द्वौ अक्षौ इव नेयौ रजनि-दिवसौ तोलयन् बहुकलः कालः काल्या सह क्रीडति' इत्यन्वयः। यथा–अक्षक्रीडायां कौचिद् द्वाभ्यामक्षाभ्यां क्रीडन्तौ तत्रत्यान् शारान् अक्षपातानुसारिसंख्यया गृहाद् गृहान्तरं–कोष्ठात् कोष्ठान्तरं चालयतः, तत्र यथासंभवं यत्र गृहेऽनेके शाराः प्रसङ्गादागताः, तत्रैकस्तिष्ठति, कदाचिद् यत्र गृहे एक एव शारः पूर्वमासीत् क्रमेणान्येऽपि समायातास्तत्राऽपि कदाचित् शून्यमेव गृहं तिष्ठति; तथा सृष्टि-स्थिति-संहाररूपां क्रीडामाचरन् काल्या सहितः कालः–रुद्ररूपः, अक्षस्थानीयौ रजनी-दिवसौ तोलयन् हस्तेन परिवर्तयन्निव, प्राणिरूपैः शारैः पूर्वोक्तदिशा क्रीडति, यथा यत्र क्वचन गृहे बहवः प्राणिनः पूर्वमासन्, तत्र कालवशादेक एव तिष्ठति, यत्र गृहे पूर्वमेक एवाऽऽसीत् तदनु तत्सन्ततिवृद्ध्या बहवो जातास्तत्र कदाचिदन्ते एकोऽपि न भवति, इति अत्र सृष्टि-स्थिति-संहारादिक्रियायामक्षक्रीडासाम्यं साधूपनिबद्धमिति तज्ज्ञान-साध्यमेव॥

इन्द्रजालनैपुण्यं यथा—

"एष ब्रह्मा सरोजे रजनिकरकलाशेखरः शङ्करोऽयं,
दोर्भिर्दैत्यान्तकोऽसौ सधनुरसिगदाचक्रचिह्नैश्चतुर्भिः।
एषोऽप्यैरावणस्थस्त्रिदशपतिरपि देवि! देवास्तथान्ये,
नृत्यन्ति व्योम्नि चैताश्चलचरणरणन्नूपुरा दिव्यनार्यः॥

[ र० अं० ४ श्लो० ११ ]"

कथंचिद् रत्नावलीसम्प्रयोगं साधयितुकामो नायकोऽन्तःपुरे पट्टराज्या-मोहनायैन्द्रजालिकमाहूतवान्, स प्रारम्भे स्वीयं नैपुण्यं दर्शयितुं सर्वान् देवान् नानास्थानस्थितानपि प्रत्यक्षतया दर्शयन्नाह—हे देवि! सरोजे एष ब्रह्मा, अयं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रजनिकरकलाशेखरः शङ्करः, असौ सधनुरसिगदाचक्रचिह्नैश्चतुर्भिर्दोर्भिरुपलक्षितो दैत्यान्तकः–विष्णुः, एष ऐरावणस्थस्त्रिदशपतिरपि, तथा अन्ये देवा अपि दृश्यन्ते, एताश्च चलच्चरणरणन्नूपुरा दिव्यनार्यो नृत्यन्ति, एतत् सर्वं पश्येति भावः ॥

चित्रे–चित्रणकर्मणि नैपुण्यं यथा—

"अतथ्यान्यपि तथ्यानि, दर्शयन्ति विचक्षणाः ।
सम-निम्नोन्नतानीव, चित्रकर्मविदो जनाः ॥" [ व्यासस्य ]

विचक्षणाः—वाग्योगपटवः, अतथ्यान्यपि तथ्यानि दर्शयन्ति, तत्र दृष्टान्तमाह– चित्रकर्मविदः–आलेख्यकार्यकुशलाः, जनाः सम-निम्नोन्नतानीव, अयं भावः–यथा चित्रकर्तरि एकस्मिन्नेव फलके तूलिकाचेष्टयैव समतल-जलशयादिनिम्नतल-भूधराद्युन्नतस्थलादि दर्शयन्ति तथैव विचक्षणा अतथ्यान्यपि तथ्यानीव दर्शयन्तीति । अत्र 'समे निम्नोन्नतानि' इत्यपि पाठः, तत्र समे-समतलरूपे चित्रफलके निम्नोन्नतानीवेत्येवं व्याख्येयम् ॥

धनुर्वेदनैपुण्यमिदम्—

"आर्यस्यास्त्रघनौघलाघववती सन्धानसम्बन्धिनी,
स्थाणुस्थानकसौष्ठवप्रणयिनी चित्रक्रियालङ्कृतिः ।
निःस्पन्देन मयाऽतिविस्मयवती सत्यं स्थितप्रत्यया,
संहारे खर-दूषण-त्रिशिरसामेषैव दृष्टा स्थितिः ॥" [ कनकजानकी ]

आर्यस्य–ज्येष्ठस्य दाशरथेः, खरश्च दूषणश्च त्रिशिराश्चैतेषां संहारे–नाशने, अस्त्राणां घनो–निबिडो य ओघः–प्रवाहः प्रक्षेपणपरम्परा, तत्र यल्लाघवं–क्षिप्रकारित्वं तद्वती–तेन युक्ता, सन्धानं–बाणाद्यस्त्राणां लक्ष्याभिमुखीकरणं, तत्सम्बन्धिनी–तद्विषया, स्थाणुवत्–अचलवत्, यत् स्थानकं–स्थितिविशेषः, तत्सौष्ठवस्य प्रणयिनी–परिचिता, चित्रा–अद्भुता या क्रिया–प्रहारव्यापारः, सा अलङ्कृतिः–शोभाधायिका यस्याः सा, अतिविस्मयमयी–अत्याश्चर्यबहुला, स्थितः–दृढः, प्रत्ययो–विश्वासः शत्रुविजयविषयको यस्यां सा, एषैव–पूर्ववर्णितानतिरिक्ता स्थितिः, मया–लक्ष्मणेन, सत्यं दृष्टा–अवलोकिता । अत्र अस्त्रलाघवं सन्धानं स्थाणुवत् स्थानकं–निश्चलत्वं स्थितप्रत्ययत्वम्–आत्मनि विश्वस्तत्वमेते पदार्था धनुर्वेदप्रसिद्धाः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**काव्येषु महाकविप्रणीतेषु निपुणत्वं तत्त्ववेदित्वं व्युत्पत्तिः। लोकादिनिपुणतासंस्कृतप्रतिभो हि तदनतिक्रमेण काव्यमुपनिबध्नाति ॥ ८ ॥**

---

काव्येष्विति–श्रव्यदृश्यभेदभिन्नेषु नानाभाषानिबद्धेषु, येषु केषुचिदात्म-परनिर्मितेषु काव्यपदवाच्येषु गद्येषु पद्यचयेषु वा निपुणतामात्रेण न कृतार्थतेति द्योतयितुमाह–**महाकविप्रणीतेष्विति**–तथा च तत्तन्महाकविव्यवहारदर्शनसमुत्थिता प्रौढिरप्यनायाससमासादनीयेत्यपरमनुकूलमित्यावेदितं भवति, तथा च पूर्वोक्तग्रन्थेषु शास्त्रेषु काव्येषु च निपुणता व्युत्पत्तिरित्यन्वयः । उक्तलोकादिनैपुण्यस्य कारणविधयोपयोगो नेष्टोऽपि तु संस्कारकतयेति द्योतयितुमाह–**लोकादिनिपुणतासंस्कृतप्रतिभो** हीत्यादिना, लोकादिनिपुणतया संस्कृता–भूषिता प्रतिभा यस्य सः, यतस्तेषां लोकादीनामनतिक्रमेण–तत्तन्मर्यादामनुल्लङ्घयन् काव्यमुपनिबध्नाति–निर्माति, अतस्तेषु निपुणताऽऽवश्यकीति समुदितार्थः ॥

इत्थमात्ममते व्युत्पत्तिकारणस्वरूपव्याख्यानं व्याख्याय परैरुक्तानपि व्युत्पत्त्यादिहेतून् संगृह्णन्नाह विवेके–

"न स शब्दो न तद्वाच्यं, न स न्यायो न सा कला ।
जायते यन्न काव्याङ्गमहो भारो गुरुः कवेः ॥" [ भामहालं० ५, ४ ]

यत् काव्याङ्गं न जायते स शब्दो न, तद् वाच्यं न, स न्यायो न, सा कला न। निगमयति–अहो कवेर्गुरुर्भारः, यतो हि तेन काव्यं साङ्गं कर्तुमीहता समस्त एव वाङ्मयः परिशीलनीय इति महान् भारः। उक्तं हि रुद्रटेनापि काव्यालंकारे–

"विस्तरतस्तु किमन्यत् तत इह वाच्यं न वाचकं लोके ।
न भवति यत् काव्याङ्गं सर्वज्ञत्वं ततोऽन्यैषा ॥" [ १–१९ ]

विस्तरतः–व्युत्पत्तिसम्बन्धिनो विस्तरात्, किम्–किमपि न साध्यम्, ततोऽन्यद् वाच्यं वाचकं वा लोके न यत् काव्याङ्गं न भवति । ततो हेतोः, एषा–व्युत्पत्तिः, अन्या–द्वितीया, सर्वज्ञत्वं नाम–"उद्देश्य-प्रतिनिर्देश्ययोरैक्यमापादयत् सर्वनाम क्रमेण तत्तल्लिङ्गभाग् भवति" इति न्यायाद् अन्यैषेति स्त्रीलिङ्गमपि सर्वज्ञत्वमित्यनेनान्वेति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अभ्यासं व्याचष्टे—

**काव्यविच्छिक्षया पुनः पुनः प्रवृत्तिरभ्यासः ॥ ९ ॥**

काव्यं कर्तुं जानन्ति विचारयन्ति वा ये ते काव्यविदः कवि-

---

एवमेव राजशेखरेणापि काव्यमीमांसायामुक्तम्—

"बहुज्ञता व्युत्पत्तिः" इत्याचार्याः, सर्वतोदिक्का हि कविवाचः, तदुक्तम्—

"प्रसरति किमपि कथञ्चन, नाभ्यस्ते गोचरे वचः कस्य ।
इदमेव तत् कवित्वं यद् वाचः सर्वतोदिक्काः" ॥ [ ]

'उचितानुचितविवेको व्युत्पत्तिः' इति यायावरीयः। इति [ का० मी० अ० ५ ] अभ्यस्ते गोचरे कस्य किमपि वचः कथञ्चन न प्रसरति। तत् कवित्वम्, इदमेव, यत् सर्वतोदिक्का वाचः, बहुशः परिशीलिते ह्यर्थे सर्वस्यापि वचः कथञ्चन प्रवर्त्तत एव, सर्वदिक्षु—सर्वस्मिन् विषये, प्रसरणशालि वाग्मित्वमेव हि कवित्वमित्यर्थः।

काव्यालंकारसूत्रवृत्तौ वामनेनापि "लोको विद्या प्रकीर्णं च काव्याङ्गानि" [ अधि १, अ. ३, सू–१ ] इति सूत्रेण संक्षिप्य लोकवृत्तस्य विद्यानां तदन्येषां च प्रकीर्णकशब्दवाच्यानां सर्वेषामर्थानां काव्याङ्गत्वमभिधाय परैरूनविंशत्या सूत्रैर्व्याख्यातम्।

अभिनवगुप्ताचार्येण च [ लोचने पृ० १३८ नि० सा० मुद्रिते ]

"समस्तवस्तुपौर्वापर्यपरामर्शकौशलं व्युत्पत्तिः" इत्युक्तम्। सर्वथा हि व्युत्प-त्युत्पत्तये यथासम्भवमशेषविषज्ञानमपेक्षितमिति समुदितार्थः, तत्सुष्टूक्तम्–न स शब्द इत्यादिना ॥ ८ ॥

प्रतिभासंस्कारककारणद्वयमध्ये प्रथमा व्युत्पत्तिर्निरूपिता, अथ क्रमप्राप्तं द्वितीयं कारणम्–**अभ्यासं** व्याचष्टे–विविच्य कथयति। सूत्रस्थं **काव्यविच्छिक्ष-येति** पदं द्विधा व्याख्याति विदेरावृत्त्याऽर्थद्वयस्येष्टत्वात्–**काव्यं कर्तुं जानन्ति विचारयन्ति** वेत्यादि। कर्तुं जानन्तीत्यस्य विचारयन्तीत्यस्य च निकृष्टमर्थं सहै-वाह–**कवि-सहृदयाः** इति–कवयः कर्तुं जानन्ति, सहृदयाश्च विचारयन्तीति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सहृदयाः, वेत्तेर्विन्तेश्चावृत्त्या रूपम्, तेषां शिक्षया वक्ष्यमाणलक्षणया, काव्य एव पौनःपुन्येन प्रवृत्तिरभ्यासः। अभ्यासंस्कृता हि प्रतिभा काव्यामृतकामधेनुर्भवति, यदाहुः—**

**"अभ्यासो हि कर्मसु कौशलमावहति, नहि सकृन्निपतितमात्रेणोदबिन्दुरपि ग्रावणि निम्नतामादधाति" [ ] इति ॥ ९ ॥**

---

कथमिमावर्थौ? एकदोच्चरितस्यैकार्थमात्रबोधकत्वौचित्यादत आह–**वेत्तेर्विन्तेश्चावृत्त्या रूपमिति**–"विदक् ज्ञाने" इति ज्ञानार्थस्य वेत्तेः "विदिंप् विचारणे" इति विचारार्थस्य विन्तेश्च तन्त्रेण निर्देशः, आवृत्त्या च बोद्धृणां द्विधाऽर्थबोध इति भावः। **तेषां** काव्यविदामुभयेषाम्, **शिक्षयेति** समासनिरूपणम्। शिक्षा चाग्रिमसूत्रे लक्षयिष्यत इत्याह–**वक्ष्यमाणलक्षणयेति**। **पुनः पुनः प्रवृत्तिरिति** सौत्राणि पदानि शेषपूरणेन व्याख्याति–**काव्य एवेति**–तेषां शिक्षयाऽन्यत्र पौनःपुन्येन प्रवृत्तिरपि नाभ्यासपदेनेह गृह्यते इति बोधयितुमेवकारः। अयमत्र समुदितार्थः–भावनात्मकबुद्ध्या विभाव्य सरसेन वाक्सन्दर्भेन प्रतिपाद्यमर्थं प्रतिपादयतां काव्यकर्तृणां काव्यार्थानुभवशीलानां सदसद्विवेचनचतुराणां सहृदयानां चोपदेशेन तद्विषयिका पुनः पुनः प्रवृत्तिरेवाभ्यासपदवाच्या प्रतिभासंस्कारकारणमिति। ननु व्युत्पत्त्यैव पूर्वोक्तरूपया सम्यक् संस्कृता भविष्यति प्रतिभा, कृतमभ्यासेनेति चेदत्राह–**अभ्याससंस्कृता हीत्यादि**–काव्यामृतं प्रसवितुं कामधेनुरिव अभ्याससंस्कृता प्रतिभा जायते, यथाऽमृतप्रदाने कामधेनुर्नितरां प्रसिद्धा उदारा च तथा अभ्याससंस्कृता प्रतिभाऽपि यथारुचि यथासमयमतिशयेन काव्यमुत्पादयत्यवबोधयति च, काव्यस्यामृतत्वकथनेन नितान्तं स्पृहणीयता, तत्परिशीलनप्रवृत्तानां च प्रवृत्त्युपायभूता प्रीतिः प्रकाश्यते। स्वोक्तेऽर्थे प्राचां संवादं दर्शयति–**यदाहुरिति**। **अभ्यासो हीति**–हिः पूर्ववाक्योक्तार्थे हेतुतां दर्शयति–यतोऽभ्यासः, **कर्मसु** सर्वेषु कार्येषु तत्तद्विषये पौनःपुन्येन प्रवृत्तिस्तत्र तत्र कर्मसु, **कौशलं** निपुणताम्, **आदधाति** जनयति। तदभावे फलाभावं दृष्टान्तेनाह–**नहि सकृन्निपतितमात्रेणेति**–सकृद्-एकवारमेव, निपतितं–निपतनं, तदेव तन्मात्रम्, तेनेति विग्रहः। अयमाशयः–'मृदुना सलिलेन खन्यमानान्यवघृष्यन्ति गिरेरपि स्थलानि इत्युक्तरीत्या सततजलपातेन ग्रावण्यपि निम्नता संजायते, किन्तु सकृज्जलनिपातेन न जायते, हि यतः, सकृन्निपतितमात्रेणोदकबिन्दुरपि ग्रावणि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शिक्षयेत्युक्तमिति शिक्षां लक्षयति—

**सतोऽप्यनिबन्धोऽसतोऽपि निबन्धो नियमच्छाया-द्युपजीवनादयश्च शिक्षाः ॥ १० ॥**

निम्नतां न आदधाति, अत्राऽपिशब्दस्तस्य निम्नताऽऽधानहेतुत्वं ख्यापयति, अतो विनाऽभ्यासं कर्मसु कौशलं नोत्पद्यत इति ॥ ९ ॥

अग्रिमसूत्रस्यावतरणिकामाह—**शिक्षयेत्युक्तमिति शिक्षां लक्षयतीति**—पूर्वसूत्रे काव्यविदां शिक्षया पुनः पुनः प्रवृत्तिरित्यभ्यासलक्षणत्वेन प्रतिपादित-मतः शिक्षानिरूपणं प्राप्तावसरमिति तां लक्षणेन प्रतिपादयतीत्यर्थः ।

इतरव्यावृत्ततया बोधनं लक्षधात्वर्थः, लक्षणं हि स्वरूपज्ञापनाय विधीयते, तच्च द्विविधं—स्वरूपलक्षणं तटस्थलक्षणं च, तत्र पृथिव्या गन्धवत्त्वं प्रथमम्, ब्रह्मणो जगत्कर्तृत्वादि द्वितीयम्, लक्ष्येऽविद्यमानं सद् यद् व्यावर्तयति तत् तटस्थलक्षणम्, अत्र हि ब्रह्मणो निर्धर्मत्वान्न तत्र जगत्कर्तृत्वादि विद्यमानमथापि व्यावर्तयति तत् । तत्र शिक्षायाः स्वरूपलक्षणमुच्यते—**सतोऽप्यनिबन्ध** इत्या-दिना, स्वरूपलक्षणमित्यस्य स्वं—लिलक्षयिषितं वस्तु, रूप्यते—परिचयगोचरता-मानीयते—इतरव्यावृत्तत्वप्रकारकज्ञानविषयीक्रियतेऽनेनेति स्वरूपम्, तच्च लक्षण-मित्यर्थः ।

काव्यकरण-तद्विवेकज्ञो हि सिद्धकविः सहृदयश्चाचार्यः स्वविनेयस्य प्रतिभा-सम्पन्नस्य समधिगतपद-वाक्य-प्रमाण-च्छन्दः-शास्त्रस्यापि कविसमयानभिज्ञत्वे काव्यकरणे सारल्यं तदनुशीलने चामन्दानन्दानुभवो न स्यादिति कविसमय-ज्ञानाय तत्स्वरूपं शिक्षयितुं शिक्षास्वरूपान्तर्भावमाह तस्य—**सतोऽप्यनिबन्ध** इत्यादिना ।

काव्यानुशासने वाग्भटेनापि "तत्र कविसमये सतामपि भावानां केषाञ्चि-दनिबन्धः" [ १ अध्याये ] इत्यादिना एतत्सूत्रप्रतिपाद्यस्य विषयस्य कविसमय-त्वमुक्तम् । अलौकिकमशास्त्रीयमपि यत् किमपि वस्तु कवय आदरादुपनिब-ध्नन्ति स कविसमय इत्युच्यते, एतच्च लोकशास्त्रविरोधेऽपि कविसम्प्रदायसिद्ध-त्वान्न दोषायापि तु गुणायैव । किञ्च कवीनां करबदरवदखिलं विश्वं विलोकयतां क्वचित् समये देशे वा तादृशाचारस्यैव लोक-शास्त्रानुमोदितत्वमवलोक्यैव तथा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सतोऽपि जाति-द्रव्य-गुण-क्रियादेरनिबन्धनम् । असतोऽपि जात्यादेरेव निबन्धनम् । नियमोऽतिप्रसक्तस्य जात्यादेरेवैकत्राव-**

---

व्यवहार इति कविसमयान्तर्गतत्वाल्लोक-शास्त्रसिद्धत्वानुमानमपि तत्र कर्तुं शक्यमेव, सम्प्रति वस्तुस्थितेर्जातेऽपि विपर्यये तदुक्तीरनुसृत्य तथा वर्णनमेवोचितं, न तु तद्विपरीतम्। तदुक्तम्–"पूर्वे हि विद्वांसः सहस्रशाखं साङ्गं च वेदमवगाह्य शास्त्राणि चावबुध्य देशान्तराणि द्वीपान्तराणि च परिभ्रम्य यानर्थानुपलभ्य प्रणीतवन्तस्तेषां देश-कालान्तरवशेनान्यथात्वेऽपि तथात्वेनोपनिबन्धो यः स कविसमयः।" [ का० मी० अध्या० १४ ] इति। कविसमय इति च योगरूढं नाम, स चायं कविसमयस्त्रिधा–स्वर्ग्यो भौमः पातालीयश्चेति, तथा चायं महाविषयः, स चापि प्रत्येकं चतुर्धा-जाति-द्रव्य-गुणक्रियारूपार्थकत्वात्, तत्रापि प्रत्येकं त्रिधा–सतोऽप्यनिबन्धात् असतोऽपि निबन्धात् नियमाच्चेति, तदेव व्याख्याति–**सतोऽपि जाति-द्रव्य-गुण-क्रियादेरनिबन्धनमिति**-अर्थस्य चतूरूपत्वेन कविसमयविषयस्य चतुर्धात्वमुक्तं प्रागेव, तेषामेव चतुर्णां मध्ये कस्यचित् **सतोऽपि** लौकिकसत्तया युक्तस्यापि, **अनिबन्धनम्** अनुपन्यसनं वर्णनाभाव इति यावत्। **असतः** लौकिकरीत्याऽप्रतीतसद्भावस्यापि, **निबन्धनम्** उपन्यसनम्, **जात्यादेरेवे**त्येवशब्देन तदतिरिक्तस्यार्थस्याभाव इति सूच्यते । सूत्रस्थं नियमपदं व्याख्याति–**नियमोऽतिप्रसक्तस्ये**त्यादि–अतिप्रसक्तस्य–अन्यत्र वृत्तितया प्रमितस्य, यत्रोपनिबध्यते तत्र तद्भिन्ने चाश्रये वर्त्तमानस्यापि जात्यादेरेकत्रैव तन्मात्रवृत्तित्वेन अवधारणं–स्थिरीकरणं नियमपदेनोच्यत इति भावः । तदेवं व्याख्यातं कविसमयवैविध्यं राजशेखरेणापि काव्यमीमांसायां विस्तरेण [ १४ अध्याये ]।

अथ वामनादिभिर्वर्णनीयार्थस्य सामान्यतो द्वैविध्यमुक्तम् "अयोनिरन्यच्छायायोनिश्च" [ अलंकारसूत्रवृत्ति ३–२–७ ] इति, अयोनिः—अकारणः, कविकृतावधानमात्रकारण इत्यर्थः, अन्यस्य–काव्यस्य च्छाया अन्यच्छाया, सा योनिर्यस्य तथाभूतश्चेति, तत्रायोनिरित्यस्याकारण इत्येतावन्मात्रार्थकरणे कारणमात्राभावे कार्यस्योत्पादाभावाद् व्याघातः स्यादिति शङ्कया कवित्वबीजभूतप्रतिभोन्मेषप्रयोजनमवधानमेवात्र कारणमिति कथितम्, अयमेवान्यच्छायायोनिरूपोऽर्थो राजशेखरेण "अन्ययोनिर्निह्नुतयोनिश्च" इति विभक्तः, तथा चोक्तं तेन–"त्रिपथ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मर्थमध्यगीष्महि, यदुत–अन्ययोनिर्निह्नुतयोनिरयोनिश्च" [ १२–अध्याये ] इति, तथा चान्यस्य काव्यस्यार्थोऽपि कथंचिदुपजीव्यते कविभिरिति तदुपजीवनं छाययोपजीवनं कथ्यते, तदुक्तं राजशेखरेण–"पुराणकविक्षुण्णे वर्त्मनि दुरापमस्पृष्टं वस्तु, ततश्च तदेव संस्कर्तुं प्रयतेत" इत्याचार्याः, 'न' इति वाक्पतिराजः, तथाहि—

"आसंसारमुदारः कविभिः प्रतिदिनगृहीतसारोऽपि ।
अद्याप्यभिन्नमुद्रो विभाति वाचां परिस्पन्दः ॥"

[ प्राकृतच्छाया, गउडवहे ९७ ]

"तत्प्रतिभासाय च परप्रबन्धेष्ववदधीत, तदवगाहने हि तदेकयोनयोऽर्थाः पृथक् पृथक् प्रथन्ते" इत्येके, "तत्रत्यानामर्थानां छायया परिवृत्तिः फलम्" इत्यपरे, "महात्मनां हि संवादिन्यो बुद्धय एकमेवार्थमुपस्थापयन्ति, तत्परित्यागाय तानाद्रियेत" इति च केचित्, 'न' इति यायावरीयः, सारस्वतं चक्षुरवाङ्मनसगोचरेण प्रणिधानेन दृष्टमदृष्टं चार्थजातं स्वयं विभजति, तदाहुः–

"सुप्तस्यापि महाकवेः शब्दार्थौ सरस्वती दर्शयति, तदितरस्य तत्र जाग्रतोऽप्यन्धं चक्षुः, अन्यदृष्टचरे ह्यर्थे महाकवयो जात्यन्धाः, तद्विपरीते तु दिव्यदृशः, न तत् त्र्यक्षः सहस्राक्षो वा यच्चर्मचक्षुषोऽपि कवयः पश्यन्ति, मतिदर्पणे कवीनां विश्वं प्रतिफलति, 'कथं तु वयं दृश्यामहे' इति महात्मनामहंपूर्विकयैव शब्दार्थाः पुरो धावन्ति, यत् सिद्धप्रणिधाना योगिनः पश्यन्ति तत्र वाचा विचारयन्ति कवयः" इत्यनल्पा महाकविषु सूक्तय इति ।

अयमाशयः—यत् पूर्वमुक्तम् 'काव्येष्वपि निपुणताऽऽसादनीया' इति, तस्य फलद्वयम्–महाकवीनां वर्णनक्रमस्यानुशीलनात् तदानुगुण्येन कवनम्, अथ च तेन तेन कविनोक्तानामर्थानामेव नवीनया सरण्या संग्रथनं संस्कारो वेति, यतश्च पुराणकविभिराचरिते पथि किमपि तादृशं वस्तु दुरापम् ? यत् तैरस्पृष्टं भवेत्, ततश्च तदवलोक्य कवयन् कश्चित् तादृशकवित्वदर्शनाच्चौरोऽयमिति वा न मन्येत, इत्याचार्यमतम्, वाक्पतिराजस्य तु–पुराणकविभिरासंसृतेरद्यावधि वाण्याः स्रोतसः सारो गृहीतोऽपि स परिस्पन्दोऽद्याप्यभिन्नमुद्र एव, यया मुद्रया–ययाऽवस्थया प्राक् परिस्पन्द आसीत् तादृश एव, न ततो न्यूनः, अतश्च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नवीनैरपि कविभिर्नवीना अनुद्भावितपूर्वा अर्था उद्भावयितुं शक्यन्ते, इति मतम्। एतदेव च अभिनवगुप्ताचार्येणापि स्वीये ध्वन्यालोके उक्तम्, तथाहि—

"वाचस्पतिसहस्राणां सहस्रैरपि यत्नतः।
निबद्धाऽपि क्षयं नैति प्रकृतिर्जगतामिव" [ कारिका० ११४ ]

यथा हि जगत्प्रकृतिः—अतीतकल्पपरम्पराऽऽविर्भूतवस्तुप्रपञ्चा सती पुनरिदानीं परिक्षीणपदार्थनिर्माणशक्तिरिति न शक्यतेऽभिधातुम्, तद्वदेवेयं काव्यस्थितिरनन्ताभिः कविमतिभिरुपभुक्ताऽपि नेदानीं परिहीयते, प्रत्युत नवनवाभिर्व्युत्पत्तिभिः परिवर्धते।" इत्थं स्थितेऽपि "संवादास्तु भवन्त्येव बाहुल्येन सुमेधसाम्।" स्थितं ह्येतत्–संवादिन्यो मेधावतां बुद्धयः। किन्तु "नैकरूपतया सर्वे ते मन्तव्या विपश्चिता।" [चतुर्थोद्द्योते] इति, तदुक्तम् [का. मी.] "तत्प्रतिभासाय परप्रबन्धेष्ववदधीत, तदवगाहने हि तदेकयोनयोऽर्थाः पृथक् पृथक् प्रथन्ते" इति, "महात्मनां हि संवादिन्यो बुद्धय इत्येकमेवार्थमुपस्थापयन्ति, तत्परित्यागाय तानाद्रियेत" इति च, किन्तु निरुक्तमतद्वयमपि राजशेखरो न मन्यते, न इति यायावरीय इति, तत्र कारणमाह–"सारस्वतं चक्षुरवाङ्मानसगोचरेण" इत्यादिना, तस्यायं निष्कर्षः–महाकवीनां हि सारस्वतं चक्षुर्भवति, तेन चक्षुषा ते यावत् पश्यन्ति तावत् न त्र्यक्षो न वा सहस्राक्षो न वा योगिनो द्रष्टुं शक्नुवन्तीति, कोऽर्थोऽन्यदृष्टः कोऽर्थोऽन्यादृष्ट इति ते स्वयमेव जानन्ति, न तदर्थं परकीयकाव्यानुसंधानाद्यावश्यकम्, किन्तु पूर्वैः काव्यानुशासनादिविधायकाचार्यैरर्थस्य योन्यन्ययोनितया विभक्तत्वेनान्ययोन्यर्थानुशीलनाय तस्य स्वकाव्ये समुपयोगाय च च्छाययाऽवलम्बनमावश्यकम्, तदयमन्तर्निष्कर्षः–पुराणकविप्रतिपादितानामेवार्थानां संस्कारेण व्यङ्ग्यादिसंनिवेशपुरस्सरं निबन्धनमपि न दोषाधायकम्, तथाहि—

"यदपि तदपि रम्यं यत्र लोकस्य किञ्चित्,
स्फुरितमिदमितीयं बुद्धिरभ्युज्जिहीते।
अनुगतमपि पूर्वच्छायया वस्तु तादृक्,
सुकविरुपनिबध्नन् निन्द्यतां नोपयाति॥" [ ध्वन्या० ४ ]

यस्मिन् काव्यवस्तुनि सहृदयसमुदयस्य 'नवीनार्थविजृम्भणमिदम्' इति बुद्धिः–चमत्कृतिसंवित्, उत्पद्यते, तादृक् तदपि वा किञ्चिद्वस्तु पूर्वच्छायया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धारणम् । छायायाः प्रतिबिम्बकल्पनया, आलेख्यप्रख्यतया, तुल्यदेहितुल्यतया, परपुरप्रवेशप्रतिमतया चोपजीवनम् । आदिशब्दात्

---

अनुगतमपि निबध्नन् कविर्निन्द्यतां नोपयातीत्यर्थः । एष च प्रथमः पक्षः, यश्च कवित्वसम्पादकतयोपादीयते ॥

अपरश्च महाकवीनां मार्गः, स चायम्–"अन्यदृष्टचरे ह्यर्थे महाकवयो जात्यन्धाः" इत्यपारे शब्दार्थसमुद्रे नवमेव वस्तूपाददीतेति, न च तथा वस्तु दारिद्र्यं स्यादिति शङ्कनीयम्, यतश्चोक्तमभिनवगुप्ताचार्येण—

"प्रतायन्तां वाचो निमितविविधार्थामृतरसाः,
न वादः कर्तव्यः कविभिरनवद्ये स्वविषये ।
परस्वादानेच्छाविरतमनसो वस्तु सुकवेः,
सरस्वत्येवैषा घटयति यथेष्टं भगवती ॥" [ ध्वन्या० उ० ४ ]

कविभिः, निमितः–नितरां प्रकटितः परिच्छिन्नो वा, विविधानामर्थानाममृतमिव समास्वाद्यो रसो यासां तादृश्यो वाचः प्रतायन्ताम्; अत एव तैः, अनवद्ये–निर्दूषणे स्वविषये, वादः–सन्देहो न कार्यः, यतः परस्वादानेच्छाविरतमनसः–अन्यकविधनरूपतदीयोक्तिग्रहणनिवृत्तचेतसः, सुकवेरेषा भगवती–सरस्वत्येव, वस्तु घटयति । ये पुनर्मनस्विनो जन्मान्तरीयसुचरितसम्भाराविर्भूतविलक्षणप्रतिभाः कवयितारः परच्छायामप्यजिघृक्षवः, तेषां काव्यार्थयोजनासम्पत्तिर्वाग्देवताप्रसादादेवानिर्वचनीया सम्पद्यत इति तत्रैव यतनीयमिति तात्पर्यम् ॥

तत्रोभयस्य पक्षस्य स्वस्वविषयतया समीचीनत्वमेवेति वस्तुस्थितौ सत्यामपीह कवित्वसम्पादनस्यैव प्रकृततया परच्छायाहरणादीनामप्युपदेशः कर्तव्य एवेत्येतदभिप्रेत्याह—

"छायाद्युपजीवनादयश्च" इति सूत्रे, तदेव व्याख्याति–छायायाः प्रतिबिम्बकल्पनयेति–अत्र प्रतिबिम्बकल्पतयेत्येव पाठो युज्यतेऽग्रिमेण पाठेन सहैकरूप्यात्, छाया हि पूर्वेषां कवीनामर्थस्य संवादः, तस्या उपजीवनम्–अवलम्बनम्, तदाश्रयणे न वाक्प्रबन्धनम्, तच्चोपजीवनं चतुर्धा–प्रतिबिम्बतया आलेख्यप्रख्यतया तुल्यदेहितुल्यतया परपुरप्रवेशतया चेति, सर्वेषां चैषां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पद-पादादीनां च काव्यान्तराद् यथौचित्यमुपजीवनम् । पुनरादि-पदात् समस्यापूरणाद्याः शिक्षाः ।**

लक्षणोदाहरणान्यनुपदमेव विवेचयिष्यन्ते । सूत्रे छायादीत्यादिपदमुपात्तं, तेन कस्य संग्रह इत्याकाङ्क्षायामाह–**आदिशब्दात् पद-पादादीनां च काव्यान्तरादि**ति–काव्यान्तरात्–पूर्वतरमहाकविप्रणीतसत्काव्यात्, **यथौचित्यम्** औचित्यमनतिक्रम्य, यावदर्थ-पद-पादादिहरणमौचितीं न लङ्घयेत् तावदाहरमिति भावः । उपजीवनपदसम्बद्धेनादिपदेन किं संग्राह्यमित्याह–**पुनरादिपदात् समस्यापूरणाद्याश्च शिक्षा** इति समस्यापूरणं–कस्याऽपि पादस्य पादांशस्य पदस्य वाऽर्थमुपजीव्य शेषांशपूरणम्, अत्रत्याद्यपदेन च बन्धविशेष-बिन्दुच्युतक-मात्राच्युतकादिपरिग्रहः, सर्वेषां काव्यकरण-तज्ज्ञानोपयुक्तानामर्थानामिति यावत् । तदेतत् सदनिबन्धना-ऽसन्निबन्धनाऽतिप्रसक्तजात्यादिनियमन-च्छायोपजीवन-समस्यापूरणादीनि समुदितानि व्यस्तानि वा, यथादेश-काल-पात्र-परिस्थिति शिक्षापदार्थो बोध्यः । तत्र क्रमश उदाहरणीयेषु सदनिबन्धाऽसन्निबन्ध–नियमानां बहुतरभेदात् सूचीकटाहन्यायेन च्छायोपजीवनमेव पूर्वमुदाहृतं विवेके । तत्र प्रतिबिम्बकल्पोपजीवनस्य लक्षणमुक्तं काव्यमीमांसायाम्—

"अर्थः स एव सर्वो वाक्यान्तरविरचना परं यत्र ।
तदपरमार्थविभेदं काव्यं प्रतिबिम्बकल्पं स्यात् ॥" [ का० मी० अ० १२ ]

'यत्र स एव सर्वः, अर्थः [ यस्माच्छायोपजीव्यते, ] परं वाक्यान्तरविरचना, अपरमार्थविभेदं तत् काव्यं प्रतिबिम्बकल्पं स्यात्' इत्यन्वयः । तथा चोपजीव्यार्थसमानार्थकवाक्यान्तररचना प्रतिबिम्बकल्पभेद इत्यायाति, तथाहि–बिम्बभूतं काव्यम्—

"ते पान्तु वः पशुपतेरलिनीलभासः,
कण्ठप्रदेशघटिताः फणिनः स्फुरन्तः ।
चन्द्रामृताम्बुकणसेकसुखप्ररूढै–
र्यैरङ्कुरैरिव विराजति कालकूटः ॥" [ का० मी० अ० १२ ]

'ते अलिनीलभासः पशुपतेः कण्ठप्रदेशघटिताः स्फुरन्तः फणिनः वः पान्तु, चन्द्रामृताम्बुकणसेकसुखप्ररूढैः यैः अङ्कुरैरिव कालकूटः विभाति' इत्यन्वयः । ते–प्रसिद्धाः, अलिवत् नीला भाः–कान्तिर्येषां ते, पशुपतेः–शिवस्य, कण्ठप्रदेशे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



घटिताः–लग्नाः, स्फुरन्तः–चञ्चलाः प्रकाशमाना वा, फणिनः, वः पान्तु। चन्द्रस्य शिरःप्रदेशस्थितस्य सम्बन्धि यदमृतं तदेवाम्बुजलं तस्य कणैः सेकेन–सिञ्चनेन सुखं–निर्बाधं, प्ररूढैः–उत्पन्नैः, यैः, अङ्कुरैरिव कालकूटो विराजति–विभाति॥ अस्य प्रतिबिम्बविधयोपजीवनं यथा—

"जयन्ति नीलकण्ठस्य नीलाः कण्ठे महाद्यः।
गलद्गङ्गाम्बुसंसिक्तकालकूटाङ्कुरा इव॥" [का० मी० अ० १२]

अर्थः स्पष्ट एव, अत्र 'चन्द्रामृताम्बु' इति स्थाने 'गङ्गाम्बु' इति निक्षेपमात्रं नवीनम्। अत्र च पूर्वश्लोकस्य च्छाया स्पष्टमेव प्रतीयते, परन्तु वर्णनाक्रमोऽन्य इति न चारुत्वं जहाति। तदुक्तं ध्वन्यालोके—

"तत्त्वस्यान्यस्य सद्भावे, पूर्वस्थित्यनुयाय्यपि।
वस्तु भातितरां तन्व्याः शशिच्छायमिवाननम्॥" [४ उद्द्यो०]

प्रसिद्धवाच्यादिविलक्षणस्य तत्त्वस्य व्यङ्ग्यरसादिरूपस्य सत्त्वे पूर्वस्थितेः–प्राचीनकविवर्णितपरम्परायाः, अनुयायि–तुल्यमपि वस्तु, तन्व्याः शशिच्छायमाननमिव विभातितराम्। यथा कामिन्याः शशिप्रभमाननं तुल्यच्छायत्वेऽपि लावण्यादिगुणयोगवशाद् भात्येव, न तु दुष्टं प्रतीयते, तथा काव्यान्तरसादृश्यमनुहरदपि काव्यं कस्यचिद् वैचित्र्यस्य सत्त्वे शोभनमेव प्रतीयत इति भावः॥

व्याख्यातं प्रतिबिम्बतयोपजीवनम्, अथालेख्यप्रख्यतयोच्यते। तल्लक्षणम्—

"कियताऽपि यत्र संस्कारकर्मणा वस्तु भिन्नवद् भाति।
तत् कथितमर्थचतुरैरालेख्यप्रख्यमिति काव्यम्॥" [का० मी० अ० १२]

"यत्र कियता अपि संस्कारकर्मणा, वस्तु भिन्नवद् भाति, अर्थचतुरैः तत् आलेख्यप्रख्यमिति काव्यं कथितम्" इत्यन्वयः। यत् पूर्वकविवर्णितमपि वस्तु कियताऽपि–अल्पेन बहुना वा, संस्कारकर्मणा भिन्नवद् भाति–तत्सादृश्यं नावगाहते, अर्थविचारचतुरैस्तदालेख्यप्रख्यमिति काव्यं कथितम्, यथा तत्रैवार्थे—

"जयन्ति धवलव्यालाः शम्भोर्जूटावलम्बिनः।
गलद्गङ्गाम्बुसंसिक्तचन्द्रकन्दाङ्कुरा इव॥" [का० मी० अ० १२]

चन्द्रकन्दः–शिरःस्थितचन्द्रात्मकः कन्दः, शेषं सुगमम्॥ अत्र पूर्वं 'जयन्ति



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नीलकण्ठस्य' इत्यत्र वर्णितमेव वस्तु केनचित् संस्कारेण परिवर्तनेन भिन्नवत् कृतमिति आलेख्यप्रख्यं काव्यम् ॥

अथ तुल्यदेहितुल्यस्य लक्षणम्—

"विषयस्य यत्र भेदेऽप्यभेदबुद्धिर्नितान्तसादृश्यात् ।
तत् तुल्यदेहितुल्यं काव्यं बध्नन्ति सुधियोऽपि ॥" [का० मी० अ० १२]

यत्र विषयस्य भेदेऽपि नितान्तसादृश्यादभेदबुद्धिस्तत् तुल्यदेहितुल्यं काव्यं सुधियोऽपि बध्नन्ति । छायोपजीवनं हि पूर्वकाव्यवस्तुना सादृश्यम्, तच्च वर्णनीयवस्तुन ऐक्ये वर्णनप्रकारभेदेऽपि भवति, तस्य प्रकारद्वयं पूर्वमुक्तम् । साम्प्रतं वर्णनीयवस्तुनो भेदेऽपि वर्णने सादृश्यादभेदबुद्धिरूपं प्रकारान्तरं तुल्यदेहितुल्यतयोक्तम्, यथा चैत्राद् वस्तुगत्या भिन्नोऽपि तद्भ्राताऽऽकारसादृश्याद्भिन्न इव प्रतीयते, तत्र किं कारणम्? देहिनो भेदेऽपि देहस्य तुल्यतयाऽभेदभ्रम एव, तत्र यथा देहसादृश्याद् देहिनः सादृश्यं प्रतीयते तथाऽत्राऽपि देहरूपस्य वर्णनक्रमस्य सादृश्याद् वर्णनीयवस्तुनोऽभेद आभातीति । अत्र सुधियोऽपीति कथयता 'इत्थं काव्यरचनाया न दोषावहत्वमपि तु प्रशंसनीयत्वमेव' इति बोधितं भवति, कविसम्प्रदायश्चैतदनुकूल एवेति च ज्ञाप्यते । तत्रोदाहरणेऽयमाधारभूतः श्लोकः—

"अवीनादौ कृत्वा भवति तुरगो यावदवधिः,
पशुर्धन्यस्तावत् प्रतिवसति यो जीवति सुखम् ।
अमीषां निर्माणं किमपि तदभूद् दग्धकरिणां,
वनं वा भूमीभृद्भवनमथवा येन शरणम् ॥" [का० मी० अ० १२]

"आदौ अवीन् कृत्वा, यावत् तुरगः अवधिः भवति, तावत् पशुः धन्यः, यः प्रतिवसति, सुखं जीवति, अमीषां दग्धकरिणाम्, किमपि तत् निर्माणम् अभूत्, येन वनम्, अथवा भूमीभृद्भवनं वा शरणम्" इत्यन्वयः । मेषानारभ्य अश्वान् यावत् ये गृहपशवः सन्ति ते प्रतिगृहं वसन्ति, आदरिद्रं सर्वैः परिपालितत्वाच्च सुखं जीवन्ति, एते च गजा दग्धाः–हतभाग्याः, येन एतेषां कृते राज्ञो भवनं [यदि भाग्याल्लब्धम्] शरणम्, तदभावे च वनमेव शरणम्, नान्यत्र क्वचिदेते जीवनं यापयितुमीशाः, एतदेव तेषां हतभाग्यत्वं यद् विरल एव तेषामाश्रय इति । अस्मादर्थाद् भिद्यमानोऽपि समानतया प्रतिभासमानश्चार्थ एवमुपनिबध्यते—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"प्रतिगृहमुपलानामेक एव प्रकारो,
मुहुरुपकरणत्वादर्धिताः पूजिताश्च ।
स्फुरति हतमणीनां किन्तु तद्धाम येन,
क्षितिपतिभवने वा स्वाकरे वा निवासः ॥" [ का० मी० १२ ]

"उपलानाम्, एक एव प्रकारः, उपकरणत्वात् प्रतिगृहं मुहुः अर्धिताः, [ क्वचित् ] पूजिताश्च, किन्तु हतमणीनां तद्धाम स्फुरति येन क्षितिपतिभवने स्वाकरे वा निवासः [ भवति ]" इत्यन्वयः। उपलानि–अश्मखण्डानि, उपकरण-रूपेण–पेषणादिसाधनरूपेण परिमाणादिरूपेण वा, प्रतिगृहं, स्वकीयम्, अर्घं–मूल्यम्, प्राप्नुवन्ति, स्वयोग्यतानुरूपं स्थानं लभन्ते, क्वचिद् देवत्वेन पूज्यन्ते च, किन्तु विधिहतानां मणीनां तु किमपि तेज एव तादृशं यस्य प्रकाशे सति क्षितिपतिभवने निवासः, राज्ञामेव तदीयार्घदानार्हत्वात्, तेजसोऽप्रकाशे सति च स्वाकरे–स्वोत्पत्तिस्थानभूते पर्वतादिकन्दरे वा निवासो भवति । अत्राधारभूते पद्ये प्राणिविषये यादृशो व्यवहारो वर्णितः, तादृश एवेहोपलानां विषये इति यद्यपि विषयकृतो भेदोऽस्त्येव तथापि वर्णनस्य नितान्तसादृश्यादभेद एव स्पष्टं प्रतीयत इति तुल्यदेहितुल्यत्वमिति ॥

अथ परपुरप्रवेशप्रतिमतयोर्जीवनं निरूप्यते–तत्र वाग्भटः–"यत्र काव्यस्य जीवितव्यैक्यं परिकरबन्धस्तु दूरादेवान्यस्तत् परपुरप्रवेशतुल्यम्" इति [ काव्यानुशासने १० अध्याये- ] एतदेव राजशेखरेणेत्थमुक्तम्—

"मूलैक्यं यत्र भवेत् परिकरबन्धस्तु दूरतोऽनेकः ।
तत् परपुरप्रवेशप्रतिमं काव्यं सुकविभाव्यम्" [ का० मी० अ० १२ ]

यत्र–ययोः काव्ययोः, मूलैक्यं–वर्णनीयवस्तुनः साम्यं भवेत्, परिकरबन्धः–ग्रन्थनम्, दूरतः–अत्यन्तम्, अनेकः–भिन्नभिन्नः, भवेत्, तत् सुकविभाव्यम्–उत्तमकविकार्यम्, परपुरप्रवेशप्रतिमकाव्यं भवतीति शेषः । यथा—

"यस्यारातिनितम्बिनीभिरभितो वीक्ष्याम्बरं प्रावृषि,
स्फूर्जद्गर्जितनिर्जिताम्बुधिरवस्फाराभ्रवृन्दाकुलम् ।
उत्सृष्टप्रसभाभिषेणनभयस्पष्टप्रमोदाश्रुभिः,
किञ्चित्कुञ्चितलोचनाभिरसकृद् घ्राताः कदम्बानिलाः ॥'
[ काव्यमीमांसा० अ० १२ ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"यस्यारातिनितम्बिनीभिः, प्रावृषि, स्फूर्जद्भिर्गर्जितनिर्जिताम्बुधिरवस्फाराभ्रवृन्दाकुलम्, अम्बरं, वीक्ष्य, उत्सृष्टप्रसभाभिषेणनभयस्पष्टप्रमोदाश्रुभिः, किञ्चित्कुञ्चितलोचनाभिः, कदम्बानिलाः, असकृत् घ्राताः" इत्यन्वयः, कस्यचिद् राज्ञो वर्णनप्रस्तावे कविराह–यस्य–वर्णनीयस्य राज्ञः, अरातिनितम्बिनीभिः–शत्रुकामिनीभिः, प्रावृषि–वर्षासु, स्फूर्जद्भिः–परितः प्रसरद्भिः, गर्जितैः, निर्जितः–अधरीकृतः, अम्बुधेः–समुद्रस्य, रवः–शब्दो यैस्तथाभूतानां, स्फाराणां–विपुलानाम्, अभ्राणां–मेघानां, वृन्देन–समूहेन, आकुलं–व्याप्तम्, अम्बरम्–आकाशम्, वीक्ष्य–अवलोक्य, उत्सृष्टं–त्यक्तं, प्रसभेन–हठात्, अभिषेणनस्य–तव सेनयाऽऽक्रमणस्य, यत् भयं तस्मात्, स्पष्टानि–प्रकटतया दृश्यमानानि, प्रमोदाश्रूणि–आनन्दजनयनजलानि यासां ताभिः; किञ्चिद्–ईषत्, कुञ्चितानि–वक्रीकृतानि, लोचनानि याभिस्ताभिः, एतादृशीमवस्थां गताभिः, कदम्बानिलाः–वर्षासमयसमुत्थकदम्बपुष्पसंसक्तवायवः, आश्वस्ततया, असकृत्–भूयो भूयः, आघ्राताः–घ्राणविषयीकृताः। अयमाशयः–त्वदीयरिपुवधूनां हृदि सदैव त्वदाक्रमणेन भाविप्रियवियोगशङ्का तिष्ठति, किन्तु वर्षासमयसूचकमेघसमूहदर्शनेन कदम्बकुसुमसम्पर्कसुरभिवायुसत्तया च वर्षासमयागमनज्ञानेन राज्ञामेषोऽभियानसमयो नेति विश्वासेन हृदयाद् भयापगमे सति, तात्कालिकसुरभिवाय्वाघ्राणरूपं सुखमनुभवन्ति ता इति। एष आधारभूतोऽर्थः। एतस्य च्छाया चेह परपुरप्रवेशवत् समाश्रिता—

"आच्छिद्य प्रियतः कदम्बकुसुमं यस्यारिदारैर्नवं,
यात्राभङ्गविधायिनो जलमुचां कालस्य संसूचकम्।
हृष्यद्भिः परिचुम्बितं नयनयोर्न्यस्तं हृदि स्थापितं,
सीमन्ते निहितं कथञ्चन ततः कर्णावतंसीकृतम्॥"

[का० मी० अ० १२]

"यस्य अरिदारैः हृष्यद्भिः यात्राभङ्गविधायिनः जलमुचां कालस्य संसूचकं नवं कदम्बकुसुमं प्रियतः आच्छिद्य परिचुम्बितं, नयनयोः न्यस्तं हृदि स्थापितं सीमन्ते निहितम्, ततः कथञ्चन कर्णावतंसीकृतम्" इत्यन्वयः। यस्य शत्रुस्त्रीभिः, कदम्बकुसुमदर्शनात् हृष्यन्तीभिः, तदीयजययात्राप्रतिकूलसमयसंसूचकं प्रियकरस्थितं तासामेवाश्वासनाय तेनोद्यानादानीतम्, कदम्बकुसुमम्, तस्य हस्ताद् बलाद् गृहीत्वा, अतिशयप्रमदजनकत्वाच्चुम्बितम्, नयनयोरप्यानन्ददायित्वात्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तयोरुपरिन्यस्तं, हृदयाश्वासकत्वात् तत्रापि स्थापितम्, आदरणीयत्वात् सीमन्ते निहितम्, सदा तस्य सन्निधानाय क्वैनत् स्थापयामीत्यवस्यन्तीभिः कथञ्चन बहु, विचार्य, कर्णावतंसीकृतं कर्णयोर्भूषणत्वेन धारितमिति भावः ।

अत्र मूलभूतो भावः 'क्षितिपरिपुवधूनां मनसि वर्षासमयसूचककदम्बकुसुम-दर्शनेन प्रियविप्रयोगविधायि वर्ण्यं विजयिराजजययात्रायाः क्रियते कालाय विरामं ज्ञात्वा तासामानन्दोदयः' इत्येव, स चोभयत्र सम एव, किन्तु प्रतिपादनरीति-स्तथा परिवर्त्तिता यथाऽसावर्थो नवीकृततया भिन्न इवाभासते । अस्य परपुरप्रवेश-तुल्यता चेत्थम्–यथा किञ्चित् पुरं पूर्वं सकृद् दृष्टम्, कालान्तरे च जाते तदीयगृहमार्गादिसंस्काररूपे परिवर्तने पुनस्तदेव पुरं प्रविशताऽन्यपुरत्वेन सन्दिह्यते, तथैवात्रापि भवतीति तत्तुल्यत्वम् । एतेषु च चतुर्षु भेदेषु तारतम्य-विचारे यथोत्तरोत्तरं प्राधान्यमवगन्तव्यं तथैवोत्कर्षस्य प्रतीयमानत्वात्, कस्यचन वस्तुनः प्रतिबिम्बापेक्षया आलेख्येऽधिकस्य सौन्दर्यस्य, ततोऽपि तत्तुल्य-तायां, ततोऽपि तुल्यत्वे सत्यपि भेदप्रतिभासस्याधिकतरचमत्कारकारित्वस्य सर्वानुभवसिद्धत्वात्, उत्तरोत्तरं च कवेर्व्यापारस्य गौरवमपि तेषामुत्कर्षे मानम् । एवं संपूर्णस्य काव्यस्योपजीवनभेदा निरूपिताः ॥

सांप्रतं पद-पादाद्युपजीवनमुदाहरणादिभिर्व्यक्तीक्रियते, पूर्वत्रार्थोपजीवनमु-दाहृतमिह शब्दोपजीवनमुदाह्रियत इति वा विज्ञेयम्, तत्र पूर्वकविकाव्यस्थं पदं पदानि वा स्वकाव्ये यत्र निवेश्यन्ते तत् पदोपजीवनमित्याख्यायते, तथाहि—

"दूराकृष्टशिलीमुखव्यतिकरान् नो किं किरातानिमा–
नाराद् व्यापृतपीतलोहितमुखान् किं वा पलाशानपि ।
पान्थाः ! केसरिणं न पश्यत पुरोऽप्येनं वसन्तं वने,
मूढा ! रक्षत जीवितानि शरणं यात प्रियां देवताम् ॥"

[ का० मी० अ० ११ ]

"[ हे ] पान्थाः ! दूराकृष्टशिलीमुखव्यतिकरान् इमान् किरातान् किं नो पश्यत, किं वा आराद् व्यापृतपीतलोहितमुखान् पलाशान् अपि न [ पश्यत ], पुरः वने एनं केसरिणं वसन्तम्, अपि न [ पश्यत ], मूढाः ! जीवितानि रक्षत, प्रियां देवतां शरणं यात" इत्यन्वयः । कश्चित् कारुणिको वसन्तेऽपि प्रवसतः काँश्चित् पथिकान् भीषयन् सश्लेषमाह–भोः पथिकाः ! दूरादाकृष्टानां–कर्णपर्यन्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माकृष्य स्थापितानाम्, शिलीमुखानां–बाणानाम्, व्यतिकरः–सम्बन्धो येषां तान् इमान्–प्रत्यक्षतो दृश्यमानान्, किरातान्–म्लेच्छविशेषान् व्याधान्, किं नो पश्यत–कुतो न विलोकयत, अवश्यं विलोकयतेति व्यङ्ग्यम्, एवम्, आरात्–दूरे समीपे च; व्यापृतानि–भक्षणप्रवृत्तानि, पीतलोहितानि–पानविषयीकृतशोणितानि, मुखानि येषां तान्–अग्रतो वर्त्तमानान्, पलाशान्–मांसभक्षकान् राक्षसान्, किं न पश्यत, किञ्च पुरः–अग्रे, वने, एनं–संमुखस्थम्, केसरिणं–सिंहं, वसन्तं–स्थितं, किं न पश्यत? इत्थञ्च भयकारणानि समुपदर्श्य ततः कर्त्तव्यमुपदिशति–जीवितानि रक्षत, व्याध-राक्षस-सिंहेषु प्रत्येकस्यापि जीवितहरणे प्रसिद्धतया सर्वेषामिह सान्निध्ये जीवितरक्षायै यतध्वम्, सहसा भयाक्रान्तैरस्माभिः क उपाय आलम्बनीय इति तेषां पृच्छामभिलक्ष्याह–प्रियां देवतां-स्वस्वेष्टदेवतां, शरणं यात, नान्यः कश्चन पराक्रमादिरिह कार्यकरो भविष्यति, अत इष्टदेवताशरणाश्रयणमेव वरमिति। एष चार्थो बाह्यः। आभ्यन्तरश्चायमर्थः–दूरत एव सौरभाकृष्टभ्रमरसम्बद्धान्, इमान्, किरातान्–भूनिम्बवृक्षान्, तथा सर्वतः प्रसृतपीतमिश्रितरक्तमुखान् इमान् पलाशान्–पलाशद्रुमान्, वने च केसरयुक्तं–पुन्नागपुष्पयुक्तं, वसन्तम्–ऋतुराजं, किं न पश्यत, एतादृशे काले पथि न स्थेयम्, जीवितरक्षा कार्या, प्रियां–स्वप्रियतमामेव, देवताम्, एतादृशे समये जीवितरक्षादक्षां शरणं यात–आश्रयत, अत्र श्लेषेण किरात-पलाश-सिंहैः सह तत्तत्पदापरार्थभूतपुष्पविशेष-द्रुमविशेष-केसरपुष्पयुक्तवसन्ततुंपदार्थानां साम्यं व्यङ्ग्यम्, तथा च किरातादिभीतैरिष्टदेवताश्रयणमिव वसन्ततदीयपुष्पादिदर्शनभीतैश्च प्रियाश्रयणं कार्यमित्युपमानोपमेयभावो गम्यते। अत्र 'पश्यत' इत्यस्य स्थाने 'पश्यथ' इति पाठो युक्तः प्रतिभाति। अत्रत्यपदस्य पदयोर्वोपजीवनं यथा—

"मा गाः पान्थ! प्रियां मुक्त्वा दूराकृष्टशिलीमुखम्।
स्थितं पन्थानमावृत्य, किं किरातं न पश्यसि?॥"

[का० मी० ११ अ० उ०]

"पान्थ! प्रियां मुक्त्वा मा गाः, [कुत इति चेत्] दूराकृष्टशिलीमुखम्, पन्थानम्, आवृत्य स्थितं किरातं किं न पश्यसि?" इत्यन्वयः। अत्र च पूर्वपद्यस्थितानि 'प्रियाम्, दूराकृष्टशिलीमुखम्, किरातम्' इति कतिचित् पदानि आनुपूर्व्यैवोपजीवितानीति स्पष्टम्॥

**पादोपजीवन**मित्यनेन श्लोकचतुर्थांशरूपपाद-पादद्वय-पादत्रयोपजीवनं संगृह्यते, पादचतुष्टयोपजीवनं तु साक्षाच्चौर्यमेवेति तत् कविसमयविरुद्धम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ पूर्वकविपद्यस्थपादोपजीवनमुदाह्रियते-

"गन्तव्यं यदि नाम निश्चितमहो गन्तासि केयं त्वरा,
द्वित्राण्येव पदानि तिष्ठतु भवान् पश्यामि यावन्मुखम् ॥
संसारे घटिकाप्रवाहविगलद्धारासमे जीविते,
को जानाति पुनस्त्वया सह मम स्याद्वा न वा सङ्गमः ॥"

[ अ० श० १८३ ]

कश्चित् प्रवासाय प्रतिष्ठमानं नायकं काचिन्नायिकाऽऽह-"अहो यदि नाम गन्तव्यं निश्चितं [ तर्हि ] गन्तासि, इयं त्वरा का, भवान् द्वित्राण्येव पदानि तिष्ठतु, यावत् मुखं पश्यामि, संसारे घटिकाप्रवाहविगलद्धारासमे जीविते त्वया सह मम पुनः संगमः स्याद्वा न वा स्यादिति को जानाति" इत्यन्वयः । प्रथमं त्वया गन्तव्यमेव नहीत्येव युक्तम्, तथापि यदि गन्तव्यमित्येव निश्चितं त्वया तर्हि गन्तासि-अद्यैव ते गमनं भावि नाहं रुन्धे, किन्तु इयं त्वरा का ? यत् त्वं सपदि प्रस्थित एव, भवान् द्वित्राण्येव पदानि-द्वित्रिपदनिक्षेपोपयुज्यमानसमयं यावत् तिष्ठतु, अत्र त्वमित्यनुक्त्वा भवानिति कथनं निस्नेहतां व्यनक्ति, किमर्थमहं तिष्ठेयमिति चेदत्राह-यावन्मुखं पश्यामि-यावता कालेन ते मुखं साधुतया पश्येयं, यथा स्मृतिर्जन्मान्तरे दृढा स्यादिति, कुत इयमुत्सुकतेति चेत् ? अत्राह-संसारे, घटिकाप्रवाहेण-कूपाज्जलोद्धरणार्थं निर्मितघटीयन्त्रवेगेन, विगलन्ती-वेगेन गच्छन्ती या धारा तया समे-तुल्ये, जीविते-जीवनसमये मम पुनस्त्वया सह सङ्गमः-सम्मेलनं, स्याद्वा न वा स्यादिति को जानाति ?, यावत् त्वमागमिष्यसि तावदहं जीविष्याम्येवेति न निश्चितमिति सम्यङ्मुखावलोकनाय क्षणं स्थेयमिति वाच्योऽर्थः, तव गमने मम जीवनमनिश्चितमिति ज्ञात्वा यथोचितमाचरेति व्यङ्ग्यम् ।

एतत्पद्यस्थितचतुर्थचरणोपजीवनं यथा-

"हंहो स्निग्धसखे ! विवेक ! बहुभिः प्राप्तोऽसि पुण्यैर्मया,
गन्तव्यं कतिचिद्दिनानि भवता नास्मत्सकाशात् क्वचित् ।
त्वत्सङ्गेन करोमि जन्ममरणोच्छेदं गृहीतत्वरः,
को जानाति पुनस्त्वया सह मम स्याद्वा न वा सङ्गमः ॥" [ ]

"हंहो स्निग्धसखे ! विवेक ! बहुभिः पुण्यैः मया प्राप्तोऽसि [ अतः ] भवता, अस्मत्सकाशात् कतिचिद्दिनानि न गन्तव्यम्, [ किमर्थमिति चेत् ? ] गृहीतत्वरः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वत्सङ्गेन जन्म-मरणोच्छेदं करोमि, [ ननु साम्प्रतमनुजानीहि ] गमनाय, पुनः कदाचिदागमिष्यामीति कथयसि चेत्? ] पुनस्त्वया सह मम सङ्गमः स्याद्वा न वेति को जानाति" इत्यन्वयः । कश्चित् कथञ्चिद् महता श्रमेण विवेकं सत्त्व-पुरुषान्यताख्यातिं सदसन्निर्णयं वा, समुपलभ्य कथयति–यथा त्वं बहुभिः पुण्यैर्लब्धोऽसि, किञ्चित् कालं यावन्मया त्वरितेन जन्ममरणोच्छेदः क्रियते, [ विवेकस्थिरीभावेन हि तदुच्छेदः प्रसिद्धः ] तावत् त्वयाऽत्र स्थातव्यम्, त्वयि गते सति पुनस्त्वदागमनमनिश्चितमिति भावः । एकदा विवेकोत्पत्तौ हि तत् स्थिरीभावाभावे पुनस्तदुपलब्धिः कठिनेति प्रतीयते । अत्रान्तिमचरणोपजीवनं स्पष्टम् ।

पादद्वयोपजीवनं यथा—

"तत् तावदेव शशिनः स्फुरितं महीयो यावन्न तिग्मरुचिमण्डलमभ्युदेति ।
अभ्युद्गतेऽतुहिनधामनिधौ तु तस्मिन्, इन्दोः सिताभ्रशकलस्य च को विशेषः ? ॥"

[ का० मी० अ० ११ ]

"शशिनः तत् स्फुरितं तावदेव महीयः, यावत् तिग्मरुचिमण्डलं न अभ्युदेति, तस्मिन् अतुहिनधामनिधौ अभ्युद्गते सति, इन्दोः सिताभ्रशकलस्य च को विशेषः ?" इत्यन्वयः । चन्द्रमसः [ रात्रौ ] प्रसिद्धं जगदाह्लादकं स्फुरितं–प्रकाशः, तावत्कालपर्यन्तमेव, महीयः–प्रशस्यतरं चमत्कारकारि वा, यावत् सूर्यस्य मण्डलं न अभ्युदेति, उष्णतेजसि सूर्ये समुदिते तु, इन्दोः श्वेतजलधरखण्डस्य च न किमपि वैशिष्ट्यम्, दिवा चन्द्रोऽपि श्वेतवारिदखण्डमिव गगने निस्तेजः प्रतीयत इति भावः ॥

एतत्पद्यस्थितपादद्वयोपजीवनं यथा—

"तत् तावदेव शशिनः स्फुरितं महीयो
यावन्न किञ्चिदपि गौरतरा हसन्ति ।
ताभिः पुनर्विहसिताननपङ्कजाभि-
रिन्दोः सिताभ्रशकलस्य च को विशेषः ? ॥" [ का० मी० अ० ११ ]

यावद् गौरतरा नार्यो न हसन्ति, तावदेव शशिनः प्रकाशश्चेतश्चमत्करोति, हसितमुखकमलाभिस्ताभिर्हेतुतामुपगताभिः, इन्दोः श्वेतवारिदखण्डस्य च विशेषाभावः, तथाभूते समये चन्द्रमसोऽपि सौन्दर्यं न चेतश्चमत्करोतीति भावः । अत्र पूर्वोक्तपद्यस्थितप्रथम-चतुर्थपादयोरुपजीवनं स्पष्टम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पादत्रयस्योपजीवनं यथा—

"अरण्ये निर्जने रात्रावन्तर्वेश्मनि साहसे ।
न्यासापह्नवने चैव दिव्या सम्भवति क्रिया ।"

[का० मी० अ० ११]

अयं धर्मशास्त्रीयो विवादविषयनिर्णायकः श्लोकः । "निर्जने अरण्ये, रात्रौ, अन्तर्वेश्मनि, साहसे, न्यासापह्नवने च, दिव्या क्रिया सम्भवति" इत्यन्वयः । जनरहिते वने, सुप्तसर्वलोकायां रात्रौ, सर्वस्य दृष्टिविषयबहिर्भूते गृहमध्ये च, कृते साहसे-साहसाचरणरूपेऽपराधे, न्यासस्य-न्यासरूपेण स्थापितधनस्य अपह्नवने-छलने च, कस्यापि साक्षिणो दुर्लभतया कथं निर्णय इति सन्देहे दिव्या क्रिया-घोरशपथरूपा तप्तलोहशलाकादिना दाहादाहादिरूपा च क्रिया सम्भवति, तयैव निर्णयः कार्य इति भावः ॥

अन्यत्पादत्रयोपजीवनं यथा—

"अरण्ये निर्जने रात्रावन्तर्वेश्मनि साहसे ।
तन्वङ्गी यदि लभ्येत दिव्या संभवति क्रिया ॥"

[का० मी० अ० ११]

पूर्वपद्ये तृतीयचरणमात्रमिह परिवर्त्तितम् । निर्जनेऽरण्ये, रात्रौ, गृहमध्ये साहसे-सहसा प्रवर्त्तने कर्मणि यदि तन्वङ्गी लभ्येत, तदा दिव्या-अतिशयाह्लादिका, क्रिया-रत्यादिरूपा, संभवतीति भावः ।

इत्थं क्रमशः पादत्रयोपजीवनपर्यन्तमुदाहृतम्, पादचतुष्टयोपजीवनं च चौर्यतयोक्तमेव, तथा च तस्य क्वचिद् दृष्टत्वेऽपि नोदाहार्यम् । 'आदिशब्दात् पद-पादादीनां च' इति वृत्तिग्रन्थे आदिग्रहणात् पदैकदेशस्योक्तेश्चोपजीवनं ग्राह्यम् ।

तत्र पदैकदेशोपजीवनं यथा—

"नाश्चर्यं यदनार्यासावस्तप्रीतिरयं मयि ।
मांसोपयोगं कुर्वीत, कथं क्षुद्रहितो जनः ॥"

[का० मी० अ० ११]

"अयं अनार्यासौ मयि अस्तप्रीतिः [इति] न आश्चर्यम्, क्षुद्रहितो जनो मांसोपयोगं कथं कुर्वीत" इत्यन्वयः । कश्चित् सज्जनः कथञ्चन दुर्जनेन सह जातप्रीतिः पश्चाद् दुर्जनान्तरसमागमेन तस्य प्रीतिहानिं दृष्ट्वा कञ्चित् प्रति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कथयति, अयं–प्रकृतचर्चाविषयीभूतो जनः, अनार्यस्य–दुष्टस्य, आसौ–समागमे सति, मयि अस्तप्रीतिः–विगलितस्नेहो जात इति नाश्चर्यं–नात्र किमपि चित्रम्, यतः क्षुद्रहितः-क्षुद्राः–लघीयांसो जनाः, हिताः–हितोपदेशका यस्य सः, क्षुद्रं–निन्दनीयं वा कर्मादि हितं यस्यासौ वा, माम्–अक्षुद्रं, कथं सोपयोगं–उपयोगेन कार्ययोजनेन सहितं कृतकृत्यं कुर्वीत, यस्य हि क्षुद्रं कार्यं तस्य क्षुद्रा एव सहाया भविष्यन्तीति तेषामेवोपयोगस्तेन कार्यः, न मादृशेन तस्य किमपि कार्यम्, प्रयोजनाभावेऽभीष्टेऽपि वस्तुनि प्रवृत्त्यभाव इति श्लेषमूलकदृष्टान्तेनाह–क्षुद्रहितो जनः–बुभुक्षाहीनो मनुष्यः, मांसोपयोगं–मांसस्य भोजनादि कथं कुर्वीतेति। यथा पूर्वमभीष्टमपि मांसं केनापि कारणेन बुभुक्षाऽभावे न भुज्यते तथाऽयमपि मयि न प्रीतिमावहतीति ॥

एतत्पद्यस्थं 'मांसोपयोगम्' इति पदं परिकल्प्य तदंशस्योपजीवनं यथा—

"कोपान्मानिनि! किं स्फुरत्यतितरां शोभाधरस्तेऽधरः,
किं वा चुम्बनकारणाद् दयित! नो वायोर्विकारादयम्।
तत् त्वं सुभ्रु! सुगन्धिमाहितरसं स्निग्धं भजस्वादरात्,
मुग्धे! मांसरसं ब्रुवन्निति तया गाढं समालिङ्गितः॥"

[ का० मी० अ० ११ ]

"मानिनि! शोभाधरः ते अधरः किं कोपात् अतितरां स्फुरति?, किं वा चुम्बनकारकारणात् [ अतितरां स्फुरति ]?, दयित! नो, अयं वायोः विकारात् [ अतितरां स्फुरति ], सुभ्रु! मुग्धे! तत् त्वं सुगन्धिं आहितरसं स्निग्धं मांसरसं आदरात् भजस्व इति ब्रुवन्, तया गाढं समालिङ्गितः" इत्यन्वयः। कश्चित् कुपितां कामिनीं प्रसादयन् पृच्छति–मानिनि! शोभायुक्तस्ते रदच्छदोऽतितरां यत् स्फुरति, तत् किं कोपात्, अथवा मां चुम्बितुमभिलाषयेति कथय। साऽऽह–दयित! त्वदुक्तावुभावपि हेतू न स्तः, किन्तु वायोर्विकार एवास्य स्फुरणे हेतुः, एतेन च तया स्वकोपो गूहितः। नायकश्च चतुरतया वायुविकारौषधिमाह श्लेषेण–मुग्धे!–अस्य विकारस्याल्पायासेनापनेतुं साध्यतया तमप्यजानती त्वं सत्यं मुग्धाऽसीति द्योतयति। सुगन्धि–शोभनो गन्धो यस्य तं सुरभिं, आहितः–आ–समन्तात्, हितकरः, रसः–स्वादः सारो वा यस्य तम्, स्निग्धं–स्नेहेन घृतादिना युक्तं, मांसरसं–मांसस्य–आमिषस्य रसं–तरलसारम्, आदरात्–श्रद्धया, भजस्व–उपयोजय, इति ब्रुवन् तया गाढं समालिङ्गितः–कोपस्यापगमात् तच्चातुर्येणातितरां प्रसत्तेर्वा स्वयं नायिकया स सामलिङ्गितः। "इति ब्रुवन् [ एव ] तया गाढं समालिङ्गितः"

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति कथनेन तदुक्त्या कस्यापि तादृशस्यार्थस्य सूचनं येन रसोद्रेकात् कोपापनयो जात इति प्रतीयते, स चायमर्थः–अस्याधरस्फुरणरूपस्य व्याधेरपनयनाय सुगन्धि पौरुषातिरेकजन्यशोभनगन्धयुक्तम्, आहितरसम्–आहितः–पूर्वं त्वयैव वर्धितो, रसो–रतिस्थायिभावकः शृङ्गारो यस्मिंस्तम्, स्निग्धं–स्नेहयुक्तम्, सरसं समुत्कण्ठितं, मां आदरात्–श्रद्धया, [ स्वेच्छयैव ] भजस्वेति । यद्यपि अत्रार्थे आहितरसं सरसमिति पदयोरुक्तार्थत्वं प्रतीयते तथापि उक्तरीत्या व्याख्यानान्न दोष इति । अत्र पूर्वपद्यस्थ 'मांसोपयोगम्' इति पदस्थो 'मांसं' इत्यंशो गृहीतः ॥

उक्तेरुपजीवनं यथा—

"ऊरुद्वन्द्वं सरसकदलीकाण्डसब्रह्मचारि" [ का० मी० अ० ११ ]

इत्यस्या उपजीवनम्—

"ऊरुद्वयं कदलकन्दलयोः सवंशं,
श्रोणिः शिलाफलकसोदरसन्निवेशा ।
वक्षः स्तनद्वितयताडितकुम्भशोभं,
सब्रह्मचारि शशिनश्च मुखं मृगाक्ष्याः ॥"

[ का० मी० अ० ११ ]

"मृगाक्ष्याः ऊरुद्वयं कदलकन्दलयोः सवंशम्, श्रोणिः शिलाफलकसोदरसन्निवेशा, वक्षः स्तनद्वितयताडितकुम्भशोभम्, मुखं च शशिनः सब्रह्मचारि" इत्यन्वयः । मृगाक्ष्याः–मृगस्य अक्षिणी इव अक्षिणी यस्यास्तस्याः, ऊरुद्वयं–जानूपरिभागयुग्मम्, कदलस्य–कदलीवृक्षस्य, कन्दलयोः–अङ्कुरयोः, नवीनकदलीवृक्षयोरिति यावत्, एतेन तयोः कोमलत्वं व्यज्यते, सवंशं–सदृशम्; श्रोणिः–कटिः, शिलाफलकेन सोदरः–समानः, सन्निवेशः–स्थितिर्यस्यास्तादृशी, वक्षः–उरः, स्तनद्वितयेन–कुचयुग्मेन, ताडिता–आहता, कुम्भयोः–घटयोः, शोभा येन तादृशम्; मुखं च शशिनः–चन्द्रस्य, सब्रह्मचारि–सहाध्यायि, समानगुणतया सदृशमिति भावः । अत्रोपरितनाया उक्तेरुपजीवनं प्रतीयत एव ॥

इत्थं व्याख्यातान्युपजीवनानि, एतेषां शिक्षयाऽपि कवित्वशक्तिरुन्मिषिता भवति, आस्वादविशेषश्च कश्चिदनुभूयते । तदुक्तं राजशेखरेण—

"उक्तयो ह्यर्थान्तरसंक्रान्ता न प्रत्यभिज्ञायन्ते स्वदन्ते च" इति ।

[ का० मी० अ० ११ ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा च परोक्तयोऽप्यर्थान्तरं संक्रमय्योपजीव्या इत्यवसितम् । इदमत्र विचार्यते–परकविप्रयुक्तशब्दार्थहरणरूपमुपजीवनमत्रोपदिष्टम्, तच्च नोपदेश्यम्, यदित्थं कथयन्ति—

"पुंसः कालातिपातेन चौर्यमन्यद् विशीर्यते ।
अपि पुत्रेषु पौत्रेषु वाक्चौर्यं न विशीर्यते ॥" [ ]

अन्यत्–धनादिकर्मकं चौर्यम्, कालातिपातेन–कियति काले गते, विशीर्यते–विलुप्यते, वाक्चौर्यं तु–शब्दार्थहरणरूपं चौर्यं तु, पुत्रेषु पौत्रेषु सत्सु–इयति महति कालेऽतिक्रान्ते, चौर्यकर्तुरभावेऽपि तदीयपुत्रपौत्राद्येष्वपि न विशीर्यते–न विलुप्यते, किन्तु जनाः कथयन्त्येव–अस्य पित्रा पितामहेन वा विख्यातस्य तस्य कवेर्वाग् हृता–आत्मीयत्वेनोपनिबद्धेति । एतादृशमकीर्तिकरं कर्म कथमुपदेष्टुमर्ह-मिति । तदिदमभिसन्धायैव वृत्तावुक्तं–यथौचित्यमिति–येन यथा चौर्यं न विभाव्येत तथेति च तदाशयः । हरणं कुत्र भवतीत्येतद्विषये राजशेखरेण मत-मिदमुपन्यस्तम्–"अयमप्रसिद्धः प्रसिद्धिमानहम्; अयमप्रतिष्ठः प्रतिष्ठावानहम्; अप्रक्रान्तमिदमस्य संविधानकं प्रक्रान्तं मम; गुडूचीवचनोऽयं मृद्वीकावचनोऽहम्; अनादृतभाषाविशेषोऽयम्, आदृतभाषाविशेषोऽहम्; प्रशान्तज्ञातृकमिदम्, देशान्तरकर्तृकमिदम्, उत्सन्ननिबन्धनमूलमिदम्, म्लेच्छितकोपनिबन्धन-मूलमिदम्, इत्येवमादिभिः कारणैः शब्दहरणेऽर्थहरणे वाऽभिरमेत" "इत्यवन्ति-सुन्दरी" इति । [ का० मी० अ० ११ ]

अयमर्थः–यस्य काव्यमनुक्रियेत ह्रियेत वा सोऽप्रसिद्धः, हर्ता चात्मानं प्रसिद्धं मन्येत तदाहरेत्, तथा सति कर्तुः प्रसिद्ध्यभावाच्चौर्यं छन्नं भवति; एवं पूर्वपरयोरप्रतिष्ठितत्व-प्रतिष्ठितत्वयोः प्रतिष्ठितेन कृतं चौर्यं गोपयितुं योग्यम्, यस्य च कर्म [ काव्यादि ] लोकेषु न प्रक्रान्तं स्यात्, स्वकीयं च शीघ्रमेव प्रक्रान्तं क्रियेतेत्यस्यामवस्थायामपि चौर्यं गोप्येत; तेन यदि स एवाऽर्थः कठोरया वाचा विरसया वोक्तः स्यात्, तर्हि तस्य सरसया वाचा हरणे चौर्यगोपनसंभवः; पूर्वकर्तुरपेक्षया स्वस्य भाषाविशेषविज्ञत्वेऽपि भाषान्तरेण हरणं छाद्यते । किञ्च अस्य ज्ञाता प्रशान्त इति हरणेऽपि को जानाति पूर्वस्यायं नास्येति; तथा देशा-न्तरस्थस्य कवेः काव्यस्य हरणेऽपि छाद्येत चौर्यम्; इदं च काव्यं कस्य कुत्र वा निबद्धमित्यज्ञातेऽपि हरणमाश्रियेत; अस्य काव्यस्योपनिबन्धनकारणं लोकैर्म्लेच्छ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भाषावदनादृतमिति विज्ञाते च हरणं छन्नं स्यादित्येतानि कारणानि हरणायोपयुक्तानीति । तथा च एतास्ववस्थासु हरणमौचित्यं नातिक्रामति ।

तथा चोक्तं राजशेखरेण—

"नास्त्यचौरः कविजनो, नास्त्यचौरो वणिग्जनः ।
स नन्दति विना वाच्यं, यो जानाति निगूहितम् ॥
उत्पादकः कविः कश्चित्, कश्चिच्च परिवर्त्तकः ।
आच्छादकस्तथा चान्यस्तथा संवर्धकोऽपरः ॥
शब्दार्थोक्तिषु यः पश्येदिह किञ्चन नूतनम् ।
उल्लिखेत् किञ्चन प्राच्यं मन्यतां स महाकविः ॥"

[ का० मी० अ० ११ ]

प्रायः कवयो वणिजश्चांशतश्चौर्यरता एव, स एव विना वाच्यं नन्दति–स एव निन्दया मुच्यते, आनन्दमवाप्नोति च, यश्चौर्यं छादयितुं जानाति, कवीनां चौर्यच्छादनस्योपायाश्च पूर्वमुक्ता एव, तेषां कवीनां च पञ्च भिदाः, तथाहि–उत्पादकः, परिवर्तकः, आच्छादकः, संवर्धकः, महाकविरिति च । एषु चतुर्णां नामानुसारमेव लक्षणानि, विज्ञेयानि । यश्च किञ्चन नूतनं पश्येत्, किञ्चिच्च प्राच्यमपि वैचित्र्येण उल्लिखेत्, स महाकविरिति मन्यतामिति ।

अयमत्र निष्कर्षः–यच्चौर्यमुद्वेगकरं तदेव निन्दितम्, किन्तु वाटिकासु विकसितानां मञ्जरीणां कुसुमावलीनां च गन्धं यदनुहरति पवनः, न तन्निन्द्यते, तपतो दिवाकरस्य तेज आतपे प्रसारितानि वस्त्राणि यदाददति, न तदाक्रोशमर्हति, एवं यत्र शब्दस्यार्थस्य वाऽनुद्वेगकरेण प्रकारेण हरणं तदनिन्दितमेवेति, अलमतिप्रसक्तानुप्रसक्तेन, विस्तरेप्सुभिराकरग्रन्था अवलोकनीयाः ॥

उपजीवनपदसम्बद्धादिपदेन समस्यापूरणाद्या ग्राह्यत्वेनोक्ताः, तत्र समस्या–परीक्ष्यकविशक्तिजिज्ञासया पूरणीयत्वेनोदाहृतः साकाङ्क्षः शब्दसन्दर्भः, तस्याः पूरणं–अवशिष्टांशनिर्माणेन आकाङ्क्षितार्थपूर्तिकरणम्, तद् आद्यं प्रथमं यासु ताः शिक्षापदवाच्या इत्यर्थः ।

सा च समस्या 'पादसमस्या, पादद्वयसमस्या' इत्यादिरूपा, तत्र पादसमस्या यथा–"मृगात् सिंहः पलायते" इति, "समुद्राद् धूलिरुत्थिता" इति च, एतौ चतुर्थौ पादौ, ताववलम्ब्य प्रत्येकं पादत्रयकल्पना, यथा प्रथमस्य—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"मदमन्थरमातङ्गकुम्भपाटनलम्पटः ।
दैवे पराङ्मुखे हन्त; [ मृगात् सिंहः पलायते ] ॥" [ ] इति,

अर्थः—मदेन-दानेन, मन्थराणाम्-अलसगतीनां, मातङ्गानां-गजानां, कुम्भस्य मस्तकस्य, पाटने-विदारणे, लम्पटः-साहसिकः, सिंहः, दैवे पराङ्मुखे सति, मृगादपि पलायते, मृगात् सिंहस्य भीतिरिह पलायनशब्दवाच्या, तत्र मत्तवारणकुम्भदारणपटोरस्य सिंहस्य मृगाद् भीतिरनुपपद्यमानतयोपपत्तिचिन्तार्थं समस्यारूपत्वेनोपनिबद्धा, सुचतुरेण कविना सर्ववैपरीत्यकारिदैवपराङ्मुखीभावेनोपपादितेति तत्पूर्त्तिः ।

द्वितीयस्य यथा—

"सीतासमागमोत्कण्ठाकर्णान्ताकृष्टधन्वनः ।
राघवस्य शराङ्गारैः, [ समुद्राद् धूलिरुत्थिता ॥" [ ] इति ।

अर्थः—सीतायाः समागमाय या उत्कण्ठा तया कर्णपर्यन्तमाकृष्टं धनुर्येन तस्य राघवस्य, शररूपैः, अङ्गारैः, शोषितात् समुद्रादपि धूलिः, उत्थितेति । अगाधजलमध्याद् धूलेरुत्थानमसंभवीति तदुपपादनाय रामस्य समुद्रपारगमनाय क्रोधेन समुद्रशोषणार्थं शरक्षेपरूपो हेतुरुपात्तः ।

पादद्वयसमस्या यथा—"चव्य-चित्रक-नागरैः," "लङ्कायां रावणो हतः," इति द्वितीय-चतुर्थौ पादौ, शेषांशः पूरणीयः, स चेत्थम्—

"मुमूर्षो ! किं तवाद्यापि [ चव्य-चित्रक-नागरैः ] ।
स्मर नारायणं येन, [ लङ्कायां रावणो हतः ] ॥" [ ] इति,

पादाविमावसम्बद्धाविव प्रतीयमानौ, अतो मुमूर्षुजनोपदेशप्रकरणमाश्रित्य प्रथम-तृतीयपादयोः प्रक्षेपेण सर्वेषां पादानां सम्बन्धः स्थापितः । अयमर्थः—हे मुमूर्षो ! अद्यापि मृत्योरासत्तिसमयेऽपि, तव, चव्य-चित्रक-नागरैः-एतन्नाम्ना प्रसिद्धौषधद्रव्यैः, किम् ?-वृथा त्वत्कृते एतेषामुपयोगः, एतत्सेवनं विहाय, नारायणं स्मर-रामं चिन्तय, येन लङ्कायां रावणो हत इति ।

समस्यापूर्तिवत् भिन्नार्थकानां विभिन्नपद्यत्रयगतानां त्रयाणां पादानामेकेन पादेनार्थसमन्वयनं नाम चमत्कृतिकृत् कवित्वं, तथाहि—

"किमपि किमिह दृष्टं स्थानमस्ति श्रुतं वा,
व्रजति दिनकरोऽयं यत्र नास्तं कदाचित् ।
भ्रमति विहगसार्थानित्थमापृच्छमानो,
रजनिविरहभीतश्चक्रवाको वराकः ॥" [ का० मी० अ० ११ ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थः-रजनिविरहभीतः-रात्रिसमयागमनाशङ्कितप्रियाविप्रयोगकातरः, अत एव वराकः-दयास्पदम्, चक्रवाकः-प्रसिद्धः पक्षिविशेषः, 'इह किमपि तादृशं स्थानं दृष्टं श्रुतं वा अस्ति किम् ? यत्र दिनकरोऽस्तं न व्रजति' इत्थं विहगसार्थान् आपृच्छमानो भ्रमति, विहगा हि दिग्विदिक्षु दूरतरं गच्छन्तीति सम्भाव्यते तैस्तादृशस्थानस्य दर्शनं श्रवणं वेति विचार्य तस्मिन् ज्ञाते तत्र गतस्य निशाभावात् प्रियासम्प्रयोगः सर्वदा भवत्वित्याशया स पृच्छतीति ॥

अपरं च—

"जयति सितविलोलव्यालयज्ञोपवीती,
घनकपिलजटान्तर्भ्रान्तगङ्गाजलौघः ।
अविदितमृगचिह्नामिन्दुलेखां दधानः,
परिणतशितिकण्ठः श्यामकण्ठः पिनाकी ॥" [का० मी० अ० ११]

अर्थः-सिताः-श्वेताः, विलोलाः-चञ्चलाः, व्याला एव-सर्पा एव यज्ञोपवीतं यस्य सः, तथा घना-निबिडा, कपिला-पिशङ्गा या जटा तस्या अन्तः-मध्ये भ्रान्तः-कृतपरिभ्रमणो गङ्गाजलस्य ओघः-प्रवाहो यस्य सः; एवम्-अविदितो मृगचिह्नो यस्यामीदृशीम्, इन्दुलेखां-चन्द्रशकलं दधानः, किञ्च परिणतः-वृद्धो यो शितिकण्ठः-नीलकण्ठपक्षी, तद्वत् श्यामः कण्ठो यस्य सः; पिनाकी-पिनाकधनुर्भृत् शिवः, जयति; अत्र 'परिणतशितिकण्ठः श्यामकण्ठः' इत्यसमस्तः पाठोऽप्युपलभ्यते, स च नाऽऽस्येनान्वयं लभत इत्युपेक्षितः ॥

अन्यच्च—

"कुमुदवनमपश्रि श्रीमदम्भोजखण्डं,
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः ।
उदयमहिमरश्मिर्याति शीतांशुरस्तं,
हतविधिललितानां ही विचित्रो विपाकः ॥"
[शि० व० स० ११ श्लो० ६४]

अर्थः—कुमुदानां वनम्, अपश्रि-अपगता श्रीर्यस्मात् तादृशं, निःशोभमित्यर्थः; अम्भोजानां खण्डं-वनम्, श्रीमत्-कान्तियुक्तम्; उलूकः-पेचकः, मुदं-हर्षं त्यजति, दिवा भीतत्वात् तस्य; चक्रवाकः प्रीतिमान्, रजनीजनितप्रियाविरहावसानादिति भावः; अहिमरश्मिः-उष्णांशुः सूर्यः, उदयं याति-उदेति शीतांशुः—शीतकिरणश्चन्द्रः, अस्तं याति। कुत एतद् वैषम्यमिति चेदत्राह—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हतविधिललितानां-दुर्दैवचेष्टितानां, विपाकः-परिपाकः, तत्तत्प्राणिकर्मानुरूपफलदानप्रकारः, विचित्रः-विविधः, न त्वेकविध इत्यर्थः। हीति विस्मये। विधिविपाकवैचित्र्याज्जगद्वैचित्र्यं युज्यत इति कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यासः॥

एषां त्रयाणां श्लोकानां, प्रथमस्य प्रथमं द्वितीयस्य द्वितीयं तृतीयस्य तुरीयं च पादमादाय पादत्रयात्मिकायाः समस्याया इव तृतीयचरणनिवेशेन रचिता पूर्तिर्यथा—

"किमपि किमिह दृष्टं स्थानमस्ति श्रुतं वा,
घनकपिलजटान्तर्भ्रान्तगङ्गाजलौघः।
निवसति स पिनाकी यत्र यायां तदस्मिन्
हतविधिललितानां ही विचित्रो विपाकः॥" [का० मी० अ० ११]

अर्थः—इह किमपि-अवर्णनीयं, स्थानं दृष्टं श्रुतं वा अस्ति किम्?, यत्र घनकपिलजटान्तर्भ्रान्तगङ्गाजलौघः स पिनाकी निवसति। तत्र किं कार्यम्? तदाह-तत् अस्मिन् यायाम्, कुत इदं वैराग्यमिति चेदत्राह-हतविधिललितानां विपाको विचित्रो हीति। व्याख्यात एवास्याधिकोंऽशः पूर्वत्र, तथा च विचित्रविधिविपाकविस्मितो भीतो वाऽहं तादृशं स्थानं यातुमिच्छामि, तत्र च न तस्य प्रभुत्वमिति भावः। अत्र पद्ये यद्यपि एक एव पादः स्वीयः, तथापि नेदं हरणमिति प्रतीयते, अपितु विभिन्नाभिप्रायेण प्रथक् पद्येषु निक्षिप्तानामेकेन नवीनेन चरणेन सह घटमानोऽन्वयोऽधिकं चमत्करोति सचेतसां चेतांसि।

चूडामणौ "**समस्यापूरणाद्याः शिक्षाः**" इत्युक्तम्, तत्राद्यपदेन वाक्यार्थशून्यवृत्ताभ्यासपदपरावृत्त्यभ्यास-महाकविकाव्यार्थभावना, सत्कविकवितापाठाश्च संगृह्यन्ते। तत्र वाक्यार्थशून्यवृत्तरचना यथा—

"आनन्दसन्दोहपदारविन्दकुन्देन्दुकन्दोदितबिन्दुवृन्दम्।
इन्दिन्दिरान्दोलितमन्दमन्दनिष्यन्दनन्दन्मकरन्दवृन्दम्॥" इति।

अत्र केवलं वृत्तानुगुणानां शब्दानामेव संघटना कृता, नार्थविचारदृष्टिरिति प्रथमतः प्रवृत्तस्य कवीभवितुमिच्छोरिदम्।

पुरातनपद्येषु पदपरावृत्त्यभ्यासो यथा—

"वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वती-परमेश्वरौ॥" [रघु० १-१]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**तत्र सतोऽपि सामान्यस्यानिबन्धो यथा-मालत्या वसन्ते, पुष्पफलस्य चन्दनद्रुमेषु, फलस्याशोकेषु । द्रव्यस्य यथा-कृष्णपक्षे सत्या अपि ज्योत्स्नायाः, शुक्लपक्षे त्वन्धकारस्य । गुणस्य यथा— कुन्दकुड्मलानां कामिदन्तानां च रक्तत्वस्य, कमलमुकुलप्रभृतेश्च हरितत्वस्य, प्रियङ्गुपुष्पाणां च पीतत्वस्य । क्रियाया यथा—दिवा नीलोत्पलानां विकाशस्य, निशानिमित्तस्य शेफालिकाकुसुमानां विस्रंसस्य ।**

---

एतत्पद्ये 'वाक्' पदस्थाने 'वाणी' पदं 'संपृक्तौ' इत्यस्य स्थाने 'संभिन्नौ' इति, 'पितरौ' इत्यस्य स्थाने 'जनकौ' इति च प्रक्षिप्य 'पार्वती-परमेश्वरौ' इति चतुर्थचरणस्थाने 'शर्वाणी-शशिशेखरौ' इति च निवेश्य पदपरावृत्त्यभ्यासः । पदस्य स्याद्यन्तस्य श्लोकचरणस्य वा परावृत्तिरिति व्युत्पत्त्या तस्योभयरूपतयाऽग्रिमश्लोक उभयोदाहरणं यथा—

"वाण्यर्थाविव संभिन्नौ, वाण्यर्थप्रतिपत्तये ।
जगतो जनकौ वन्दे, शर्वाणी-शशिशेखरौ ॥" इति । [ ]

महाकाव्यार्थचर्वण-परकृतकाव्यपाठौ क्रियारूपौ इति न तयोरिहोदाहर्तुं योग्यत्वम् । एवमन्यान्यपि ग्रन्थान्तरेषूक्तानि कवित्वसम्पादकानि कवित्वेप्सुना परिशीलनीयानि । तदयमवसितो हरणोपजीवनसमस्याद्यभ्यासविचारः, यश्च पदन्याससामर्थ्योपजननायोपयुक्तः ॥

साम्प्रतं पूर्वमुक्तः "सतोऽप्यनिबन्धः" इत्यादिरूपः कविसमयो वैशद्येन निरूपणीयः, अयं च यद्यपि सूत्रे पूर्वमुपात्त इत्यस्यैव निरूपणमावश्यकमासीत् तथापि सूची-कटाहन्यायेन पूर्वमुपजीवनाद्येवोपनिबद्धमित्युक्तं प्रागेव । तत्र क्रमशः प्रागुक्तजात्यादीनामनिबन्धनादि पृथक् पृथग् वक्तुमुपक्रमते-तत्र **सतोऽपि सामान्यस्ये**त्यादिना, सतः—लौकिकनियमेन विद्यमानस्याऽपि, सामान्यस्य—जातेः, किञ्चिज्जातीयवस्तुन इत्यर्थः, अनिबन्धः—निबन्धनाभावोऽसत्त्वेन निबन्धनं वा, **यथा मालत्या वसन्ते** इति-वसन्ते सत्या अपि मालतीजातेः कविभिस्तस्यास्तत्राभावो निबध्यते, सा वा तस्मिन् समये न वर्ण्यते । यथा—

"मालतीविमुखश्चैत्रो विकासी पुष्पसंपदाम् ।
आश्चर्यं जातिहीनस्य कथं सुमनसः प्रियाः ॥" [ का० मी० अ० १४ ] इति,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थः—मालत्या-जातीकुसुमेन, विमुखः-रहितः, चैत्रः [मासः], पुष्पसंपदां-पुष्पसमृद्धीनां, विकासी-विकासयुक्तः। जातिहीनस्य-ब्राह्मणत्वादिरहितस्य, सुमनसः-देवाः, प्रिया इत्याश्चर्यम्; अथ च जात्या-मालत्या रहितस्य, सुमनसः-पुष्पान्तराणि प्रियाणीत्यप्याश्चर्यमेव, यस्य मालतीविमुखता तस्यान्यकुसुमप्रियत्वमाश्चर्यकरं, यथा ब्राह्मण्यादिहीनस्य देवप्रियत्वमिति भावः॥

चन्दनद्रुमेषु पुष्प-फलस्यानिबन्धो यथा—

"यद्यपि चन्दनविटपी विधिना फल-कुसुमवर्जितो विहितः।
निजवपुषैव परेषां तथापि सन्तापमपहरति॥" [शा० प० भट्टादित्यस्य]

अर्थः—चन्दनविटपी यद्यपि विधिना फल-कुसुमवर्जितो विहितः तथापि निजवपुषैव परेषां सन्तापमपनयति। वृक्षस्य पुष्प-फलाभ्यामेव लोकोपकारकत्वं दृश्यते, न तु स्वशरीरेण, शरीरे हि परोपकारोपयुक्ते पुनस्तादृशोपकारकरणस्यावसर एव न स्यादिति यद्यप्यस्ति तथापि विधिना पुष्प-फलराहित्यं लम्भितश्चन्दनतरुः परोपकारसामर्थ्यराहित्यमात्मनो वीक्ष्य शरीरमेव मे तर्हि विनियुज्यतामस्मिन् कर्मणीत्यभिसन्धाय स्वशरीरेणैव परसन्तापमपनयतीति तस्य चरमा परोपकारपरतेति॥

अशोकेषु फलस्यानिबन्धो यथा—

"दैवायत्ते हि फले किं, क्रियतामेतदत्र तु वदामः।
नाशोकस्य किसलयैर्वृक्षान्तरपल्लवास्तुल्याः॥" [का० मी० अ० १४]

अर्थः—केषुचिद् वृक्षेषु फलमेव, केषुचित् कुसुमान्येव, केषुचिदुभयं, क्वचिन्नैकमपीति दैवायत्तमित्यशोकस्य फले दैवायत्ते—दैवाधीने, अशोकेन अन्येन वा तद्गुणलुब्धेन जनेन किं क्रियताम्?—कस्या अपि क्रियाया अवसर एव न, तु—किन्तु, अत्र—अशोकचर्चायाम्, एतद् वदामः, यत् अशोकस्य किसलयैर्वृक्षान्तरपल्लवा न तुल्याः, फलाभावेऽप्यनन्यसदृशकिसलयैरेवायं माननीय इति भावः॥

सतोऽपि द्रव्यस्यानिबन्धः—यथा कृष्णपक्षेऽपि शुक्लपक्षेण समैव ज्योत्स्ना प्रायो भवति, परन्तु सा न निबध्यते, यथा—

"ददृशाते जनैस्तत्र यात्रायां सकुतूहलैः।
बलभद्र-प्रलम्बघ्नौ पक्षाविव सितासितौ॥" [का० मी० अ० १४]

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थः—तत्र यात्रायां सकुतूहलैर्जनैर्बलभद्रप्रलम्बघ्नौ सिताऽसितौ पक्षौ इव ददृशाते, कंसेनाहूतौ बलराम-कृष्णौ मथुरायां यात्रायां गच्छन्तौ बहुदिनेभ्यः श्रुतचरित्रत्वेऽप्यदृष्टतया कुतूहलसहितैर्मनुष्यैर्बलरामः शुक्लपक्ष इव, प्रलम्बघ्नः—श्रीकृष्णस्तु कृष्णपक्ष इव दृष्टः, अत्रोभयोः पक्षयोर्ज्योत्स्नानिमित्तकशुक्लत्व-कृष्णत्वाविशेषेऽपि गौरवर्णस्य बलभद्रस्य शुक्लेन कृष्णवर्णस्य प्रलम्बघ्नस्य च कृष्णपक्षेणोपमानं कृतमिति तत्र ज्योत्स्ना न निबध्यत इति प्रतीयते ॥

तुल्यन्यायेन शुक्लपक्षे स्थितस्यान्धकारस्यानिबन्धो यथा—

"मासि मासि समा ज्योत्स्ना, पक्षयोः कृष्ण-शुक्लयोः ।
तत्रैकः शुक्लतां यातो, यशः पुण्यैरवाप्यते ॥" [ का० मी० अ० १४ ]

उभयोः-पक्षयोः प्रतिमासं ज्योत्स्नासाम्येऽप्येकस्य शुक्लत्वेन ख्यातिर्नापरस्य यतो यशसि न केवलं गुणसत्ता नियामिकाऽपि तु पुण्याख्यमदृष्टं तत्र कारणमिति । अत्र तमसः शुक्ले सतोऽप्यनिबन्धः । ननु तमसो द्रव्यत्वं नैयायिकैरनङ्गीकृतमिति कथं द्रव्यस्य सतोऽनिबन्धनस्योदाहरणत्वमिति चेत् ? न—आर्हतैः सांख्यैर्वेदान्तिभिश्च तमसो द्रव्यत्वस्वीकारात् ॥

जाति-द्रव्ययोरनन्तरं गुणस्यैव क्रमतः प्राप्तिरिति सतोऽपि तस्य क्वचनानिबन्धः, यथा कुन्दकुड्मलानां कामिदन्तानां च मूले रक्तत्वसत्त्वेऽपि रक्तत्वं तत्र न निबध्यते, यथा—

"द्योतितान्तःसभैः कुन्दकुड्मलाग्रदतः स्मितैः ।
स्नपितेवाभवत् तस्य शुद्धवर्णा सरस्वती ॥" [ शि० व० स० २० श्लो० ९ ]

अर्थः—"कुन्दकुड्मलाग्रदतः तस्य सरस्वती, द्योतितान्तःसभैः स्मितैः स्नपितेव शुद्धवर्णा अभवत्" इत्यन्वयः । नारदेनोक्तं शिशुपालवधायेन्द्रसन्देशं युधिष्ठिरप्रेषितं राजसूययज्ञे साहाय्याय निमन्त्रणं च समधिगम्य किमत्र पूर्वं कर्तव्यमिति विचाराय उद्धव-बलरामाभ्यां सहोपविष्टः श्रीकृष्णः पूर्वं किमिह विचारणीयं तत्र च किमस्मन्मतमिति प्रकटयितुं वक्तुमुपचक्राम, तत्रत्यं वर्णनमिदम् । कविराह—कुन्दं—माघभवः पुष्पविशेषः, तस्य कुड्मलानि—कोरकाणि, तेषामग्राणीव दन्ता यस्य तस्य, श्रीकृष्णस्य, सरस्वती—वाणी, अन्तः प्रधाना सभा—अन्तःसभा, सा द्योतिता—प्रकाशिता यैस्तादृशैः स्मितैः, स्नपितेव—क्षालितेव, शुद्धवर्णा—स्फुटाक्षरा, अथ च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वच्छकान्तिरभवत्, अत्र स्वाभाविकवर्णशुद्धेः स्नानहेतुकत्वमुत्प्रेक्ष्यते, स्मितपूर्वाभिभाषी हरिरिति भावः। अत्र कुन्दकुड्मलानामिव तदुपमितकामिदन्तानामपि श्वेतत्वमात्रं वर्णनीयत्वेनोपन्यस्तं तन्मूलगता रक्तता च नोपनिबद्धेति ॥

एवं कमलमुकुलप्रभृतीनां सदपि हरितत्वं न निबन्धनीयम्, यथा—

उद्दण्डोदरपुण्डरीकमुकुलभ्रान्तिस्पृशा दंष्ट्रया,
मग्नां लावणसैन्धवेऽम्भसि महीमुद्यच्छतो हेलया।
तत्कालाकुलदेवदानवकुलैरुत्तालकोलाहलं,
शौरेरादिवराहलीलमवतादभ्रंलिहाग्रं वपुः ॥ [का० मी० अ० ९५]

अर्थः—उद्दण्डम्—उच्छ्रितम्, उदरं—मध्यभागो यस्य तादृशं यत् पुण्डरीकमुकुलं—सिताम्भोजकलिका तस्य भ्रान्तिं—भ्रमं स्पृशति या तया, दंष्ट्रया, लावणसैन्धवे—लवणसमुद्रसम्बन्धिनि, अम्भसि—जले, मग्नां महीं, हेलया—अनायासेन, उद्यच्छतः—उपरि आनयतः, शौरेः—हरेः, तत्काले- तस्मिन् काले, आकुलानां देवदानवानां कुलैः—समूहैः, 'युतैः' इति विवेके पाठः, उत्ताल—प्रभूतः कोलाहलो यत्र तत्, आदिवराहस्य—प्राथमिकशूकरस्य, लीला—अनुकरणं यत्र तादृशम्, अभ्रंलिहाग्रं—मेघस्पर्शिमूर्धभागं, वपुः—शरीरम्, अवतात्—सर्वविधभयेभ्यो रक्षतु। अत्र स्वभावसिद्धश्वेतरूपायां दंष्ट्रायां पुण्डरीकमुकुलभ्रान्तिवर्णनामुखेन साम्यं वर्णयता कविना तस्मिन् पुण्डरीकमुकुले सतोऽपि हरितत्वस्य निबन्धनं त्यक्तमिति गम्यते ॥

एवं सतोऽपि प्रियङ्गुपुष्पाणां पीतत्वगुणस्यानिबन्धः, यथा—

"प्रियङ्गुश्याममम्भोधिरान्ध्रीणां स्तनमण्डलम्।
अलङ्कर्तुमिव स्वच्छाः सूते मौक्तिकसम्पदः ॥" [ ]

अर्थः—अम्भोधिः, प्रियङ्गुपुष्पवत् श्यामम्, आन्ध्रीणाम्—आन्ध्रदेशोद्भवस्त्रीणाम्, स्तनमण्डलं—मण्डलाकारं स्तनम्, अलङ्कर्तुं—शोभयितुमिव, स्वच्छाः—श्वेताः, मौक्तिकसम्पदः—मुक्तारूपाः समृद्धीः, सूते—उत्पादयति। श्यामेषु स्तनेषु श्वेतमौक्तिकहारेणाधिका शोभा स्यादिति विचार्येव समुद्रेण मौक्तिकान्युत्पाद्यन्त इत्युत्प्रेक्षा। अत्र प्रियङ्गुपुष्पे पीतत्व-श्यामत्वयोरुभयोः सत्त्वेऽपि श्यामत्वमेव वर्ण्यते, न पीतत्वम्, तदीयश्यामताया एवाधिकसौन्दर्ययोगात् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रमप्राप्तायाः क्रियायाः सत्या अप्यनिबन्धः, यथा नीलोत्पलानां—नीलकमलानां दिवा सतोऽपि क्रियारूपस्य विकासस्यानिबन्धः । यथा—

"आलिख्य पत्रमसितागुरुणाऽभिरामं,
रामामुखे क्षणसभाजितचन्द्रबिम्बे ।
जातः पुनर्विकसनावसरोऽयमस्ये-
त्युक्त्वा सखी कुवलयं श्रवणे चकार ॥" [ का० मी० अ० १४ ]

अर्थः—"सखी असितागुरुणा अभिरामं पत्रं आलिख्य, रामामुखे क्षणसभाजितचन्द्रबिम्बे [ सति ] पुनः 'अस्य विकसनावसरो जातः' इत्युक्त्वा श्रवणे कुवलयं चकार" इत्यन्वयः । नायिकां विभूषयन्ती सखी तस्याः कपोलोपरि असितागुरुणा—कालागुरुक्षोदेन, अभिरामं—सुन्दरं, पत्रं—शोभाकरं विशेषकम्, आलिख्य—रचयित्वा, रामामुखे—प्रकृतनायिकाया वदने, क्षणं—कालागुरुपत्रस्थितिकालपर्यन्तमेव, तावतैव निष्कलङ्कस्यास्या मुखस्य तेन साम्यमिति भावः, सभाजितं—स्वसाम्यप्रदानेन कृतार्थीकृतं चन्द्रबिम्बं येन तथाभूते सति, पुनः—अनन्तरम्, 'अस्य—कुवलयस्य, विकसनावसरः—प्रफुल्लताप्राप्तिसमयः, चन्द्रोदये तस्य विकास इति प्रसिद्धेस्त्वन्मुखरूपस्य चन्द्रस्योदयात्, जातः—प्राप्तः' इत्युक्त्वा, श्रवणे—तस्याः कर्णयोः, कुवलयं—नीलोत्पलं, चकार—परिधापयामास । अत्र यद्यपि दिवाऽस्य विकासो न भवति, तथाऽपि त्वन्मुखचन्द्रोदयाद् रात्रिमभिसमीक्ष्येदं विकसितं स्यादिति सखीवाच्यम् ॥

तथा निशानिमित्तस्य शेफालिकाकुसुमानां विस्रंसस्यानिबन्धो यथा—

"त्वद्विप्रयोगे किरणैस्तथोग्रैर्दग्धाऽस्मि कृत्स्नं दिवसं सवित्रा ।
इतीव दुःखं शशिने गदन्ती शेफालिका रोदिति पुष्पबाष्पैः ॥"
[ का० मी० अ० १४ ]

अर्थः—'त्वद्विप्रयोगे—दिवा त्वद्विरहे जाते, सवित्रा—सूर्येण, तथा—प्रसिद्धैः, उग्रैः—तीक्ष्णैः, किरणैः, कृत्स्नं दिवसमभिव्याप्य दग्धाऽस्मि' इति दुःखं शशिने गदन्ती शेफालिका पुष्पाण्येव बाष्पाणि तैः सह रोदिति । नायं शेफालिकाकुसुमानां निशानिमित्तः पातः, अपि तु सा प्रियदर्शनाद् विवृद्धदुःखा तत्सूचनाय सबाष्पं रोदितीवेत्युत्प्रेक्षा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**असतोऽपि सामान्यस्य निबन्धो यथा-नदीषु पद्मनीलोत्पला-**

---

एवं सतां जाति-द्रव्य-गुण-क्रियाणामनिबन्धनं व्युत्पाद्य साम्प्रतमसतो निबन्धनमपि कविसमयसिद्धं व्याख्याति-**असतोऽपि सामान्यस्य निबन्ध** इत्यादिना; असतोऽपि—वस्तुगत्या अविद्यमानस्यापि, सामान्यस्य—तत्तज्जातेः, सत्त्वेन निबन्धः—उल्लेखः, यथा नदीष्वसतामपि पद्मनीलोत्पलादीनां सत्त्वेन निबन्धनम्, तद्यथा—

"दीर्घीकुर्वन् पटुमदकलं कूजितं सारसानां,
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः,
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः॥" [ मे० दू० पू० ३१ ]

अर्थः—"यत्र प्रत्यूषेषु पटुमदकलं सारसानां कूजितं दीर्घीकुर्वन्, स्फुटितकमलामोदमैत्रीकषायः, अङ्गानुकूलः, शिप्रावातः प्रार्थनाचाटुकारः प्रियतम इव स्त्रीणां सुरतग्लानिं हरति" इत्यन्वयः। यक्षो विशालानगरीं वर्णयन्नाह-यत्र—विशालायां, प्रत्यूषेषु—अहर्मुखेषु, पटु—प्रस्फुटम्, मदेन कलम्—अव्यक्तमधुरम्, सारसानां—पक्षिविशेषाणां हंसानां वा, कूजितं—रुतं, दीर्घीकुर्वन्—वर्धयन् यावद् दूरं वातो याति यावद् वा वातो वाति तावत् तेषां शब्दस्यानुवर्तनात् स्फुटितानां—विकसितानां, कमलानां—पङ्कजानाम्, आमोदेन—सौरभेण सह या मैत्री, तेन कषायः—सुरभिः "रागद्रव्ये कषायोऽस्त्री निर्यासे सौरभे रसे।" इति यादवः, अङ्गानुकूलः—गात्रसुखस्पर्शः, शिप्रावातः—तत्रत्यनदीविशेषसम्बन्धिपवनः, प्रार्थनायां—सुरतयाच्ञायां, चाटु—प्रियवचनप्रयोगं करोतीति तथोक्तः, प्रियतमः—वल्लभ इव स्त्रीणां सुरतग्लानिं—संभोगखेदं, हरति—अपनयति। अत्र शिप्रावाते प्रयुक्तानि विशेषणानि प्रियतमेऽपि यथायथं योज्यानि, तथाहि—सोऽपि स्वचाटुवाक्यानुसारिक्रीडापक्षिकूजितमविच्छिन्नीकुर्वन्, किञ्च सुरतविमर्देन मर्दितानां कमलानामामोदेन युक्ततया तदीयगन्धयुक्तः, अङ्गानामशिथिलपरिरम्भदानादिभिरनुकूलश्च भवति, एवंभूतश्च सः स्वचाटूक्तिभिर्विस्मृतपूर्वरतिखेदाः स्त्रियः करोति, तथा च तास्तस्य प्रार्थनां सफलयन्तीति भावः। अत्र शिप्रानद्यां कमलसद्भावेनैव तदीयामोदेन वायोः सौरभयोग उक्तः, तत्र कमलयोगश्चासन्नेव सत्त्वेन वर्णितः॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दीनां, जलाशयमात्रेऽपि हंसादीनां, यत्र तत्र पर्वते सुवर्णरत्नादीनामिति । द्रव्यस्य यथा-तमसि मुष्टिग्राह्यत्वस्य सूचीभेद्यत्वस्य च, ज्योत्स्नायां च कुम्भोपवाह्यत्वादेः । गुणस्य यथा-यशो-हासादौ शौक्ल्यस्य, अयशः-पापादौ कार्ष्ण्यस्य, क्रोधा-नुरागयो रक्तत्वस्य । क्रियाया यथा-चकोरेषु चन्द्रिकापानस्य, चक्रवाकमिथुनेषु निशि भिन्नतटाश्रयणस्य ।

---

नद्यामसतो नीलोत्पलस्य निबन्धो यथा—

"गगनगमनलीलालम्भितान् स्वेदबिन्दून्,
मृदुभिरनिलवारैः खेचराणां हरन्तीम् ।
कुवलयवनकान्त्या जाह्नवीं सोऽभ्यपश्यद्,
दिनपतिसुतयेव व्यक्तदत्ताङ्कपालीम् ॥" [का० मी० अ० १४]

अर्थः—अत्र "मृदुभिरनिलचारैः" इति काव्यमीमांसास्थः पाठः, स एव चार्थयोजने सुकर इति तमाश्रित्यैव व्याख्यायते, सः-वर्णनीयः प्रकृतो नायकः, मृदुभिः-कोमलैः, अनिलचारैः-वायुचलनैः, खेचराणां-आकाशगामिनां सिद्धादीनाम्, गगने गमनस्य या लीला तया लम्भितान्-उत्पादितान्, स्वेदबिन्दून् हरन्तीम्, कुवलयानां-नीलोत्पलानां, वनस्य-समूहस्य, कान्त्या-प्रभया, दिनपतिसुतया-कालिन्द्या, व्यक्तं-प्रकटं, दत्ता अङ्कपाली-क्रोड आसनार्थं यस्यास्तामिव, जाह्नवीं गङ्गामपश्यत् । अत्र जाह्नव्यां कुवलयानां वनानि, नीलकान्तियोगेन तस्या यमुनासङ्गं विडम्बयन्तीति कवेरुत्प्रेक्षा । तथा च तत्र नीलोत्पलसत्त्वं निबद्धमिति ॥

चूडामणौ पद्मनीलोत्पलादीनामित्यत्रादिशब्देन कुमुदादीनि जलीयपुष्पाणि ग्राह्याणि, तेषामपि यथासंभवं वर्णनमन्वेषणीयम् । यथा कुमुदानां नद्याम्—

"रेवाजले विकसिता कुमुदावलिराबभौ ।
कौतुकेन तरन्तीव बालहंसपरम्परा ॥" [ ]

अर्थः—रेवाजले विकसिता कुमुदावलिः, कौतुकेन तरन्ती बालहंसपरंपरा इव आबभौ । कुमुदानां श्वेतत्वेन हंसैः समानवर्णतया प्रवाहगत्या च गतिमत्त्वप्रतीतेर्बालहंससमूहसाम्यं तेषामुचितम् । तथा च नद्यां कुमुदानां सत्त्वमुपनिबद्धमिहेति ॥

एवं जलाशयमात्रे यत्र तत्र साधारणजलाशयेऽपि हंसादीनामसतामप्यु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पनिबन्धः । यद्यपि हंसा मानसादिजलाशयविशेषेष्वेव तिष्ठन्तीति लोकप्रसिद्धिः, तथापि कविभिर्वर्णनीयजलाशयमात्रे तेषां सत्त्वमुपनिबध्यते, यथा—

"आसीदस्ति भविष्यतीह स जनो धन्यो धनी धार्मिको,
यः श्रीकेशववत् करिष्यति पुनः श्रीमत्कुडङ्गेश्वरम् ।
हेलान्दोलितहंससारसकुलक्रेङ्कारसम्मूर्च्छितै-
रित्याघोषयतीव तन्नवनदी यच्चेष्टितं वारिभिः ॥" [का० मी० अ० १४]

अर्थः—आसीदस्ति भविष्यतीत्यनेन कालत्रयनिर्देशः, तथा च कालत्रयेऽपि स एव जनो धन्यः—कृतकृत्यः, धनी—प्रशस्तधनवान्, धार्मिकश्च, यः श्रीकेशववत्—राजामात्यवत्, केशवनामा कश्चन राजकुलामात्यो वित्ताधिकृतः, उज्जयनीस्थं कुडङ्गेश्वरप्रासादं यस्य चर्चा प्रबन्धचिन्तामणौ सिद्धसेनप्रबन्धे समागता तं पुनः संस्कारेण समधिकशोभाशालिनं चकारेत्यैतिह्यं श्रूयते, श्रीमन्तं—कान्तियुक्तम्, कुडङ्गेश्वरं—तन्नामकप्रासादं, पुनः करिष्यति, इति यच्चेष्टितं यदीयक्रियाकलापम्, तन्नवनदी—तस्य—प्रासादस्य, समीपे परिखारूपेण विहिता काचन नवीना नदी, तत्रत्या 'तन्नव'नाम्नी वा काचन नदी, हेलया—अनायासेन, आन्दोलितानां—क्षोभितानां, हंसानां सारसानां च जलचरपक्षिविशेषाणां, कुलस्य—समूहस्य, क्रेङ्कारेण—स्वजातिस्वभावसिद्धशब्देन, सम्मूर्च्छितैः—संमिश्रितैः, तदीयशब्दसङ्कलितशब्दैरिति भावः, वारिभिः—जलतरङ्गैः, तद्भूतशब्दैरिति भावः, आघोषयतीव—प्रख्यापयतीवेत्युत्प्रेक्षा । तत्प्रासादसमीपस्थनदीप्रवाहविक्षोभेण शब्दायमानजलचरहंसादिपक्षिशब्दमिश्रिततया द्विगुणितेन तरङ्गध्वनिना श्रीकेशवकीर्तिस्तत्सदृशकार्यकारिभूतभविष्यद्वर्तमानजनधन्यत्वख्यापनपूर्वकं ख्याप्यत इवेति सारांशः । अत्र प्रासादसमीपस्थजलाशयेऽपि हंससत्त्वमुपनिबद्धमिति ध्येयम् ॥

एवं यत्र तत्र पर्वतेऽसतामपि सुवर्णरत्नादीनां निबन्धः, सुवर्णस्य यथा—

"नागावासश्चित्रपोताभिरामः, स्वर्णस्फातिव्याप्तदिक्चक्रवालः ।
साम्यात् सख्यं जग्मिवानम्बुराशेरेष ख्यातस्तेन जीमूतभर्ता ॥"
[का० मी० अ० १४]

अर्थः—नागानां—सर्पाणामथ च हस्तिनाम्, आवासः—निवासस्थानम्, चित्रैः पोतैः—जलयानैः, अथ च चित्राणां—सर्पविशेषाणां व्याघ्रविशेषाणां च, पोतैः—शावकैः, अभिरामः—सुन्दरः, स्वर्णसः—शोभनजलस्य, स्फात्या—विस्तारेण वृद्ध्या

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वा, व्याप्तं दिशां चक्रवालं-समूहो येन, अथ च स्वर्णस्य-कनकस्य, विस्तारेण व्याप्तो दिशां समूहो येन, एषः-वर्णनीयः पर्वतः, साम्यात्-उक्तधर्माणां सादृश्यात्, अम्बुराशेः-समुद्रस्य, सख्यं-मित्रतां सादृश्यं वा, जग्मिवान्-प्राप्तः, तेन हेतुना जीमूतभर्ता जीमूतानां-मेघानां, भर्ता-धारकः, इति ख्यातः, अत्युच्चतया, शिरसि मेघान् धारयति, समुद्रस्तु मेघानां भर्ता-पूरको जलदानेनेत्युभावपि जीमूतभर्तृत्वेन ख्यातौ प्रसिद्धौ। अत्र सुमेरुपर्वताद् भिन्नेऽप्यत्र पर्वते स्वर्णस्य सत्त्वमुपनिबद्धम् ॥

सर्वेषु पर्वतेषु रत्नानामुपनिबन्धो यथा—

"नीलाश्मरश्मिपटलानि महेभमुक्त-
सूत्कारसीकरविसृञ्जि तटान्तरेषु।
आलोकयन्ति सरलीकृतकण्ठनालाः,
सानन्दमम्बुदधियाऽत्र मयूरनार्यः ॥" [का० मी० अ० १४]

अर्थः—अत्र-पर्वते, सरलीकृतकण्ठनालाः-ऋजूकृतगलप्रदेशाः, मयूरनार्यः-मयूर्यः, तटान्तरेषु-स्वाश्रिततटभिन्नतटेषु, महेभैः-महागजैः, मुक्तान् सूत्कारसीकरान्-नासिकाशब्देन सह निर्गच्छतो जलकणान्, विसृजन्ति यानि तानि, नीलाश्मरश्मिपटलानि-नीलमणिकिरणजालानि, अम्बुदधिया-मेघबुद्ध्या, सानन्दम्, आलोकयन्ति-पश्यन्ति। नीलाश्मरश्मिसमूहे जायमाना जलदभ्रान्तिर्हस्तिशुण्डामुक्तजलकणपातेन परिपोष्यते, जलदागमे च मयूरीणामानन्दः स्वाभाविक एव। अत्र च वर्णनीये साधारणे पर्वतेऽपि नीलरत्नानामसतामपि सत्त्वेन निबन्धः ॥

असतो द्रव्यस्य सत्त्वेन निबन्धनं यथा—तमसि-अन्धकारे, केषाञ्चिन्मतेऽभावरूपे, बहूनां मते रूपक्रियाद्याश्रयिद्रव्यरूपत्वेऽपि, मुष्टिग्रहणादियोग्यतायाः सर्वथाऽभावेऽपि मुष्टिग्राह्यत्वस्य-मुष्टिविषयीकरणयोग्यतायाः, सूचीभेद्यत्वस्य-सूचीकरणकभेदनकर्मतायाश्च निबन्धः।

तत्र मुष्टिग्राह्यत्वं यथा—

"तनुलग्ना इव ककुभः, क्ष्मावलयं चरणचारमात्रमिव।
दिवमिव चालिकदघ्नीं मुष्टिग्राह्यं तमः कुरुते ॥"

[वि० शा० भ० अ. ३. श्लो. ६०]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थः—मुष्टिग्राह्यं-मुष्टिपरिच्छेद्यमथवाऽतिसमीपतया मुष्टिधारणयोग्यम्, तमः-अन्धकारः, ककुभः-दिशः, तनुलग्ना इव-सर्वा दिशः संकुच्य शरीरस्य समीपमागता इव, क्ष्मावलयं-भूमण्डलं यत् पूर्वमपरिच्छेद्यं प्रतीयते स्म तत्, चरणचारमात्रं-यावति चरणौ कथंचिच्चरतस्तत्परिमितम्, इव, दिवम्-अनन्ततया विख्यातमाकाशम्, अलिकदघ्नीं-भालप्रदेशपरिमिताम्, इव, कुरुते । तमसा स्वशरीरमात्रं सर्वं प्रतिभाति, दूरे किञ्चिन्न विभाव्यत इत्याशयः । अत्र च तमसो मुष्टिग्राह्यत्वं स्पष्टमेव निबद्धम् ॥

तमसः सूचीभेद्यत्वं यथा—

"पिहिते कारागारे तमसि च सूचीमुखाग्रनिर्भेद्ये ।
मयि च निमीलितनयने तथापि कान्ताननं व्यक्तम् ॥"

[का० मी० अ० १४]

अर्थः—कारागारे-बन्दीगृहे, पिहिते सति, तमसि-अन्धकारे च, सूचीमुखस्याग्रभागेन भेदनयोग्ये-अतिघनतां याते सति, मयि च निमीलितनयने सति, तथापि-सर्वथा व्यक्तीभवनयोग्यताया अभावे सत्यपि, कान्ताननं व्यक्तं-प्रत्यक्षरूपेणादृश्यत । कारागारे स्वत एव प्रवेशोऽसाध्यः, तत्रापि तत् पिहितम्, पिधानाच्च रात्रिकृतस्य तमसः सान्द्रताऽपि युक्तैव, एवं चेदृशे तमसि नेत्रव्यापाराभावेऽपि तन्मुखं मे प्रत्यक्षमिवादृश्यतेत्यहो भावनावैचित्र्यमिति भावः । अत्र सूचीभेद्यत्वोक्तिः स्पष्टैव ॥

ज्योत्स्नायाः कुम्भोपवाह्यत्वादि यथा—

"शङ्खद्रावितकेतकोदरदलस्रोतःश्रियं बिभ्रती,
येयं मौक्तिकदामगुम्फनविधेर्योग्यच्छविः प्रागभूत् ।
उत्सेक्या कलसीभिरञ्जलिपुटैर्ग्राह्या मृणालाङ्कुरैः,
पातव्या च शशिन्यमुग्धविभवे सा वर्तते चन्द्रिका ॥"

[का० मी० अ० १४]

अत्र 'शङ्खद्रावित' इत्यस्य स्थाने काव्यमीमांसायां 'यन्त्रद्रावित' इति पाठः, सरस्वतीकण्ठाभरणे द्वितीयपरिच्छेदे च 'सद्योद्रावित' इति पाठः, सर्वे एव च पाठोऽर्थयोजने समर्थ इति, विवेकगृहीत एव पाठः स्वीकृतः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थः—या इयं-साक्षाद्दृश्यमाना, शङ्खेन द्राविताना केतकोदरदलानां—केतकीलतापुष्पमध्यभागस्थपत्राणां, स्रोतसः-प्रवाहस्य, श्रियं-शोभां बिभ्रती, चन्द्रिका प्राक्-शशिनो मौग्ध्ये, मौक्तिकानां दाम्नो-माल्यस्य, गुम्फनविधेः-निर्माणक्रियायाः, योग्या छविर्यस्यास्तथाभूता अभूत्-अल्पीयसी आसीत्, सा शशिनि अमुग्धविभवे सति-प्रौढप्रकाशे सति, कलसीभिः-घटैः, उत्सेक्या-उपरि सेचनीया, ततोऽल्पत्वे अञ्जलिपुटैर्ग्राह्या, ततोऽत्यल्पत्वे च मृणालस्य-कमलदण्डस्य अङ्कुरैः-अन्तश्छिद्रयुतकोमलभागैः पातव्या-पेया च वर्तते इत्यन्वयः। यथा कस्यचिद् दुग्धादिपदार्थस्य बहुलीभूतस्य यावद् घटपूरणयोग्यता तावद् घटैः पश्चादञ्जलिभिः, अञ्जलेरपि पूरणासम्भवे च केनचित् क्षुद्रेण पात्रेण एकत्रीकरणं भवति, तथैवेहाऽप्युपचरितमिति ज्योत्स्नायाः कुम्भाद्युपवाह्यत्वं स्फुटम् ॥

अत्र तमसि मुष्टिग्राह्यत्व-सूचीभेद्यत्वयोर्ज्योत्स्नायां कुम्भोपवाह्यत्वस्य च यद्यपि गुणरूपत्वमित्यसतो गुणस्य सत्त्वेन निबन्धनप्रस्तावे उपन्यासो युक्तस्तथापि काव्यमीमांसादावप्यसतो द्रव्यस्यैवोपनिबन्धनमिदमुदाहृतमिति स्थितस्य गतिश्चिन्तनीयेति रीत्याऽत्र गुणवाचकपदस्य गुणिपरत्वमास्थेयमिति प्रतीमः ॥

असतो गुणस्य सत्त्वेनोपनिबन्धो यथा—यशसि हासे च शौक्ल्यस्य, अयशसि पापे च कार्ष्ण्यस्य, क्रोधा-ऽनुरागयो रक्तत्वस्य चासत उपनिबन्धः ।

तत्र यशसः शौक्ल्यस्योपनिबन्धो यथा—

"स्तेमः स्तोकोऽपि नाङ्गे श्वसितमविकलं चक्षुषां सैव वृत्ति-
मध्येक्षीराब्धि मग्नाः स्फुटमथ च वयं कोऽयमीदृक् प्रकारः ।
इत्थं दिग्भित्तिरोधक्षतविसरतया मांसलैस्त्वद्यशोभिः,
स्तोकावस्थानदुःस्थैस्त्रिजगति धवले विस्मयन्ते मृगाक्ष्यः ॥"

[ का० मी० अ० १५ ]

अर्थः—दिश एव भित्तयः, ताभिः, रोधः-प्रसरणवारणम्, तेन क्षतः-नष्टः, विसरः-प्रसरणं यासां तासां भावो दिग्भित्तिरोधविसरता तया, मांसलैः-पुञ्जीभूतैः, अत एव स्तोके-अल्पेऽवकाशे, अवस्थानं-स्थितिः, तेन दुःस्थैः-पर्याकुलीभूतैः, त्वद्यशोभिः-त्वदीयकीर्तिभिः, त्रिजगति-लोकत्रये, धवले-दुग्धवत् स्वच्छे संजाते सति, अङ्गे स्तोकोऽपि स्तेमः-आर्द्रता न, श्वसितं-श्वासव्यापारः, अविकलं-पूर्ववदविच्छिन्नम्, चक्षुषां सैव-अविकलैव, अव्याहतैवेति यावत्,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वृत्तिः—व्यापारः, अथ च वयं मध्येक्षीराब्धि—क्षीरसमुद्रमध्ये स्फुटं—प्रत्यक्षतया मग्नाः स्मः, अयमीदृक् प्रकारोऽवस्थाविशेषः कः?' इत्थं, मृगाक्ष्यः—मृगनेत्रसमाननेत्राः स्त्रियो विस्मयन्ते—विस्मययुक्ता भवन्ति। कवी राजानं वर्णयन्नाह—दिग्भ्यो बहिरपि गन्तुं कामयमानानि त्वद्यशांसि, दिग्भित्तिभिः कविकल्पिताभी रुद्धानि, ततश्च तडागादिषु रुद्धं पयस्तत्र यथा बहुलीभवति तथाऽत्र त्रिजगति समन्ताद् व्याप्तानि तत् क्षीरपूर्णमिव सर्वं चक्रुरिति तत्र वसन्त्यो नार्यं आत्मानं क्षीरसमुद्रे मग्नमथ च जलादौ मग्नस्य या स्थितिः—शरीरे आर्द्रीभावः, श्वासरोधः, चक्षुर्व्यापारशून्यता, तेषामभावं च दृष्ट्वा पूर्वानुभूतभिन्नोऽयं कश्चित् प्रकार इति विस्मययुक्ता भवन्तीति। अत्र च यशसः शौक्ल्यं स्पष्टमेवोपनिबद्धम्॥

हासस्य शौक्ल्यं यथा—

"अट्टहासच्छलेनास्याद्, यस्य फेनौघपाण्डुराः।
जगत्क्षय इवापीताः, क्षरन्ति क्षीरसागराः॥" [का० मी० अ० १५]

अर्थः—यस्य आस्यात्, जगत्क्षये पीताः फेनौघपाण्डुराः—फेनसमूहशुभ्राः क्षीरसागराः, अट्टहासच्छलेन—उच्चहासव्याजेन, क्षरन्तीव—निःसरन्तीव इत्युत्प्रेक्षा। अत्र प्रलये समस्तं जगद् ग्रसितवतो विराट्पुरुषस्य रुद्रस्य वा अट्टहासोऽतिधवलतया वर्णनीय इति तत्र पीतक्षीरसागरनिःसरणोत्प्रेक्षा॥

अयशसः कार्ष्ण्यं यथा—

"प्रसरन्ति कीर्तयस्ते तव च रिपूणामकीर्तयो युगपत्।
कुवलयदलसंवलिताः प्रतिदिशमिव मालतीमालाः॥"
[का० मी० अ० १५]

अर्थः—ते कीर्तयः, तव रिपूणां चाकीर्तयो युगपत्, कुवलयदलसंवलिता मालतीमाला इव प्रतिदिशं प्रसरन्ति। वर्णनीयस्य राज्ञः कीर्तयः शुभ्रा मालतीपुष्पाणीव, तद्ग्रथितमालायां मध्ये मध्ये तच्छत्रुदुर्यशोरूपनीलवर्णकुवलयदलानि मिश्रितानि, तानि च सहैव प्रतिदिशं यान्तीत्यर्थः। तथा चायशसः कृष्णता स्फुटमुपनिबद्धा॥

पापस्य कृष्णता यथा—

"उत्खातनिर्मलकृपाणमयूखलेखा-
श्यामायिता तनुरभूद् दशकन्धरस्य।
सद्यः प्रकोपकृतकेशववंशनाश-
संकल्पसंजनितपापमलीमसेव॥" [का० मी० अ० १५]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थः—अत्र काव्यमीमांसाया वटपत्तनमुद्रिते संस्करणे दशकन्धरस्येति स्थाने हयकन्धरस्येति पाठो दृश्यते, तथा च तन्मात्रस्य व्याख्याने भेदः, अन्यत् सर्वं समानमेव । दशकन्धरस्य–दशसंख्याकाः कन्धरा यस्य तस्य, दशमुखस्य–रावणस्य, हयकन्धरस्य–हयस्य–अश्वस्य, कन्धरेव कन्धरा यस्य तस्य हयग्रीवनाम्नोऽसुरस्येति वा,उत्खातः–कोशात् समुद्धृतो यो निर्मलः-स्वच्छः, कृपाणः–खड्गः, तस्य मयूख-लेखाभिः–किरणपङ्क्तिभिः, श्यामायिता–कालिमानं प्राप्ता, तनुः–शरीरम्, सद्यः–तस्मिन् क्षण एव, प्रकोपेन–क्रोधावेशेन, कृतो यः केशवस्य–केशवावतारस्य रामस्य विष्णोर्वा, वंशनाशस्य–सन्ततिविच्छेदस्य, संकल्पः, तेन संजनितं यत् पापं वंश-च्छेदस्य पापाधायकत्वात्, तेन मलीमसेव–मलिनेव, अभूत्–आसीत् । तथा च पापस्य कृष्णता स्पष्टमेवोक्तेति ॥

क्रोधस्य रक्तत्वं यथा—

"आस्थानकुट्टिमतलप्रतिबिम्बितेन,
कोपप्रभाप्रसरपाटलविग्रहेण ।
भौमेन मूर्च्छितरसातलकुक्षिभाजा,
भूमिश्चचाल चलतोदरवर्तिनेव ॥" [ का० मी० अ० १५ ]

अर्थः—आस्थानस्य–सभामण्डपस्य, यत् कुट्टिमं–निबद्धं तलं–तलप्रदेशः, तत्र प्रतिबिम्बितेन–संक्रान्तच्छायेन, कोपस्य प्रभायाः प्रसरेण–विस्तारेण पाटलः–रक्त-वर्णः, विग्रहः–शरीरं यस्य तेन, मूर्च्छिता–पुत्रपराभवशङ्कया मोहमुपगता, या रसा–पृथ्वी तस्याः, तलं–पातालं, तस्य कुक्षिः–मध्यप्रदेशस्तं भजति तेन, तत्र स्थितेनेत्यर्थः, चलता–श्रीकृष्णेन सह युद्धार्थं व्रजता, भौमेन–नरकासुरेण, उदर-वर्तिना इव–उदरस्थितेनेव, भूमिः–धरा, चचाल–चकम्पे, रसातले भौमेन सह श्रीकृष्णस्य युद्धमभूत् तस्य सभामण्डप एव, तत्र भौमचलनेन पृथ्व्यपि चलति, मातुरुदरस्थितेन बालेन चलता माता कम्पते, भूमिश्च तस्य मातेति तस्याः कम्पो युक्त एव । अत्र भौमस्य क्रोधेन रक्तविग्रहत्वमुक्तम् ॥

अनुरागस्य रक्तत्वं यथा—

"गुणानुरागमिश्रेण यशसा तव सर्पता ।
दिग्वधूनां मुखे जातमकस्मादर्धकुङ्कुमम् ॥" [ का० मी० अ० १५ ]

अर्थः—गुणानुरागमिश्रेण–गुणेषु योऽनुरागो दृढः स्नेहस्तद्युतेन, सर्पता–प्रसरता,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तव यशसा, दिग्वधूनां मुखे–दिश एव वध्वो वधूत्वेनोपचरितास्तासां वदने, अथ च तत्प्रान्तभागे, अकस्मात्–अन्यकारणराहित्येऽपि, अर्धकुङ्कुमम्–अर्धभागे कुङ्कुमं काश्मीरजं जातम् । स्त्रीणां मुखोपरि सौभाग्य-सौन्दर्यादिवर्धनाय कुङ्कुमलेपः क्रियते, तत्र दिग्वधूनां मुखे वर्णनीयराजगुणरागेण कुङ्कुमस्थानीयेन दिक्षु गच्छताऽर्धं मुखस्य लिप्तमर्धं च श्वेतवर्णेन यशसेत्यनुरागस्य रक्तत्वं स्पष्टम् ॥

एवमसत्या अपि क्रियायाः सत्त्वेन निबन्धः, यथा चकोरेषु चन्द्रिकापानस्य वस्तुगत्याऽसतो निबन्धः क्रियते, एवं चक्रवाकमिथुनेषु स्त्री-पुंसोर्भिन्नतटाश्रयणस्य निशि निबन्धः क्रियते ।

तत्र चकोरे चन्द्रिकापानं यथा—

"एतास्ता मलयोपकण्ठसरितामेणाक्षि! रोधोभुव–
श्चापाभ्यासनिकेतनं भगवतः प्रेयो मनोजन्मनः ।
यासु श्यामनिशासु पीततमसो मुक्तामयीश्चन्द्रिकाः,
पीयन्ते विवृतोर्ध्वचञ्चु विचलत्कण्ठं चकोराङ्गनाः ॥"

[ का० मी० अ० १५ ]

अर्थः—एणाक्षि!-एणस्य–मृगविशेषस्याक्षिणी इव अक्षिणी यस्याः सा एणाक्षी, तत्सम्बुद्धौ हे एणाक्षि!, एताः, ताः–प्रसिद्धाः, भगवतो मनोजन्मनः, प्रेयः, चापाभ्यासनिकेतनं मलयोपकण्ठसरितां रोधोभुवः, सन्तीति शेषः, कामस्य प्रियतरधनुर्विद्याभ्यासस्थानभूता मलयपर्वतप्रान्तभागस्थनदीनां तटप्रदेशा एते इत्यर्थः । यासु–रोधोभूमिषु, श्यामनिशासु–कृष्णपक्षीयरात्रिषु, पीततमसः–कृतान्धकारपानाः, चकोराङ्गनाः–चकोर्यः, विवृतोर्ध्वचञ्चु–विवृता–विस्तारिता, ऊर्ध्वीकृता, चञ्चुर्यस्मिन् कर्मणि तद् यथा स्यात् तथा, एवं विचलन्–पानसमये स्वभावत एव चञ्चलः, कण्ठः–गलप्रदेशो यस्मिंस्तथाभूतं यथा स्यात् तथा, क्रियाविशेषणद्वयमिदम्, मुक्तामयीः–मौक्तिकविकारा इव, मौक्तिकप्रचुरा वा, चन्द्रिकाः–ज्योत्स्नाः, पीयन्ते–पिबन्ति, दैवादिकस्य पीयते रूपम् ॥

चक्रवाकमिथुनस्य भिन्नतटाश्रयणं यथा—

"संक्षिपता यामवतीस्तटिनीनां तनयता पयःपूरान् ।
रथचरणाह्वयवयसां किं नोपकृतं निदाघेन? ॥"

[ का० मी० अ० १४ ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जातेर्नियमो यथा-समुद्रेष्वेव मकराः, ताम्रपर्ण्यामेव मौक्ति-

अर्थः—यामवतीः-रात्रीः, संक्षिपता-संकोचमानयता, लघूकुर्वतेत्यर्थः, तटिनीनां-नदीनां, पयःपूरान्, तनयता-जलशोषणेन प्रवाहाणां विस्तारमल्पतां नयता च, निदाघेन-ग्रीष्मर्तुना, रथचरणाह्वयवयसां-चक्रनामकपक्षिणाम्, किं नोपकृतम्? सर्वमुपकृतमिति भावः । रात्रौ चक्रवाका वियुज्य परस्परं नद्या भिन्नतटाश्रयिणो भवन्तीति कविसमयप्रसिद्धिः, रात्रेश्चाल्पीयसीत्वे विरहकालस्याल्पत्वम्, नद्याः प्रवाहस्य लघुत्वे च भिन्नतटस्थत्वेऽपि पूर्वसमयादपेक्षाकृतं सामीप्यमिति, देश-कालोभयकृतविरहविप्रकर्षो दूरीकृतो निदाघेनेति महदुपकृतमिति हृदयम् ॥

सतोऽनिबन्धनान्यसतो निबन्धनानि च व्याख्याय क्रमप्राप्तं नियमं व्याख्यातुमुपक्रमते-जातेर्नियमो यथेत्यादिना । नियमश्चातिप्रसक्तानां जाति-द्रव्य-गुण-क्रियाणामेकविषयेऽवधारणमेवेति प्रागुक्तमेव चूडामणौ, तत्रातिप्रसक्तस्येत्यस्येष्टस्थलादन्यत्राऽपि सम्भवतो जात्यादेरित्यर्थः, तदुक्तं राजशेखरेणापि काव्यमीमांसायाश्चतुर्दशेऽध्याये-'अनेकत्रप्रवृत्तवृत्तीनामेकत्रावधारणं नियमः' इति । तथा चायमपि पूर्ववत् प्रकारचतुष्टयवान्, तत्र जातेः-सामान्यस्य, अन्यत्राऽपि प्रसक्तस्यैकत्र नियमनं यथा-नद्यादिष्वपि लोके प्रवृत्तवृत्तीनां मकराणां समुद्रमात्रवृत्तित्वमिति; एवं सत्स्वपि मौक्तिकोत्पत्तिस्थानेषु ताम्रपर्णीत्याख्यायामेव नद्यां मौक्तिकोत्पत्तिरिति च ।

तत्र प्रथमो यथा—

"गोत्राग्रहारं नयतो गृहत्वं स्वनाममुद्राङ्कितमम्बुराशिम् ।
दायादवर्गेषु परिस्फुरत्सु दंष्ट्रावलेपो मकरस्य वन्द्यः ॥"
[का० मी० अ० १४]

अर्थः—दायादवर्गेषु-दायं-दातव्यं भागम्, आददत इति दायादाः सोदरभ्रात्रादिसगोत्राः, तेषां वर्गाः-समूहाः, तेषु, परिस्फुरत्सु-सर्वतः स्वसामर्थ्यप्रकटनपूर्वकं संचरत्सु, अग्रे-पूर्वं ह्रियते ममैवायमग्रभाग इति कृत्वेति-अग्रहारः, गोत्रस्य-कुलस्य, अग्रहारः-गोत्राग्रहारः, तं-कुलस्य मुख्यं धनम्, स्वनाममुद्राङ्कितं-स्वस्य नामैव मुद्रा-प्रत्ययकारिचिह्नं, तेन अङ्कितं-चिह्नितं यथा स्यात् तथा,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कानि । द्रव्यस्य यथा-मलय एव चन्दनस्थानम्, हिमवानेव भूर्जो·

---

अम्बुराशिं-समुद्रम्, गृहत्वम्-आलयत्वं, मकरालयनामवत्त्वमित्यर्थः, नयतः-प्रापयतः, मकरस्य, दंष्ट्रावलेपः-स्वतीक्ष्णदंष्ट्रागर्वः, वन्द्यः-स्तुत्यः । स्वकीयदंष्ट्राबलेनैव मकरेण सत्स्वप्यन्येषु जलीयजन्तुवर्गरूपदायादेषु प्रसह्य गोत्रस्य मुख्यं वस्तु स्वनाम्ना चिह्नयित्वा स्वावासीकृतमिति भावः । एतेन मकराः समुद्र एव वसन्तीति प्रकटितम् ॥"

ताम्रपर्ण्यामेव मौक्तिकानि यथा—

"कामं भवन्तु सरितो भुवि सुप्रतिष्ठाः,
स्वादूनि सन्तु सलिलानि च शुक्तयश्च ।
एतां विहाय वरवर्णिनि! ताम्रपर्णीं
नान्यत्र सम्भवति मौक्तिककामधेनुः ॥" [का० मी० अ० १४]

अर्थः—वरो वर्णः-शरीररूपं यस्याः सा वरवर्णिनी, तत्सम्बुद्धौ हे वरवर्णिनि!

"शीते सुखोष्णसर्वाङ्गी ग्रीष्मे या सुखशीतला ।
भर्तृभक्ता च या नारी सा भवेद् वरवर्णिनी ॥"

इति तल्लक्षणमुक्तं रुद्रेण, हे उत्तमाङ्गने! भुवि सुप्रतिष्ठाः-पुण्यजनकत्वादिना सुप्रतिष्ठिताः, सरितः-गङ्गाद्या महानद्यः, कामं भवन्तु, तासु स्वादूनि सलिलानि शुक्त्यश्च कामं-यथेच्छं सन्तु, किन्तु एतां-दृश्यमानाम्, ताम्रपर्णीं, विहाय-त्यक्त्वा, अन्यत्र मौक्तिकानां कामधेनुः-यथेच्छमुत्पादयित्री न सम्भवति, अत्रैव मौक्तिकान्युत्पद्यन्ते नान्यत्रेति भावः ॥

जातेर्नियममुक्त्वा द्रव्यस्य नियममाह-द्रव्यस्य यथेति-द्रव्यस्यान्यत्र सतोऽपि एकत्र नियमः, यथा-मलयः-मलयनामा पर्वत एव, चन्दनस्य-सौगन्धिककाष्ठस्य, स्थानं-स्थितिविषयः, उत्पत्तिभूमिर्वा, एवं हिमवान् हिमाचल एव, भूर्जस्य-स्वनामख्यातस्य वृक्षविशेषस्य, उत्पत्तिपदं-प्रादुर्भूतिस्थानमिति ।

तत्र प्रथमो यथा—

"तापापहारचतुरो नागावासः सुरप्रियः ।
नान्यत्र मलयादद्रेर्दृश्यते चन्दनद्रुमः ॥" [का० मी० अ० १४]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्पत्तिपदम् । गुणस्य यथा—सामान्योपादाने रत्नानां शोणतैव, पुष्पाणां शुक्लतैव, मेघानां कृष्णतैव । क्रियाया यथा-ग्रीष्मादौ

---

अर्थः—तापस्य-औष्ण्यस्य, अपहारे-अपनयने, चतुरः-कुशलः, नागानां-सर्पाणाम्, आवासः-निवासस्थानम्, सुराणां प्रियः-देवानां प्रीतिकारणम्, चन्दनद्रुमः, मलयात्-एतन्नामकात्, अद्रेः-पर्वतात्, अन्यत्र न दृश्यते ॥

द्वितीयो यथा—

"न्यस्ताक्षरा धातुरसेन यत्र भूर्जत्वचः कुञ्जरबिन्दुशोणाः ।
व्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम् ॥"

[कु० सं० स० १, श्लो० ७]

अर्थः—यत्र-हिमालये, धातुरसेन-गैरिकादिधातुद्रवेण, न्यस्तानि-लिखितानि, अक्षराणि यासु ताः, कुञ्जराणां शरीरेषु ये बिन्दवः-स्वाभाविका रक्तवर्णाः पिटिकाः, तद्वत् शोणाः-रक्तवर्णाः, अथवा कुञ्जरबिन्दुसमबिन्दुभिः शोणाः बाहुल्येन तासु तेषां सत्त्वात्, भूर्जत्वचः-भूर्जवृक्षवल्कलानि, विद्याधरसुन्दरीणाम्, अनङ्गलेखक्रियया-कामसम्बन्धिपत्रलेखनकर्मणा, उपयोगं-सार्थक्यं, व्रजन्ति-प्राप्नुवन्ति । कुमारसंभवे हिमालयवर्णनप्रस्तावे पद्यमिदं तस्य भूर्जोत्पत्तिस्थानत्वमाह ॥

अथ क्रमप्राप्तं गुणस्य नियममाह-**गुणस्य यथे**त्यादिना । यथा **सामान्योपादाने** रत्नविशेषस्य नामानुच्चार्य रत्नत्वेन सामान्येन रत्नस्य ग्रहणे, **रत्नानां शोणता** रक्तवर्णतैवेति नियमः । एवं सामान्यतः-पुष्पत्वेन रूपेण, पुष्पाणामुपादाने तेषां **शुक्लतैव** शुक्लरूपवत्त्वमेव, तथा मेघानामपि सामान्यतः कथने **कृष्णतैव** कृष्णवर्णतैवेति च गुणनियम इति । विशेषतो रत्नादीनामुपादाने तत्तद्रूपतायां न नियमः, एवं पुष्पाणामपि जपापुष्पत्वादिना मेघानां शारदमेघत्वादिरूपेण चोपादानेन तत्तद्वर्णानामपि न नियमः ।

तत्र रत्नानां शोणतैव यथा—

"सांयात्रिकैरविरतोपहृतानि कूटैः, श्यामासु तीरवनराजिषु संभृतानि ।
रत्नानि ते दधति कच्चिदिहायताक्षि ! मेघोदरोदितदिनाधिपबिम्बशङ्काम् ॥"

[का० मी० अ०-१५]



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थः—आयते-दीर्घे, अक्षिणी यस्यास्तत्सम्बुद्धौ हे आयताक्षि !, इह-पर्वते, सांयात्रिकैः-पोतवणिग्भिः, तत्त्वेनोपचरितैः, कूटैः-सानुभिः, अविरतं-सततम्, उपहृतानि-उपहारीकृतानि, श्यामासु-वृक्षश्रेणिभिरन्धकारयुक्ततया श्यामीकृतासु, वनराजिषु-अरण्यश्रेणिषु, सम्भृतानि-समुचितानि, रत्नानि-माणिक्यानि, ते-तव, मेघोदरे-जलदमध्ये, उदितस्य-प्रकाशं गतस्य, दिनाधिपस्य-सूर्यस्य, यत् बिम्बं-मण्डलं, तस्य शङ्कां-सन्देहं, दधति कच्चित् ?-उत्पादयन्ति किम् ? यथा पोतवणिजो दूरदेशाद् रत्नानि समानीय राज्ञे उपहरन्ति, तथा तत्त्वेनोपचरितैरेतदीयशिखरैः पर्वतायोपहृतानि रत्नानि क्रमशोऽस्य तटप्रदेशीयश्यामायमानवनेषु संचितानि क्षणं मेघयुक्ताकाशे उदयं गतस्य सूर्यस्य सदृशानि लक्ष्यन्त इति भावः। यथा प्रातःकाले मेघाच्छादितं सूर्यबिम्बं विभाति तथैव कृष्णवनसंचितरत्नान्यपीति कथने प्रातःकालिकसूर्यबिम्बेन सह रत्नानां सादृश्यमभिधीयमानं तेषां रक्तत्वं प्रकटयत्येव ॥

पुष्पाणां सामान्येनोपनिबद्धानां श्वेततैव यथा—

"पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम्।
ततोऽनुकुर्याद् विशदस्य तस्यास्ताम्रौष्ठपर्यस्तरुचः स्मितस्य ॥"

[ कु० सं० स० १, श्लो० ४४ ]

अर्थः—पुष्पं-श्वेतकुसुमं, यदि प्रवालोपहितं-नवपल्लवसंस्थितं स्यात्, वा-अथवा, मुक्ताफलं-मौक्तिकं, स्फुटं-स्पष्टं यथा स्यात् तथा, विद्रुमे-रक्तमणौ, तिष्ठतीति यथाभूतं स्यात्, ततः-तदा, ताम्रे-रक्तवर्णे, ओष्ठे-दन्तच्छदे, पर्यस्ताः-विप्रकीर्णाः, रुचः-कान्तयो यस्य तस्य, विशदस्य-स्वच्छस्य, तस्याः-पार्वत्याः, स्मितस्य-ईषद्धास्यस्य, अनुकुर्यात्-सादृश्यं प्राप्नुयात्। उत्पाद्योपमालंकारः। अत्र पुष्पमिति सामान्येनोपादाने तस्य श्वेतत्वमेव गम्यते, अत एव श्वेतवर्णेन स्मितेन सह तस्य साम्यम्। यथा श्वेतं पुष्पं रक्तप्रवालोपरि यथा वा श्वेतं मौक्तिकं रक्तविद्रुमोपरि भायात् तथैव श्वेतं हास्यं ताम्रवर्णोष्ठस्योपरि भातीति कवेरभिप्रायः ॥

एवं मेघानां कृष्णतैव, तस्योदाहरणं यथा—

"मेघश्यामेन रामेण पूतवेदिर्विमानराट्।
मध्ये महेन्द्रनीलेन रत्नराशिरिवाबभौ ॥" [ का० मी० अ०-१५ ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**संभवदपि कोकिलरुतं वसन्त एव, मयूराणां वर्षास्वेव विरुतं नृत्तं चेति ।**

---

अर्थः—मेघवत् श्यामेन–कृष्णवर्णेन, रामेण, पूता–पवित्रीकृता, वेदिः–मध्यस्थितोच्चभूमिर्यस्य सः, विमानराट्–पुष्पकम्, मध्ये–मध्यस्थितेन, महेन्द्रनीलेन–महता इन्द्रनीलमणिना, रत्नराशिः–रत्नसमूह इव, आबभौ–शुशुभे । अत्र महार्हरत्नैर्निर्मितस्य पुष्पकस्य मध्ये रामचन्द्रस्य रत्नसमूहमध्यस्थितस्य महेन्द्रनीलमणेरिव शोभाऽभवदिति भावः । सामान्येन मेघोपादाने तद्वत् श्यामत्वमित्यर्थस्य वाच्यत्वे मेघानां श्यामतैवेति नियम आश्रितः ॥

क्रमप्राप्तं क्रियाया नियममाह–**क्रियाया यथेति** । ग्रीष्मवर्षाद्यन्यर्तुषु **सम्भवदपि** सम्यक् प्रकारेण भवदपि, अथवा संभाव्यमानमपि, **कोकिलरुतं** कोकिलानां कूजनव्यापारः, वसन्त एव निबध्यते, नान्यस्मिन्नृताविति । मयूराणामन्येष्वपि समयेषु संभवत्, **विरुतं** केकाशब्दः, **नृत्तं** गात्रसंचालनविशेषः, वर्षास्वेव निबध्यते । तत्र प्रथमो यथा—

> "वसन्ते शीतभीतेन कोकिलेन वने रुतम् ।
> अन्तर्जलगताः पद्माः श्रोतुकामा इवोत्थिताः ॥"

[ का० मी० अ०–१४ ]

अर्थः—शीतभीतेन–शीतसमये भीत्या रुतमकुर्वता, कोकिलेन, वसन्ते प्राप्ते सति, रुतं–कूजितम्, ततश्च अन्तर्जलगताः–जलमध्ये लीनाः, पद्माः–कमलानि श्रियश्च, श्रोतुकामा इव–किमयं वदतीति ज्ञातुमुत्कण्ठिता इव, उत्थिताः–निर्गताः । वसन्ते कोकिलरुतस्येव पद्मानामपि विकासस्य प्रसिद्धिः, शीतकाले पद्मानि शीतेन नश्यन्ति, सति वसन्ते तेषां पुनरुत्पत्तिः । अत्र पद्मशब्दस्य पुंसि प्रयोगः, "वा पुंसि पद्मं नलिनम्" इति कोशानुसृतोऽपि कविभिरप्रयुक्तत्वाद् दोषाधायक इति साहित्यदर्पणादिषु निर्णीतम्, तथापि 'पद्मा' इत्यनेन श्री-कमलयोः श्लेषस्येष्टत्वेन श्रोतुकामा इवेत्युत्प्रेक्षापोषकत्वेन च न दोष इति स्वीकार्यम् ॥

मयूरनृत्य-गीते वर्षास्वेव यथा—

> "मण्डलीकृत्य बर्हाणि कण्ठैर्मधुरगीतिभिः ।
> कलापिनः प्रनृत्यन्ति काले जीमूतमालिनि ॥"

[ दण्डिनः का० द० प० १. श्लो–७० ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अथवा नियमः समयः कवीनाम्, यथा कृष्णनीलयोः, कृष्णहरितयोः, कृष्णश्यामयोः, पीतरक्तयोः, शुक्लगौरयोः, चन्द्रे शशमृगयोः, कामकेतने मकरमत्स्ययोः, अत्रिनेत्रसमुद्रोत्पन्नयोश्चन्द्रयोः, द्वादशानामप्यादित्यानां, नारायणमाधवविष्णुदामोदरकूर्मादेः, कमलासंपदोः, नागसर्पयोः, क्षीरक्षारसमुद्रयोः, सागरमहासमुद्रयोः, दैत्यदानवासुराणां चैक्यम् । तथा चक्षुरादेरनेकवर्णोपवर्णनम्,**

---

अर्थः—कलापिनः-मयूराः, जीमूतमालिनि-मेघमालायुक्ते, काले-वर्षासु बर्हाणि मण्डलीकृत्य-पिच्छानि चक्राकारतया निर्माय, मधुरा गीतिः-गायनं येषु तैः, कण्ठैरुपलक्षिताः सन्तः प्रनृत्यन्ति । अत्र जीमूतमाली कालो वर्षाकाल एवेति तत्रैव तेषां रुत-नृत्ये इति कविराह ॥

एवं जात्यादीनां नियममुक्त्वा नियमशब्दमन्यथाऽपि व्याख्याति—**अथवा नियमः समयः कवीनामिति** । कवीनां समयः-सिद्धान्त आचारः, काचिद् विशिष्टा व्यावहारिकपरम्पराऽत्र नियमशब्देनोच्यत इति, स च यद्यपि बहुविषयः, तत्र कश्चित् पूर्वमप्यसन्निबन्धन-सदनिबन्धनादिरूप उक्त एव, सम्प्रति तद्विशेष एव कश्चिदुदाहियते-यथेत्यादिना । अत्र 'कृष्णनीलयोः' इत्यादिषष्ठ्यन्तपदानामन्ते निर्दिष्टेन 'ऐक्यम्' इति पदेनान्वयः, तथा च नील-कृष्णयोर्वस्तुतो लोके भेदेऽपि कविभिरभिन्नत्वेनाचारादैक्यम्, यथा—

"नदीं तूर्णं कर्णोऽप्यनुसृतपुलिनां दाक्षिणात्याङ्गनाभिः,
समुत्तीर्णो वर्णामुभयतटचलाबद्धवानीरहाराम् ।
तटे सह्यस्योच्चैः स्वसलिलनिवहो भाति नीलः स यस्याः,
प्रियस्यांसे पीने लुलित इव घनः केशपाशः सुकेश्याः ॥"

[ का० मी० अ०-१५ ]

अर्थः—कर्णोऽपि-कश्चिदेतन्नामकराजापि, दाक्षिणात्याङ्गनाभिः-दक्षिणदिग्भवाभिः कामिनीभिः, अनुसृतपुलिनाम्-आश्रिततटप्रदेशाम्, उभयतटयोः-उभयोः कुलयोः, चलः-चञ्चलः, आबद्धः-श्रेणीबद्धः, वानीरहारः-वेतसलतामाला यस्यास्ताम्, वर्णाम्-एतन्नामिकां नदीम्, तूर्णं-झटिति, समुत्तीर्णः-पारितवान् । पुनर्नदीमेव विशिनष्टि-यस्याः-वर्णायाः, सः-प्रसिद्धः, नीलः-नीलवर्णः, स्वसलिलनिवहः-स्वप्रसूतजलसमूहः, सह्यस्य-तन्नामकपर्वतस्य, उच्चैस्तटे-उन्नते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रान्तभागे, पीने-मांसले, प्रियस्य-दयितस्य, अंसे-स्कन्धे, लुलितः-विकीर्णः, सुकेश्याः-सुन्दरकेशयुक्ताया महिलायाः, घनः-निबिडः, केशपाश इव-कच-समूहवद्, विभातीति शेषः । अत्र नीलवर्णेन जलेन स्वभावतः कृष्णवर्णानां सुकेशीकचानां सादृश्योक्तेरुभयोर्वर्णयोरैक्यं स्पष्टमेव प्रतीयत इति । यद्यपि "कृष्णे नीला-ऽसित-श्याम-काल-श्यामल-मेचकाः" [ अमर० १-५-१४ ] इत्यादिकोषानुसारं स्वभावत एव नील-कृष्णयोरैक्यं लभ्यत इति न तत्र कवि-समयकृतो विशेष इति प्रतिभाति, तथापि "नील्या अन् वक्तव्य" इति कात्यायन-वार्तिकवशनिष्पन्नस्य नीलशब्दस्य लोके हरितमिश्रितश्यामवर्णविशेषाभिधायिता दृश्यत इति कविसमयस्य तद्भिन्नत्वेन तत्कथनं पार्थक्येनावश्यकमिति न काचि-दनुपपत्तिरिति ॥

कृष्ण-हरितयोरैक्यं यथा—

"मरकतसदृशं च यामुनं स्फटिकशिलाविमलं च जाह्नवम् ।
तदुभयमुदकं पुनातु वो हरि-हरयोरिव संगतं वपुः ॥"

[ का० मी० अ०-१५ ]

अर्थः—मरकतसदृशं-हरितवर्णं, यामुनम्, स्फटिकशिलाविमलं-स्फटिकवत् स्वच्छम्, जाह्नव्या इदं-जाह्नवं गाङ्गम्, [ कृष्ण-श्वेतवर्णयोः ] हरिहरयोः, संगतं-संमीलितमेकत्र स्थितं वा, वपुरिव, तदुभयम्-एतद्द्वयमप्युदकं, वः पुनातु । अत्र यमुनाया जलं कृष्णवर्णतया ख्यातं कृष्णवर्णहरिशरीरेणोपमितं च हरितवर्णमरकतमणिसदृशत्वेनोक्तमिति कृष्ण-हरितयोरैक्यं स्वीकृतमेव ॥

एवं कृष्ण-श्यामयोर्वस्तुतोऽभिन्नयोरपि लौकिकव्यवहारे प्राप्तसूक्ष्मभेदयो-रैक्यं यथा—

"एतत् सुंदरि! नन्दनं शशिमणिस्निग्धालवालद्रुमं,
मन्दाकिन्यभिषिक्तमौक्तिकशिले मेरोस्तटे नन्दति ।
यत्र श्यामनिशासु मुञ्चति मिलन्मन्दप्रदोषानिला-
मुद्दामामरयोषितामभिरतं कल्पद्रुमश्चन्द्रिकाम् ॥"

[ का० मी० अ०-१५ ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थः—सुन्दरि! एतत्–पुरोदृश्यमानम्, शशिमणेः–चन्द्रकान्तस्य, स्निग्धः–चिक्कणः सुन्दरो वा, आलवालः–जलाधारो येषु तादृशा द्रुमाः–वृक्षा यस्मिंस्तत्, नन्दनं–प्रसिद्धं देवोद्यानम्, मन्दाकिन्या–स्वर्गङ्गया, अभिषिक्ता मौक्तिकशिला–मुक्तामयी दृषद् यस्मिँस्तस्मिन्, मेरोस्तटे–सुमेरुपर्वतप्रान्तभागे, नन्दति–समृद्धतया राजते। यत्र श्यामनिशासु–कृष्णपक्षरात्रिषु, कल्पद्रुमः–अभिलषितार्थप्रदः सुरवृक्षविशेषः, उद्दाम्नाम्–उत्कटयौवनानाम्, अमरयोषितां–देवाङ्गनानाम्, अभिरतं–सुरतं लक्ष्यीकृत्य, सुरतसमये इत्यर्थः, मिलन्–संगतः, मन्दः–शनैश्चरन्, प्रदोषानिलः–सायंकालिकः शीतसुरभिर्वायुर्यस्यां ताम्, चन्द्रिकां–ज्योत्स्नाम्, मुञ्चति–विसृजति, तत् पश्येति शेषः। कस्यचित् कामुकस्य विद्याधरादेः कामिनीं प्रति स्वावसरसूचनाय कथनमिदम्। अत्र श्यामनिशास्विति कथनेन कृष्ण-श्यामयोरैक्यं व्यक्तमिति॥

पीत-रक्तयोरैक्यं यथा—

"लेखया विमलविद्रुमभासा, सन्ततं तिमिरमिन्दुरुदासे।
दंष्ट्रया कनकभङ्गपिशङ्गया, मण्डलं भुव इवादिवराहः॥"

[ कि० स० ९–श्लो–३५ ]

अर्थः—इन्दुः, विमलविद्रुमस्य–निर्मलरक्तमणेः, भास इव भासः–कान्तयो यस्यास्तया, लेखया–स्वकलया, रलयोरैक्याद् रेखाकारेण स्वशरीरेण वा, सन्ततं–समन्ताद् व्याप्तं, तिमिरम्, आदिवराहः–वराहावतारो विष्णुः, कनकभङ्गवत्–स्वर्णखण्डवत्, पिशङ्गया–पीतवर्णया, दंष्ट्रया–उन्नतेन दन्तेन, भुवः–भूमेः, मण्डलं–वलयमिव, उदासे–उच्चिक्षेप, उद्धार वा। अत्र विद्रुमभासो लेखायाः पीतवर्णया दंष्ट्रयोपमानात् तयोर्वर्णयोरैक्यं कवेर्मतमिति व्यक्तम्॥

शुक्ल-गौरयोरैक्यं यथा—

"कैलासगौरं वृषमारुरुक्षोः, पादार्पणानुग्रहपूतपृष्ठम्।
अवेहि मां किङ्करमष्टमूर्तेः कुम्भोदरं नाम निकुम्भमित्रम्॥"

[ र० वं० स० २. श्लो–३५ ]

अर्थः—पुत्रप्राप्त्यर्थं वसिष्ठोपदिष्टां नन्दिनीसेवामाचरन् राजा दिलीपस्तया परीक्षानिमित्तं स्वमायया स्वस्योपर्याक्रममाणेन सिंहेन मनुष्यवाचा विस्मयजननपूर्वकं स्वपरिचयमुच्यते, कैलासवद् गौरं–शुभ्रम्, वृषं–स्ववाहनभूतवृषभम्,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आरुरुक्षोः-आरोढुमिच्छतः, अष्टमूर्तेः-शिवस्य, पादार्पणं-उच्चं वृषपृष्ठं प्राप्तुं मध्ये पादस्थापनं, स एवानुग्रहः-अनुकम्पा, तेन पूतं-पवित्रीकृतं, पृष्ठं-पृष्ठदेशो यस्य तम्, किङ्करं-तस्यैव दासं, निकुम्भस्य-कार्तिकेयस्य, मित्रं-सुहृदम्, कुम्भोदरं नाम मां सिंहं, अवेहि-अवधारय । एतावता स्वस्याधृष्यत्वमुपपादितम् । अत्र च श्वेततया प्रसिद्धस्य कैलासस्य गौरत्वकथनेन शुक्ल-गौरयोरैक्यमुक्तमेव । यद्यपि "गौरः पीतेऽरुणे श्वेते विशुद्धे चाभिधीयते" ॥ इति कोशेन गौरशब्दस्य श्वेतपर्यायत्वेन शुक्लेन सह तस्यैक्यं सर्वं सम्मतमेवेति न तत्र कविसमयकृतो विशेषस्तथापि लौकिकं गौरशब्दस्य सर्षपादिवर्णे प्रयोगमनुसृत्यायं विशेषोऽभिहित इति । एवं वर्णान्तरेष्वपि लोके भिन्नत्वेन प्रतीतेषु कविसमये क्वचिदैक्यमूह्यमिति ॥

चन्द्रे शश-मृगयोर्लोके भिन्नयोरप्यैक्यं, तेन चासौ शशाङ्क इति मृगाङ्क इति वोपचर्यते । एतेन भौम इव दिव्येऽपि विषये कवीनां समय इति ज्ञेयम् । यथा—

"मा भैः शशाङ्क! मम सीधुनि नास्ति राहुः,
खे रोहिणी वसति कातर! किं बिभेषि ।
प्रायो विदग्धवनितानवसङ्गमेषु,
पुंसां मनः प्रचलतीति किमत्र चित्रम् ॥"

[ वा० का० सू० ३. २. ८ ]

अर्थः—काचित् कामिनी पातुं स्थापिते मद्यपूर्णपात्रे सकेशपाशेन स्वमुखेन प्रतिबिम्बितपूर्वे चलां चन्द्रप्रतिकृतिं विलोक्य मम केशपाशं राहुं मदीयप्रतिकृतिं चायं रोहिणीं मन्यते इति सम्भाव्य तं उपालभते विबोधयति वा—हे शशाङ्क! मा भैः-भयनिमित्त एवायं तव कम्पः, तत्कारणाभावाच्च भीतिं त्यज, तव भयस्य च कारणद्वयं संभवति-राहुसन्निधानं, परस्त्रीसंबन्धसम्भावितकोपायाः रोहिण्याः स्वपत्न्याः सन्निधानं वा, तत्र प्रथमस्याभावमाह-मम सीधुनि-मद्ये राहुर्नास्ति, द्वितीयं निषेधति-रोहिणी-तव मानिनी जाया खे आकाशे वसति, अत्र तस्याः सन्निधानासंभव एव, अतश्च कातर!-अकारणभीरो! किं बिभेषि-कुतस्त्रसि, त्रासस्य तज्जन्यकम्पस्य वा कारणं स्वयमूहते-प्राय इति । विदग्धानां-कामकलाचतुराणां वनितानाम्, नवसङ्गमेषु-प्रथमपरिचयेषु,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुंसां–अविदग्धपुरुषाणां, मनः, प्रायो–बाहुल्येन, अहमस्या हृदयावर्जको भवेयं न वेति शङ्कया, प्रचलति–वेपते, इति हेतोः अत्र–तव भीतौ, किं चित्रं?–किमपि नाश्चर्यमिति। अत्र चन्द्रमसः शशाङ्कत्वेनोपादानम् ॥

अन्यत्र च मृगाङ्कत्वेन यथा—

"अङ्काधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः।
केसरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः॥" [ शि० व० स० २, श्लो–५३ ]

अर्थः—युधिष्ठिरेण यज्ञार्थमाहूतः शिशुपालं प्रत्याक्रमणाय च प्रोत्सुकः श्रीकृष्णः किमत्र कर्तव्यमित्युद्धव-बलरामौ पप्रच्छ, तत्र पूर्वं बल एव स्वमत-माह, तत्र प्रसङ्गे–ऋजुतायाः, बलप्रयोगस्य च कीदृशः परिणामो भवतीति निदर्श-यति–अङ्कम्–उत्सङ्गम्, अधिरोपितः–स्थापितो मृगो येन स चन्द्रमाः, मृगला-ञ्छन इति ख्यातः, मृगस्तस्य दयनीयत्वेन सम्मत इति वैपरीत्येन स तस्याकी-र्तिकरः संवृत्तः। निष्ठुरं–निरनुक्रोशं यथा स्यात् तथा, क्षिप्तः–आक्रम्य निहतः, मृगयूथः–मृगसमूहो येनासौ, केसरी–सिंहः, मृगाधिपः–मृगान् अधिकं पाति रक्षयतीति सः, तत्स्वामी वा ख्यातः। निर्दयतया हता मृगास्तस्य वशगास्तत्कीर्ति-कराश्च संवृत्ता इति शत्रौ मार्दवमनुचितं पौरुषं कीर्तिकरमिति शिशुपालेऽपि पौरुषं प्रयोक्तव्यमिति बलरामोक्तिः। अत्र च मृगलाञ्छनत्वेनोक्तिरिति शश-मृगयोरैक्यमापतितमेव ॥

एवं कामस्य ध्वजे मकर-मत्स्ययोरैक्यमपि कविसमयः, तथा च—

"चापं पुष्पमयं गृहाण मकरः केतुः समुच्छ्रीयतां,
चेतोलक्ष्यभिदश्च पञ्च विशिखाः पाणौ पुनः सन्तु ते।
दग्धा काऽपि तवाकृतेः प्रतिकृतिः कामोऽसि किं गूहसे,
रूपं दर्शय नात्र शंकरभयं सर्वे वयं वैष्णवाः॥" [ ]

अर्थः—कश्चिदतिशयसुन्दरं पुरुषं काम एव त्वमिति समर्थयमाना काचिन्ना-यिकाऽऽह–पुष्पमयं चापं, गृहाण–हस्ते कुरु, मकरः–तदङ्कितस्तद्रूपो वा, केतुः–ध्वजः स्वकामत्वचिह्नम्, समुच्छ्रीयतां–ऊर्ध्वीक्रियताम्, पुनश्च ते पाणौ, चेतो-लक्ष्यं–मनोरूपं शरव्यं ये भिन्दन्ति ते तथाभूताः, पञ्च विशिखाः–बाणाश्च सन्तु, तथा च स्वकीयानि सर्वाणि चिह्नानि धारयेति भावः। नन्वसौ कामो दग्धः शङ्करे-णेति चेत्? नेत्याह–काऽपि तवाकृतेः–त्वदाकारस्य, प्रतिकृतिः–प्रतिमूर्तिर्दग्धा, न

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वमिति भावः, अतश्च त्वं कामोऽसि, किं-कुतः कारणादात्मानं गूहसे-गोपायसि, न किमपि गोपनकारणं लक्ष्यत इति भावः, ततश्च रूपं दर्शय-सर्वमात्मीयं वस्तु गृहीत्वा स्वरूपे तिष्ठ, ननु शङ्करः पुनः कुप्येतेति चेत्? तत्राह-अत्र शंकरभयं नास्ति, कुतः? सर्वे वयं वैष्णवाः-सर्वेऽत्रत्या विष्णुभक्ता इति शंकराय स्वद्वृत्तावेदकः कोऽपि नास्तीति निर्भयो विचरेति भावः । अत्र कामस्य मकरो ध्वज इत्युक्तम् ॥

अन्यत्र च मत्स्यो यथा—

"मीनध्वजस्त्वमसि नो न च पुष्पधन्वा,
केलिप्रकाश! तव मन्मथता तथापि ।
इत्थं त्वया विरहितस्य मयोपलब्धाः,
कान्ताजनस्य जननाथ! चिरं प्रलापाः ॥" [ का० मी० अ-१६ ]

अर्थः—"त्वं मीनध्वजः-मत्स्यकेतनवान्, नो असि न विद्यसे, पुष्पधन्वा-पुष्पमयधनुर्हस्तश्च न असि, केलिप्रकाश! केलिषु-रतिक्रीडासु, प्रकाशते-अतिशयेन शोभत इति सः, एतद्गुणमूलकं कस्यचिन्नाम तत्सम्बुद्धिः, तथापि-मन्मथचिह्नयोरुक्तयोरभावेऽपि, तव-भवतः, मन्मथता-कामदेवत्वमथ च अन्तरुन्मथनजनकत्वम्, हे जननाथ! त्वया विरहितस्य कान्ताजनस्य इत्थं-पूर्वोक्तप्रकाराः प्रलापाः मया चिरमुपलब्धाः । केनचिद् राज्ञा कार्यवशात् स्वपुरं परित्यज्यान्यत्र तिष्ठता स्वप्रेयसीनां वार्ताहरणाय प्रेषितः कश्चित् तासामवस्थामित्थं व्याजहारेति प्रतीयते । अत्र कामस्य मीनध्वजत्वमुक्तमिति नैकस्य जनस्य ध्वजे प्रकारभेदः सम्भवतीत्यगत्या मकर-मीनयोरैक्ये पर्यवस्यति ॥

यथा वा—

आपातमारुतविलोडितसिन्धुनाथो, ह्राकारभीतपरिवर्तितमत्स्यचिह्नाम् ।
उल्लङ्घ्य यादवमहोदधिभीमवेलां, द्रोणाचलं पवनसूनुरिवोद्धरामि ॥"
[ का० मी० अ०-१६ ]

अर्थः—पद्यमिदं महाभारतीययुद्धप्रसङ्गे सिन्धुदेशराजस्य जयद्रथस्य रक्षणाय यादवसेनया रचिते शकटव्यूहे तं [ जयद्रथं ] संस्थाप्य प्रवेशद्वारे स्वयं तिष्ठति द्रोणाचार्ये कथमत्र प्रवेष्टव्यमिति संशयितेषु स्वपक्षीयेषु स्वसामर्थ्यप्रकाशनाय भीमसेनेनोक्तमिति प्रतिभाति । पवनसूनुर्हनूमान् द्रोणाचलमिव-द्रोणपर्वतमिव,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पवनसूनुरिव–हनूमानिवाऽहं भीमः, [ स्वस्यापि पवनसूनुत्वेन–वायोरंशात् समुद्भूतत्वेन तत्साम्योक्तिरिति तत्त्वम्, ] द्रोणाचलं–अचलरूपं–पर्वतसमानं द्रोणाचार्यम्, उद्धरामि–उत्पाटयामि, प्रवेशद्वाराद्व्यावर्तयामि इति भावः । हनूमता सह साम्यसमर्थकं विशेषणमाह–आपातमारुतेति–आपातमारुतेन–आक्रमणवेगजवायुना, विलोडितः–संक्षोभितः, सिन्धुनाथः–समुद्रो येन स इति हनूमत्पक्षे, सिन्धुनाथः–सिन्धुदेशपालको जयद्रथनृपो येन स इति भीमसेनपक्षे । किं कृत्वेत्याह–हाकारेण–भयसूचकशब्दविशेषेण सह भीताः; परिवर्तिताः–समन्तात् वर्तमाना मत्स्या एव चिह्नं यस्यास्तादृशीं, यादवा इव महोदधिः–समुद्रः, तस्य भीमवेलां–भयजनकं तटम्, उल्लङ्घ्य–उत्प्लुत्येति हनूमत्पक्षे, हाकारेण भीतः, परिवर्तितः-स्वसैनिकनिरीक्षणाय पृष्ठावलोकीकृतः मत्स्यचिह्नः–मीनध्वजः–प्रद्युम्नः सेनापतिर्यस्याः [ यादवसेनायाः सेनापतिः प्रद्युम्न आसीत्, स च कामदेवावतारः, कामदेवश्च मीनध्वज इति तस्यापि मत्स्यध्वजत्वेन प्रसिद्धिः ] सा, ताम्, यादवाः—यादवपक्षीया सैनिका एव, महोदधिः—दुर्लङ्घ्यत्वात् समुद्रः, तस्य भीमवेलामिति पूर्ववत्, उल्लङ्घ्य–अतीत्य ॥

अत्रिनेत्रसमुद्रोत्पन्नयोश्चन्द्रयोश्चैक्यम्, द्विधा हि श्रूयते चन्द्रमस उत्पत्तिः, हरिवंशपुराणे तस्य अत्रिनेत्रसमुद्भूतत्वमित्थमुक्तम् । [ अत्रेः ]

"नेत्राभ्यां वारि सुस्राव दशधा द्योतयद् दिशः ।
तद्गर्भविधिना हृष्टा दिशो देव्यो दधुस्तदा ॥
समेत्य धारयामासुर्न च ताः समशक्नुवन् ।
स च ताभ्यः सहैवाथ दिग्भ्यो गर्भः प्रभावितः ॥
पपात भासयँल्लोकान् शीतांशुः सर्वभावतः ।" इति ।

अपरञ्च, तस्य मथ्यमानात् क्षीराब्धेरप्युत्पत्तिः पुराणेषु श्रुता, न च तयोः पार्थक्येन व्यवहारः क्वापि दृष्ट इति कविसमयेऽपि तयोरेकत्वमेवाश्रितम् ।

यथा—

"वन्द्या विश्वसृजो युगादिगुरवः स्वायंभुवाः सप्त ये,
तत्रात्रिर्दिवि सन्दधे नयनजं ज्योतिः स चन्द्रोऽभवत् ।
एका यस्य शिखण्डमण्डनमणिर्देवस्य शम्भोः कला,
शेषाभ्योऽमृतमाप्नुवन्ति च सदा स्वाहा-स्वधाजीविनः ॥"

[ का० मी० अ–१६ ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थः—वन्द्याः-सर्वेषां प्रणम्याः, विश्वसृजः—सृष्टेरादावुत्पन्नत्वात् तेभ्य एवान्या सर्वा सृष्टिरिति तेषां विश्वसृट्त्वम्, युगादिगुरवः-युगानां—सत्ययुगादीनामादौ विद्यमानाः, गुरवः—सर्वलोकोपदेशकाः, सप्त स्वायंभुवाः—स्वयंभूर्ब्रह्मा ततः समुद्भूताः सप्तर्षित्वेन प्रसिद्धाः, तत्र-तन्मध्ये, अत्रिः—तन्नामा मुनिः, दिवि—आकाशे, नयनजं ज्योतिः सन्दधे—समुत्ससर्ज, सः—तज्ज्योतिरेव, चन्द्रोऽभवत्—चन्द्रतां गतम्, उद्देश्य-प्रतिनिर्देश्ययोरैक्यमापादयत् सर्वनाम क्रमेण तत्तल्लिङ्गभाग् भवतीति प्रतिनिर्देश्यचन्द्रगतलिङ्गविवक्षया स इति पुल्लिङ्गनिर्देशः, यस्य-चन्द्रस्य, एका कला, देवस्य शम्भोः शिखण्डस्य—चूडाया मण्डनाय मणिरिव स्थिता, शेषाभ्यः पञ्चदशभ्यः स्वाहा-स्वधाभ्यां जीवन्तीति ये ते देवाः पितरश्च, स्वाहाजीविनो देवाः, स्वधाजीविनः पितरः, सदा अमृतं—सुधाम्, आप्नुवन्ति—लभन्ते । अत्र चन्द्रस्यात्रिनेत्रसमुत्पन्नत्वमुक्तम् ॥

समुद्रोत्पन्नत्वं च तस्य यथा—

"यदिन्दोरन्वेति व्यसनमुदयं वा निधिरपा-
मुपाधिस्तस्यायं जयति जनिकर्तुः प्रकृतिता ।
अयं कः सम्बन्धो यदनुहरते तस्य कुमुदं,
विशुद्धाः शुद्धानां ध्रुवमनभिसन्धिप्रणयिनः ॥"

[ अनर्घराघवे, मुरारेः ]

अर्थः—अपां निधिः—निधिः समुद्रः, इन्दोः—चन्द्रस्य, व्यसनं—क्षयं, उदयं—वृद्धिं च, यत् अन्वेति—आनुकूल्येन क्षयं वृद्धिं च प्राप्नोति, तस्य अयम्—अग्रे कथ्यमानः, जनिकर्तुः—उत्पादकस्य समुद्रस्य, प्रकृतिता—जन्यमानसमप्रकृतित्वम्, उपाधिः—साध्यव्यापको धर्मः, किन्तु कुमुदं तस्य—चन्द्रस्य यत् अनुहरते क्षयवृद्धी अनुकरोति, अयं कः सम्बन्धः—नहि चन्द्र-कुमुदयोः कश्चित् सम्बन्धो विज्ञातो येन तदनुसारित्वं तस्य स्यात्, अतश्चैतज्ज्ञायते यत्, विशुद्धाः—निर्दोषाः, शुद्धानां तादृशानाम्, ध्रुवं—निश्चयेन, अनभिसन्धिप्रणयिनः—निर्व्याजस्नेहिनो भवन्तीति शेषः । अत्र चन्द्रस्य समुद्रो जनयितेति स्पष्टमुक्तम् ॥

द्वादशात्मा दिवाकर इति प्रसिद्धम्, तत्र मासि मासि प्रत्येकमादित्यास्तपन्तीति प्रतिपादितं तत्तदाकरग्रन्थेषु, एवं च तेषां वास्तविको भेदः किन्तु कविसमये तेषामैक्यमेवोपनिबध्यते, यथा—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"यस्याधोऽधस्तथोपर्युपरि निरवधि भ्राम्यतो विश्वमश्वै-
रावृत्तालातलीलां रचयति रयतो मण्डलं चण्डधाम्नः ।
सोऽव्यादुत्तप्तकार्तस्वरसरलशरस्पर्धिभिर्धामदण्डै-
रुद्दण्डैः प्रापयन् वः प्रचुरतरतमःस्तोममस्तं समस्तम् ॥"

[ का० मी० अ-१६ ]

अर्थः—अश्वैः, विश्वं-जगत्, अधोऽधः, तथा उपरि उपरि, निरवधि-सततम्, भ्राम्यतः, चण्डधाम्नः-तिग्मदीधितेः, यस्य-आदित्यस्य, मण्डलं रयतः-वेगात्, आवृत्तालातलीलां-भ्रान्तालातचक्रविडम्बनाम्, रचयति-कुरुते, उत्तप्तकार्तस्वरस्य-अग्निशुद्धहेम्नः, सरलाः-अवक्राः, ये शराः-इषवः, तैः स्पर्धन्त इति तथाभूतैः, उद्दण्डैः-अव्याहतैः, धामदण्डैः-तेजःकिरणैः, प्रचुरतरतमःस्तोमं-समधिकान्धकारसमूहम्, अस्तं-नाशं, प्रापयन्-गमयन्, सः-आदित्यः, वः, अव्यात्-रक्षयेत् । अत्र अधोऽध उपर्युपरि चैकस्यैव भ्रमणमुक्तमिति सर्वेषामैक्यं स्पष्टमेव ॥

एवं नारायण-माधव-विष्णु-दामोदरादीनां लौकिकस्वरूपकृतभेदेऽपि कविसमये ऐक्यम्, यथा—

"येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो,
यो गङ्गां च दधेऽन्धकक्षयकरो यो बर्हिपत्रप्रियः ।
यस्याहुः शशिमच्छिरो हर इति स्तुत्यं च नामामराः,
सोऽव्यादष्टभुजङ्गहारवलयस्त्वां सर्वदोमाधवः ॥"

[ सुभाषितावलौ चन्द्रकस्य ]

अर्थः-अयं श्लोकः सर्वेष्वलङ्कारग्रन्थेषु श्लेषप्रकरणे उदाहृतः, परं तत्र पाठभेदः दृश्यते, काव्यप्रकाश-ध्वन्यालोक-साहित्यदर्पणेषु दत्तः पाठः समानः, सरस्वतीकण्ठाभरण-काव्यमीमांसाधृतः पाठश्चात्रत्येन पाठेन सरूपः, केवलमन्तिमपादे "अष्टभुजङ्गहारवलयः" इत्यस्य स्थाने सरस्वतीकण्ठाभरणे "इष्टभुजङ्गहारवलयः" इति पाठः समुपलभ्यते, अयमेव च पाठः समीचीनः प्रतिभाति, उभयपक्षे सुसंबद्धत्वात् । त्वां, उमाधवः-शिवः, माधवो वा, पात्विति सम्बन्धः । तत्र शिवपक्षे व्याख्या-ध्वस्तमनोभवेन-दग्धकामेन, येन बलिजितः-नारायणस्य कायः, पुरा-त्रिपुरदाहव्यतिकरे, अस्त्रीकृतः-शरतां नीतः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदुक्तं महिम्नस्तोत्रे—

"रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-
र्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः॥"

अन्धकस्य–दैत्यविशेषस्य, क्षयकरः–नाशको यः, गङ्गां च दधे–शिरसि गङ्गां दधार; यश्च बर्हिपत्रः–मयूरवाहनः कार्तिकेयः प्रियो यस्य तादृशः, यस्यः शिरः शशिमत्–चन्द्रकलायुक्तम्, यस्य च हर इति स्तुत्यं नाम, अमराः–देवाः, आहुः; अष्टानां भुजङ्गानां हारो वलयं च यस्य, अथवा "इष्टभुजङ्गहारवलयः" इति पाठे–इष्टानि भुजङ्गानां हारा वलयानि च यस्य सः, स सर्वदा उमायाः–पार्वत्याः, धवः पतिः शिवः, त्वामव्यादिति।

माधवपक्षे—अभवेन–संसारबन्धप्रयुक्तोत्पत्तिरहितेन, येन, अनः–शकटं, तदाख्योऽसुरः, कृष्णावतारे नाशितः, ध्वस्तं–पादाघाताच्चूर्णितम्, बलिं जयतीति तथाभूतः कायः; पुरा–समुद्रमथनोत्थामृतपरिवेषणसमये, स्त्रीकृतः–स्त्रीरूपतां प्रापितः, समुद्रोत्थामृतभोजनाय सुरासुरयोर्विवादे जाते मोहिनीरूपं धृत्वाऽसुरान् विमोह्य तानेकपङ्क्तौ समुपावेश्य अमृतपरिवेषणे तानच्छलयदिति पौराणिकी कथा; अन्धकानां–यदूनाम्, क्षयं–निवासभूमिं द्वारकापुरीम्, करोति–निर्मापयतीति तथाभूतः; यः, अगं–गोवर्धनपर्वतं कृष्णरूपेण, गां–पृथिवीमेकार्णवमग्नां वराहरूपेण, दधे–धारयामास; यश्च बर्हिणः–मयूरस्य, पत्राणि–पिच्छानि तेषां प्रियः–मुकुटे शोभार्थं तेषां धारयिता, "बर्हिपत्रकृतापीडम्" इति गोपालध्यानेऽभिधानात्; यस्य शशिनं मश्नातीति शशिमथ्–राहुः, तस्य शिरो हरतीति तथाभूतः, इति नाम अमरा आहुः। अमृतपरिवेषणसमय एव राहुश्छलेन देवानां पङ्क्तावुपविष्टोऽमृतं जग्राह, तत्कालमेव सूर्याचन्द्रमोभ्यां हरिः संसूचितस्तस्य शिरश्चकर्त चक्रेण, अमृतं च तावत् पीतवान् स इत्यमरत्वं प्राप्तः सूर्याचन्द्रमसौ तदपराधादेव ग्रसतीति पौराणिकी कथा। अष्टौ भुजङ्गान् कालियादीन् हन्तीति तथा, "इष्टभुजङ्गहारवलयः" इति पाठे–इष्टः, भुजङ्गहा–गरुडो यस्य, रवे–शब्दब्रह्मणि लयो यस्य सः, सः, सर्वदः–सर्वेप्सितदाता, माधवः, त्वां पातु। अत्र नारायण-श्रीकृष्ण-माधवादीनामैक्यं स्पष्टमेव॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा कमला-सम्पदोरैक्यं यथा—

"दोर्मन्दी [ न्दे ] रितमन्दरेण जलधेरुत्थापिता या स्वयं,
यां भूत्वा कमठः पुराणककुदन्यस्तामुदस्तम्भयन् ।
तां लक्ष्मीं पुरुषोत्तमः पुनरसौ लीलाञ्चितभ्रूलता-
निर्देशैः समवीविशत् प्रणयिनां गेहेषु दोष्णि क्षितिम् ॥"

अर्थः–अत्र 'मन्दीरित' इत्यस्य स्थाने 'मन्देरित' इति पाठः साधुः, या–लक्ष्मीः, दोर्भ्यां–बाहुभ्यां, मन्दम्–ईषत्, ईरितः–प्रेरितः, मन्दरः–मन्थानकपर्वतो येन तथाभूतेन, जलधेः–समुद्रात्, स्वयमुत्थापिता, पुनः तां लक्ष्मीम्, असौ पुरुषोत्तमः, लीलया, अञ्चितैः–शोभितैः, भ्रूलतानिर्देशैः–भ्रवल्लीचलनैरेव, प्रणयिनां–स्वभक्तानामथ च प्रेमिणां, गेहेषु समवीविशत्–निवेशयामास, एवं यां भुवम्, कमठः–कच्छपो भूत्वा, पुराणेन–प्राचीनेन, ककुदेन–वृषस्कन्धोपरिभागेन, न्यस्तां–क्षिप्ताम्, पृथ्वी पूर्वं वृषस्कन्धोपरिस्थिता, ततः पतिता कच्छपावतारेण धारितेति पौराणिकी कथाऽत्रानुसंधेया, उदस्तम्भयत्–उत्थापयामास, पुनः तां क्षितिं–पृथ्वीं, प्रणयिनां दोष्णि–बाहौ समवीविशत् । अत्र लक्ष्मी-सम्पदोरैक्यं निबद्धम्, नहि समुद्रोत्थिता मूर्तिमती स्वप्रिया तेन प्रणयिगेहे निवेशिता, अपि तु सम्पत्स्वरूपैवेति तयोरैक्यं स्पष्टमेवेह ॥

नाग-सर्पयोरैक्यं यथा—

"हे नागराज ! बहुमस्य नितम्बभागं, भोगेन गाढमभिवेष्टय मन्दराद्रेः ।
सोढाविषह्यवृषवाहनयोगलीला पर्यङ्कबन्धनविधेस्तव कोऽतिभारः ॥"

[ का० मी० अ–१६ ]

अर्थः—हे नागराज !–वासुके !, अस्य मन्दराद्रेः बहुं–विस्तीर्णं नितम्बः भागं–कटिपश्चात्प्रदेशम्, भोगेन–फणदेशेन, गाढं–दृढम्, अभिवेष्टय, सोढः, अविषह्यः–अन्यैरसहनीयः, वृषवाहनस्य–शिवस्य, योगलीलायां–योगक्रीडायां, पर्यङ्कस्य–आसनस्य, बन्धनविधिः–स्थिरीकरणकृत्यं येन तस्य, तव, अयं कः, अतिभारः–विशेषायाससाध्यं कार्यम्, तादृशे कार्ये कृतात्मयोगस्य तवायं नियोगसुकर एवेति भावः ॥ अत्र मन्दराचलबन्धनभूतस्य नागस्य शिवपरिकरस्य सर्पस्य चैक्यं प्रतिपादितमिति ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षीरसागर-क्षारसमुद्रयोरैक्यं यथा—

"शेतां हरिर्भवतु रत्नमनन्तमन्त-
र्लक्ष्मीप्रसूतिरिति नो विवदामहे हे [ ऽब्धे ! ] ।
हा दूरदूरसपयास्तृषितस्य जन्तोः,
किं त्वत्र [ त्वं न ] कूपपयसः स मरोर्जघन्यः ॥"

[ का० मी० अ-१४ ]

अर्थः—अत्र कोष्ठान्तर्गतः पाठोऽपि समुपलभ्यते, स एव चाधिकः शोभनोऽर्थसङ्गत्या, त्वयि हरिः शेतां-शयनं करोतु, हरिशयनकृतं महत्त्वं तेऽस्तु, अन्तः-तव मध्ये, अनन्तं-संख्यातीतं, रत्नं जातावेकत्वम्, भवतु, किञ्च लक्ष्मीप्रसूतिः-लक्ष्म्या उत्पत्तिर्भवतु, हे [ अब्धे ! ] अत्र विषये-तव हरिशयनादिकृते माहात्म्ये, नो विवदामहे-विवादं न कुर्मः । किन्तु, हा इति खेदे, तृषितस्य-पिपासितस्य, जन्तोः कृते, दूरम्-अत्यन्तं, दूरसं-दुष्टरसवत्, पयो यस्य स त्वम्, कूपपयसः दुर्लभजलत्वेऽपि पानीयकूपपानीयात्, मरोः-मरुदेशात्, जघन्यः-नीचः। अथवा स त्वं कूपपयसः मरोः किं न जघन्यः? इति कोष्ठस्थपाठानुसार्यन्वयः । ईदृशमहिम्नोऽपि तव समीपे गतस्तृषितो न तृषाशान्तिं लभते, ततो वरमसौ मरुरेव, यत्र कूपजलं तु मिलति, येन तृषाशान्तिरिति भावः ॥

'किं त्वस्ति' इति पाठोऽप्यनुकूल एव । अत्र हरिशयनं लक्ष्मीप्रसूतिश्च क्षीराब्धिः, दूरदूरसपयस्त्वं च लवणोदस्य तथाप्यत्र तयोरैक्येन तस्य दूषणमुपनिबद्धम् ॥

सागरा हि प्रतिद्वीपं भिद्यन्ते, महासमुद्रश्च समग्रां पृथ्वीं परिक्षिप्य वर्तते, तयोश्चैक्यं कविसमयसिद्धम्, यथा—

"रिङ्गत्तरङ्गभ्रूभङ्गैस्तर्जयन्तीमिवापगाः ।
स ददर्श ततो गङ्गां सप्तसागरवल्लभाम् ॥"

[ का० मी० अ-१४ ]

अर्थः—स ततः, रिङ्गन्तः-प्रेङ्खमाणा ये तरङ्गाः, तेषां भङ्गैः-त्रुटिभिः, आपगाः-अन्या नदीः, तर्जयन्तीं-भीषयन्तीमिव, सप्तानामपि सागराणां समूहभूतस्य महासागरस्य वल्लभां-प्रियां गङ्गां ददर्श, यत इयं सप्तसागरवल्लभा अत एव तत्संगमकाङ्क्षिणीरन्या नदीस्तर्जयतीति भावः, दृश्यते हि लोकेऽपि पत्युरति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रियाङ्गना अन्याः सपत्नीरधः करोतीति । अत्र गङ्गाया पूर्वसागरगामित्वेऽपि महासमुद्रवल्लभात्वेनोक्तिरुभयोरैक्यमास्थायैव ॥

तत्त्वतो दैत्य-दानवाऽसुराणां भेदः; तथाहि–दितेरपत्यानि-हिरण्याक्ष-हिरण्यकशिपु-प्रह्लाद-विरोचन-बलि-बाणादयो दैत्याः, दनोरपत्यानि–विप्रचित्ति-शम्बर-नमुचि-पुलोमप्रभृतयो दानवाः, एभ्योऽतिरिक्ताः सुरविरोधित्वमात्रेण ख्याता बल-वृत्र-विक्षुरस्त-वृषपर्वादयोऽसुरा इति । कोशेषु यद्यपि "असुरा दैत्य-दैतेय-दनुजेन्द्रारिदानवाः । शुक्रशिष्याऽदितिसुताः पूर्वदेवाः सुरद्विषः ॥" इत्यादिरूपेणैते सर्वे पर्यायवाचिनो विख्यातास्तथापि देवविरोधित्वमात्रं साम्यमेषामादाय तत्रैकत्र निर्देशः, किन्तु तेषां युगभेदेन वंशभेदेन गुणभेदेन पार्थक्यं स्पष्टमेव, तथापि कविसमये तेषामैक्येनैव व्यवहारः । यथा—

"जयन्ति बाणासुरमौलिलालिता, दशास्यचूडामणिचक्रचुम्बिनः ।
सुराऽसुराधीशशिखान्तशायिनो, भवच्छिदस्त्र्यम्बकपादपांसवः ॥"
[ का० पू० भा० श्लो. २ ]

अर्थः–बाणासुरस्य मौलिना–किरीटेन, लालिताः–सादरं सेविताः, दशास्यस्य–रावणस्य, चूडामणीनां चक्रं समूहः, दशास्यत्वेन तस्य दश चूडामणयः, तत् चुम्बन्ति–तेषामुपरि स्थित्वा तिष्ठन्तीति ते, सुराश्चासुराश्च तेषामधीशाः–सुराधीशाः–इन्द्रादयोऽसुराधीशा बलादयस्तेषां शिखान्तेषु–शिखाग्रभागेषु, शेरत इति तथाभूताः, भवच्छिदः–सेवकानां संसारबन्धमोचकाः, त्र्यम्बकस्य–शिवस्य, पादपांसवः–चरणरजांसि, जयन्ति—सर्वोत्कर्षेण वर्तन्ते, अतश्च तान् प्रत्यस्मि प्रणत इत्याक्षिप्यते । बाणस्य दैत्यस्यात्रासुरत्वेन निर्देशः ॥

यथा च—

"तं शम्बरासुरशराशनिशल्यसार-केयूररत्नकिरणारुणबाहुदण्डम् ।
पीनांसलग्नदयिताकुचपत्रभङ्गं मीनध्वजं जितजगत्त्रितयं जयेत् कः ? ॥"

अर्थः—शम्बरासुरस्य शरा अशनय इव तत्कृते शल्यवत्–शङ्कुवत् सारः–बलं यस्य स चासौ केयूररत्नकिरणैररुणश्च बाहुदण्डो यस्य तम्, पीनयोः–मांसलयोः, अंसयोः–स्कन्धयोः, लग्नः–सक्तः, दयितायाः–रतेः, कुचस्थितः पत्रभङ्गः–पत्राकृतिरचनाविशेषो यस्य तम्, जितं जगत्त्रितयं येन तम्, तं–प्रसिद्धं, मीनध्वजं–मत्स्यकेतनं कामं, को जयेत् ?, अपि तु कोऽपि नेत्यर्थः । अत्र दानवस्य शम्बरस्य असुरत्वेनोल्लेखः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथा च—

"आसीद् दैत्यो हयग्रीवः सुहृद्वेश्मसु यस्य ताः ।

प्रथयन्ति बलं बाह्वोः सितच्छत्रस्मिताः श्रियः ॥" [ हयग्रीववधे ]

अर्थः—हयग्रीवो दैत्य आसीत्, यस्य बाह्वोर्बलं, सुहृद्वेश्मसु—तन्मित्रमन्दिरेषु, सितच्छत्रमेव स्मितं-लीलावाससूचक ईषद्धासो यासां तथाभूताः, ताः-विख्याताः, श्रियः-सम्पदः, प्रथयन्ति-प्रकटयन्ति । एतेनैव तस्य प्रभुत्वं बाहुबलं चानुमेयं यत् तस्य सुहृदोऽपि तेन तथा सम्पादिता यथा तेऽपि सितच्छत्रवन्तो राजान एव जाता इति । अत्र हयग्रीवोऽसुरोऽपि दैत्यत्वेनोपनिबद्धः ॥

यथा वा हयग्रीवं प्रति—

"दानवाधिपते! भूयो भुजोऽयं किं न नीयते ।

सहायतां कृतान्तस्य क्षयाभिप्रायसिद्धिषु ॥" [ ह० व० ]

अर्थः—हे दानवानामधिपते!-हयग्रीव!, अयं-स्वकीयो भुजः, कृतान्तस्य-यमस्य, क्षयाभिप्रायाणां-नाशाभिलाषाणां, सिद्धिषु-साधनेषु, भूयः-पुनरपि, अधिकं वा, सहायतां-सहकारित्वम्, किं न नीयते? कुतस्त्वमुदासीन इव पूर्ववत् प्रतिपक्षाणां मारणाद् विरतोऽसीति भावः । अत्रासुरस्य तस्य दानवत्वेनोपनिबन्धः ॥

उपनिबद्धश्चायं सदसदसत्सन्निबन्धनः कविसमयः, एवंभूताश्च बहुशः कविसमयविषया आकारेषु स्थितास्ते यथायथं तेभ्योऽनुसन्धेयाः । किञ्च चक्षुः कृष्णमध्यं श्वेतप्रान्तं च स्वाभाविकं, तस्य कविभिरनेकवर्णत्वेनोपनिबन्धनं क्रियते, तस्य शुक्लता यथा—

"तिष्ठन्त्या जनसंकुलेऽपि सुदृशा सायं गृहप्राङ्गणे,

तद्द्वारं मयि निःसहालसतनौ व्रीडामृदु प्रेङ्खति ।

ह्रीनम्राननयैव लोलसरलं निःश्वस्य तत्रान्तरे,

प्रेमार्द्राः शशिखण्डपाण्डिममुषो मुक्ताः कटाक्षच्छटाः ॥"

[ का० मी० अ–१५ ]

अर्थः-सायं जनसंकुले-बहुजनव्याप्तेऽपि, गृहप्राङ्गणे, तिष्ठन्त्या सुदृशा, निःसहा-कामपीडादिना ग्लाना, अत एव अलसा-मन्दव्यापारा, तनुः-शरीरं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्य तस्मिन्, मयि, तद्द्वारं-तस्या द्वारदेशं, वीङ्खया-गतिविशेषेण "वीङ्खा गति-र्विहारेर्ष्यापरिसर्पपरिक्रमाः" इति हैमः [ ६, १३६ ], मृदु यथा स्यात् तथा, प्रेङ्खति-गच्छति सति, ह्रीनम्राननयैव-तत्रस्थजनदर्शनकृतलज्जासंवरणाय नीचै-रास्यमुखं धारयन्त्यैव, तत्रान्तरे-तस्मिन्नेव समये, लोलं-चञ्चलं च तत् सरलं-निसर्गमृदुभावं यथा स्यात् तथा, निःश्वस्य-दुःखसूचकं निःश्वासं कृत्वा, प्रेम्णा आर्द्राः-कोमलाः, शशिखण्डस्य-चन्द्रशकलस्य, पाण्डिमानं-श्वैत्यं मुष्णन्तीति ताः, कटाक्षस्य छटाः-कान्तयो, मुक्ताः-मदभिमुखमीरिताः । इह गुरुपरवशा मध्या नायिका । अत्र चक्षुषः श्वेततयोपनिबन्धः ॥

चक्षुषः श्यामता यथा—

"अथ पथि गमयित्वा क्लृप्तरम्योपकार्ये,
कतिचिदवनिपालः शर्वरीः शर्वकल्पः ।
पुरमविशदयोध्यां मैथिलीदर्शिनीनां,
कुवलयितगवाक्षां लोचनैरङ्गनानाम् ॥" [ र० वं० स० ११, श्लो-९३ ]

अर्थः—सीतास्वयंवरप्रसङ्गे जनकपुरं गतस्तत्र परिणीतपुत्रचतुष्टयो राजा दश-रथोऽयोध्यां प्रत्यावृत्तस्तत्रत्यं वर्णनमिदम्-अथ-अनन्तरम्, शर्वकल्पः-शिव-सदृशः, अवनिपालः-राजा दशरथः, क्लृप्ता-रचिता, रम्या-मनोहरा, उपकार्या-पटभवनं यत्र तस्मिन्, पथि-मार्गे, कतिचित्, शर्वरीः-रात्रीः, गमयित्वा-अतिवाह्य, मैथिलीदर्शिनीनां-सीतासंदर्शनलालसानाम्, अङ्गनानां-पुरस्त्रीणाम्, लोचनैः-नेत्रैः, कुवलयिताः-कुवलयेन नीलोत्पलेन युक्ताः कृताः, गवाक्षाः-वाता-यनानि यस्यां ताम्, अयोध्यां पुरम्-अयोध्यानगरीम्, अविशत्-प्रविष्टवान् । अत्र लोचनानां कुवलयेन साम्यविवक्षणात् श्यामता स्पष्टं प्रतीयते ॥

कृष्णता यथा—

"पादन्यासैः क्वणितरशनास्तत्र लीलावधूतै-
रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः ।
वेश्यास्त्वत्तो नखपदसुखान् प्राप्य वर्षाग्रबिन्दू-
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् ॥"

[ मे० दू० पू० मे० श्लो-३५ ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थः—यक्षो मेघायोजयिनीमार्गेण गन्तुमनुरुन्धन्, तस्या वर्णनप्रसङ्गे महाकालशिवस्य सायंकाले पूजासमये समागतानां नर्तकीचामरग्राहिणीनां वेश्यानां दर्शनस्य सौख्यं वर्णयति, तत्र–संध्याकाले, पादन्यासैः–चरणविक्षेपैर्नृत्याङ्गभूतैः, क्वणिताः–शब्दायमानाः, रशनाः–काञ्च्यो यासां ताः, लीलया–विलासेन, अवधूतैः–कम्पितैः, रत्नानां–कङ्कणमणीनां, छायया–कान्त्या, खचिताः–रूषिताः, वलयः–चामरदण्डा येषां तैः, "वलिश्चामरदण्डे च जरा–विश्लथचर्मणि" इति विश्वः। चामरैः–वालव्यजनैः, क्लान्तहस्ताः–शिथिलकराः, एतेन दैशिकं नृत्यं सूचितम्; तदुक्तं नृत्यसर्वस्वे-"खड्ग-कन्दुक-वस्त्रादिदण्डिका-चामरस्रजः। वीणां च धृत्वा यत् कुर्युर्नृत्यं तद् दैशिकं भवेत्॥" इति, वेश्याः–महाकालमुपेत्य नृत्यन्त्यो गणिकाः, त्वत्तः, नखपदेषु–सुरतसमयप्राप्तनखक्षतस्थानेषु, सुखान्–सुखकरान्, "सुखहेतौ सुखे सुखम्" इति शब्दार्णवः, वर्षस्य–वर्षणस्य,–अग्रबिन्दून्–प्रथमकणान्, तेषां सुखोष्णत्वात् क्षते सुखकरत्वम्, प्राप्य, त्वयि मधुकरश्रेणिवत्–भ्रमरपङ्क्तिवत्, दीर्घान्–आयतान्, कटाक्षान्, आमोक्ष्यन्ते–प्रेरयिष्यन्ति, "परैरुपकृताः सन्तः सद्यः प्रत्युपकुर्वते" इति भावः। कामिनीदर्शनीयत्वलक्षणं शिवोपासनाफलं सद्यो लप्स्यसे इति ध्वनिः। अत्र कटाक्षाणां मधुकरश्रेणिसाम्यप्रदर्शनेन कृष्णत्वमुक्तमेव॥

मिश्रवर्णना यथा—

"तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां,
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम्।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं,
पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानाम्॥"

[मे० दू० पू० मे० श्लो–४७]

अर्थः—यक्षो मेघमाह–तां–चर्मण्वतीम्, उत्तीर्य, भ्रुवो लता इव–भ्रूलताः, तासां विभ्रमाः–विलासाः, परिचिताः–अभ्यस्ताः कृता वा येषु तेषाम्, पक्ष्माणि–नेत्रलोमानि, "पक्ष्म सूत्रे च सूक्ष्मांशे किञ्जल्के नेत्रलोमनि" इति विश्वः, तेषाम्, उत्क्षेपात्–उन्नमनाद्धेतोः, कृष्णाश्च ताः शाराश्च कृष्णशारा नीलशबलाः, उपरि विलसन्त्यः कृष्णशाराः प्रभा येषां तेषाम्, कुन्दानि–माघ्यकुसुमानि तेषां क्षेपः–इतस्ततश्चालनं, तस्यानुगाः–अनुसारिणो ये मधुकराः–भ्रमरा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**बहुकालजन्मनोऽपि शिवचन्द्रमसो बालत्वं, कामस्य च मूर्तत्वममूर्तत्वं चेत्यादि ॥ १० ॥**

स्तेषां श्रियं मुष्णन्तीति तथोक्तास्तेषाम्, क्षिप्यमाणकुन्दानुसारिमधुकरकल्पानामिति भावः, दशपुरं–रन्तिदेवस्य नृपस्य नगरं, तस्य वध्वः–स्त्रियः, तासां नेत्रकौतूहलानां–नेत्राभिलाषाणां साभिलाषदृष्टीनामिति यावत्, आत्मबिम्बं–स्वमूर्तिम्, पात्रीकुर्वन्–विषयीकुर्वन्, व्रज–गच्छ । अत्र कृष्णशारप्रभाणामित्यनेन कृष्णताबहुला शबलता नेत्रेषूक्तेति ॥

एवं बहुकालजन्मनोऽपि अविदितविप्रकृष्टकालभवस्यापि, शिवचन्द्रमसः शिवशिरःशेखरस्थत्वेन प्रसिद्धशशिकलायाः, बालत्वम् अप्राप्तावस्थान्तरप्राथमिकावस्थावत्त्वं कविसमयसिद्धम्, यथा—

"मालायमानामरसिन्धुहंसः, कोटीरवल्लीकुसुमं भवस्य ।
दाक्षायणीविभ्रमदर्पणश्रि, बालेन्दुखण्डं भवतः पुनातु ॥"

[ का० मी० अ–१६ ]

अर्थः—मालायमाना–मालेवाचरिता या, अमरसिन्धुः–गङ्गा, तस्या हंसः, शिवशिरोमालाभूतायां गंगायां संचरणशीलहंससदृशम्, कोटीरः–जटा, "कोटीरस्तु जटा सटा" इति रभसः । सैव वल्ली–लता, तस्याः कुसुमं–पुष्पम्, तत्सदृशमित्यर्थः, दाक्षायण्याः–दक्षात्मजायाः सत्याः, विभ्रमाणां–मुखव्यापारादिचेष्टानां, दर्पणस्य–आदर्शस्य, श्रीरिव श्रीर्यस्य तत्, तत्कार्यकारित्वेन तद्वदुपचर्यमाणमिति भावः, भवस्य–शिवस्य, बालेन्दुखण्डं–नूतना शशिकला, भवतः–सभ्यान्, पुनातु–पवित्री करोतु । अत्र खण्डरूपस्येन्दोर्बालत्वं स्फुटमुक्तमेव ॥

कामस्य हि शिवनेत्रदाहात् पूर्वं मूर्तत्वं–शरीरित्वं, दाहान्तरं चामूर्तत्वमिति वस्तुस्थितिः, कविसमये तूभयमप्युपनिबध्यते । तत्र मूर्तत्वं यथा—

"अयं स भुवनत्रयप्रथितसंयमः शङ्करो,
बिभर्ति वपुषाऽधुना विरहकातरः कामिनीम् ।
अनेन किल निर्जिता वयमिति प्रियायाः करं,
करेण परिताडयञ्जयति जातहासः स्मरः ॥"

[ का० मी० अ–१६ ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थः—अयं-अग्रे दृश्यमानः, प्रथितः संयमः-बाह्याभ्यन्तरिन्द्रियनिग्रहो यस्य तादृशः, शंकरः-शिवः, सः, अधुना विरहकातरः-क्षणमपि प्रियाविरहमसहमानः सन्, वपुषा-स्वशरीरार्धेन कामिनीं-स्वप्रेयसीं पार्वतीम्, बिभर्ति-धारयति, अनेन वयं निर्जिताः-निर्जित्य दग्धाः, किल-प्रसिद्धिरेषा, इति कथयन्, करेण-स्वहस्तेन, प्रियायाः करं परिताडयन्-उभयकरघातेन तालिकां घटयन्, जातहासः-'अहो कीदृशोऽयं लोकप्रवादो यन्मद्वशे विद्यमानोऽपि शिवो मद्विजेतृत्वेनोद्घोष्यते' इति हेतोर्हसन्, स्मरः-कामः, जयति-सर्वातिशायित्वेन राजते। अत्र करेण करताडनस्योक्ततया हासवत्त्वेन च तस्य मूर्तत्वं निबद्धमिति स्पष्टम् ॥

तस्यैवामूर्तत्वमपि यथा—

"धनुर्माला मौर्वी क्वणदलिकुलं लक्ष्यमबला-
मनो भेद्यं, शब्दप्रभृतय इमे पञ्च विशिखाः ।
इयाञ्जेतुं यस्य त्रिभुवनमनङ्गस्य विषयः,
स वः कामः कामान् दिशतु दयितापाङ्गवसतिः ॥"

[ सुभाषितावली, घण्टकस्य ]

अर्थः—अनङ्गस्य-शरीररहितस्य यस्य, माला-पुष्पमाल्यम्, "माला तु पङ्क्तौ पुष्पादिदामनि" इति हैमः, धनुः-चापः, क्वणदलिकुलं-शब्दायमानभ्रमरसमूहः, मौर्वी-ज्या, भेद्यं-भेदनीयम्, अबलामनः, मनसोऽणुत्वेन प्रसिद्धेरत्र लक्ष्यस्य दुर्भेद्यत्वं ध्वन्यते, लक्ष्यं-वेधविषयः, इमे शब्दप्रभृतयः-शब्द-रूप-रस-गन्ध-स्पर्शाः, पञ्च-परिमितपञ्चसंख्याकाः, विशिखाः-बाणाः, त्रिभुवनं-त्रयो लोकाः, इयान् विषयः, जेतुं-विजयकर्मीकर्तुम्, ख्यातः, दयितानां-स्त्रीणाम्, अपाङ्गे-नेत्रकोणे, वसतिः-निवासो यस्य सः, स-प्रसिद्धः कामः, वः कामान्-अभिलषितप्रियसङ्गमादीन्, दिशतु-ददातु। अनङ्गः सन् आयुधादिना परमदुर्बलोऽपि दुर्लक्ष्यभेदनपूर्वकं त्रिभुवनविजयी काम इति, कवेराशयः। अत्रामूर्तत्वमनङ्गपदेन स्पष्टं प्रतिपादितम् ॥

इत्थं काव्येषु सिद्धवत्कृत्य प्रयुक्तः कवीनां समयो दिङ्मात्रेण निर्दिष्टः, विस्तरग्राहिभिः प्रबन्धान्तरेषु तदन्वेषणं कार्यं स्वयं वोहनीयमिति ध्वनयन्नाह-इत्यादीति-इति-पूर्वोक्तप्रकारकसदसन्निबन्धादिरादौ यस्य तदिति सामान्ये नपुंसकम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथाहि–साहित्यदर्पणे कविसमयख्यातानि इत्थं प्रदर्शितानि—

"मालिन्यं व्योम्नि पापे, यशसि धवलता वर्ण्यते हासकीर्त्त्योः,
रक्तौ च क्रोध-रागौ सरिदुदधिगतं पङ्कजेन्दीवरादि ।
तोयाधारेऽखिलेऽपि प्रसरति च मरालादिकः पक्षिसङ्घो,
ज्योत्स्ना पेया चकोरैर्जलधरसमये मानसं यान्ति हंसाः ॥
पादाघातादशोको विकसति बकुलो योषितामास्यमद्यै–
र्यूनामङ्गेषु हाराः स्फुटति च हृदयं विप्रयोगस्य तापैः ।
मौर्वी रोलम्बमाला धनुरथ विशिखाः कौसुमाः पुष्पकेतो–
र्भिन्नं स्यादस्य बाणैर्युवजनहृदयं स्त्रीकटाक्षेण तद्वत् ॥
अह्न्यम्भोजं निशायां विकसति कुमुदं चन्द्रिका शुक्लपक्षे,
मेघध्वानेषु नृत्यं भवति च शिखिनां नाप्यशोके फलं स्यात् ।
न स्याज्जाती वसन्ते न च कुसुमफले गन्धसारद्रुमाणा–
मित्याद्युन्नेयमन्यत् कविसमयगतं सत्कवीनां प्रबन्धे ॥" इति ।

अत्रोक्ता बहुशो विषया उदाहृता एव, अन्येऽपि यथादर्शनमुन्नेयाः, तत्र केचन प्रदर्श्यन्ते । अशोकस्य पादाघातेन विकासो यथा—

"असूत सद्यः कुसुमान्यशोकः स्कन्धात् प्रभृत्येव सपल्लवानि ।
पादेन नापैक्षत सुन्दरीणां सम्पर्कमाशिञ्जितनूपुरेण ॥"

[कु० संभव० ३।२६]

अर्थः—महादेवविजयप्रस्थितस्य मदनस्य साहाय्यं कर्तुं तत्प्रियसखो वसन्तः स्वसमृद्धिं स्वयमेव प्रकटीचकारेति प्रसङ्गे कुमारसंभवकाव्ये पद्यमिदम्, अशोकः स्कन्धात्–शाखाद्वयविभागस्थानात्, प्रभृत्येव–ततः प्रारभ्यैव, सद्यः–तत्कालमेव, सपल्लवानि–सकिसलयानि, कुसुमानि–पुष्पाणि, असूत–जनयामास, आशिञ्जिताः–कृतशब्दा नूपुरा यस्मिंस्तेन, सुन्दरीणां पादेन सम्पर्कं नापैक्षत, कोऽप्येष चमत्कारातिशयो यत् सुन्दरीपादाघातं विनैवाशोको विकसित इति । तथा च तद्विकासे तदपेक्षेति स्फुटं प्रतीयते ॥

जलधरसमये हंसानां मानसं प्रति गमनं यथा—

"कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां,
तच्छ्रुत्वा ते श्रवणसुखदं गर्जितं मानसोत्काः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आ कैलासाद् बिसकिसलयच्छेदपाथेयवन्तः,
सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥"

[ मे० दू० पू० मे० श्लो० ११ ]

अर्थः—यद् गर्जितं कर्तृ, महीं—पृथ्वीम् उच्छिलीन्ध्राम्—उद्गतकन्दलिकाम्, अत एव अवन्ध्यां—सफलाम्, कर्तुं प्रभवति "कन्दल्यां च शिलीन्ध्रा स्यात्" इति शब्दार्णवे, शिलीन्ध्राणां भाविसस्यसम्पत्तिसूचकत्वं च निमित्तनिदाने इत्थमुक्तम्—"कालाभ्रयोगादुदिताः शिलीन्ध्राः, सम्पन्नसस्यां कथयन्ति धात्रीम्" इति । श्रवणसुखदं—श्रुतिसुखजनकम्, ते—तव, गर्जितं—गर्जनशब्दम्, श्रुत्वा—समाकर्ण्य, मानसोत्काः—मानसे सरसि उत्कण्ठिता, कालान्तरे मानसस्य हिमदुष्टत्वात्, हिमस्य च हंसानां रोगहेतुत्वादन्यत्र गता हंसाः पुनर्वर्षासु मानसमेव गच्छन्तीति प्रसिद्धिः, बिसकिसलयानां—मृणालाग्राणां, छेदैः—शकलैः, पाथेयवन्तः पथिभोज्यद्रव्ययुक्ताः, मृणालकन्दलशकलसम्बलवन्त इति यावत्; राजहंसाः—हंसविशेषाः, "राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः" इत्यमरः, नभसि—व्योम्नि, भवतः—तव, सहायाः—सयात्राः, "सहायस्तु सयात्रः स्यात्" इति शब्दार्णवे, सम्पत्स्यन्ते—भविष्यन्ति । अत्र वर्षासु हंसानां मानसगमनं स्पष्टम् ॥

विप्रयोगस्य तापैर्हृदयस्फोटो यथा कादम्बरीविरहेण मुनिपुत्रस्य कपिञ्जलस्य कादम्बरीपूर्वार्धवर्णितः ॥

मेघध्वानेषु शिखिनां नृत्यं यथा—

"ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी,
पुत्रप्रेम्णा कुवलयदलप्रापिकर्णे करोति ।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं,
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः ॥"

[ मे० दू० पू० मे० श्लो० ४४ ]

अर्थः-मेघं प्रति यक्षः कथयति—ज्योतिषः—तेजसः, या लेखाः—राजयः, तासां वलयं—मण्डलं यस्यास्तीति तत् तथोक्तम्, गलितं—भ्रष्टं स्वतः पतितं, न तु लौल्यात् छिन्नमिति भावः, यस्य—मयूरस्य, बर्हं—पिच्छम्, भवानी—गौरी, पुत्रप्रेम्णा—पुत्रस्यायं वाहनीभूतो मयूर इति स्नेहेन, कुवलयस्य—नीलोत्पलस्य, दलं—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



काव्यस्य हेतुमुक्त्वा स्वरूपमाह—

## अदोषौ सगुणौ सालङ्कारौ च शब्दाऽर्थौ काव्यम् ॥ ११ ॥

पत्रं प्राप्नोति तच्छीलं तस्मिन्, नीलकमलपत्रपरिधानशीले इति भावः, कर्णे, करोति–धारयति, दलं परित्यज्य तत्स्थाने बर्हं धत्ते इति यावत्, हरशशिरुचा–शिवशिरश्चन्द्रकान्त्या, धौतापाङ्गं–स्वतोऽपि शौक्ल्यादतिधवलितनेत्रापाङ्गम्, पावकस्य–अग्नेरपत्यं पुमान्–पावकिः, तस्य स्कन्दस्य, तं–पूर्वोक्तं, मयूरं–शिखिनम्, पश्चात्–पूर्वोक्तसार्द्रपुष्पाभिषेचनानन्तरम्, अद्रेः–देवगिरेः कर्तुः, ग्रहणेन–गुहासङ्क्रमणेन, गुरुभिः–प्रतिध्वानमहद्भिरित्यर्थः, गर्जितैः–स्वकीयगर्जनशब्दैः, नर्तयेथाः–नर्तनं कारय, मार्दङ्गिकभावेन कुमारमुपास्स्वेति भावः । तथा चात्र मेघध्वानेन शिखिनो नृत्यं निबद्धमेवेति ॥

विशेषजिज्ञासुभिश्च महाकवीनां विततं निबन्धवृन्दं परिशीलनीयमिति ॥ १० ॥

काव्यकारणनिरूपणप्रसङ्गेन तदन्तःपातिशिक्षाया लक्षणं विस्तरेण विवेचयन् प्राप्तावसरं कविसमयं च प्रदर्श्य सम्प्रति काव्यलक्षणभूतं सूत्रं व्याचिख्यासुराह–**काव्यस्य हेतुमुक्त्वा स्वरूपमाहेति**–काव्यस्य–अनुपहसनीयत्वविशिष्टस्य कविकर्मभूतस्य, हेतुम्–उत्पत्तिकारणम्, उक्त्वा–"प्रतिभाऽस्य हेतुः"। [का० शा० १–४] इत्यादिसूत्रैः कथयित्वा, तस्यैव स्वरूपं–स्वं–काव्यात्मकं लक्ष्यं, रूप्यते–इतरभिन्नत्वेन रूपेण ज्ञाप्यतेऽनेनेति स्वरूपं लक्षणम्, आह–"अदोषौ सगुणौ" इत्यादिसूत्रेण कथयतीति भावः । अनेन सूत्रेण काव्यस्य लक्षणं प्रतिपादनीयम्, तत्र काव्यलक्षणे बहु विवदन्ते आलङ्कारिकाः । केचित् काव्यत्वं शब्दमात्रनिष्ठमाचक्षते, अपरे शब्दार्थोभयनिष्ठम्, तेषां मतानि च सूत्रव्याख्यान्ते विवेचयिष्यन्ते । स्वमते च शब्दार्थयोर्द्वयोरेव सहभावेन काव्यत्वमङ्गीकृतम्, आस्वादव्यञ्जकत्वस्योभयत्राऽपि सद्भावात्, 'काव्यं श्रुतम्, गीतं रचितम्, काव्यमवगतं–बुद्धम्' इत्यादिविश्वजनीनव्यवहारदर्शनेनानुपहसनीयकाव्यत्वरूपस्य लक्ष्यतावच्छेदकधर्मस्योभयत्राऽपि सत्त्वेन तथानिर्णयात् । तदाह–**अदोषौ सगुणौ सालङ्कारौ च शब्दाऽर्थौ काव्यमिति**–शब्दश्चार्थश्चानयोरितरेतरयोगः शब्दार्थौ, तौ काव्यं–काव्यशब्दप्रवृत्तिनिमित्तं, तथा च सर्वेषां शब्दानामर्थानां च काव्यत्वप्रसक्तौ लक्षणस्याव्यावर्तकतेति तद्दोषवारणाय 'अदोषौ' इत्यादि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विशेषणत्रयं शब्दाऽर्थयोरुपात्तम् । शब्दाऽर्थावित्यत्र च यद्यप्यर्थशब्दस्य स्वराद्यकारान्तत्वेन पूर्वनिपातो युक्तस्तथापि शब्दस्यार्थाश्रयतया प्राधान्येनाऽभ्यर्हितत्वात् पूर्वनिर्देशः, अर्थे लौकिकार्थक्रियाकारित्वरूपस्य प्राधान्येऽपि शास्त्रीयार्थक्रियाकारित्वस्य शब्दाधीनत्वेन तस्यैव प्राधान्यात्, श्रुतावपि हि "नामरूपे व्याकरवाणि" [छा० उप० १] इत्यादौ नामपदेन शब्दस्यैव पूर्वनिर्देशः, कविभिरपि "वागर्थाविव सम्पृक्तौ" [र० वं० स० १-श्लो० १] इत्यादौ शब्दस्यैव 'वाक्'पदेन पूर्वमुपादानम् । गुणसत्त्वापेक्षया दोषाभावस्यैवाधिकावश्यकत्वेन पूर्वमदोषाविति विशेषणमुपात्तम्, गुणेन हि प्राशस्त्यातिशयो विज्ञायते, दोषास्तु काव्यद्वारा कविमपि दूषयन्तीति तत्परित्यागः पूर्वमेवापेक्षित इति बुद्ध्या च; अदोषौ न विद्यते दोषो ययोरिति बहुव्रीहिः, काव्यत्वविघटका ये च्युतसंस्कारत्वादयोऽतिप्रबला दोषास्तैर्विरहितौ शब्दार्थौ काव्यलक्षणघटकत्वेन ग्राह्यौ ।

अत्रेदं विचार्यते–"अदोषौ" इत्यत्र नञर्थान्वयितया विवक्षितस्य दोषस्य सामान्याभावो विवक्षितो विशेषाभावो वा?, नाद्यः, एवं सति काव्यं निर्विषयं स्यात्, नहि सम्भवति प्रयत्नेनापि निर्मिते काव्ये दोषसामान्याभावः, अथ कश्चिन्महताऽवधानेन विमलया प्रतिभया च युक्तः कविकुलचूडामणिः पद्यमेकमल्पं वा कमपि प्रबन्धं तादृशं विरचयेदपि, तथाऽपि प्रविरलविषयता काव्यस्य स्यादेव, स्याच्च बहूनां महाकाव्यानामकाव्यतेति; न द्वितीयः, वस्तुतो दुष्टस्यापि काव्यस्य काव्यता स्वीकार्या स्यात्, नहि क्वचिदपि काव्ये सर्वेषां दोषाणां यौगपद्येन सत्ता सम्भवति, तथा च कस्यचिद् दोषस्याभावादेव दोषविशेषाभाववत्त्वं शब्दार्थयोरस्तीति तस्य काव्यत्वं को व्याहन्तुमीशः, एवं च दोषसत्ताहेतुकाऽकाव्योदाहरणमेव दुर्लभं स्यादित्युभयतः पाशायां रज्जौ दुर्लभोऽदोषाविति लक्षणघटकविशेषणस्य प्रवेश इति; अत्रोच्यते–प्रथमः पक्ष एव साधीयान्, न च सर्वथा निर्दोषस्यैकान्तमसम्भव इति वाच्यम्, पदमात्रस्य, एकस्य पद्यस्य, अन्यस्य निबन्धस्य वा तथाभूतस्य लाभे लक्षणस्य साफल्यात्, अत्र पक्षे पूर्वं प्रदर्शितः काव्यस्य प्रविरलविषयतादोषश्च भूषणमेव, अत एव चेदृशेऽपारे विचित्रकविपरम्परापरिपूरितेऽपि संसारे द्वित्रा एव महाकवयः स्तूयन्ते, तथा च निर्दोषशब्दार्थवत्त्वं काव्यलक्षणे देयमेवेति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्रापरे साहित्यदर्पणकारविश्वनाथकविपञ्चाननप्रभृतयो नवीनाः प्रत्यवतिष्ठन्ते यदि दोषरहितस्यैव काव्यत्वमिष्टं तर्ह्युदाह्रियमाणस्यास्य पद्यस्य काव्यत्वं न स्यात्, यथा—

"न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः,
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः।
धिग्धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा,
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः॥"

[ह० ना० अं० १४, श्लो० ६]

अर्थः—अयं श्लोको हनुमन्नाटके किञ्चिद्वैपरीत्येन पठितो दृश्यते, अत्रत्यं पूर्वार्द्धं तत्र परार्धत्वेन पठितम्, अलङ्कारग्रन्थेषु सर्वत्रायमेव [अत्रत्यः] पाठः समुपलभ्यते, किञ्च तत्र "स्वर्गग्रामटिकाविलुण्ठनपरैः पीनैः किमेभिर्भुजैः" इति पाठः, तथापि यथाऽत्र स्थितः पाठस्तथैव व्याख्यायते। मे-सर्वलोकविजयिनः परमप्रतापयुक्तस्य, यत्, अरयः—शत्रवोऽपि सन्ति, अयमेव न्यक्कारः-तिरस्कारः, निःसपत्नेन मया भवितव्यम्, तत्र नैकोऽरिः, किन्तु अरयः—बहवः शत्रवः। तत्राऽपि-तेष्वरिष्वपि, असौ-प्रख्यातः, तापसः-तपस्विवेषधरो रामः, कश्चित् समो वैरी भवेत् तदाऽपि कश्चिदाश्वासः, किन्तु राज्यभ्रष्टः सहायहीनस्तपस्विवेषधारी च, अयमपि परमो न्यक्कारः। सोऽपि अत्रैव-लङ्कामागत्य, न तु स्वोपरि आक्रममाणं, राक्षसकुलं—राक्षसानां वंशमेव, नन्वेकं कमपि राक्षसं, निहन्ति—न केवलमाक्रामति किन्तु मारयत्यपि। अहो! तथापि रावणो जीवति-प्राणान् धारयति महदाश्चर्यमिति भावः। शक्रजितम्-इन्द्रजेतारं मेघनादम्, धिक् धिक्-बहुशो धिक्काराः, प्रबोधितवता-बलान्निद्रातः समुत्थापितेन, कुम्भकर्णेन-मदनुजेन, किम्?-तेनापि न किमपि कृतमिति भावः। किञ्च, स्वर्गग्रामटिकायाः-स्वर्गरूपक्षुद्रग्रामस्य, विलुण्ठनेन-पुनः पुनः सर्वस्वहरणेन, वृथा-निष्प्रयोजनं यथा स्यात् तथा, उच्छूनैः-वृद्धिं गतैः पुष्टैः, एभिः-मदीयैः, विंशत्या भुजैः-बाहुभिः, किम्?-एभिरपि न किमपि स्वानुरूपः पराक्रमः प्रकटित इति भावः॥

अत्र हि विधेयाविमर्शो नाम दोषः, स च विधेयस्य-विषयस्य, अविमर्शः-तत्त्वेनाप्रतिपादनमेव, तच्चेह विद्यते, तथाहि—

"अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्।
नह्यलब्धाऽऽस्पदं किञ्चित् कुत्रचित् प्रतितिष्ठति॥"

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति वृद्धवचनेनानुवाद्य-विधेययोः पौर्वापर्यस्य नियमितत्वात्, अत्रारिमत्त्व-तत्तापसत्व-तत्कृतराक्षसकुलहननादीनामनुवाद्यानां पूर्वप्रयोगे न्यक्कारस्य च विधेयस्य परप्रयोगे कर्तव्ये तथा न कृतम्, अयमिति सर्वनाम्नाऽरिमत्त्वादिरेव परामृश्यते, तदेवाचानुवाद्यमुद्देश्यं वा, न्यक्काराद् विधेयात् पश्चान्निर्दिष्टम्, उद्देश्य-विधेययोर्लक्षणं चेत्थमुक्तं भट्टवार्तिके—

"यच्छब्दयोगः प्राथम्यं सिद्धत्वं चाप्यनूद्यता।
तच्छब्दयोग औत्तर्यं साध्यत्वं च विधेयता॥" इति।

तथा चानुवाद्यस्य पूर्वमुपन्यासो विधेयस्य पश्चादिति, इह तदकरणाद् विधेयाविमर्शो दोषो वाक्यगतः। अन्तिमचरणे च 'वृथोच्छूनैः' इत्यत्र पदगतोऽसौ दोषः, तथाहि—उच्छूनतया वृथात्वस्य तत्कालमात्रजातत्वाभिप्रायेण विधेयतां नेतुमुचितस्य तत्पुरुषसमासेन कविना गुणीभावं नीततया पूर्वसिद्धत्वप्रतिभासनादनुवाद्यत्वप्रतीतिर्भवतीति विधेयस्य प्राधान्येनाविमर्शः-अनिर्देश एवात्रेति स दोषोऽक्षत एव। एवं च द्विधा वाक्यपदोभयगतत्वेनात्र दोषसत्त्वादिदं काव्यं न स्यादिति। न च, न चेल्लक्षणयुक्तं माऽस्त्विदं काव्यमेतावता का नो हानिरिति वाच्यम्, महामान्यविद्वत्कविसम्प्रदायस्याकुलीभावप्रसङ्गात्, तथाहि–अस्य पद्यस्य ध्वनित्वेन उत्तमकाव्यता विद्वत्समाजे प्रथिता, ध्वनित्वं ह्यत्र प्रतिपदमेवावभासते, तथाहि—'अयमेव' इत्यन्ययोगव्यवच्छेदसूचकस्य एवकारस्य, 'मे' इति काकुपदस्य च, 'अरयः' इति बहुवचनस्य, 'अत्रैव' इति सर्वनाम्नः, 'निहन्ति, जीवती'त्याख्यातस्य, 'अहो' इत्यव्ययस्य, 'रावण' इति तत्तद्विशेषार्थान्तरसंक्रमितवाच्यस्य पदस्य, 'धिक् धिक्' इति द्विरुक्तेः, 'शक्रजितम्' इति ताच्छील्यविहितक्विप्प्रत्ययस्य, 'ग्रामटिका' इत्यनादरार्थविहितकरूपतद्धितप्रत्ययस्य, 'विलुण्ठन' इत्यत्रोपसर्गस्य, 'भुजैः' इति बहुवचनस्य च, तत्तदर्थव्यञ्जकत्वेनासंलक्ष्यक्रमो ध्वनिरत्र। 'अयमेव' इत्येवकारेण न्यक्कारसत्त्वेऽसन्दिग्धता, 'मे' इति काक्वा चात्मनोऽप्रतिभटता, 'अरयः' इति बहुवचनेन चारीणां बाहुल्यस्य नितान्तमसह्यता, 'तापस' इति पदेन शत्रुभावाचरणायोग्यता, 'अत्रैव' इत्यनेन समीपस्थस्यापि जीवतः शत्रोरत्यमृष्यता, 'निहन्ति' न तु केवलं वर्तत एवेति चाख्यतेन, 'राक्षसकुलम्' एव न तु द्वित्रान् राक्षसान्, 'जीवति' इत्याख्यातेन च मृते रावणे यद्भविष्यत् तद्भविष्यत्, जीवति सत्येवं भावो दुःसह एवेति जीवनस्य निन्द्यता च, 'अहो' इति निपातेनानुतापातिशयः, 'रावणः' इति पदम् 'इन्द्रा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिग्देवविजयी, कैलासोत्तोलकः स्वशिरसामपि छेदकः, आज्ञानुवर्तिसकललोकः, प्रथितपराक्रमशाली च' इत्याद्यर्थेषु सङ्क्रमितवाच्यम्, 'धिक् धिक्' इति द्वित्वेन द्वित्वेन निन्दाया अतिशयः, जयतेस्ताच्छील्यक्विपा च तादृशः स्वभावः, 'ग्रामटिका' इत्यनेन तस्यानायासलुण्ठनीयता, 'भुजैः' इति बहुवचनेन लोकातिगसंख्यता चासंलक्ष्यक्रमेण ध्वन्यते; समुदायेन च निर्वेदाख्यः संचारिभावः प्रतीयत इति ध्वनित्वेनास्योत्तमकाव्यता "इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः" [ का० प्र० प्र० उ० ] इति स्वीयलक्षणानुसारमेव स्वीकार्येति, तत्र काव्यलक्षणाघटनादव्याप्तिरिति । न चांशविशेषे सत्यपि दोषे तदतिरिक्तांशस्य निर्दुष्टतया तत्र काव्यलक्षणघटनान्नाव्याप्तिरिति वाच्यम्, यत एवं सति यत्रांशे दोषः सोऽकाव्यत्वप्रयोजकः, यत्र च ध्वनिः स उत्तमकाव्यत्वप्रयोजक इत्युभाभ्यामंशाभ्यामाकृष्यमाणमिदं काव्यमकाव्यं वेति निर्णेतुमशक्यं स्यात्, किञ्च दोषाणां दोषत्वं हि समुदायदूषकत्वेन, नहि काव्यस्य कञ्चिदंशं दूषयन्तः श्रुतिदुष्टत्वादयो दोषाः, किन्त्वविकलमेव काव्यम्, तथाहि–काव्यात्मभूतस्य रसस्यानपकर्षत्वे तेषां दोषत्वमपि नाङ्गीक्रियते, अन्यथा नित्यदोषानित्यदोषत्वव्यवस्थाऽपि न स्यात्, ये हि सर्वदा रसापकर्षकास्ते नित्यदोषाः, यथा च्युतसंस्कारत्वादयः, श्रुतिदुष्टत्वादयो हि कतिपयशृङ्गारादिरसमात्रापकर्षकत्वेनानित्यादोषा इति सर्ववादिसम्मतम्, एवं चांशविशेषेऽपि दोषसत्त्वे सर्वमेव काव्यं दुष्टं स्यादित्येकस्याप्यंशस्य निर्दोषकत्वेन काव्यत्वं न स्यादिति ।

न च,

"तत्सादृश्यमभावश्च, तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च, नञर्थाः षट् प्रकीर्तिताः ॥"

इत्युक्तदिशाऽनुदरा कन्येतिवदिह नञोऽल्पार्थकत्वमिति "ईषद्दोषौ शब्दार्थौ काव्यम्" इत्युक्तौ प्रोक्तपद्यस्य गुणसंख्ययाऽल्पदोषकत्वेन काव्यत्वं स्यादेवेति नोक्ताव्याप्तिदोष इति वाच्यम्, एवं च काव्यत्वाय दोषसत्त्वस्याप्यपेक्षितत्वेन निर्दोषयोः शब्दार्थयोः काव्यत्वं न स्यात्, सोऽयं वृद्धिमिच्छतो मूलस्यापि हानिरित्याभाणकविषयः, यदेकं संग्रहीतुं कृते प्रयत्ने शतं काव्यान्यकाव्यतामापद्यन्ते । न च "सति संभवे ईषद्दोषौ शब्दार्थौ काव्यम्" इति वाच्यम्, रत्नलक्षणे क्रियमाणे प्रखरप्रभादिगुणविशिष्टमहामूल्यशिलाखण्डमित्यादिरूपमेव स्वरूपलक्षणमुच्यते, न तु कीटानुवेधरहितत्वमपि, तस्य रत्नत्वविधानार्हत्वात्;

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कीटानुवेधो हि मूल्येऽल्पत्वमुपादेयतांशे तारतम्यं वा प्रयोजयति, न तु तस्य रत्नत्वं व्याहन्ति, तथैव काव्ये दोषाणां तदीयन्यूनकोटितामात्रप्रतीतिकरत्वाऽभ्युपगमात्, इत्यदोषाविति लक्षणे नैव वाच्यमित्याहुः।

अत्रोच्यते—दोषत्वं नाम–उद्देश्यप्रतीतिप्रतिबन्धकत्वम्, तच्च तद्वाच्यव्यङ्ग्य-वैचित्र्यप्रतीतिविरहविशिष्टदोषस्य तज्ज्ञानस्य वाऽङ्गीक्रियते प्रतीतिबलात्, इति "न्यक्कार" इति पद्ये विशिष्टाभावसंभवान्न काव्यत्वक्षतिः, तथाहि–तत्र व्यङ्ग्य-प्रतीतेः सत्त्वेन व्यङ्ग्यवैचित्र्यप्रतीतिविरहस्यासत्त्वान्न दोषत्वमिति काव्यत्वमक्ष-तमेव, यं प्रति न व्यङ्ग्यवैचित्र्यप्रतीतिस्तं प्रत्यस्याकाव्यत्वमेवेति, अत एव "वक्त्राद्यौचित्यवशाद् दोषोऽपि गुणः क्वचित्" इति [का० प्र० सू० ८१] इति सूत्रे लक्ष्यते; तथा, अप्रतीतत्वं तच्छास्त्रज्ञं प्रत्यदोषः, अन्यं प्रति तु दोष इति,

"कीटानुविद्धरत्नादि–साधारण्येन काव्यता।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः॥" [ ]

इत्यभियुक्तोक्तिबलेन नित्यदोषदुष्टस्यैवाकाव्यत्वमिति न काऽपि हानिः। अय-माशयः–दोषो द्विप्रकारकः–एक उत्कटो द्वितीयोऽनुत्कटः, प्रथमश्च्युतसंस्कारादिः, यः सर्वत्र दोष एव, द्वितीयो भग्नप्रक्रमादिः, यथा काये श्वित्रादिस्तथा प्रथमः, यथाऽनतिघनपक्ष्मलोचनत्वादिस्तथा द्वितीयः, प्रथमप्रकारेण दोषेण स्वरूपं निहन्यते, उत्कटतया सद्य एव रसापकर्षकत्वात्, द्वितीयेन तु बहुशः क्षोदे कृते केवलं प्रतीतिरपकृष्यते, चमत्कारजनकत्वं त्वव्याहतमेव तिष्ठति, तदेव च काव्य-जीवातुभूतम्। तथा च 'अदोषौ' इति लक्षणे प्रतिषेध्यदोषगणे प्रथमकोटिस्थि-तानामुत्कटानां दोषाणामेव ग्रहणमिति न कोऽपि दोष इति पटीयान् पन्थाः॥

निर्गुणेऽतिव्याप्तिवारकं विशेषणमाह—**सगुणा**विति–माधुर्यौजःप्रसादाख्या ये गुणास्तत्सहितावित्यर्थः, गुणानां रसैकनिष्ठानामपि परम्परया रसाभिव्यञ्जक-शब्दार्थनिष्ठत्वं बोध्यम्, तथा चोक्तं काव्यप्रकाशस्याष्टमोल्लासे–"गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता।" इति, गुणस्य रसनिष्ठत्वेऽपि तद्व्यञ्जकपरं गुणपदमिति प्रदीपकार आह; तद्व्यञ्जकेत्यनेन

"मूर्ध्नि वर्गान्त्यगाः स्पर्शाः, अटवर्गौ र-णौ लघू।
अवृत्तिरल्पवृत्तिर्वा माधुर्ये घटना तथा॥"

[का० प्र० उ० ८ का० ७४]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्यादिना काव्यप्रकाशे "तत्र निजान्त्याक्रान्ता अटवर्गा वर्गा ह्रस्वान्तरितौ र-णावसमासो मृदुरचना च" [अ० १, सू० ४] इत्यादिना काव्यानुशासने च वक्ष्यमाणं वर्णघटनादि गृह्यते, तेन नीरसेऽव्याप्तिरपि नेति बोध्यम्। एतेन "गुणानां रसनिष्ठत्वेन सगुणावित्यस्य शब्दार्थविशेषणत्वमप्यनुपपन्नम्, न च शब्दार्थयोः साक्षाद्गुणवत्त्वाभावेऽपि स्वाश्रयरसाभिव्यञ्जकत्वरूपपरम्परासम्बन्धेन गुणवत्त्वादुपपद्यते सगुणत्वमित्यपि वाच्यम्, एतादृशपरम्परासम्बन्धेन तदाश्रयता—[गुणाश्रयता] कल्पनापेक्षया सरसावित्यस्यैव वक्तुमौचित्यात्, गुणवत्त्वान्यथानुपपत्तिलभ्यतया तथा नोच्यत इत्यपि न युक्तम्, प्राणिमन्तो देशा इति वक्तव्ये शौर्यादिमन्तो देशा इतिवदेवंकथनस्यानादर्तव्यत्वात्, गुणाभिव्यञ्जकौ शब्दार्थौ काव्ये प्रयोज्याविति सूचनाय सगुणाविति विशेषणोपादानमित्यपि न वक्तव्यम्, तयोः काव्यस्वरूपसम्पादनसामग्रीबहिर्भावात्, तौ हि उत्कर्षसम्पादकाविति तादृशवस्तुनः स्वरूपघटकतया प्रवेशानौचित्यात्" इति परास्तम्, मधुरः शब्दो मधुरोऽर्थ इति सर्वतः प्रचलितस्य व्यवहारस्य दुरपह्नवतया, स्वव्यञ्जकतादिसम्बन्धेन लक्षणया गुणगणस्य शब्दार्थयोर्वृत्तौ बाधकाभावात्; तथा चोक्तं प्रदीपे-"अयं च [गुणः] सर्वेषु रसेष्वाधेयतया सर्वासु च रचनासु व्यङ्ग्यतया स्थितः" इति, एवं च व्यञ्जकत्वसम्बन्धेन गुणवत्त्वं रचनानतिरिक्तस्य शब्दस्य तत्तादात्म्यापन्नस्य चार्थस्य सम्यगुपपन्नमेव॥

सालङ्काराविति—वाच्यवाचकसमाश्रया ये उपमाऽनुप्रासादयोऽलङ्कारास्तत्सहितौ शब्दार्थौ, इत्यर्थः। अत्र पण्डितराजजगन्नाथेनेत्थमुक्तं रसगङ्गाधरे—"लक्षणे गुणालङ्कारादिनिवेशो न युक्तः, "उदितं मण्डलं विधोः" इति काव्ये दूत्यभिसारिका-विरहिण्यादिसमुदीरिते क्रमेणाभिसरणविधि-निषेध-जीवनाभावादिपरे, 'गतोऽस्तमर्कः' इत्यादौ चाव्याप्त्यापत्तेः। न चेदमकाव्यमिति वदितुं शक्यम्, काव्यतया पराभिमतस्यापि तथा वक्तुं शक्यत्वात्, काव्यजीवितं चमत्कारित्वं चाविशिष्टमेव, गुणत्वाऽलङ्कारत्वादेरननुगमाच्च, दुष्टं काव्यमिति व्यवहारस्य बाधकं विना लाक्षणिकत्वायोगाच्च; न च 'संयोगाभाववान् वृक्षः कपिसंयोगी'इतिवदंशभेदेन दोषरहितं दुष्टमिति व्यवहारे बाधकं नास्तीति वाच्यम्, 'मूले महीरुहो विहङ्गमसंयोगी न शाखायाम्' इति प्रतीतेरिवेदं पद्यं पूर्वार्धे काव्यमुत्तरार्धे तु न काव्यमिति स्वरसभाविनो विश्वजनीनानुभवस्य विरहादव्याप्यवृत्तिताया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपि तस्यायोगात्, शौर्यादिवदात्मधर्माणां गुणानां हारादिवदुपस्कारकाणामलङ्काराणां च शरीरघटकत्वानुपपत्तेश्च" इति ।

अस्यायमाशयः—काव्यलक्षणे गुणा-ऽलङ्कार-दोषाभावानां निवेशो नोचितः, गुणा हि माधुर्यादयः, ते च रचनाविशेषसम्बद्धाः, अलङ्कारा अपि तथैव, एवं च निर्गुणे निरलङ्कारे च "उदितं मण्डलं विधोः" "गतोऽस्तमर्कः" इति वाक्ययोर्दूत्यभिसारिकादिप्रोच्चारितयोर्वक्तृबोद्धव्यादिविशेषसहकारेण विभिन्नविलक्षणार्थप्रतिपादकतयाऽतिचमत्कारकारिणोरवश्यं काव्यत्वेन स्वीकार्ययोरव्याप्त्यापत्तेः; अनयोरस्मन्मते न काव्यत्वमिति तु न वाच्यम्, सत्यपि चमत्कारकारित्वरूपातिशयेऽनयोः काव्यत्वास्वीकारे भवदभिमतकाव्यस्याप्यकाव्यत्वेन वक्तुं शक्यत्वात्, गुणत्वाऽलङ्कारत्वादीनामनुगतरूपेण लक्षणस्य दुर्निरूपतया च स्वयमनुगमरहितयोस्तयोः काव्यलक्षणप्रवेशे तल्लक्षणस्याप्यननुगतत्वापत्तेः, किञ्च गुणा न शरीरधर्माः किन्त्वात्मनः, शब्दार्थौ च काव्यस्य शरीरम्, इति न तद्गुणत्वं गुणानाम्, अलङ्कारा अपि न शरीरघटका अपि तु शरीरभूषका इति न तेषामपि स्वरूपे निवेशो युक्तः, दोषाभावोऽपि न लक्षणे निवेश्यः, दुष्टं काव्यमिति व्यवहारस्य निरालम्बनत्वप्रसङ्गात्; न च यथा संयोगस्याव्याप्यवृत्तितया स्वाभावेन सहैकस्मिन्नधिकरणे तस्य वृत्तिः स्वीक्रियते, तथा च 'संयोगाभाववान् वृक्षः संयोगी' इति यथा व्यवह्रियते तथा दोषस्याप्यव्याप्यवृत्तितया स्वीकारात् काव्यं [ दोषरहितं ] दुष्टमिति व्यवहारः किं न स्यादिति वाच्यम्, 'मूले वृक्षः कपिसंयोगी न शाखायाम्' इत्यादिप्रतीत्या संयोगस्याव्याप्यवृत्तित्वोपगमेऽपि 'इदं पद्यं पूर्वार्धे काव्यं, न परार्धे' इतीदृश्याः प्रतीतेरभावाद् दोषाणामव्याप्यवृत्तित्वे मानाभावात्, इति ।

अत्र ब्रूमहे—यदुक्तम् 'उदितं मण्डलं विधोः, गतोऽस्तमर्कः' इत्यादिनिर्गुणनिरलङ्काराणां काव्यत्वं न स्यात्' इति, तन्न– 'लोकोत्तरं कविकर्म काव्यम्" इत्युक्ततया लोकोत्तरत्वविशिष्टस्य काव्यलक्षणकरणे तत्र गुणालङ्कारयोः प्रवेशे प्रोक्तेषु तल्लक्षणागमनेऽपि क्षत्यभावात् । अयमाशयः–'लोकोत्तरचमत्कारविशिष्टौ शब्दार्थौ काव्यम्' इत्येतावदेव हि सामान्यतो लक्षणमभीष्टम्, गुणाऽलङ्कारौ तु विशेषकतया निर्दिष्टौ, उपपादितं चैतद् गङ्गाधरशास्त्रिणा स्वकीयरसगङ्गाधरटिप्पण्याम् । किञ्च, अलङ्काराणां नैयत्यमपि नास्माकमभिमतमित्यपि चकारेण सूच्यत इत्युपवर्णयिष्यत एव । यच्चोक्तं 'गुणत्वालङ्कारत्वादेरननुगमाच्च' इति,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदपि न-'काव्यधर्मत्वं, रसधर्मत्वं वा गुणत्वम्, काव्यशोभाधायकत्वमलङ्कारत्वम्' इत्यादिरूपेणानुगमसंभवात् । यच्चोक्तम्-'शौर्यादिवदात्मधर्माणाम्' इति, तदपि 'स्वव्यञ्जकतासम्बन्धेन काव्यात्मभूतरसधर्माणां शब्दार्थयोः स्वीकारः' इत्यादिरूपेण प्रत्युक्तमेव । यदपि च 'दोषाभावस्य लक्षणकुक्षिप्रवेशे दुष्टं काव्यमिति व्यवहारानुपपत्तिः' इत्युक्तं, तदपि न-नित्यदोषाणामेवेह दोषपदेनोपादानमित्यादिरीत्या खण्डितत्वात् । तथा च दोषस्याव्याप्यवृत्तितादिशङ्कासमाधानादेरवसर एव नेत्यास्तां तावत् ॥

शब्दार्थौ इति—शब्दश्चार्थश्चेतीतरेतरयोगद्वन्द्वेन काव्यत्वं तदुभयत्र व्यासज्य वर्तत इति फलति, व्यासज्यवृत्तित्वं च पर्याप्तिसम्बन्धेन वृत्तित्वम्, आस्वादव्यञ्जकत्वस्य लोकोत्तरचमत्कारकारणत्वस्य वा उभयत्र सत्त्वात्, अनुपहसनीयकाव्यत्वं हि लक्ष्यतावच्छेदकम्, तद्धि उभयत्रैव वर्तते । 'काव्यं पठितं श्रुतं गीतं रचितम्' इति व्यवहारेण शब्दे 'काव्यं बुद्धम्' इति व्यवहारेण चार्थे काव्यत्वस्य प्रतीतेरुभयत्रापि तत्त्वं स्वीकार्यमेव ।

यत्तु रसगङ्गाधरे 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति स्वकीयं लक्षणं व्यवस्थापयितुं "यत्तु प्राञ्चः शब्दार्थौ काव्यमित्याहुस्तत्र विचार्यते—शब्दार्थयुगलं न काव्यशब्दवाच्यं मानाभावात्, 'काव्यमुच्चैः पठ्यते, काव्यादर्थोऽवगम्यते, काव्यं श्रुतमर्थो न ज्ञातः' इत्यादिविश्वजनीनव्यवहारतः, प्रत्युत शब्दविशेषस्यैव काव्यपदार्थत्वप्रतिपत्तेश्च, व्यवहारः शब्दमात्रे लक्षणयोपपादनीयः, यथा ग्रामैकदेशे दग्धे ग्रामो दग्ध इति व्यवहारस्तद्वदिति चेत्? स्यादप्येवम्, यदि काव्यपदार्थतया पराभिमते शब्दार्थयुगले काव्यशब्दशक्तेः प्रमापकं दृढतरं किमपि प्रमाणं स्यात्, तदेव तु न पश्यामः, विमतवाक्यं त्वश्रद्धेयमेव । इत्थं चासति काव्यशब्दस्य शब्दार्थयुगलशक्तिग्राहके प्रमाणे प्रागुक्ताद् व्यवहारतः शब्दविशेषे सिध्यन्तीं शक्तिं को नाम निवारयितुमीष्टे? । एषैव वेदपुराणादिलक्षणेष्वपि गतिः, अन्यथा तत्रापीयं दुरवस्था स्यात् । यत्तु-'आस्वादे बोधकत्वमेव काव्यत्वप्रयोजकम्, तच्च शब्दे चार्थे चाविशिष्टम्' इत्याहुः, तन्न-रागस्यापि रसव्यञ्जकतया ध्वनिकारादिसकलालङ्कारिकसम्मतत्वेन प्रकृते लक्षणीयत्वापत्तेः ।······अपि च काव्यपदप्रवृत्तिनिमित्तं शब्दार्थयोर्व्यासक्तम्? प्रत्येकपर्याप्तं वा?, नाद्यः, एको न द्वाविति व्यवहारस्येव श्लोकवाक्यं न काव्यमिति व्यवहारस्यापत्तेः, न

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्वितीयः, एकस्मिन् पद्ये काव्यद्वयव्यवहारापत्तेः। तस्माद् वेद-शास्त्र-पुराण-लक्षणस्येव काव्यलक्षणस्यापि शब्दनिष्ठतैवोचिता" इति प्रतिपादितम्।

तदपरे न क्षमन्ते-'काव्यं पठ्यते' इतिवत् 'काव्यं बुध्यते' इति व्यवहारस्यापि दृष्टत्वेन व्यवहारतः शब्दविशेषस्यैव काव्यत्वप्रतिपत्तिः, इति प्रत्युक्तम्, प्रदर्शितोभयव्यवहारेणोभयत्र शक्तेः प्रमितत्वेन शब्दमात्रे काव्यत्वव्यवहारे लक्षणाया अव्याहतत्वमेव। यदपि 'वेदपुराणादिशब्दानामपि शब्दमात्रपरत्वम्' इत्युक्तं, तदपि न-वेदत्वादेः शब्दार्थोभयवृत्तित्वस्य "तदधीते तद्वेद" [पा० ४. २. ५९] इति सूत्रस्थमहाभाष्ये सिद्धान्तितत्वात्, 'तथाहि-तत्रत्यं महाभाष्यम्-"तदधीते तद्वेद" किमर्थमिमावुभावप्यर्थौ निर्दिश्येते?, न योऽधीते वेत्त्यप्यसौ?, यश्च वेदाधीतेऽप्यसौ, नैतयोरावश्यकः समावेशः, भवति हि कश्चित् संपाठं पठति, न वेत्ति। तथा कश्चिद्वेत्ति न संपाठं पठति" इति; अत्र कैयटः-['न य' इति प्रतीकमुपादाय] यो हि यं ग्रन्थमधीते स तं स्वरूपतोऽवश्यं वेत्ति, यश्च स्वरूपतो वेत्ति सोऽवश्यमधीते इति भावः। [नैतयोरिति प्रतीकमुपादाय] अर्थावबोधो वेदनमभिप्रेतं न तु स्वरूपमात्रवेदनम्' इति। अयमाशयः-सूत्रे 'अधीते वेद' इत्युभयोर्ग्रहणं नावश्यकम्, पठनक्रियाकर्तुर्वेदनावश्यकत्वादिति शङ्का। कश्चिदर्थहीनं पठति, तस्य स्वरूपतो ज्ञानस्य सत्त्वेऽपि अर्थतो ज्ञानं नास्ति, तत्र प्रत्ययसिद्ध्येऽधीत इति, यश्च वेत्ति-अर्थतोऽवगच्छति परं न पठति, तत्र प्रत्ययसिद्ध्ये वेत्तीति स्थलभेदेन द्वयोर्ग्रहणमावश्यकमित्युत्तरम्। तथा च शब्दार्थयोरुभयोरपि वेदादिशब्दप्रतिपाद्यत्वमित्यायातम्। तथा च दृष्टान्तेन काव्यत्वस्य शब्दमात्रवृत्तित्वस्थापनं विरुद्धम्। यत्तु-'आस्वादोद्बोधकत्वमात्रेण शब्दार्थयोः काव्यशरीरे प्रवेशश्चेत्? रागादेरपि तथात्वेन तेषामपि तत्र प्रवेश आवश्यकः स्यात्' इति, तदपि न-न वयमास्वादोद्बोधकमात्रेण शब्दार्थयोः काव्यत्वमभिप्रेमो येन तदुद्बोधकानामन्येषामपि तत्र प्रवेशः स्यात्, किन्त्वास्वादोद्बोधकत्वं काव्यशरीरगतयोः शब्दार्थयोरभिप्रेमः। अयमाशयः-शब्दार्थयोरुभयोः काव्यशरीरत्वम्, तत्र शब्दस्येवार्थस्याऽप्यास्वादोद्बोधनव्यापार इत्येवास्मन्मतमिति। यदपि-'काव्यत्वमुभयोः व्यासक्तमिति पक्षे श्लोकवाक्यं न काव्यम्' इति दोषः प्रदत्तः, तदपि न-लक्षणयाऽन्यतरस्मिन्नपि व्यवहारसम्भवात्तस्य दोषस्याप्राप्तेः। तथा च शब्देऽर्थे च काव्यत्वं सुस्थमिति।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यच्च केचित्—'कविकर्म काव्यम्' इति समाख्यानुरोधात् शब्दमात्रस्य काव्यत्वम्, अर्थस्य तु कविकृत्यजन्यतया न तत्त्वम्, तस्मादास्वादजीवातुः शब्दः काव्यमिति काव्यं निर्ब्रुवते, तन्न–आस्वादजीवातुत्वस्योभयत्र सामान्यतया वर्तनात्, वैयाकरणानां मते शब्दस्यापि कविकृत्यजन्यतया तत्र काव्यपदस्योक्त-समाख्यासमन्वयाय यदि कश्चिदुपायोऽवलम्बनीयस्तर्हि अर्थविषयेऽपि तस्या-वलम्बनमेव युक्तमिति न कश्चिद् विशेषस्तयोः, अर्थेऽप्यास्वादोद्बोधकतासत्त्वं दृश्यकाव्यस्येवार्थस्यापि काव्यत्वं प्रमापयत्येव। यदि च शब्दमात्रे कविकर्म-विषयत्वाग्रहस्तर्हि अर्थस्य कविकर्मविषयभूतशब्दप्रकाशनीयतया शब्दद्वाराऽर्थेऽपि कविकर्मविषयत्वमिति स्वीकृत्य समाख्या[कविकर्म काव्यमिति योग]विरोधः परिहरणीयः, शब्दमात्रे क्वचित् काव्यत्वव्यवहारश्च–अग्रमात्रे हस्ते हस्तत्वव्यव-हारादिवदुपचारादिति। किञ्च, शब्दमात्रस्य काव्यत्वं नितरामक्षोदक्षमम्, तथा सति हि काव्यस्य शरीरत्वेन शब्दमात्रमास्थेयम्, एवञ्चार्थस्य काव्यबहिर्भूतत्वे-नार्थालङ्कारा अर्थदोषाश्च दत्तजलाञ्जलयः स्युः, तथाहि–"अङ्गाश्रिता अलङ्काराः" [का० शा. १. १४] इत्युक्त्याऽर्थालङ्काराणामुपमादीनामाश्रयस्यार्थस्य काव्याङ्ग-तास्वीकाराभावेन तदलङ्कारतानापत्तेः, एवं दोषस्थलेऽप्यर्थगतदोषाणां काव्यदोष-त्वानापत्तेः, तथा च तन्निरूपणादिप्रयासः सकलालङ्कारिकव्यवहारसिद्धौ वैफल्य-मियात्, शब्दमात्रस्य काव्यत्वे हि तन्मात्रगतानामलङ्कारदोषादीनां निरूपण-मुपादान-परिहारौ च वक्तव्यावित्यर्थगतालङ्कारदोषादीनामुपादान-परिहाराद्य-भिधानमुन्मत्तप्रलापान्नातिरिच्यते, न चार्थस्य रसोपयोगितयाऽर्थगतानामपि तेषां निरूपणं नासङ्गतमिति वाच्यम्, काव्याङ्गनिरूपणे प्रक्रान्ते तेषां निरूपणस्या-प्राकरणिकत्वापातात्। इत्थं व्याख्यातमात्मीयं काव्यलक्षणम्।

अत्र प्राचामाचार्याणां नव्यानां च काव्यलक्षणविषये मतभेदो दिङ्मात्रं प्रद-र्श्यते, तथा हि–काव्यलक्षणकृतां बहुत्वेऽपि मुख्यतया तत्र द्वैविध्यं दृश्यते–केचन शब्दार्थोभयस्य काव्यताशंसिनः, केचन केवलस्य शब्दस्य; तत्र प्रथमं शब्दमात्रस्य काव्यत्वे—

[१] "संक्षेपाद्वाक्यमिष्टार्थव्यवच्छिन्ना पदावली काव्यम्" इत्यग्निपुराणम्, अत्र काव्यमिति लक्ष्यनिर्देशः, इष्टार्थप्रतिपादनपरायणशब्दसमुदयः काव्यमिति लक्षणं फलति, तत्र संक्षेपादिति कथनेन कस्यचिदनावश्यकस्याधिकस्याक्षरस्य पदस्य वा स्थितिरपोहिता। एवम्—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ २ ] "शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली" इति काव्यादर्शे [ १.१० ] दण्डी, तावदिति वाक्यालङ्कारे, इष्टाः-सरसमनोहरतया वर्णयितुमभिलषिता येऽर्थाः-कविप्रतिभोल्लासविषयीभूताः सुन्दराः पदार्थाः, तैः, विशेषेण अवच्छिन्ना-परिपूर्णा, चमत्कृतिविशेषबहुलेत्यर्थः, पदावली-पदसमूहः, शरीरं-काव्यशरीरम्। पूर्वलक्षणसमानमेवैतल्लक्षणमपि।

[ ३ ] पीयूषवर्षजयदेवस्तु "निर्दोषा लक्षणवती सरीतिर्गुणभूषिता। सालङ्काररसानेकवृत्तिर्वाक्काव्यनामभाक्॥" [ चन्द्रा० म.१. श्लो. ७ ], अनेन दोषरहिता गद्यपद्यादिलक्षणलक्षिता रीति-गुणाऽलङ्कार-रस-सहिता, अनेकवृत्तियुक्ता वाक् काव्यमित्यभिहितं भवति।

[ ४ ] अतिप्राचीनः शौद्धोदनिराचार्यः "काव्यं रसादिमद् वाक्यं, श्रुतं सुखविशेषकृत्" इति वदन् रसादियुक्तवाक्यरूपशब्दमात्रे काव्यत्वं मनुते।

[ ५ ] केशवमिश्रेणापि पूर्वमतवत् "रसाऽलङ्कारान्यतरशालिवाक्यत्वं काव्यत्वम्" इत्यभिहितम्, पूर्वलक्षणस्थादिपदेनालङ्कारः परिगृहीतोऽनेन।

[ ६ ] "वाक्यं रसात्मकं काव्यम्" इति विश्वनाथकविपञ्चाननः। [ सा. द. प्र. प. १ ] रसः स्वात्मा-साररूपत्वेन जीवनाधायको यत्र तादृशं वाक्यं-सन्दर्भविशेषः काव्यमिति तदाशयः।

[ ७ ] "ध्वन्यात्मकं वाक्यं काव्यम्" इति महिमभट्टः।

[ ८ ] "रमणीयार्थप्रतिपादकः शब्दः काव्यम्" इति पण्डितराजजगन्नाथः [ रसगं० प्र० आ० १ ] रमणीयस्य-लोकोत्तरचमत्कारकारिणोऽर्थस्य, प्रतिपादकः-बोधकः, शब्दः काव्यमिति, रमणीयार्थप्रतिपादकत्वं च कटाक्षादावपीति तद्वारणाय शब्दः इति विशेष्यनिर्देशः, रमणीयलक्ष्यव्यङ्ग्यार्थयोरपि संग्रहाय वाचक इत्यनुक्त्वा प्रतिपादक इत्युक्तम्, 'रमणीय'शब्दप्रतिपादके व्याकरणादिशास्त्रेऽतिव्याप्तिवारणाय अर्थेति, घटमानयेत्यादिवाक्येऽतिव्याप्तिवारणाय रमणीयेति। न च रमणीयत्वस्याननुगतत्वात् तत्रापि[ घटमानयेति वाक्ये ]तन्नास्तीति कथमवगम्यतामिति चेत्? न-रमणीयताऽत्रलोकोत्तराह्लादजनकज्ञानगोचरता, लोकोत्तरो य आह्लादः-आनन्दस्तज्जनकं यज्ज्ञानं[ भावना ]तद्गोचरता-तद्विषयीभूतता।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ननु लोकोत्तरत्वस्याप्यननुगतत्वेन, घटमानयेति वाक्ये तन्नास्तीति कथं प्रतीयेतेति चेत्? न–लोकोत्तरत्वमाह्लादगतश्चमत्कारत्वापरपर्यायोऽनुभवसाक्षिको जातिविशेष इत्यनुगमसम्भवात्, अनुभवश्च सहृदयानामेवेति न दोषः। इत्थं च चमत्कार-जनकभावविषयार्थप्रतिपादकशब्दत्वं काव्यत्वमिति फलितम्। इत्थं संक्षेपेण शब्दमात्रस्य काव्यत्ववादिनां मतानि।

अथ शब्दार्थोभयस्य काव्यत्ववादिनश्चैते—

[ १ ] "शब्दार्थौ सहितौ काव्यम्" इति भामहः। [ भामहालं. १,१६ ]

[ २ ] शब्दार्थौ काव्यम्" इति रुद्रटः। [ रुद्रटालं. २.१. ]

अनेन शब्दस्येवार्थस्यापि कविकर्तृका विलक्षणानन्ददायिनी सृष्टिरित्युक्तम्।

[ ३ ] गुणाऽलङ्कारसहितौ शब्दार्थौ दोषवर्जितौ काव्यम्" इति प्रतापरुद्रीये।

[ ४ ] "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि" इति मम्मटः [ का० प्र० १.४. ]

[ ५ ] "काव्यं शब्दार्थवैचित्र्ययोगः सहृदयप्रियः।
यस्मिन्नदोषत्व-गुणालङ्कृति-ध्वनयः स्थिताः॥"
इति नरेन्द्रप्रभसूरिः [ अलङ्कारमहो० १.१२ ]

सहृदयप्रियशब्दवैचित्र्यार्थवैचित्र्ययोगस्य दोषाभाव-गुणालङ्कारध्वनिसहितस्य काव्यत्वमित्यर्थः॥

[ ६ ] "साधुशब्दार्थसन्दर्भं गुणाऽलङ्कारभूषितम्।
स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये॥"

इति वाग्भटः [ वाग्भटालं० १,२. ] साधुः–दोषरहितः, शब्दार्थयोः सन्दर्भः-ग्रन्थनं यत्र तत्, गुणैरलङ्कारैश्च भूषितम्, स्फुटा-स्पष्टा रीतिर्यस्मिंस्तत्, रसेन युक्तं च काव्यं कीर्तये कुर्वीतेति। अत्र काव्यस्य स्वरूपफले सहैवोक्ते।

[ ७ ] "शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि।"

इति वक्रोक्तिजीवितकारः। वक्रव्यापारयुक्ते सहृदयाह्लादकारिणि बन्धे व्यवस्थितौ शब्दार्थौ सहितौ काव्यमिति तदर्थः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**चकारो निरलङ्कारयोरपि शब्दार्थयोः क्वचित् काव्यत्वख्यापनार्थः।**

[ ८ ] "शब्दार्थयोर्यथावत् सहभावेन विद्या साहित्यविद्या" इति राजशेखरः, [ का० मी० अ० ३. ]

[ ९ ] "अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम्" इत्याचार्यहेमचन्द्रसूरिः। [ का० शा० प्र० अ० सू० ११ ]

एवं निरूपितानि स्वरूपत उभयत्र काव्यत्वस्य पक्षपातिनामपि लक्षणानि। एषां युक्ताऽयुक्तत्वविचारस्तत्तत्पदनिवेशप्रयोजनादिविचारपूर्वक इह कर्तुमशक्यः। काव्यविषये आत्मत्वेन येन यद् वस्तु निरूपितं, तेन तत्स्थितिस्तत्र लक्षणे सन्निवेशिता। तत्रायं निष्कर्षः—यत्र कुत्रापि लक्षणे रसः, रीतिः, वृत्तिः, लक्षणम्, औचित्यम्, वक्रता, गुणाः, अलङ्काराः, इत्यादयो येऽर्था विवक्षितास्ते चमत्कारजनकतयैव काव्यलक्षणे समावेशिताः, तत्रापि चमत्कारजनने केचिदर्थविशिष्टं शब्दं व्यापारयन्ति, केचित् शब्दार्थौ, केचित् पुनः शब्दमात्रम्, अर्थमात्रं त्ववलम्ब्य चमत्कारस्य समर्पणं नोपपद्यते, अर्थस्य शब्दोपस्थापनानियमात्। एवमेव केवलैरर्थैश्चमत्कारस्य जननं तु न कस्यापि काव्यतयाऽभिमतमिति सहृदयानां न परोक्षम्। तथा च शब्दव्यापारोऽवश्यमपेक्षणीयः, शब्दमात्रस्य च काव्यता यथा न युक्ता तथोपपादितमेवाधस्तादर्थविषयकदोषादीनामनिरूपणताप्रसङ्गादिदोषैः। तथा च शब्दार्थौ सहितावेव काव्यम्, एतन्मूलकमेव च काव्यप्रबन्धानां सहितस्य भावः साहित्यमिति समाख्येत्यलं विस्तरैः।

एतावता 'निर्दोषयोः सगुणयोः सालङ्कारयोः शब्दार्थयोः काव्यत्वम्' इति निर्णीतम्, एवं च निरलङ्कारयोस्तयोः काव्यत्वं न स्यात्, विशेषणाभावप्रयुक्तविशिष्टाभावेन लक्षणासंघटनात्, इति मनसि निधायाह—**चकारो निरलङ्कारयोरपीति**-तथा चान्वाचयवाची चकार इति भावः, निरलङ्कारत्वं च स्फुटालङ्काराऽस्फुटालङ्कारोभयशून्यत्वम्, तादृशयोरपि शब्दार्थयोः क्वचित् सति रसादिवस्तुन्यसति च दोषे काव्यत्वमस्तीति ख्यापनमर्थो यस्य तादृशश्चकार इत्यर्थः। अयमाशयः-सर्वथा निर्दोषे गुणिनि च शब्दार्थयुगले सति चालङ्कारे काव्यत्वमव्याहतमेव, सत्यपि दोषे तस्यानुत्कटत्वे गुणाऽलङ्कारसद्भावे च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



काव्यत्वं न निवार्यते, क्वचिच्च स्फुटे रसेऽनुत्कटे च दोषेऽलङ्कारवैधुर्येऽपि काव्यत्वं न हीयत इति सूचकः सूत्रघटकश्चकार इति।

**'निरलङ्कारयोरपि'** इत्युक्त्या चालङ्काराणां स्थित्यभावस्य यथाकथञ्चित्काव्यत्वविघाताऽप्रयोजकत्वेऽपि गुणस्थितेरवश्यापेक्षणीयत्वमिति प्रतिपादितम्। तथा चालङ्काराभावेऽपि गुणबाहुल्ये सति काव्यं स्वदते, यथा—**शून्यं वासगृहमि**त्युदाह्रियमाणे पद्ये, अत्र हि न कश्चित् शब्दनिष्ठोऽर्थनिष्ठो वाऽलङ्कार इति स्पष्टम्। अलङ्कारयुक्तमपि गुणशून्यं च काव्यं न स्वदते, यथा—

"स्तनकर्परपृष्ठस्था वार्जिनीछदमण्डकाः।
वियोगाग्न्यूष्मणा पक्काः कन्दुकिन्येव ते स्त्रिया॥" इति [ ] पद्ये।

अस्यार्थः—स्तनावेव कर्परौ—कपालौ, तण्डुलादिभर्जनसाधनभूतौ आष्ट्राविति भावः, तयोः पृष्ठे—उपरिभागे, तिष्ठन्तीति तादृशाः, स्तनयोरुपरि विन्यस्ता इत्यर्थः, ते—पूर्वस्थापिताः, वारि—जले, जायत इति वार्जं कमलम्, तदस्त्यस्यामिति वार्जिनी कमलिनी, तस्याश्छदानि—पत्राण्येव, मण्डकाः—पिष्टकविशेषाः, कन्दुः—भर्जनपात्रं, तदेव कन्दुकम्, तदस्त्यस्याः सा कन्दुकिनी आष्ट्रस्वामिनी तण्डुलादिभर्जनेन जीविकावती, अथवा कन्दुकं—आष्ट्रमस्त्यस्यामिति कन्दुकिनी चुल्ली, तयेव—तत्सदृशया, स्त्रिया, वियोगस्य योऽग्निः—वियोगजसन्तापरूपो वह्निः, तस्योष्मणा—सन्तापेन, पक्काः पचनकर्मीकृताः। अयमाशयः—यथा चुल्ल्युपरि स्थापितआष्ट्रस्थाः पिष्टकाश्चुल्लया अग्निद्वारा पच्यन्ते, तथा वियोगजन्यदाहापनयनाय स्तनयोरुपरि स्थापितानि कमलिनीदलानि स्त्रिया वियोगजसन्तापवह्निजन्योष्मणा पक्कतां नीतानीति। अत्र पद्ये 'स्तनकर्पर' इति स्तनयोः कर्परेण सह रूपकम्, वार्जिनीछदानां मण्डकैः सह, वियोग एवाग्निरिति विग्रहे च तत्रापीति रूपकत्रयपरिपुष्टः कन्दुकिन्येवेत्युपमालङ्कारः। तथा चालङ्कारद्वयसत्त्वेऽपि गुणाभावान्नेदं काव्यं चारुतामावहतीति। उक्तं च ध्वनिकारेणापि—

"रसानुगुणार्थविशेषनिबन्धनमलङ्कारविरहेऽपि च्छायातिशयं पुष्णाति, यथा—

"मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः।
येनैकचुलके दृष्टौ दिव्यौ तौ मत्स्य-कच्छपौ॥"

'अत्र ह्यद्भुतरसानुगुणमेकचुलुके मत्स्यकच्छपदर्शनं छायातिशयं पुष्णाति' इति, नीरसे तु यदि न स्फुटोऽलङ्कारस्तर्हि किंकृतश्चमत्कारः स्यात्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथा—

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं

निरलङ्कारस्यापि काव्यत्वमाह यथा—शून्यं वासगृहं विलोक्येत्यादि-नायिकारब्धशाह्यसम्भोगवर्णनमिदम्। वासगृहं भोगागारं, "भोगागारं वासगृहम्" इत्यमरः [२.२.८] शून्यं जनान्तररहितं, विलोक्य जनान्तर-सहिते हि गृहे प्रियेण सहैकस्मिन् शयने स्थितिरेव न स्यादिति वासगृहस्य जनान्तररहितत्वनिश्चयेऽपि कदाचिन्निभृतसखीस्थितिः संभाव्येतेति पुनरपि विशेषेण दृष्ट्वा, शयनात् तल्पात्, किञ्चित् अपरकायेनैव, न तु सर्वाङ्गेण, तथा सति हि शय्याया अधिकान्दोलने सुप्तत्वेन ज्ञातस्य पत्युर्निद्राभङ्गः सम्भाव्यते, अपरकायमात्रोत्थापने च कदाचिन्निद्राच्युतावपि स्वस्यास्योद्यमस्य पार्श्व-परिवर्तनार्थत्वस्योपपादयितुं शक्यत्वादिति भावः; शनैः मन्दम्, इदमपि निद्राभङ्गभीतिज्ञापनायैव, निद्राभङ्गे हि समीहितचुम्बनालाभ इति शङ्का; उत्थाय अपरकायमुन्नमय्य, चेष्टायाः परीक्षणार्थम्, निद्रायाः-स्वापस्य, व्याजं-मिषम्, न तु वास्तविकीं निद्रामिति भावः, उपागतस्य प्राप्तस्य, न हि तस्यातृप्तस्य—उद्वेलमनोरथसनाथस्य वास्तविकी निद्रा सम्भवत्यपि; पत्युः स्वस्वा-मितया निर्णीतस्य, न तु प्रियस्य, प्रथमसमागमेनाजातपरिचयात् प्रियत्वबुद्धेर-नुदयात्, मुखं आननम्, सुचिरं सर्वावान्तरावयवसमीक्षापूर्वकं बहुकाल-पर्यन्तम्, निर्वर्ण्य मनसैव साधुतया व्याख्याय, यावता कालेन निद्रायाः परीक्षा, अनुरागोदयश्चाभूदिति भावः, विस्रब्धं विश्वस्तभावेन, जनान्तरशून्य-तया गृहस्य पूर्वमेव निश्चयः, पत्युश्च स्वापस्य सत्यत्वपरीक्षैतत्कालपर्यन्तमपि निद्राभङ्गचेष्टाया अदर्शनाज्जातैवेति निःशङ्कं स्वव्यापारे प्रवृत्तिरुचितैवेत्यर्थः, परिचुम्ब्य परितः—कपोलयोर्नयनप्रान्तयोश्च चुम्बनं कृत्वा, गण्डस्थलीं कपोलस्थलीम्, जातपुलकां उद्भिन्नरोमाञ्चामालोक्य, यद्यपि प्रेयसीकर्तृक-चुम्बनजातस्मरविक्रियाप्रभवः पुलकोद्गमो न केवलं कपोलयोरेव, किन्तु सर्वाङ्गीणः सम्भाव्यते, तथापि नायिकायाः मुखमात्रदर्शनव्यापृताया अङ्गान्तर-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लज्जा नम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥ १ ॥
[अ. श. ८२]

---

जातरोमाञ्चोद्गमादर्शनमिति भावः । लज्जते—त्रपते इति लज्जा पचादित्वादच्, इदं पृथक् पदम्, अत एव चुम्बनाऽऽलोकनयोर्लज्जनक्रियया समानकर्तृकत्वेन यबुपपत्तिः; अत एव नम्रमुखी पूर्वत एव नम्रीभूतानना, न तु नमितमुखी, मुखनमने साध्वसविह्वलतया कामाकुलतया च शक्तेरभावात्, बाला मुग्धा, अतश्च लज्जाधिक्यस्यौचित्यम्; हसता 'पूर्वं मया प्रार्थिताऽपि कटाक्षवीक्षणेऽपि कृपणतामेव कृतवती, इदानीं कियत् प्रगल्भसे' इति सर्वं मयाऽवबोधीति स्मयमानेन, प्रियेण चातुर्येण भावोदयावसरप्रदानपर्यन्तं निद्राव्याजमुपेत्य, नायिकाया हृदये स्वीयं रसविशारदत्वं प्रकाशितमितीतः पूर्वं पतिमात्रतया ज्ञातेनापि सम्प्रति हृदयेश्वरेण; चिरं बहुकालपर्यन्तं सम्भोगस्वीकारं लज्जापगमं वा यावदित्यर्थः, चुम्बिता, सवृद्धिमूलधनप्रत्यर्पणस्य कृते वा प्रतिकर्तव्यत्वस्यौचित्यादिति भावः ॥

अत्र शून्यमित्यनेनोद्दीपनातिशयः, वासगृहमिति स्रक्-चन्दनादिसामग्रीसद्भावद्योतनेन मनःप्रसादः, पत्युरिति युक्ते स्थानेऽनुरागोदयः, विस्रब्धमिति रागातिशयकृता विमृश्यकारित्वम्, नम्रेति मुखस्य स्वतो नम्रतयाऽनुरागोदयजन्मा वैयात्यप्रसरः, चिरं चुम्बितेति नायकस्य स्नेहोदयप्रकर्षश्च व्यज्यते। अत्र नायकालम्बनकः शून्यगृहाद्युद्दीपनकः, मुखनिर्वर्णनचुम्बनाद्यनुभावकः, लज्जाहासादिव्यङ्ग्यहर्षादिव्यभिचारिभावकः, नायिकाहृदयावस्थरतिस्थायिकः, तज्ज्ञे सामाजिके शृङ्गारो रसः । अत्र न स्फुटः कोऽप्यलङ्कारः, रसस्य च प्राधान्यान्नालङ्कारता, इतररसोपकारकत्वरूपेऽन्योत्कर्षकत्वरूपे वाऽप्राधान्य एव रसस्यालङ्कारत्वस्वीकारात् । तदिदं पद्यमलङ्कारविरहितमपि साधु काव्यम् । लज्जा-हासयोर्व्यभिचारिभावयोः स्वपदोपात्तत्वरूपो दोषस्तत्राप्यसत्कल्प एव, रसप्रतीतिविघातासमर्थत्वात्, उत्कटदोषस्यैव तथात्वोपगमस्य पूर्वमुक्तत्वादित्यलम् ॥

काव्यलक्षणे निरुक्ते दोषाभावो गुणसत्ता च प्रविष्टा, तत्र किं दोषत्वं किं वा गुणत्वमिति विज्ञानं विना दोष-गुणयोः स्वरूपं परिच्छेत्तुमशक्यमिति गुणस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुण-दोषयोः सामान्येन लक्षणमाह—

**रसस्योत्कर्षाऽपकर्षहेतू गुण-दोषौ, भक्त्या शब्दाऽर्थयोः ॥ १२ ॥**

रसो वक्ष्यमाणस्वरूपः, तस्योत्कर्षहेतवो गुणाः, अपकर्षहेतवस्तु

---

सत्ताया दोषस्यासत्तायाश्च न ज्ञानमसंभवीति ग्राह्यापरिचये ग्रहणस्येव हेयापरिचये हानस्याप्यशक्यत्वमिति तयोः स्वरूपनिर्णयोऽवसरप्राप्तः, अतस्तन्निरूपणपरसूत्रभूमिकामारचयति–**गुणदोषयोरि**त्यादिना। तत्र यद्यपि सूत्रे "अदोषौ सगुणौ" इत्युक्ततया पूर्वं दोषस्वरूपनिरूपणमेवावश्यकं क्रमानुरोधात्, तथा च दोषगुणयोरिति वक्तव्ये व्यत्यासेन गुणदोषयोरित्युक्तिर्नोचिता, तथापि गुणस्य रससमनियतत्वेनात्यादरभूमितया संग्राह्यतया च प्रथमोद्देशः, दोषस्य हेयतया पश्चान्निर्देशः; गुणश्च दोषश्च गुण-दोषाविति द्वन्द्वेऽभ्यर्हितस्य गुणस्य पूर्वप्रयोगः, तयोः **सामान्येन लक्षण**मिति-सामान्यतोऽज्ञाते विशेषजिज्ञासाया अनुदयेन पूर्वं सामान्यरूपेण ज्ञानमावश्यकमित्यल्पेन प्रयासेन सकलगुण-दोषपरिचयाय सामान्यलक्षणमेव व्यापकमिति सामान्येन गुणत्वेन दोषत्वेन च गुण-दोषयोर्लक्षणं-स्वरूपपरिचयम्, **आह** कथयति-**रसस्ये**त्यादिसूत्रेण।

सूत्रं व्याख्याति—**रसो वक्ष्यमाणस्वरूप** इति-यद्यपि रस्यते-आस्वाद्यते इति व्युत्पत्त्या योगार्थप्रतीतिर्भवति तथाऽपि विशिष्य स्वशास्त्रसंकेतितस्य रसस्य स्वरूपं वक्ष्यमाणमेवेति बोध्यम्, अत्र चोक्तव्युत्पत्त्या रसपदेन रसभाव-रसाभास-भावाभासादीनां ग्रहणम्, सर्वेषामपि रस्यमानताऽनतिरेकात्। **तस्य** रसस्य, **उत्कर्षहेतवः** उत्कर्षः-अनुभवसिद्धश्चित्तद्रुत्यादिकार्यविशेषप्रयोजकत्वस्वरूपो धर्मविशेषः, तस्य हेतुः-कारणभूतो गुणः, अपकर्षो-न्यूनता, चित्तद्रुत्यादिकार्यविशेषप्रतिबन्धकत्वरूपो धर्मो वा तस्य हेतुर्दोष इति, द्वन्द्वान्ते श्रूयमाणतया हेतुपदस्य प्रत्येकं सम्बन्धः, तथा च रसोत्कर्षकारणत्वे सति रसाव्यभिचारिस्थितित्वम्, अव्यभिचारेण रसोपकारकत्वं वा गुणत्वं, रसप्रतीतिविघातकत्वं च दोषत्वमिति फलति; अलङ्कारास्तु रसव्यभिचारिस्थितयो नियमेन रसोपकारकत्वाभाववन्तश्चेति न तेषु गुणलक्षणसंक्रान्तिः। **ते च रसस्यैव धर्मा** इति-सूत्रे '**भक्त्या शब्दार्थयोः**' इति वाक्येन तयो रसैकधर्मत्वं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दोषाः, ते च रसस्यैव धर्माः, उपचारेण तु तदुपकारिणोः शब्दाऽर्थ-

लभ्यते, अत एव च लक्षणे [ गुणस्य ] रसाव्यभिचारितत्वमुक्तम्, दोषलक्षणेऽपि च रसस्यापकर्षत्वं तदीयप्रतीत्यादिविघातकत्वमिति रसघटितमेव लक्षणमुक्तम्। ननु दोषाणां रसस्य उत्पद्यमानस्य? उत्पन्नस्य वा? अपकर्षकत्वम्, नाद्यः- श्रुतिकटुत्वप्रतिकूलवर्णत्वादिदोषाणामुत्पन्ने एव रसेऽपकर्षत्वेन तेषामसंग्रहः स्यात्, न द्वितीयः-च्युतसंस्कारतादिदोषाणामुत्पत्तावेव प्रतिबन्धकत्वेन तेषाम-संग्रहापत्तेः, एवं चोभयथा दोष इति चेत्? न-अत एवापकर्षपदेन प्रतीति-विघातस्योक्तत्वात्, काव्यस्योद्देश्या प्रतीतिः, सा च-रसवती, अविलम्बिता, अनपकृष्टरसविषया च, नीरसे तु अविलम्बिता चमत्कारिणी प्रतीतिरुद्देश्या, तादृशप्रतीतिविघातकत्वं तु सर्वेषां दोषाणामविशिष्टम्। इयं च दोषाणां रस-प्रतीतिविघातकता क्वचित् साक्षात्, यथा रसदोषाणां स्वशब्दवाच्यत्वादीनां, क्वचित् परम्परया, यथा शब्दार्थवर्णरचना दोषाणाम्। ननु गुणानां रसमात्र-धर्मत्वे 'मधुरा वर्णाः' इति व्यवहारो वर्णानां माधुर्यधर्मवत्त्वप्रत्यायकः कथं संगच्छेत, वर्णितं च वामनादिभिः-"ओजः-प्रसादादीनां बन्धगुणत्वम्" [ वामनालं० अधि० ३, अ० १, सू० ४ ] इति चेत्? न-औपचारिकत्वेन तेषां व्यवहाराणां संगमनात्, यथा 'यजमानः प्रस्तरः' इत्यत्र दर्भमुष्टिरूप-प्रस्तरस्य यजमानवद् यागक्रियासाधनत्वसाम्याद् यजमानत्वोपचारस्तस्यापि हविरासादनादिद्वारा यागसाधनत्वात्, निरूपितं चैतत् ताण्ड्यब्राह्मणे [ ६।७।१७ ] तथा रसगतमपि माधुर्यं तत्समर्पकार्थाश्रयत्वेन वर्णेषु आरोप्य 'मधुरा वर्णा' इत्यादिरूपेणोपचरन्तीति मन्तव्यम्; तदुक्तम्-**उपचारेण तु तदुपकारिणोः शब्दार्थयो**रिति-तदुपकारिणोः-रसप्रतीतावुपकारजनकयोः शब्दार्थयोर्गुणवत्त्वोक्तिस्तु उपचारेण रसधर्माणां तेषां तत्रारोपेणेत्यर्थः, उपचारप्रकारश्च पूर्वमभिहित एव, यथा शौर्यादिगुणानामात्मधर्मत्वं सकलवादि-सम्मतमप्याकार-महत्त्वादेस्तदभिव्यञ्जकस्य क्वचिदशूरेऽपि दर्शनाद् 'आकार एवास्य शूर' इति शौर्यादिकमाकारे उपचर्यते तथैवेति भावः। ननु उपचारस्तदा स्वीकार्यो यदि रसैकधर्मत्वं तेषां क्वचित् केनचित् प्रमाणेन प्रमितं स्यात्, न च तथा दृश्यतेऽत उपचारकमपहाय तद्धर्मत्वमेव तेषां कुतो नाश्रीयते इति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योरुच्यन्ते, रसाश्रयत्वं च गुण-दोषयोरन्वय-व्यतिरेकानुविधानात्। तथाहि यत्रैव दोषास्तत्रैव गुणाः, रसविशेषे च दोषा न तु शब्दाऽर्थयोः, यदि हि तयोः स्युस्तद्बीभत्सादौ कष्टत्वादयो गुणा न भवेयुः, हास्यादौ चाश्लीलत्वादयः। अनित्याश्चैते दोषाः, यतो

---

चेत्? अत्राह–रसाश्रयत्वं च गुणधर्मयोरित्यादि। अन्वय–व्यतिरेकानुविधानादिति–तत्सत्त्वे तदितरयावत्कारणसत्त्वे च तत्सत्त्वमन्वयः, एवं तद्व्यतिरेके तदितरयावत्कारणसत्त्वेऽपि तदभावो व्यतिरेकः, यथा दण्डसत्त्वे दण्डेतरघटीययावत्कारणमृदादिसत्त्वे घटसत्त्वं, दण्डासत्त्वे दण्डेतरयावदुक्तकारणसत्त्वेऽपि घटासत्त्वमिति दण्डान्वयव्यतिरेकानुविधानात् घटं प्रति दण्डकारणम्, तथा रससत्त्वे गुणादिसत्त्वम्, रसाभावे रसेतरयावत्कारणसत्त्वेऽपि गुणाभावेन गुणानां रसप्रतिबद्धयोरन्वयव्यतिरेकयोरनुविधायित्वमनुवर्त्तित्वं दृष्टमिति तेन तेषां रसाश्रयत्वं निश्चीयते। तदेवान्वयव्यतिरेकानुविधानं स्पष्टयति–तथाहीत्यादिना–तथाहि–तदेव प्रदर्श्यत इत्यर्थः। यत्रैव दोषास्तत्रैव गुणा इति–यस्यैव दोषयुक्तत्वं तस्यैव गुणवत्त्वमपि युक्तमिति भावः। दोषाणां रसवृत्तित्वमाह–रसविशेषे च दोषा इति–दोषाणां रसप्रतीतिविघातकत्वस्यैव लक्षणेनोक्ततया रसविशेष एव दोषविशेषाणां दोषत्वं सामान्यतो रसेषु दोषाणाम्। तदेव रसविशेषप्रसिद्धं दोषत्वं स्फुटयति–यदि हीत्यादिना–हि–यतः, तयोः शब्दार्थयोः, यदि दोषाः स्युः, तत् तर्हि बीभत्सादौ रसे [आदिपदेन रौद्रसंग्रहः] कष्टत्वादयः दोषाः, गुणा न भवेयुः गुणत्ववत्तां न गच्छेयुः, एवं हास्यादौ रसे च, अश्लीलत्वादयः दोषा गुणा न भवेयुरिति सम्बन्धः। अयमाशयः–यदि दोषाः शब्दार्थयोः स्युस्तर्हि शृङ्गारे दोषतया प्रसिद्धाः कष्टत्वादयो बीभत्सादौ गुणत्वेनोक्ता न भवेयुः, एवं वीरादिरसेषु दोषतया परिगणिता अश्लीलत्वादयो हास्यादौ गुणतां न भजेयुः, एवं दुःश्रवत्वादयो दोषाः प्रतिपाद्यप्रतिपादकवशात् क्वचिद् गुणतां न गच्छेयुः, दृश्यते चैषां तत्र तत्र गुणत्वम्, स्वीकृतं च काव्यप्रकाशादिकृद्भिरपि–"वक्त्राद्यौचित्यवशाद् दोषोऽपि गुणः क्वचित् क्वचिन्नोभौ" [उ० ७. का. ५९] इति कारिकाव्याख्यायाम्–"तत्र वैयाकरणादौ वक्तरि प्रतिपाद्ये च, रौद्रादौ च रसे व्यङ्ग्ये कष्टत्वं गुणः" इति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**यस्याङ्गिनस्ते दोषास्तद्भावे न दोषास्तद्भावे तु दोषा इत्यन्वय-व्यतिरेकाभ्यां गुण-दोषयो रस एवाश्रयः ॥**

---

एवं "वक्तरि क्रोधसंयुक्ते, तथा वाच्ये समुद्धते। रौद्रादौ च रसेऽत्यन्तं दुःश्रवत्वं गुणो भवेत्" ॥ ८ ॥

तथा "सुरतारम्भगोष्ठ्यादावश्लीलत्वं तथा गुणः। " इति साहित्यदर्पणे सप्तमपरिच्छेदेऽपि दोषाणां क्वचिद् रसे गुणत्वमुक्तम्।

अयमत्र सारः—यो दोषो यं रसं सन्तं तदीयास्वाद्यतालक्षणस्वरूपं विघटयन् दूषयतीति दोषतया ख्यातः स एव चेदन्यत्र रसस्यास्वादं न प्रतिबध्नाति तदा तत्र तस्य न दोषता, यथा विप्रलम्भशृङ्गाररसे "प्रससार शनैर्वायुर्विनाशे तन्वि ते तदा" इत्यत्र वायुशब्दोऽपानवायुरूपाश्लीलार्थस्मारकतयाऽश्लीलत्वेन दोषः, किन्तु तदेवाश्लीलत्वं सुरतारम्भगोष्ठ्यां "द्व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्तु" इति कामशास्त्रानुसारं "करिहस्तेन संबाधे प्रविश्यान्तर्विलोडिते। उपसर्पन् ध्वजः पुंसः साधनान्तर्विराजते ॥" इति बालायाः सुरतोपायस्य द्व्यर्थैः पदैः वर्णनप्रसङ्गे साधनादिशब्दप्रयोगेण प्रतीयमानमपि काव्यजीवानुभूतशृङ्गाररसास्वादं न प्रतिबध्नातीति तस्य न दोषत्वमित्येव न प्रत्युत गुणत्वं मन्यन्ते आलङ्कारिकाः। ततश्च शब्दार्थयोर्दोषस्य सत्त्वे स्वीकृते रसभेदेन समानाकारकशब्दप्रयोग एव दोषत्वमदोषत्वं चेत्युभयमपि न स्यात्, भवति च तथेति दोषाणां नित्यत्वाऽनित्यत्व-व्यवस्थाऽप्युपपद्यते, तदाह–**अनित्याश्चैते दोषा** इति–एते–कष्टत्वादयो दोषाः, **अनित्याः**–न सर्वदा दोषतामेव भजन्ते, क्वचिद्गुणताया अपि तेषु दृष्टत्वात्। अयमाशयः–द्विविधो दोषो नित्योऽनित्यश्च, तत्रानुकरणादन्येन प्रकारेण समाधातुमशक्यो नित्यः, यथा–च्युतसंस्कारादिः। तद्भिन्नस्त्वनित्यः, यथा–कष्टत्वादिः। अनित्यत्वे कारणमाह–**यतो यस्याङ्गिनस्ते** इत्यादिना–यतः कारणात् यस्याङ्गिनो रसस्य ते दोषाः–विघातकाः, तदभावे–तद्रसभिन्नरसे, नीरसे वा, ते न दोषाः; मुख्यार्थप्रतीतिविघातकत्वरूपदूषकताभावात्, इति अन्वयव्यतिरेकयो र्दृष्टतया दोषा रसाश्रया रसमात्रदूषकाः, दोषाणां च गुणसमनियतत्वस्वाभाव्ये-तेषां [ दोषाणां ] रसाश्रितत्वे पूर्वोक्तयुक्त्या निर्णीते गुणा अपि रसाश्रया एव।

उक्तं च गुण-दोषयो रसधर्मत्वं काव्यप्रकाशकृता मम्मटेनापि, तथा हि—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः॥ [ उ०८, का० ६६ ]

अर्थः—अङ्गिनः शरीरेष्वात्मवत् काव्येषु प्राधान्येन स्थितस्य, रसस्य, धर्माः-साक्षात् तदाश्रिताः, उत्कर्षहेतवः-अचलस्थितयो रसादपृथक्वृत्तयः, आत्मनः शौर्यादय इव ये स्युः, ते गुणा इति ज्ञातव्याः। एतल्लक्षणमपि स्वकीयलक्षणतो नातिभिन्नमिति द्रष्टव्यम्॥

तत्रैव दोषलक्षणं यथा—

"मुख्यार्थहतिर्दोषो, रसश्च मुख्यस्तदाश्रयाद्वाच्यः।
उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः॥" [ उ०८, का०४९ ]

अर्थः—मुख्यार्थस्य हतिः-अपकर्षो यस्मात् स दोष इति दोषसामान्यलक्षणम्; मुख्यः क इति चेदत्राह-रसश्च मुख्यः; ननु तर्हि नीरसेषु न कश्चिद् दोषः स्यात्, दूष्यस्याभावादिति चेदत्राह-तदाश्रयाद् वाच्य इति-आश्रयणमाश्रयः, तथा च तेन रसेनाश्रयणाद्-उपकारित्वेनापेक्षणाद् वाच्योऽप्यर्थो मुख्यः; न चैवं मुख्यशब्दार्थस्य नानात्वेनाननुगमः, काव्ये प्राधान्येनोद्देश्यप्रतीतिविषयत्वेनानुगमात्; तदेवं रसवति सर्व एव दोषाः; नीरसे स्वविलम्बितचमत्कारिवाक्यार्थप्रतीतिविघातका एव हेया इति मन्तव्यम्; नन्वेतयोरेव दोषाधारत्वमुचितं न तु शब्दादीनामित्यत आह-उभयोपयोगिन इत्यादि-अत्र शब्दपदमर्थप्रतिपादनात्मकव्यापारवतोः पद-वाक्ययोर्वर्तते, तेनाद्यपदाद् वर्ण-रचने संगृहीते इति प्रकाशकारस्वरसः; न च तत्र बीजाभावः, अन्यथा वर्णस्यापि शब्दपदेनैव प्राप्तो शब्दाद्या इति बहुवचनस्यासंगत्यापत्तेः, तथा च पद-वाक्य पदांश-रचनाः 'शब्दाद्याः' इत्यनेन ग्राह्याः, ते चोभयोपयोगिनः-रसवाच्यार्थयोरुभयोरुपकारकाः-उभाभ्यामप्यपेक्षिताः, तेन तेष्वपि स इति, यथा काणत्वखञ्जत्वादयस्तत्तदङ्गधर्माः साक्षादङ्गेष्वाश्रिता अङ्गिनमेव दूषयन्ति तथा सरसे काव्ये तत्तदङ्गेषु स्थितास्ते रसम्, अन्यत्र-असति [ रसे ] वाच्यमर्थं चोद्देश्यप्रतीतिविषयतया स्थितं दूषयन्तीति मुख्यार्थहतिकारकत्वं तेषां न हीयते; इति काव्यप्रकाशकृत आशयः। स्वमते च दोषाणां केवलं रसदूषकत्वमेवेति रसाश्रितत्वमेव, तदुक्तमानन्दवर्धनाचार्येणापि—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः ।
ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः ॥" इति ।

[ ध्वन्या० उ० २, श्लो० ३४ ]

तथा च शृङ्गारध्वनिमात्रे तेषां दोषत्वमिति रसमात्रदूषकत्वं स्पष्टम् । न च तर्हि पदादिदोषाः स्वमतेऽपि कथं वर्णिता इति वाच्यम्, रसस्यात्मभूतस्य तत्तदङ्गद्वारैव दोषाश्रयतासम्भवात्, तथा च पदाद्यङ्गावच्छेदेनाऽपि विद्यमाना दोषा अङ्गिनो रसस्यैव दूषका इति तद्दोषतयैव गणनीया इति हृदयम् । गुणानां च रसैकधर्मत्वं काव्यप्रकाशकृद्भिरपि स्वीकृतमेवेति गुण-दोषयो रसधर्मत्वं सिद्धम् ।

नरेन्द्रप्रभसूरिणाऽप्यलङ्कारमहोदधौ दोषाणां गुणानां च रसमात्रवृत्तित्व-मुक्तम्, तथा हि—

"वैचित्र्यव्याहतिर्दोषः सा च भूम्ना रसक्षतेः ।
तद्भव रस एवैष, भक्त्या शब्दार्थयोः पुनः ॥" [ पञ्चमे तरङ्गे १ ]

अर्थः—वैचित्र्यस्य–सहृदयानन्दिनः सौन्दर्यविशेषस्य, व्याहतिः–विलोपः, दोषः, सा च–वैचित्र्यव्याहतिः, भूम्ना–बाहुल्येन रसक्षतेः–रसहानेर्जायते, तत्–तस्मादेष–दोषः, रसे एव, शब्दार्थयोः पुनस्तयोर्व्यवहारः कथमित्याह–भक्त्येति–उपचारेण शब्दार्थयोस्ते उच्यन्ते न तु मुख्यया वृत्त्येति ।

तथा—

शौर्यादय इवात्मानं रसमेव श्रयन्ति ये ।
गुणास्ते सहजाः काव्ये नित्यवैचित्र्यकारिणः ॥

[ अ० म० त० ६ का० १ ]

'शौर्यादय आत्मानमिव ये रसमेव श्रयन्ति ते गुणा' इत्युक्त्या रसमात्र-धर्मत्वं गुणानामिति स्पष्टमेव । एवं साहित्यदर्पणेऽपि प्रथमे परिच्छेदे—

"[ वाक्यं रसात्मकं काव्यं ] दोषास्तस्यापकर्षकाः । ( २ )
उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः ॥" ( ३ )

इति ग्रन्थव्याख्यायां–श्रुतिदुष्टापुष्टार्थत्वादयः काणत्वखञ्जत्वादय इव शब्दार्थ-द्वारेण देहद्वारेणेव, व्यभिचारिभावादेः स्वशब्दवाच्यत्वादयो मूर्खत्वादय इव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साक्षात् काव्यस्यात्मभूतं रसमपकर्षयन्तः काव्यस्यापकर्षका इत्युच्यन्ते; गुणाः शौर्यादिवत्, अलङ्काराः कटककुण्डलादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, देहद्वारेणेव शब्दार्थद्वारेण तमेव काव्यस्यात्मभूतं रसमुत्कर्षयन्तः काव्यस्योत्कर्षका उच्यन्ते। इत्थं चैषामपि मते रसापकर्षकत्वेन रसाश्रयत्वमेव दोषाणामिति स्पष्टम्। यत्-आचार्यवामनेन "काव्यशोभायाः कर्तारो धर्मा गुणाः" इति सूत्र-[काव्यालं० अधि० ३, अ० १, सू० १] व्याख्यायां-ये खलु शब्दार्थयोर्धर्माः काव्यशोभां कुर्वन्ति ते गुणाः "गुणविपर्ययात्मानो दोषाः" [अधि० २, अ० १, सू० १] इति सूत्रेण च गुणविरुद्धस्वरूपान् दोषान् कथयता शब्दार्थधर्मत्वं गुण-दोषयोरुक्तमिति प्रतीयते तदपि 'काव्यशोभाकर्त्तार' इत्युक्तिगर्भतया न प्रतिकूलम्, काव्यस्यात्मभूतरसोत्कर्षेणैव काव्यशोभा सम्पद्यत इति परम्परया शब्दार्थद्वारा रसोपकारापकारयोरेव पर्यवसानात्।

यच्च पण्डितराजजगन्नाथेन-"येऽमी माधुर्यौजः-प्रसादा रसमात्रधर्मतयोक्ताः, तेषां रसधर्मत्वे किं मानम्? प्रत्यक्षमेवेति चेत्? न-दाहादेः कार्यादनलगतोष्णस्पर्शस्य यथा भिन्नतयाऽनुभवस्तथा द्रुत्यादिचित्तवृत्तिभ्यो रसकार्येभ्योऽन्येषां रसगतगुणानामननुभवात्; तादृशगुणविशिष्टरसानां द्रुत्यादिकारणत्वात् कारणतावच्छेदकतया गुणानुमानमिति चेत्? प्रातिस्विकरूपेणैव रसानां कारणतोपपत्तौ गुणकल्पने गौरवात्; शृङ्गारवीरकरुणानां माधुर्यवत्त्वेन द्रुतिकारणत्वं प्रातिस्विकरूपेण कारणत्वकल्पनापेक्षया लघुभूतमिति तु न वाच्यम्, परेण मधुरतादिगुणानां पृथग्द्रुततरत्वादिकार्यतारतम्यप्रयोजकतयाऽभ्युपगमेन माधुर्यवत्त्वेन कारणताया गडुभूतत्वात्; इत्थं च प्रातिस्विकरूपेणैव कारणत्वे लाघवम्। किञ्चात्मनो निर्गुणत्वेनात्मरूपरसगुणत्वं माधुर्यादीनामनुपपन्नम्, एवं तदुपाधिरत्यादिगुणत्वमपि, मानाभावात् पररीत्या गुणे गुणान्तरस्यानौचित्याच्च। अथ शृङ्गारो मधुर इत्यादिव्यवहारः कथमिति चेत्? एवं तर्हि द्रुत्यादिचित्तवृत्तिप्रयोजकत्वं प्रयोजकतासम्बन्धेन द्रुत्यादिकमेव माधुर्यादिकमस्तु, व्यवहारस्तु वाजिगन्धोष्णेति व्यवहारवदुपपन्नः, प्रयोजकत्वं चादृष्टादिविलक्षणं शब्दार्थरसरचनागतमेव ग्राह्यम्, अतो न व्यवहारातिप्रसक्तिः। तथा च शब्दार्थयोरपि माधुर्यादेरीदृशस्य सत्त्वादुपचारो नैव कल्प्य इति तु मादृशाः" इत्युक्तम्, तस्यायं भावः—अग्निजन्यं दाहरूपं कार्यं यथोष्णस्पर्शरूपाद्गुणात्पृथगुपलभ्यते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा शृङ्गार-वीरादिरसेषु कार्यरूपाद् द्रुतिदीप्तिविलासाख्यादन्यत् न किमपि माधुर्यादिरूपमनुभूयत इत्यनुभावात् तेषां रसगुणत्वे किमपि न मानम्। अथोच्यते माधुर्यादिगुणविशिष्टा एव रसा द्रुत्यादीनां कारणानि, [अर्थाद् गुणसहकारादेव द्रुत्यादिप्रयोजकत्वं तेषाम्] ततश्च कारणतावच्छेदकतया गुणानां माधुर्यादीनां तद्धर्मतयाऽनुमानं स्यादिति, तदापि न–शृङ्गारत्वादिरूपेणैव तेषां तत्कारणतास्वीकारे लाघवात्। ननु शृङ्गारो द्रुतेः कारणं, शान्तो द्रुतेः कारणं, करुणो द्रुतेः कारणमिति प्रातिस्विकरूपेण कारणताकल्पनाऽपेक्षया शृङ्गार-करुण-शान्ता द्रुतिकारणानि माधुर्यवत्त्वादित्येक एव कार्यकारणभाव इति लाघवमिति चेत्? न–भवद्भिः शृङ्गारादिरसेषु मधुरतादिगुणानां पृथग्द्रुतद्रुततरद्रुततमत्वादिकार्यतारतम्योपगमेन तत्तद्रूपेण कार्यकारणभावत्रयकल्पनया सह माधुर्यवत्त्वेन कार्यकारणभावकल्पनाया अधिकत्वात्। किञ्चात्मनो निर्गुणत्वं वेदान्तादिदर्शनेषु प्रतिपक्षमतनिराकरणपूर्वकं सिद्धान्तितमित्यात्मस्थानीयस्य रसस्यापि तथात्वमेवोचितम्। तथा च तदुपाधिभूतरत्यादिगुणत्वमपि न तेषां [माधुर्यादीनां] रत्यादीनां सुखरूपतया स्वतो गुणरूपत्वेन गुणे गुणानङ्गीकारात्। शृङ्गारो मधुर इत्यादिव्यवहारस्तु माधुर्यादीनां द्रुत्यादिप्रयोजकतासम्बन्धकृतः। न चैवमदृष्टादीनामपि द्रुत्यादिप्रयोजकतया मधुरत्वं स्यादिति वाच्यम्, अदृष्टादिविलक्षणाया [असाधारणायाः] प्रयोजकतायास्तत्र स्वीकारात्। एवञ्च द्रुत्यादिचित्तवृत्तिप्रयोजकत्वरूपं माधुर्यादिकं शब्दार्थादीनामपीति स्वतःसिद्धमिति तदर्थमुपचारकल्पनाऽपि नावश्यकीत्यपरमनुकूलमिति।

अत्रोच्यते–गुणत्वं नामोपकारकत्वम्, तथा च सम्बन्धभेदादाश्रयत्वं भिद्यते, तथा चोपकार्योपकारकभावसम्बन्धेन गुणाश्रयत्वं रसानाम्, व्यञ्जकतासम्बन्धेन च तदाश्रयत्वं शब्दार्थयोरिति वयं प्रतीमः। यथा दोषाणां शब्दार्थयोर्विद्यमानानामेव मुख्यार्थप्रतिबन्धकत्वरूपं दोषत्वं, तेन रूपेण रसाद्याश्रितत्वं च सकलवादिसिद्धं तथैव गुणानामपि रसोपकारकत्वेन रसाश्रयत्वं बोध्यम्। यच्चोक्तं–द्रुत्यादिकार्याद् भिन्नस्य माधुर्यादेर्नोपलम्भ इति, तदपि नास्माकं प्रतिकूलम्, दाहरूपकार्याद् दाहकत्वशक्तेरिव द्रुतिरूपकार्यात् तदनुकूलशक्तिरूपस्य माधुर्यादेः कल्पनीयत्वात्; न च कार्यकारणभावगौरवं, यतो यथा दाहं प्रति वह्नेः वह्नित्वेनैव कारणता न तु दाहकशक्तिमद्वह्नित्वेन तथैव शृङ्गारत्वादिनैव द्रुत्यादिकारणत्वोपगमे कार्यकारणभावगौरवाभावात्। यदुक्तम्–आत्मनो निर्गुणत्ववत्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अलङ्काराणां सामान्यलक्षणमाह—

**अङ्गाश्रिता अलङ्काराः ॥ १३ ॥**

**रसस्याङ्गिनो यदङ्ग-शब्दाऽर्थौ, तदाश्रिता अलङ्काराः, ते च**

तत्स्थानीयरसस्यापि तथात्वमेवोचितमिति, तदपि न–आत्मनो निर्गुणत्वं हि न सर्ववादिसम्प्रतिपन्नम्, अस्तु नाम तथात्वम्, तथापि आत्मनि शौर्यादिमत्त्वं यथा व्यवहारदशायामाश्रीयते तथैव माधुर्यादेरप्याश्रयितुं शक्यत्वात्; नन्वयं व्यवहारोऽज्ञानिनामिति वाच्यः, व्यवहारकाले सर्वेषामेव तथात्वस्य 'पश्वादिभिश्चाविशेषाद्' इति सूत्रेण शारीरके भाष्ये सिद्धान्तितत्वात् । एवं च 'शृङ्गारो मधुरः' इत्यादिव्यवहारोपपत्तये कल्प्यमान उपचारः शब्दार्थयोर्गुणवत्त्वव्यवहारायैव कल्प्यः । उक्तं चैतदष्टमोल्लासप्रारम्भ एव प्रदीपकारैरिति गुणानां रसधर्मत्वे न किमपि बाधकमिति ॥ १२ ॥

काव्यलक्षणसूत्रस्थितयोः 'अदोषौ सगुणौ' इति पदयोरपेक्षिते दोषगुणलक्षणे अभिधाय क्रमप्राप्त'सालङ्कारौ' इति पदापेक्षितालङ्कारस्वरूपनिरूपणपरसूत्रावतरणिकामाह–**अलङ्काराणां सामान्यलक्षणमाहे**ति–अलङ्काराः–अनुप्रासयमकादयः शब्दालङ्काराः, उपमादयश्चार्थालङ्कारा वक्ष्यन्ते, तेषां, सामान्यलक्षणं–सामान्येन–अलङ्कारत्वेन रूपेण, न तु अनुप्रासत्व-यमकोपमात्वादिविशेषैः, लक्षणं–स्वरूपम्, आह–अग्रिमेण–"**अङ्गाश्रिता अलङ्काराः**" इति सूत्रेण कथयतीत्यर्थः, तत्तत्प्रातिस्विकरूपेणालङ्काराणां लक्षणस्य काव्यलक्षणघटकालङ्कारपदेनानपेक्षितत्वेनालङ्कारत्वेन रूपेणैवालङ्काराणां तत्रोक्तत्वेन तेनैव रूपेण लक्षणकथनमावश्यकमिति तदेवाहेति भावः । 'अङ्ग–काव्यात्मभूतस्य रसस्योपकारकं शब्दार्थयोरन्यतरत्, आश्रिताः–स्वरूपवाचकत्वादिसम्बन्धेन तत्र स्थिताः, अलङ्काराः–अलङ्कारपदवाच्या इति सूत्रार्थं वर्णयति–**रसस्याङ्गिन** इत्यादिना । **रसस्य** शृङ्गारादेः, **अङ्गिनः** मुख्यस्य, **यदङ्गं** अङ्गभूतौ व्यञ्जकौ **शब्दार्थौ**, **तदाश्रिताः** तन्मात्रस्थिताः, **अलङ्कारा** इति । एतेन गुणा-ऽलङ्कारयोर्भेदोपि स्पष्टीकृतः–अङ्गिनमाश्रिता गुणाः, अङ्गमाश्रिताश्चालङ्कारा इति । उक्तं च काव्यप्रकाशे मम्मटाचार्येणापि—

"उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥" [ ८. ६७ ] इति



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**रसस्य सतः क्वचिदुपकारिणः, क्वचिदनुपकारिणः, रसाभावे तु वाच्य-वाचकवैचित्र्यमात्रपर्यवसिता भवन्ति ।**

---

"ये वाचकवाच्यलक्षणाङ्गातिशयमुखेन मुख्यं रसं सम्भविनमुपकुर्वन्ति ते कण्ठाद्यङ्गानामुत्कर्षाधानद्वारेण शरीरिणोऽप्युपकारकाः हारादय इवालङ्काराः" इति वृत्तिः। अलङ्काराश्च गुणा इव न सदा रसोपकारका एव किन्तु क्वचिदुपकारकाः क्वचिदनुपकारकाश्चेत्याह–ते चेति–अलङ्काराश्चेति भावः। **रसस्य सत** इति–काव्योपात्तविभावानुभावादिभिर्लब्धसत्ताकस्य रसस्य[ आनुगुण्येन स्थिताः ] क्वचित् काव्ये उपकुर्वन्ति–साहाय्यकमाचरन्ति, तत्र **तदुपकारिणः**, **क्वचित्** यत्र च तद्रसप्रतिकूला अथवा न प्रतिकूला न वानुकूलास्तत्र **अनुपकारिणः**। यत्र च रसस्य सर्वथाऽभाव एव तत्र चैते स्वाश्रयवैचित्र्यमात्रकर्तार इत्याह–**रसाभावे तु** इत्यादि–वाच्योऽर्थः, वाचकाः शब्दास्तेषां वैचित्र्यं–शोभातिशयः, तन्मात्रे पर्यवसिताः–क्षीणव्यापारा भवन्ति। अयमाशयः–यत्र शरीरे स्वतोऽपि सौन्दर्यं तत्रालङ्कारयोगे निरलङ्कारावस्थातः कश्चिदतिशयः प्रतीयत एव, किन्तु यदि त एवालङ्काराः कुस्थानविन्यस्ता भवेयुर्यथा–कर्णयोः कङ्कणं हस्तयोः कुण्डलं तर्हि कथं शोभां जनयेयुः, यत्र चाङ्गी स्वत एव रूपहीनोऽसुन्दरस्तत्रापि ते सन्ति चेत् दृष्टिमात्रवैचित्र्यकरा नान्यत् किमपि प्रयोजनं तेषाम्, एवं सरसे काव्ये आनुगुण्येनोपनिबद्धा अलङ्कारा रसोपकारिणः, आनुगुण्याभावेऽनुपकारिणः, नीरसे चोक्तिमात्रवैचित्र्यावहा इति।

एवञ्च रसोपकारकत्वे सति तद्वृत्तित्वम्, तथात्वे सति रसानियतस्थितिकत्वम्, अनियमेन रसोपकारकत्वं चेति लक्षणत्रयं भवति, गुणमात्रभेदकं तु प्रथमलक्षणमात्रम्, अन्त्या-ऽद्यलक्षणयोः सत्यन्तं पदादिदोषातिव्याप्तिवारणाय। कुवलयानन्दटीकायामलङ्कारचन्द्रिकायां तु–"रसादिभिन्नव्यङ्ग्यभिन्नत्वे सति शब्दार्थान्यतरनिष्ठा या विषयतासम्बन्धावच्छिन्ना चमत्कृतिजनकतावच्छेदकता तदवच्छेदकत्वमलङ्कारत्वम्, अनुप्रासादिविशिष्टशब्दज्ञानादुपमादिविशिष्टार्थज्ञानाच्च चमत्कारोदयात् तेषु तादृशचमत्कारजनकतावच्छेदकता तदवच्छेदकत्वमुपमात्वादाविति लक्षणसमन्वयः, शब्दार्थयोर्ज्ञाननिष्ठचमत्कृतिजनकताया विषयितयाऽवच्छेदकत्वेन तद्विशेषणीभूतानुप्रासोपमादेस्तन्निष्ठावच्छेदकतावच्छेदकत्वात्, रसवदाद्यलङ्कारसंङ्ग्रहाय व्यङ्ग्योपमादिवारणाय च भेदद्वयगर्भसत्यन्तोपादानम्"

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्युक्तम्, अत्र अङ्गिरसाश्रिता गुणाः, अङ्गभूतशब्दार्थाश्रिता अलङ्कारा इति तयोर्भेदः स्वसिद्धान्तसिद्धः । एतेन "शौर्यादिसदृशा गुणाः, केयूरादितुल्या अलङ्कारा इति गुणालङ्कारयोर्विवेकमभिधाय [ लोके ] संयोग-समवायाभ्यां शौर्यादीनामस्ति भेदः, इह [ साहित्ये ] तूभयेषां समवायेनैवात्रस्थितिरित्यभिधाय, तस्मात् गड्डरिकाप्रवाहेण [ मेषाणां गतानुगतिका पङ्क्तिगतिर्गड्डरिका, तद्वत् प्रवाहेण, अविवेकमूलमिति यावत् ] गुणा-ऽलङ्कारभेदः [ न वास्तविकः ]" इति भामहविवरणे यद् भट्टोद्भटोऽभ्यधात् तन्निरस्तम्, गुणालङ्कारयोराश्रयकृतभेदस्य पूर्वमुक्तत्वात् । किञ्च कवयः सन्दर्भेष्वलङ्कारान् प्रति व्यवस्यन्ति न्यस्यति च, न गुणान् प्रति, गुणानां नियतवृत्तिरसधर्मत्वात्, अपोद्धाराहारयोरपि वाक्यस्य पोषणदूषणाजनकत्वाच्च । तत्र शब्दालङ्कारापोद्धारो यथा—

"अलङ्कृतजटाचक्रं चारुचन्द्रमरीचिभिः ।
मृडानीदत्तदेहार्धं नमामः परमेश्वरम् ॥" [ ]

अत्र स्थितस्य द्वितीयपादेऽनुप्रासस्य 'तरुणेन्दुमरीचिभिः' इति पाठपरिवर्तनेन अपोद्धारे कृतेऽपि परमेश्वरविषयकरत्युद्बोधे विशेषाभावाद् गुणतोऽलङ्कारस्य भेदः स्पष्टः । अर्थश्चोक्तोदाहरणस्य स्पष्टः । एवमर्थालङ्कारापोद्धारो यथा—

"श्यामां स्मितासितसरोजदृशं कराग्रैरिन्दौ विभूषयति बालमृणालकल्पैः ।
आरेभिरे रचयितुं प्रतिकर्म नार्यः, कार्याणि नायतदृशोऽवसरे त्यजन्ति ॥"

[ ]

अर्थः—स्मितं-ईषत्फुल्लम्, असितसरोजं-नीलकमलमेव, दृग्-नेत्रं यस्यास्तां, श्यामां-रात्रिं, कामिनीत्वेनाध्यवसिताम्, इन्दौ-चन्द्रमसि, बालानि-अचिरोद्गतानि [ मृदूनि ], मृणालानि-बिसानि, तत्कल्पैः-तत्सदृशैः, कराग्रैः-किरणप्रान्तभागैः, विभूषयति-अलङ्कुर्वति सति, नार्यः-कामिन्यः, प्रतिकर्म-नेपथ्यालङ्कारं, रचयितुं-विधातुम्, आरेभिरे-प्रवृत्ताः, आयतदृशः-दीर्घदृष्टयः [ दूरदर्शिन्यः ], अवसरे प्राप्ते, कार्याणि-कर्तव्यानि, न त्यजन्ति-अवसरोचितकार्यकरणे सावधाना भवन्ति ॥

अत्र चन्द्रकृतस्वप्रियरात्रिभूषणरूपोद्दीपनविभावालोकनेन तासामपि रतिसमयः समीपवर्तीति विज्ञाय ता अपि तत्साधनालङ्कारादिकर्मणि प्रवृत्ता इत्ययमर्थो दूरदृशामवसरोचितकार्यकरणस्वरूपेण सामान्येन समर्पित इत्यर्थान्तरन्यासोऽल

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ङ्कारः । द्वितीयचरणे च 'बालमृणालकल्पैः' इत्युपमालङ्कारः, तस्य परित्यागाय तत्स्थाने 'केलिचकोरलेह्यैः' इति परिवर्तने कृतेऽपि प्रस्तुतशृंगाररसस्य न पुष्टिर्न वा दूषणम् ।

अर्थालङ्कारस्याहरणं [ सन्निवेशो ] यथा पूर्वोदाहृत [ दशमे शिक्षालक्षणसूत्रे "पर्वतमात्रे रत्नानि यथा" इति निरूपणोक्त– ] "नीलाश्मरश्मि०" इति पद्यद्वितीयचरणान्ते 'तटान्तरेषु' इत्यपनीय तत्स्थाने 'मृगाक्षि सानौ' इति परिवर्तनेनोपमालङ्काराहरणेऽपि न कश्चिद् विशेष इति । [ मृगस्याक्षिणी इव अक्षिणी यस्या इति विग्रहे समासगतोपमा स्पष्टा ]

इत्थमलङ्काराणामपोद्धाराहारयोः कविस्वेच्छाविषयत्वं गुणानां तु न तथा संभव इति स्पष्टोऽनयोर्भेद इति नायं गड्डरिकाप्रवाह इवाविवेकनिबन्धन इति बोध्यम् । उक्तञ्च काव्यप्रकाशेऽपि "अचलस्थितयो गुणाः" इति ।

तथा "काव्यशोभायाः कर्तारो धर्मा गुणाः" [ का० सू०, अधि० ३, अ० १, सू० १ ] "तदतिशयहेतवस्त्वलङ्काराः" [ का० सू० अधि० ३, अ० १. सू० २ ] इति वामनेन यो विवेकः कृतः सोऽपि व्यभिचारी,

तथाहि—

'गतोऽस्तमर्को, भातीन्दुः, यान्ति वासाय पक्षिणः ।'

इत्यादौ प्रसाद-श्लेषसमता-माधुर्य-सौकुमार्यार्थव्यक्तीनां गुणानां सद्भावेऽपि काव्यव्यवहारस्याप्रवर्तनात्,

"अपि कान्चिच्छ्रुता वार्ता तस्यौशिष्यविधायिनः ।
इतीव प्रष्टुमायाते तस्याः कर्णान्तमीक्षणे ॥" [ ]

इत्यादौ चोत्प्रेक्षाऽलङ्कारमात्राद् विवक्षितत्रिचतुरगुणात् काव्यव्यवहारदर्शनाच्च गुणानां रसादिसद्भावे एव गुणत्वमन्यथा न, अलङ्काराणां च स्वतन्त्राऽपि स्थितिरिति व्यभिचारः स्पष्ट एवेति पूर्वोक्त एव गुणालङ्कारविवेक इति निर्णीतं विवेके ।

तत्रालङ्कारस्य रसोपकारकत्वं यथा शब्दालङ्कारस्य—

"अपसारय घनसारं कुरु हारं दूर एव किं कमलैः ।
अलमलमालि ! मृणालैरिति वदति दिवानिशं बाला ॥"

[ का० प्र० ८, ३४२ ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र रेफानुप्रासः शब्दमलङ्कुर्वन् विप्रलम्भश्रृङ्गारमुपकरोति, रेफस्य श्रृङ्गार-व्यञ्जकत्वेन विप्रलम्भश्रृङ्गारगतमाधुर्यस्योत्कर्षकत्वात्।

अर्थः—घनसारं-कर्पूरम्, [अथ च घन इव-लोहमुद्गर इव, सारः-बलं पीडाकारकं यस्य तमित्यन्तर्ध्वनिः,]

"घनं सान्द्रं घनं वाद्यं घनो मुस्तो घनोऽम्बुदः।
घनः काठिन्यसंघातो विस्तारो, लोहमुद्गरौ" ॥ [इति धरणिः]

अपसारय-दूरीकुरु, हारं-मुक्तासूत्रं, [अथ च हारयति सुखं प्राणान् वेति स्वार्थण्यन्तादच्, प्राणहारकमिति ध्वनिः], दूरे एव कुरु मा भूत् तत्सामीप्यमपि, कमलैः-सरोजैः, [अथ च जलीयमलभूतैः] किं-किमपि न कार्यम्, आलि! मृणालैः-बिसैः, अलमलं-किमपि नैव कार्यं, तानि व्यर्थान्येवेत्यवधारणार्थं द्विरभिधानम्, इति-पूर्वोक्तप्रकार-शैत्योपचारवारणपरं वाक्यं, बाला मुग्धा तथाविधदुःखासहिष्णुरिति भावः, दिवानिशं-सततम्, वदति। अत्र विरहवेदनायाः सततप्रवर्तमानत्वेन वर्णनाद् विप्रलम्भश्रृङ्गारध्वनिः।

अर्थालङ्कारस्य रसोपकारकत्वं यथा—

मनोरागस्तीव्रं विषमिव विसर्पत्यविरतं,
प्रमाथी निर्धूमं ज्वलति विधुतः पावक इव।
हिनस्ति प्रत्यङ्गं ज्वर इव गरीयानित इतो,
न मां त्रातुं तातः प्रभवति न चाम्बा न भवती ॥"

[मालतीमाधवे, अङ्कः २]

अर्थः—'माधवानुरक्ताया मालत्या लवङ्गिकां सखीं प्रत्युक्तिरियम्—[हे सखि! अद्य मम] मनोरागः-माधवविषयकश्चित्तानुरागः, अविरतं-निरन्तरं, तीव्रं यथा स्यात् तथा, विषमिव, अथवा तीव्रं विषमिव-हालाहलमिव, विसर्पति-विविधप्रकारेण सर्वतः संचरति व्याप्नोति वा; [ततोऽपि वृद्धः] प्रमाथी प्रकर्षेण मथनशीलः क्षोभकारीति यावत्, विधुतः-[वातेनोत्तेजितः] प्रज्वलितः, निर्धूमं यथा स्यात् तथा, पावक इव-अग्निरिव, ज्वलति; [ततोऽप्युत्कर्षकाष्ठां गतः] गरीयान्-अतिशयेन गुरुः [सान्निपातिकः], ज्वर इव प्रत्यङ्गं-प्रत्यवयवं हिनस्ति-तापयति; इतः कारणात्, इतः दुःसहतरानुरागजन्यदुःखात्, मां त्रातुं-रक्षितुं, तातः-पिता, न प्रभवति [नन्द-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नरूपवरान्तरानुसरणात् ], न चाम्बा-माताऽपि न प्रभवति, तयाऽपि तद्प्रतिषेधनात्; भवत्यपि न प्रभवति पित्रोः सम्मते सख्याः प्रतिषेधकत्वासंभवात्, इति। अत्र मालोपमालङ्कारो विसर्पणादेरतिशयप्राप्तिसूचनपूर्वकं विप्रलम्भशृङ्गारमतितरां पुष्णाति।

क्वचित् सतोऽपि शब्दालङ्कारस्य रसानुपकारकत्वम्,

यथा—

"चित्ते विहट्टदि टुट्टदि सा गुणेसुं सेज्जासु लोट्टदि विसट्टदि दिम्मुहेसुं।
बोलम्मि वट्टदि पवट्टदि कव्वबंधे झाणेण टुट्टदि चिरं तरुणी तरट्टी॥"

[ कर्पूरमञ्जरीसट्टके द्वितीयजवनिकान्तरे ]

[ चित्ते विघटते त्रुट्यति सा गुणेषु, शय्यासु लुठति विसर्पति दिङ्मुखेषु। वचने वर्तते प्रवर्तते काव्यबन्धे, ध्यानेन त्रुट्यति चिरं तरुणी प्रगल्भा ]

इति च्छाया,

अर्थः—दर्शनक्षणात् प्रभृति कुरङ्गाक्षी [ दंसणकरणादो पहुदि कुरंगच्छी ] इत्युपक्रम्य सा प्रगल्भा तरुणी चित्ते विघटते-विशेषेण घटिता-दृढतरं सम्बद्धा भवति;। गुणेषु न त्रुट्यति-न हीयते; शय्यासु लुठति-मुहुर्मुहुः पार्श्वपरिवर्तनं करोति, न तु स्वपिति; दिङ्मुखेषु विसर्पति-सर्वतः संचरतीति भावः; वचने वर्तते-अविरतं प्रलपतीति भावः; काव्यबन्धे प्रवर्तते-प्रवृत्ता भवति, चिरं-चिरकालं ध्यानेन-चिन्तया, त्रुट्यति-कृशा भवति॥

अत्र ट वर्गानुप्रासः शब्दालङ्कारः, स च शब्दमात्रमलङ्करोति, न तु सन्तमपि विप्रलम्भशृङ्गारं रसं, टवर्गानुप्रासस्य तत्प्रतिकूलत्वात्।

एवमर्थालङ्कारस्यानुपकारकत्वं यथा—

"मित्रे क्वापि गते सरोरुहवने बद्धानने ताम्यति,
क्रन्दत्सु भ्रमरेषु वीक्ष्य दयितासन्नं पुरः सारसम्।
चक्राह्वेन वियोगिना बिसलता नास्वादिता नोज्झिता,
कण्ठे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः॥" [ प्रकीर्णकम् ]

अर्थः—सन्ध्याकालिकचक्रवाकचेष्टावर्णनमिदं-मित्रे-सूर्ये, सुहृदि च, क्वापि अज्ञातरूपे देशविशेषे गते सति, [ एतेन मित्रस्य प्रतिकर्तुरभावः सूचितः ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र रसोपकारप्रकारानाह—

**तत्परत्वे काले ग्रह-त्यागयोर्नातिनिर्वाहे निर्वाहेऽप्यङ्गत्वे रसोपकारिणः ॥ १४ ॥**

सरोरुहवने–कमलवने, [सरोरुहेत्यनेकदेशवासेन सहवासित्वं सूचितम्, बद्धानने-मुद्रिते मौनिनि च सति, ताम्यति–शोकात् तप्यमाने सति, [एतेन सहवासिनां प्रतिकाराभावः सूचितः] भ्रमरेषु–भृङ्गेषु, भ्रमं रान्तीति व्युत्पत्त्या पान्थेषु च, क्रन्दत्सु–शब्दायमानेषु रुदत्सु च सत्सु, [अनेन क्रन्दज्जनान्तर-दर्शनेन दुःखातिरेकः सूचितः] पुरः–अग्रे, कान्तया–दयितया [सारस्या]-आसक्तं–युक्तं, सारसं–पक्षिविशेषं रसिकं च वीक्ष्य–अवलोक्य, [अनेन नायि-कासक्तनायकान्तरदर्शनेन विप्रलम्भोद्दीपनम्], वियोगिना–चक्रवाकीविच्छेदवता [सन्ध्याकालिकचन्द्रोदयेन चक्रवाकमिथुनविच्छेदस्य कविसमयप्रसिद्धत्वात्] चक्राह्वेन–चक्रवाकपक्षिणा, बिसलता–मृणालवल्ली, नास्वादिता–न भुक्ता, नोज्झिता–न च त्यक्ता, [किन्तु] केवलं निर्गच्छतः–निर्गन्तुमिच्छतः, जीवस्य–जीवनस्य, अर्गलेव–द्वाररोधककाष्ठमिव, कण्ठे–गले, निहिता–स्थापिता ॥

अत्रोपमाऽर्थालङ्कारः, न चासौ प्रकृतस्य शृङ्गारस्योपकारिका, विप्रलम्भे हि जीवनिर्गमोऽपि वर्ण्यते—तदुत्कर्षाधायकत्वात्, इति तन्निरोधहेतूपपादनमनुचितं, प्रत्युत स्नेहाभावे पर्यवस्यति । केचिदत्रोपमायामावश्यकस्य बिसलतायां कवि-विवक्षितस्य जीवनिर्गमप्रतिबन्धकत्वरूपस्य, सादृश्यस्याभावात्, सा नेत्यत्रो-त्प्रेक्षालङ्कार इत्याहुः, तस्याः संभावितसादृश्येनापि प्रवृत्तेः, सादृश्योत्प्रेक्षाया अपि उपमोक्तन्यायेन प्रकृतरसापकर्षकत्वस्य सत्त्वमिति च कथयन्ति । एतावता प्रदर्शितेन प्रबन्धेनालङ्कारस्यानिश्चितोत्कर्षकापकर्षकत्वेन स्पष्टो गुणाद् भिन्नः स्वभाव इति स्पष्टम् ॥ १३ ॥

पूर्वं सूत्रेऽलङ्काराणामङ्गाश्रितत्ववर्णनपूर्वकं तेषां क्वचिद् रसोपकारकत्वं क्वचि-दनुपकारकत्वं, रसाभावे च वाच्यवाचकवैचित्र्यमात्रकारकत्वमित्युपपादितं, तत्र क्रमशस्त्रयमपि प्रदर्शयितुं प्रथमं रसोपकारकत्वं वर्णयितुं प्रवृत्तं सूत्रमवता-रयति–तत्र **रसोपकारप्रकारानाहे**ति–कथमुपनिबद्धा अलङ्कारा रसमुप-कुर्वन्तीति तस्य प्रकारान्–भेदान्, आह–व्याचष्टेऽनेन सूत्रेणेति भावः । **तत्परत्वे** स–प्रधानीभूतो ध्वनिगम्यो रसः, परः–पोषयितुमिष्टो येषां ते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अलङ्कारा इति वर्तते । तत्परत्वं-रसोपकारकत्वेनालङ्कारस्य निवेशो, न बाधकत्वेन नापि ताटस्थ्येन, यथा—**

---

तत्परास्तेषां भावस्तत्परत्वं, तस्मिन् सतीत्येकः प्रकारः; **काले ग्रह-त्याग-योरिति**-ग्रहणं-ग्रहः, त्यजनं-त्यागः, ग्रहश्च त्यागश्च ग्रह-त्यागौ तयोः, काले-यत्रावसरे यस्य ग्रहणमुचितं तत्र ग्रहे, यत्र च यस्य त्याग उचितस्तत्र तत्त्यागे च सतीति प्रकारद्वयमिति प्रथमेन मिलितास्त्रयः, [ अलङ्काराणामिति चोभयत्र सम्बन्धनीयम् ]; **नातिनिर्वाहे** रसनिर्वहणैकतानहृदयस्य कवेरलङ्काराणां निर्वाहार्थमनतिप्रयत्नकरणे, इत्येकः प्रकारः, पूर्वैस्त्रिभिः सह चतुर्थः; **निर्वाहेऽप्यङ्गत्वे** कृतेऽप्यलङ्कारनिबन्धने रसापेक्षया तस्याप्राधान्ये, इत्ययमेकः प्रकार इति पूर्वैश्चतुर्भिः सहाऽयं पञ्चम इति पञ्चप्रकारास्तस्य-[ अलङ्काराणां रसोपकारकत्वस्य ] इति सूत्रार्थः । तदित्थं विशकलिताः पञ्च प्रकाराः—

१ रसस्य प्राधान्ये तदुपकारकतयैवालङ्कारस्योपनिबन्धः ।

२ अङ्गत्वेन विवक्षितस्यापि अलङ्कारस्य सत्येवावसरे ग्रहणं नानवसरे ।

३ गृहीतस्याऽप्यलङ्कारस्य तद्रसानुगुणतयाऽलङ्कारान्तरापेक्षया काले त्यागः ।

४ रसनिर्वहणैकतानत्वे तन्निर्वाहेऽनतिप्रयत्नः ।

५ अलङ्कारोऽयमुपनिबध्यमानो रसापेक्षया प्राधान्यं मा गमदिति सतर्कस्य कवेः प्रयासेन तस्याङ्गभाव इति । उक्तं चैतदानन्दवर्धनाचार्येणापि ध्वन्यालोके–

"विवक्षा तत्परत्वेन नाङ्गित्वेन कथञ्चन ।
काले च ग्रहण-त्यागौ नातिनिर्वहणैषिता ॥
निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणम् ।
रूपकादेरलङ्कारवर्गस्याङ्गत्वसाधनम् ॥

इति [ ध्वन्या० उ० २, का. ४२ ]

सूत्रार्थं सोदाहरणं व्याख्यातुमुपक्रमं कुर्वन् सूत्रेऽदृष्टस्यावश्यकस्य पदस्य सूत्रान्तरादनुवृत्तिमाह–**अलङ्कारा इति वर्तत** इति–पूर्वसूत्रात् "अङ्गाश्रिता अलङ्काराः" इत्यतः 'अलङ्काराः' इति पदमनुवर्तत इत्यर्थः । '**तत्परत्वे**' इत्यस्यार्थमाह–**रसोपकारकत्वेनालङ्कारस्य निवेश** इति । नन्वलङ्कारश्चेदुपनिबद्धस्तर्हि रसोपकारकः स्यादेव, तस्यैवालङ्कार्यत्वादिति चेदत आह–**न बाधकत्वेनेत्यादि**–अलङ्कारोपनिबन्धः सर्वत्र रसोपकारक एव न भवति, क्वचित् तस्य बाधकत्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं,
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकगतः।
करौ व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं,

स्यापि दृष्टत्वात् तथात्वे ताटस्थ्येनौदासीन्येन चोपनिबन्धे नोपकारकत्वमिति भावः, बाधकत्वं च रसान्तरानुभवसामग्रीसाधनेन प्रकृतरसक्षतिसाधकत्वम्, ताटस्थ्यं च प्रकृतरसपरिपुपोषयिषाविरहेणालङ्कारविन्यासप्रयासविकलकविकृतिनिष्ठरससामग्रीवैधुर्यम्। तत्राङ्गत्वेन निवेशो यथा–चलापाङ्गामिति। शकुन्तलामवलोक्याङ्कुरिताभिलाषो दुष्यन्तः–अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा स्यात्, अथवा कृतं सन्देहेन,

"असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः॥"

[अ० शा० १,१९]

तथापि तत्वत एनामुपलप्स्ये" इति विचारयन् शकुन्तलाया भ्रमरकृतबाधामवलोक्य सस्पृहमिदमाह—

"हे मधुकर! भ्रमर! त्वं [शकुन्तलाया अस्मदभिलषितसङ्गमायाः] चलौ–विलासवशात् तरलौ, अपाङ्गौ–पर्यन्तौ यस्यास्तां, वेपथुमतीं त्वत्स्पर्शसंजातसंत्रासजनितकम्पतया विधुरितस्थितिम्, तथा च मुग्धताभिव्यक्तेः शोभातिशायिनीं प्रवातकम्पितनीलोत्पलसदृशीमिति च व्यज्यते, दृष्टिं नयनम् बहुशः अनेकवारं, स्पृशसि; तथा रहस्यं–गोपनीयं किमपि वस्त्वाख्याति तच्छीलो रहस्याख्यायी, तद्वत् कर्णान्तिके कर्णयोः समीपप्रदेशे, चरति गच्छतीति तथाभूतः सन्, मृदु कोमलम्, अतश्च प्रियमपि, स्वनसि ध्वनिं करोषि; किमपि तां श्रावयितुमिव कर्णाभ्यासमास्से; करौ हस्तद्वयं, न तु करम्, व्याधुन्वत्याः कम्पयन्त्याः, एतेन सम्भ्रमाधिक्येन तदधरपानस्यासुकरत्वमुक्तम्, रतिसर्वस्वं रतिनिधानभूतम्, अधरं न त्वोष्ठम्, पिबसि आस्वादयसि, न तु यथाकथञ्चित् स्पृशसीति भावः, तेन च तदधरपानावधिसुखसमुदय इति तस्यातिपुण्यजन्यत्वं व्यङ्ग्यम्, एवं च वयं तत्त्वान्वेषात् यथार्थतः, इयमस्मदुपभोग्या न वा, सत्यां च तथाभूतायां सङ्गमोपायः कः, स्वतन्त्रा परतन्त्रा वेयमिति तत्त्वस्यान्वेषणपारवश्यात्, हता असंप्राप्तसमागमाः प्रति हताशाः, त्वं यदस्याः सकलं वल्लभवृत्ता-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वयं तत्त्वान्वेषान्मधुकर! हतास्त्वं च सुकृती ॥
[अ० शा० अं० १. श्लो. २०]

अत्र भ्रमरस्वभावोक्तिरलङ्कारो रसपरत्वेनोपनिबद्धो रसोपकारी।

न्तमाचरसीत्यतः सुकृती पुण्यवान् कृतकृत्यो वा, । अयमाशयः–वयमेतद्विषयतर्कवितर्कपतिता एतावत्कालपर्यन्तमप्यप्राप्तैतत्समागमाः प्रतिहताशा एव, त्वं च चञ्चलनीलोत्पलभ्रान्त्याऽपि चलापाङ्गां दृशं स्पृशसीत्यस्माकमभिलाषतः परिचुम्बनप्रवृत्तानां तरलनयनप्रान्तपरिचुम्बनसमये समुचितं नयनस्पर्शविधानं भवताऽनुष्ठितम्; तथा लोचनकुवलयस्पर्शनिवृत्तः स्वजातिसमुचितकमलकोशनिलयमभ्यासेन कर्णकुहरं प्रवेष्टुमभिलषन् यत् तन्निकटवर्ती प्रियं मधुरं च स्वनसि तत् किल नयनप्रान्तचुम्बनाभिमुखीकृतकान्ताकर्णोपान्तनिवेशितमुखानामस्माकमुचितं तदवसरोचिताभिप्रायनिवेदनपरतया रहोवृत्तान्ताख्यानमनुष्ठितं भवता, किञ्च नयनस्पर्श-कर्णान्तोपान्तस्वनव्यापृतोऽशङ्कितोपलब्धसुगन्धिमुखनिःश्वासामोदाघ्राणजातपद्मबुद्धिस्तदधरपल्लवोपरि निवेशोत्सुकमतिर्दंशभयाद् विधूनितपाणिपल्लवायास्तद्वञ्चनपूर्वकमधरोपविष्टो रतिविषयेऽधरास्वादस्य सारभूततया, तत्सर्वस्वभूतमधररसपानमनुभवसीत्यस्मत्कृत्यमेतदपि त्वयैव सम्पादितमिति कृतातिशयपुण्योपचयः सुकृती खलु । अत्र केचित् प्रथमे पादे 'चलापाङ्गं दृष्टः स्पृशसि' इति परिवर्तनं कृत्वा "आदौ वाच्यः स्त्रिया रागः पुंसः पश्चात् तदिङ्गितैः" इति कविसमयानुरोधेन नायिकाकृतचलापाङ्गविशिष्टदर्शनविषयीभूतस्य तस्य तत्स्पर्शरूपस्पृष्टकालिङ्गनकारित्वमुचितमिति कथयन्ति, किन्तु एवमेव सर्वत्र प्राचीनपाठोपलम्भात् तत्र स्वकल्पितपाठनिवेशनमनुचितम् । किञ्च तस्य भ्रमस्य हठकामुकत्वारोपविषयतया तत्र शास्त्रीयनियमोल्लङ्घनमपि स्वभावानुकूलमेव । अत्र यद्यपि त्वं कृतीत्यत्र चरणत्रयं हेतुत्वेनोपात्तमिति काव्यलिङ्गम्, त्वमेव कृती वयं हता इत्यस्मदपेक्षया त्वं श्रेष्ठ इति व्यतिरेकश्च, तथापि भ्रमरस्वभावोक्तेरेव प्रकृतरसानुकूलतया स एवालङ्कारोऽत्र कविना रसपरत्वेनोपनिबद्ध इति रसोपकारक इति स्वमतमाह–अत्र **भ्रमरस्वभावोक्तिरलङ्कारो रसपरत्वेनोपनिबद्ध** इति–"स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्" [काव्य० उ० १०, का० १११] इति लक्षितस्वभावोक्तिनामाऽलङ्कारः, स्वमते यद्यपि "स्वभावाख्यानं जातिः" [काव्या० शा० अ० ६,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बाधकत्वेन यथा—

"स्रस्तः स्रग्दामशोभां त्यजति विरचितामाकुलः केशपाशः,

सू. १५] इति सूत्रेण जातिशब्देन व्यवह्रियते, तथापि बहुतरप्रसिद्धनाम्नाऽर्थतो वा स्वभावोक्तिपदेन कथनमिति बोध्यम्। ध्वन्यालोकेऽपि द्वितीयोद्योते "अत्र स्वभावोक्तिरलङ्कारो रसानुगुणः" इत्युक्तम्। केचित्तु–'वस्तुतोऽत्र न स्वभावोक्तिरलङ्कारः स्वस्यासाधारणधर्मस्य वर्णन एव तदलङ्कारस्वीकारात्, नह्यत्रभ्रमरस्यासाधारणो धर्मः कश्चिदुपनिबद्धः, चलापाङ्गादिस्पर्शस्य तथाभूतत्वाभावादिति व्यतिरेकालङ्कार एवाङ्गिकचमत्कारभूमिरिह' इत्याहुः, वृत्तौ 'भ्रमरस्वभावोक्ति'-शब्दे च भ्रमरस्य स्वभावे उक्तिर्यस्येति व्यधिकरणबहुव्रीहिमाश्रित्य समस्तस्य पदस्य व्यतिरेकपरत्वमवगच्छन्ति। यच्च केचिदिहाद्यांशे रूपकालङ्कारमप्याहुः, तन्न शोभनम्–भ्रमरे हठकामुकव्यवहारस्य समासोक्तिकारणभूतस्य स्पष्टं प्रतीयमानत्वेन रूपकासंभवात् कुत्राऽपि तादात्म्यारोपाप्रतीतेश्च, समासोक्तिस्तु तथा सम्भवन्त्यपि स्वभावचमत्कारनिर्देशमुखेनैवात्र माधुर्योपलब्धिरिति पश्चात् क्रियते, व्यतिरेकोऽपि न प्रकृतरसस्य तथोपकारको यथा स्वभावोक्तिः। न च भ्रमरासाधारणधर्मस्यानुल्लेखान्न स्वभावोक्तिसंभव इति वाच्यम्, पद्मपरिचुम्बनादेस्तत्स्वभावत्वेन पद्माकाराक्षिकर्णमुखादिसम्पर्कात् तस्यासाधारण एव स्वभावो व्यञ्जनया गम्यते, किन्त्वलङ्कारो रसापेक्षया गुणीभूत इति रसाङ्गतां–रसानुगुणतां गतः। अत्र वयमिति बहुवचनेन सकलसुखसाधनस्वामित्वकृत आदर आत्मनि व्यक्तः, अस्मच्छब्दश्च आसमुद्रक्षितिपतित्व-पुरुवंशोत्पन्नत्व-विविधाभिलाषचाटुकप्रवणत्वादिरूपार्थान्तरसंक्रमितवाच्यः। त्वमित्यत्रैकवचनेन चास्फुटज्ञानत्वेन तस्य निकृष्टत्वं बोधयति, युष्मच्छब्दश्च स्फुटज्ञानराहित्याद्यर्थान्तरसंक्रमितवाच्यः, इत्याद्यभिज्ञानशाकुन्तलटीकाकृद्भिर्व्याख्यातम्॥

अलङ्कारस्य बाधकत्वेन निवेशो न रसानुगुण इति पूर्वमुक्तमुदाहरति–बाधकत्वेन यथा–'स्रस्तः स्रग्दामशोभामिति।

अर्थः—नायको वत्सराज उपवनोपविष्टो मदनमहोत्सवप्रसङ्गे नृत्यन्त्यौ चेट्यौ दृष्ट्वा [निर्वर्ण्य] अहो मधुरोऽयमासां निर्भरः क्रीडारसः, तथा हि–स्रस्त इत्याद्याह। अस्याः क्रीडन्त्याः क्षीबायाः मत्तायाः स्रस्तः विगलितबन्धनः, अत एव आकुलः विलुलितः, अस्तव्यस्तभावेन वर्तमानः, केशपाशः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षीबाया नूपुरौ च द्विगुणतरमिमौ क्रन्दतः पादलग्नौ ।
व्यस्तः कम्पानुबन्धादनवरतमुरो हन्ति हारोऽयमस्याः
क्रीडन्त्याः पीडयेव स्तनभरविनमन्मध्यभङ्गानपेक्षम् ॥"
[र० अं० १ श्लो. १६]

अत्र पीडयेवेत्युत्प्रेक्षालङ्कारोऽङ्गी संस्तदनुग्राहकश्चार्थश्लेषः करु-

कचराशिः, विरचितां विन्यासविशेषापादनेन रमणीयतां नीतां, स्रग्दाम-शोभां मालाश्रियं, त्यजति वेणीरूपेण बद्धस्य केशसमूहस्य शोभासम्भार-माधातुं विन्यस्तैर्नानावर्णाकृतिभिः पुष्पैर्यथावन्माल्यश्रीः समुत्पादिताऽऽसीत्, सा प्रचलचरणं नृत्यन्त्यास्तस्या अनिश्चितस्थलपातिचरणकृतकम्पनेन विघटितेति मालाश्रीर्हीनेति तात्पर्यम्; इमौ पादलग्नौ-नृत्यवशात् त्रुटितसन्धिकावपि तत्प्रेम्णा तस्यागमनिच्छन्तौ, अत एव पादयोः सक्तौ, नूपुरौ च, द्विगुणतरं माऽऽवां त्यजतमित्यभ्यर्थनयेव बहुतरं, क्रन्दतः रुदतः, कम्पानुबन्धात् चलनसातत्यात्, व्यस्तः स्थानान्तरं प्राप्तः, अयमस्याः, हारः-मौक्तिकमाला, अनवरतं सततम्, उरः वक्षःस्थलं, हन्ति ताडयति, उत्तालं नृत्यन्त्या हार उच्छलितोच्छलितः पततीति ताडयन्निव लक्ष्यते इति भावः, क्रीडन्त्या इत्युक्तं नृत्यम्, तत्स्वरूपं परिचाययितुं क्रियाविशेषणमाह-पीडयेवेत्यादि-नृत्यजनि-तसंचारकृत [भारगौरवसमेधित] खेदेन, स्तनभरेण विनमतः-वक्रतामुपगच्छतः, मध्यस्य-कटिप्रदेशस्य, भङ्गस्तदनपेक्षं तदनादृत्य यथा स्यात् तथा क्रीडन्त्याः; प्रचलचरणपातं नृत्यन्त्या मे स्तनभरेण मध्यदेशो भज्यत इति भीतिमपहाय नृत्यमाचरन्त्या इत्यर्थः ॥ अत्र कथमलङ्कारस्य प्रकृतरसबाधकत्वमिति विवृणोति-अत्र पीडयेवेत्युत्प्रेक्षालङ्कारोऽङ्गीत्यादिना-पीडयेवेत्यनेन हेतुरुत्प्रेक्ष्यत इत्युत्प्रेक्षालङ्कारः स च श्लेषापेक्षया प्रधानमित्यङ्गी, तदनु-ग्राहकः-तत्सम्पादकः, अर्थश्लेषः, स च आकुलः-अस्तव्यस्तः अन्यत्र व्यग्रश्च, पादलग्नौ-चरणपरिहितौ, प्रसादनार्थं चरणमाश्लिष्यन्तौ च, हन्ति-ताड-यति, पातेन व्यथयति, अनभीप्सितकारितादण्डरूपं ताडनं वा करोतीत्यर्थः, श्लेषो हि पीडयेत्यस्य पुष्टिं विदधाति, एतौ चालङ्कारौ करुणरससमुचितान् विभा-वादीन् उपस्थापयतः, "इष्टनाशादनिष्टाप्तेः करुणोदयदर्शनात्" । आकुलस्य केशपाशस्य क्रन्दतोर्नूपुरयोः हन्यमानस्योरसश्च शोच्यत्वेन करुणालम्बनत्वमेव । एतादृशविपरीतसामग्रीसमुपस्थापकाविमौ हेतूत्प्रेक्षाऽर्थश्लेषालङ्कारौ नायिकाविषय-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णोचितान् विभावानुभावान् संपादयन् बाधकत्वेन भातीति न प्रकृतरसोपकारी।

ताटस्थ्येन यथा—

"लीलावधूतपद्मा कथयन्ती पक्षपातमधिकं नः।
मानसमुपैति केयं चित्रगता राजहंसीव॥"

[र० अं० २. श्लो. ८]

फलहकलिखितसागरिकाप्रतिबिम्बदर्शनाभिजाताभिलाषस्य वत्सराजस्येयमुक्तिस्तटस्थस्येव कविनोपरचितेति श्लेषानुगृहीतोप-

कानुरागिनायकहृदये समुद्यतोऽनुरागस्य वर्णनया। सामाजिकहृदयेषु समुद्भवतः शृङ्गारस्य प्रतिपक्षिणाविति बाधकत्वेनैव भातः, प्रकृतस्य शृङ्गारस्य करुणेन सह विरोधात्। यद्यपीष्टनाशादिविभावस्य करुणरसस्य सामग्री नात्र समवैति, नाल्पीयसा सुखविगमेनेष्टनाशसद्भावोऽपि तु यत्रात्यन्तिकः प्रियविगमः [मरणजन्यः] तत्रैवास्योद्भवः, इतीह करुणरसस्य स्थायिभूतः शोको न प्राप्तप्रकर्ष इति तस्येहासम्भवस्तथापि परकीयदुःखदर्शनजन्मनः खेदस्य शोकप्रथमस्वरूपता, स चोद्बुद्ध इति स्थायितामनापन्नोऽपि भावतया तिष्ठन् शृङ्गारप्रतिकूल एवेति बोध्यम्॥

**ताटस्थ्येन** नोपकारकत्वेन न बाधकत्वेन वाऽलङ्कारनिवेशो यथा–**लीले**त्यादि।

अर्थः–नायको वत्सराजः कदलीगृहाभ्यन्तरमिलिते चित्रफलके आत्मना सहाभिलिखितां सागरिकां पश्यन्नाह–**लीलावधूते**त्यादि–लीलया–विलासेन, अवधूतं पद्मं करावस्थितकमलं यथा, अन्यत्र लीलया–शरीरशोभया, अवधूता–तिरस्कृता, पद्मा–लक्ष्मीर्यया सा, **नः** अस्मद्विषये, अधिकं पक्षपातं–स्नेहकृतं भावातिशयं, **कथयन्ती** प्रकटयन्ती, **चित्रगता** प्रतिकृतिलिखिता, **का इयम्** अज्ञातनामरूपा राजहंसीव, नः **मानसं** हृदयम्, **उपैति** प्रविशति, राजहंस्यपि लीलया–गतिविलासेन, तत्कृतकम्पेन कमलमवधुनोति, पक्षयोः–पक्षावयवानां वा पातमपि कथयति, गमनसमये पक्षाणां पातं प्रकटयति, मानसं–हृदयं तदाख्यं सरश्चोपैतीति॥ अत्र श्लोकार्थज्ञानाय तत्रत्यं प्रकरणमाह–**फलहकलिखिते**त्यादि–**वत्सराजस्येयमुक्ति**रित्यन्तं–फलहके चित्रफलके, लिखितं सागरिकायाः–सागरिकात्वेन ख्याताया रत्नावल्याः, प्रतिबिम्बस्य–प्रतिकृतेर्दर्शनेन, अभिजातः–तां प्रति प्रवृत्तः, अभिलाषः–तत्प्राप्तीच्छा यस्य तस्य वत्सराजस्य तत्रत्यनायक-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मालङ्कारप्राधान्येन प्रस्तुतो रसो गुणीकृतोऽपरिजिघटिषया। अङ्गत्वेऽपि कालेऽवसरे ग्रहणं यथा—**

**"उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणा-**
**दायासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः।**

---

स्योदयनस्योक्तिरियमित्यर्थः। अलङ्कारस्य ताटस्थ्येनोपनिबन्धं वर्णयति **तटस्थस्येव कविनोपरचितेति**—अयमाशयः—वत्सराजस्य तदनुरक्तस्येव नेयमुक्तिः कविना निबद्धा, अपि तु, उदासीनस्य कस्यचन किमपि चित्रं दृष्ट्वा यथोक्तिः सम्भाव्यते तेन रूपेणेव, इति हेतोः, **श्लेषानुगृहीतोपमालङ्कारप्राधान्येनेति**—श्लेषसहकृतेनोपमालङ्कारेण प्रधानतां भजमानेन, **प्रस्तुतः** प्रकृतः, **रसः** सम्भोगशृङ्गारः, गुणीकृतः अप्राधान्यं गमितः। कुत इति चेदत्राह—**अपरिजिघटिषयेति**—तादृशं रसं परिघटयितुमिच्छाया अभावेन। अयमाशयः—अत्र राजहंसीवेत्युपमालङ्कारो लीला-पद्म-पक्षपात-मानस-शब्दैः श्लिष्टैः परिपोषित इति तत्रैव कवेः परिजिघटयिषा, प्रकृतो रसस्तु तदा परिजिघटयिषितोऽनुभूयेत यदि राज्ञो मुखाद् गाढानुरागसूचकशब्दावली निःसारिता स्यात् कविना, तत्तु न कृतमिति तटस्थतया राजाऽत्र वक्तीति दर्शितमिति न रसपरिपोष इति ताटस्थ्येन रसानुपकारकोऽलङ्कार इति बोध्यम्। केचित्तु 'नः' इति पदेन तत्र चित्रफलके राज्ञोऽप्यभिलिखिततया चानुरागः सूच्यत एवेति कथमिह ताटस्थ्यमिति शङ्कन्ते, तन्न—केयमिति पदेन साम्प्रतमपि सा राज्ञोऽपरिचितेति प्रतिपादयताऽपरिचितायामनुरागस्यासम्भवः सूचित इति ताटस्थ्यमक्षतमेव॥

अङ्गत्वेऽपि रसाऽपेक्षयाऽप्राधान्येऽपि **काले ग्रहणम्** अवसरे निबन्धो यथा—**उद्दामोत्कलिकामित्यादि।**

अर्थः—अकालकुसुमजनकदोहदेन प्रफुल्लां नवमालिकां पश्यन् राजा वत्सराजः प्राह—उद्दामा—बहवः, उद्गताः कलिका यस्यास्तां, पक्षे समधिकोत्कण्ठां, विपाण्डुरा—पीता, रुक्—कान्तिर्यस्याः, एकत्र परिपाकेन, अन्यत्र विरहेण, क्षणात् तस्मिन्नेवावसरे, प्रारब्धा जृम्भा पुष्पाणां विकासो यया, अन्यत्र मन्मथोद्रेककृतोऽङ्गमर्दो यस्यास्ताम्, अविरलैः अविच्छिन्नैः, श्वसनोद्गमैः वसन्तमारुतोल्लासैः, **आत्मनः** लतालक्षणस्य, **आयासं** आयासनमान्दोलनायत्तम्, अन्यत्र निःश्वासपरम्पराभिश्चात्मन आयासं हृदयस्थितं सन्तापम्,। **आतन्वतीं** प्रकटी-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं
पश्यन् कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहम् ॥५५॥"
[र० अं० २. श्लो. ४]

अत्रोपमा तदनुग्राहकश्च श्लेष ईर्ष्याविप्रलम्भस्य भाविनश्चर्वणा-

कुर्वाणाम्, समदनां सह मदनेन–मरुबकवृक्षेण वर्तत इति समदना ताम्, अन्यत्र सकामाम्, **अन्यां** तदतिरिक्तां, **नारीमिव** कामिनीमिव, इमाम्, उद्यानलतां पश्यन्, अहं वत्सराज उदयनः, देव्याः वासवदत्तायाः मुखं, कोपेन विपाटला–विशेषेण रक्ता, द्युतिः–कान्तिर्यस्यास्तथा, ध्रुवं निश्चितं, करिष्यामि॥ अत्र ध्रुवशब्दो भाविन्या ईर्ष्याया अवकाश–दाने जीवितमिव विन्यस्तः। अत्र लतादर्शनेन परकामिनीदर्शनकृता ईर्ष्या नायिकाहृदये कथमपि नोदेतुं शक्नोतीति विवेके तदुपपादनाय तत्रत्य प्रसङ्ग इत्थं वर्णितः—

"वासवदत्तापरिगृहीता नवमालिकालता सम्प्रति न फुल्ला, माधवीलता तु मत्परिगृहीता फुल्लेति तद्दर्शनादीर्ष्यावशेन विपाटलद्युति मुखमहं देव्याः करिष्यामि" इति। यद्यपि तत्रत्यपूर्वापरपर्यालोचनया नवमालिकालतैव राज-परिगृहीता, माधवीलता देवीपरिगृहीतेति लभ्यते तथा–हि–प्रथमेऽङ्के 'निपुणिका' कथं सुसंगता, हला सुसंगमे सुष्ठु त्वयाज्ञातम्, एतत् खलु विस्मयस्य कारणम्। अद्य किल भर्ता श्रीपर्वतादागतस्य श्रीखण्डदासनामधेयस्य धार्मिकस्य सकाशाद-कालकुसुमसंजननदोहदं शिक्षित्वाऽऽत्मनः परिगृहीतां नवमालिकां कुसुमसमृद्धि-शोभितां करिष्यतीति [प्राकृतस्य च्छाया] ततो द्वितीयेऽङ्के–विदूषकः साधु रे श्रीखण्डदास धार्मिक साधु। येन दत्तमात्रेणैव तेन दोहदकेनेदृशी नवमालिका संवृत्ता। येन निरन्तरोद्भिन्नकुसुमगुच्छाच्छादितविटपा उपहसन्तीव लक्ष्यते देवी परिगृहीता माधवीलता। इति प्राकृतस्य च्छाया। एतेन सन्दर्भेण च विवेकोक्त-विपरीतं [नवमालिका राजपरिगृहीता, माधवी देवीपरिगृहीतेति] लभ्यते, इति स्पष्टमेव, तथापीर्ष्याकारणं–राजपरिग्रहीभूतलताया विकास एवेत्येतावत् तात्पर्यं तस्य ग्रन्थस्येत्यवसेयम्। 'अऋत्वेऽपि काले ग्रहणमित्यस्योदाहरणतां संगमयति—**अत्रोपमा तदनुग्राहकश्च श्लेष** इत्यादिना–नारीमिवेत्युपमा, तदनुग्राहकः–तत्परिपोषकः, उत्कलिकाजृम्भाऽऽयासादिशब्ददेष्वर्थश्लेष ईर्ष्याविप्रलम्भस्य शृङ्गाररसभेदस्य मानविप्रलम्भान्तर्गतस्येर्ष्यामानस्य **भाविनः** करिष्यामीति शब्देन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिमुख्यं कुर्वन्नवसरे रसस्य प्रमुखीभावदशायामुपनिबद्ध उपकारी। न त्वेवं यथा—

"वाताहारतया जगद्विषधरैराश्वास्य निःशेषितं,
ते ग्रस्ताः पुनरभ्रतोयकणिकातीव्रव्रतैर्बर्हिभिः।
तेऽपि क्रूरचमूरुचर्मवसनैर्नीताः क्षयं लुब्धकै-
र्दम्भस्य स्फुरितं विदन्नपि जनो जाल्मो गुणानीहते॥"

[भ० श० ८७]

---

भावितया प्रतीतस्य, ईर्ष्यामानलक्षणञ्च—"पत्युरन्यप्रियासङ्गे दृष्टेऽथानुमिते श्रुते। ईर्ष्यामानो भवेत् स्त्रीणाम्" इति साहित्यदर्पणे तृतीयपरिच्छेदे [२०६] लक्षितः; **चर्वणाभिमुख्यं कुर्वन्निति**–भाविनोऽपि शब्दव्यापारमहिम्ना चर्वणविषयतां सम्पादयन्, **अवसरे** इति पदं स्वयमेव विवृणोति—**रसस्य प्रमुखीभावदशायामिति**–ईर्ष्याविप्रलम्भाख्यस्य रसस्यारम्भावस्थायामिति भावः। **उपनिबद्धः** श्लेष इति पूर्वोक्तविशेष्यार्थे निवेशितः, **उपकारी** परिपोषकः। अत्रत्य उपमालङ्कारः श्लेषालङ्कारश्च तस्य रसास्वादनोन्मुखतायां कारणत्वं गतौ भाविनमीर्ष्याविप्रलम्भाख्यं रसमुपकुरुत इति भावः॥

अवसरे ग्रहणमुदाहृत्यानवसरे ग्रहणं वर्जयति–**न त्वेवं यथेति**। यथाऽग्रिमश्लोकेऽनवसरेऽलङ्कारग्रहणं तथा ग्रहणे नोपकारी इति सम्बन्धः। **वाताहारतयेति–विषधरैः** सर्पैः, **वाताहारतया** वायुमात्रभक्षणव्रतधारितया, **आश्वास्य** सर्वेषां विश्वासमाविर्भाव्य, **जगत्, निःशेषितं**–नाशितम्, वायुभक्षा वयमिति लोकान् प्रतार्य तैः कटुदंशनैर्मार्यन्ते इति भावः; **ते विषधराः, पुनरिति** वाक्यालङ्कारे, **अभ्रैः**–मेघैर्मुक्ताः, **तोयकणिकाः**–जलबिन्दवस्तेषां पानमेव, **तीव्रं**–कठिनं, **व्रतं**–कष्टसाध्यमनुष्ठानं येषां तैः, **बर्हिभिः** मयूरैः, **ग्रस्ताः** गिलिताः, जगति जलधरमुक्तजलबिन्दुमात्राशना वयमिति स्वं रूपं प्रख्याप्येमे सर्पा अपि मयूरैर्भक्षिताः; **तेऽपि** मयूरा अपि, **क्रूरं**–कठिनं, **चमूरोः**–चित्रमृगस्य, **चर्म**कृत्तिः, **वसनं**–वस्त्रं येषां तैः, **लुब्धकैः** व्याधैः, **क्षयं नीताः** नाशिताः, चर्ममात्रपरीधाना वयमिति निर्लोभत्वं सात्त्विकत्वं वाऽऽत्मनः प्रख्याप्येमे मयूरा व्याधैर्मारिताः। इति पादत्रयोक्तार्थसमर्थनायार्थान्तरन्यासमाह–**दम्भस्य स्फुरितमिति**। **जाल्मः**–असमीक्ष्यकारी मूर्खो जनः, **दम्भस्य**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र वाताहारत्वं पश्चाद्वाच्यमप्यादावुक्तमित्यतिशयोक्तिरनवसरे गृहीता, तथा हि–प्रथमत एव प्रथमपादे हेतूत्प्रेक्षया यदतिशयोक्तेरुपादानं न तत् प्रकृतस्य दम्भप्रकर्षप्रभावतिरस्कृतगुणगणानुशोचनमयस्य निर्वेदस्याङ्गतामेति, नहि वाताहारत्वादधिको दम्भस्तोयकणव्रतं नापि ततोऽधिकं दम्भत्वं मृगाजिनवसनमिति।

---

शाठ्येन धर्माचरणरूपाडम्बरस्य, स्फुरितं परप्रतारणपूर्वकतदीयहिंसारूपं चेष्टितं, विदन् जानन्नपि, गुणान् धार्मिकत्वादीन्, ईहते आदरेणार्जयितुमिच्छति। उपरि चरणत्रयेण गुणानां परप्रतारणपरपीडनादिरूपं कृत्यं ज्ञात्वाऽऽपि, पामरो जनोऽमीषां गुणानां गौरवं गायतीत्याश्चर्यमिति तात्पर्यम्, "जाल्मस्तु पामरेऽसमीक्ष्यकारिणि च" इति हैमः, अर्थान्तरन्यासोऽलङ्कारः; अत्र कथमनवसरे ग्रहणमिति संगमयति–अत्र वाताहारत्वं पश्चाद् वाच्यमपीत्यादिना। अत्र व्रतत्रयमुदाहृतम्–मृगचर्मपरीधानं, मेघमुक्तजलकणिकापानं, वाताहारत्वं च, तदिमानि व्रतानि येन क्रमेणोदाहार्याणि तेन नोदाहृतानि, उत्तरोत्तरं हि तेषां तीव्रत्वमित्यविचार्य वाताहारत्वं यत् पश्चात् वाक्यं तत् पूर्वमेवोदाहृतम्, इत्यतिशयोक्तेरलङ्कारस्यानवसरे ग्रहणम्, तदेव पुनः स्पष्टयति–तथाहीत्यादिना। प्रथमत एव सर्वप्रथमं, हेतूत्प्रेक्षया जगदाश्वासने हेतुरूपत्वेन वाताहारतायाः कथनेन, यदतिशयोक्तिरुपात्ता तत् प्रकृतस्य प्रकृतपद्ये व्यङ्ग्यस्य, दम्भप्रकर्षस्य–आडम्बराधिक्यस्य, प्रभावेण, तिरस्कृतः–व्यर्थतां नीतो यो गुणगणस्तस्यानुशोचनं चिन्तनं, तन्मयस्य–तद्रूपस्य निर्वेदस्य शान्तस्थायिभावस्य रसस्य, अङ्गताम्–उपकारकतां, नैति न प्राप्नोतीति तत्र हेतुमाह–न हि वाताहारत्वादधिको दम्भ इत्यादिना। अयमाशयः–अत्र छलने हेतूत्प्रेक्षार्थमतिशयोक्तिरादृता, तत्र आरोहक्रमेण पूर्वं मृदु, ततस्ततः कठिनं तदनन्तरं च ततोऽपि कठिनं वाच्यमिति सर्वतः पूर्वं यद्वाताहारत्वमुक्तं ततः कठिनो दम्भस्तोयकणिकापानं नास्तीति तस्य वाताहारतायाः पूर्वं वाच्यत्वावसरः, एवं जलकणिकापानतो मृगचर्मवसनं नाधिकमपि तु सरलमिति ततोऽपि पूर्वं तदुपादानावसर इत्येवावसरेऽनुपात्तत्वेनातिशयोक्तिर्निर्वेदस्योपकारिका न जातेति भावः॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गृहीतस्याप्यवसरे त्यागो यथा—

"रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणै-
स्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्ताः सखे ! मामपि ।
कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः,
सर्वं तुल्यमशोक ! केवलमहं धात्रा सशोकः कृतः ॥७॥"

[ ह० ना० अं-५, श्लो०-२४ ]

---

गृहीतस्याऽप्यलङ्कारस्यावसरे त्यागेन रसोपकारानुकूले काले त्यागमुदाहरति-**रक्तस्त्वमि**त्यादिना । अयमर्थः—हे **अशोक** ! वञ्जुलवृक्ष ! त्वं **नवपल्लवैः** नूतनप्रवालैः, **रक्तः** लोहितोऽसि; **अहमपि श्लाघ्यैः** प्रशंसनीयैः, **प्रियायाः** जनकनन्दिन्याः, **गुणैः** सौशील्या-ऽनुपमसौन्दर्य-हृद्यत्वा-ऽनवद्यत्वादिभिर्हृदया-कर्षणधुरीणैर्गुणैः, **रक्तः** प्रबुद्धानुरागोऽस्मि, हे **सखे** ! साम्यस्य प्रस्तुतत्वात् सखित्वोक्तिः । त्वां **स्मरधनुर्मुक्ताः** पुष्पेभ्यः परावृत्ताः शिलीमुखाः-भ्रमराः, **आयान्ति** त्वदुपरि निपतन्ति, मामपि कामधनुर्मुक्ता बाणाः, **आयान्ति** मदु-पर्यपि निपतन्तः पीडयन्ति, कामस्य पुष्पधन्वत्वात् पुष्पेभ्यश्च्युता एव स्मरधनु-र्मुक्ताः, वृक्षपक्षे भ्रमराः, नायकपक्षे च बाणाः शिलीमुखशब्देनैवोक्ता इति साम्यम् । यथा कान्तायाः-रमण्याः, पादतलस्य-चरणाधःप्रदेशस्य आहतिः-आघातः, तव भवतः, मुदे विकासरूपहर्षाय भवति, "पादाघातादशोको विक-सति बकुलो योषितामास्यमद्यैः" इत्यादि कविसमयात् रमणीपादाघातादशोकस्य विकासः सिद्ध इति तस्य हर्षहेतुरसौ, तद्वन्ममापि कान्तापादतलाहतिर्मुदे हर्षाय, कुपितकामिनीपादाघातस्य प्रियैः प्रियतरत्वेनादृतत्वादिति भावः, तदेवं सर्वं, **आवयोः** तवाशोकस्य मम च विरहिणः, **तुल्यं** समानमस्ति, केवलं **धात्रा** दुर्दैवेन, **अहं सशोकः** कान्ताविप्रयोगजन्यशोकसहितः, कृतोऽसीत्ययमेवावयोर्भेदः । "रक्तोऽनुरक्ते नील्यादिरञ्जिते लोहिते त्रिषु" इति मेदिनी, 'भृङ्गबाणौ शिली-मुखौ' इत्यनेकार्थध्वनिमञ्जरी, "वञ्जुलोऽशोके" इत्यमरश्च ॥ सीतावियोगसंजात-विह्वलावस्थस्य दाशरथेरियमुक्तिः । अत्र च प्रतिपादमाद्योऽर्थो विभावत्वेनोपात्तः, यतस्त्वं नवपल्लवै रक्तोऽत एवाहं प्रियां प्रति प्रबुद्धानुरागोऽस्मि, तवोपरि भ्रमर-निपातेन तव पुष्पोद्गमसंसूचनान्ममापि कामबाणाघातपीडा जायते, कान्तापादा-घातेन तव विकासमवलोक्याहमपि तस्मै स्पृहयामीत्यादिरीत्या व्याख्यानेन प्रति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र प्रबन्धप्रवृत्तोऽपि श्लेषो व्यतिरेकविवक्षया त्यज्यमानो विप्रलम्भोपकारी।

न त्वेवं यथा—

"आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं,
भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी।

---

पादाद्यांशाऽर्थो विप्रलम्भशृङ्गारस्य विभावः। अत्र अवसरे, त्यागमुपपादयति—**प्रबन्धप्रवृत्तोऽपीत्यादिना**, आद्यचरणत्रयनिर्व्यूढोऽपि 'रक्त-शिलीमुखशब्दयोः शब्दश्लेषः, कान्तापादतलाहतिरित्यत्र चार्थश्लेषः, पूर्वयोः शब्दयोः परिवृत्त्यसहत्वाच्छब्दश्लेषः, उत्तरत्र शब्दपरिवर्त्तनेऽपि श्लेषसद्भावेनार्थश्लेष इति विवेकः। **व्यतिरेकविवक्षया** चतुर्थचरणस्थस्य व्यतिरेकस्य विप्रलम्भशृङ्गाररसानुगुणतमस्य प्रतिपिपादयिषया, **त्यज्यमानो** परिह्रियमाणः, विप्रलम्भस्योपकारकः। तदिदमवसरे गृहीतस्यापि त्यागे रसोपकारकत्वस्योदाहरणमुपयुक्तम्। रक्तत्वादिभिरुभयोः साधर्म्ये प्रतिपादितेऽपि सशोकत्वेनात्मन उपमेयस्य न्यूनतायाः प्रतिपादनात्माऽत्र व्यतिरेकः, "उत्कर्षा-ऽपकर्षहेत्वोः साम्यस्य चोक्तावनुक्तौ चोपमेयस्याधिक्यं व्यतिरेकः" [काव्यानुशासनम्—सू० १३०] इति लक्षणात्। इत्थं चात्रालङ्कारद्वयसन्निपात इति परास्तम्, व्यतिरेकस्यैव कविव्यापारविषयत्वात्। न च माऽस्त्वत्रालङ्कारद्वयसन्निपातः किन्त्वलङ्कारान्तरमेव नृसिंहवदिदं मन्यतामिति वाच्यम्, उभयोरुपकार्योपकारकभाव एव तथाविधसङ्करस्वीकारात्, यथा "अतिगाढगुणायाश्च नाब्जवद्भङ्गुरा गुणाः" इत्यत्रातिगाढगुणत्वेन प्रकृतनायिकाऽप्रकृतकमलयोः साम्यं श्लेषेणोक्त्वा 'नाब्जवद्भङ्गुरा गुणाः' इति व्यतिरेक उक्तस्तत्र श्लेषो व्यतिरेकस्योपकारीत्युभयोः संकर इति स्वीक्रियते। शब्दालङ्कारेण श्लेषेण सहार्थालङ्कारस्य व्यतिरेकस्य कथमङ्गाङ्गिभाव इति मा शङ्कि, अर्थानुसन्धानविरहिण्यनुप्रास-यमकादावेवार्थालङ्कारेण सहाङ्गाङ्गिभावासम्भवस्य सर्वालङ्कारिकसम्मतत्वात्।

पूर्वत्र रसोपकारापेक्षया काले त्यागस्य गुणत्वोदाहरणमुक्त्वाऽवसरे त्यागाभावस्य वर्जनीयतामाह—**न त्वेवं यथेति**–अग्रिमश्लोके यथाऽवसरे त्यागो न कृतस्तथा सति रसोपकारकत्वं नेति भावः। उदाहरति—**आज्ञा शक्रशिखामणीत्यादि**। बालरामायणनाटके–अहं धनुरारोप्यानारोप्य वा बलादपि सीतां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उत्पत्तिर्द्रुहिणान्वये च तदहो ! नेदृग्वरो लभ्यते,
स्याच्चेदेष न रावणः क नु पुनः सर्वत्र सर्वे गुणाः ॥८॥"

[ वा० रा० अ. १. श्लो. ३६ ]

अत्र 'न रावणः' इत्यस्मादेव त्यागो युक्तः, तथा हि-रावण इत्येत-

---

परिणेष्यामीति रावणसंवादमधिगत्य शोचतो जनकस्यानुमोदनार्थं तत्पुरोहितः शतानन्दः प्राह-अहो ! आश्चर्यमेकोऽपि गरीयान् दोषः समग्रमपि गुणग्रामं दूषयति, तथाहि—आज्ञा शक्रशिखामणीत्यादि-यस्य आज्ञा आदेशः, शक्रस्य-शक्नोति स्वेष्टं सम्पादयितुमिति शक्रस्तस्य देवेन्द्रस्य, शिखामणेः-मुकुटस्थमाणिक्यस्य, प्रणयिनी-प्रिया, देवेन्द्रेण शिरसि मणिमालेव वहनीयेति भावः, तत्र प्रणयिनीत्वेन निरूपणाच्च केवलं तस्य सान्निध्ये एव तदाज्ञाकरत्वमिन्द्रस्य, अपि तु यथा शिखामणिः सततं तेन धार्यते तद्वदाज्ञापि सततं स्नेहेन शिरसि धार्यते इति व्यङ्ग्यम्; शास्त्राणि नीतिधर्मशासनानि, नवं सर्वदा नूतनम्, वयोऽतिपातसंभाव्यमानसकलदूषणराहित्यसूचनाय नवमिति पदमुपात्तम्, चक्षुः नयनम्, शास्त्राज्ञामनुसंधाय तदनुकूलमेवाचरणात् शास्त्राणां चक्षुष्ट्वम्, शास्त्राणि चक्षुरिति बहुवचनैकवचनाभ्यां सकलशास्त्रपर्यालोचनपूर्वकं तदैकमत्येन समन्वयबुद्ध्या कार्यकरणमपि सूच्यते; तथा भूतपतौ सकलप्राणिनामीश्वरे प्रेरके, पिनाकिनि शिवे, भक्तिः श्रद्धाकृतोऽनुरागः; एवं लंकेति प्रसिद्धा दिव्या उत्कृष्टा पुरी नगरी, निवासस्थानमिति भावः; द्रुहिणस्य-ब्रह्मणः, अन्वये-वंशे, उत्पत्तिः-जन्म, तत् तस्मात्, एतादृशगुणगणपूर्त्तेः सत्त्वात्, अहो आश्चर्यम्, ईदृक् दशमुखसदृशः, [अन्यः] वरः जामातृत्वेन वरणीयः पुमान्, न लभ्यते नैव प्राप्तुं शक्यते, चेत् यदि, एष रावणः रावयति-क्रन्दयति लोकान्-पीडनादिनेति तथाभूतो न स्यात्, यद्ययं रावणो न स्यात् तदा सर्वे वरगुणा इह समुदिता इत्यवश्यं वरणीयः स्यादिति, अस्य रावणत्वं समर्थयति—क नु पुनः सर्वत्र जने सर्वे गुणाः सम्भवन्तीति वा, लभ्येरन्निति वा शेषः, तथा च जगदाक्रन्दकारित्वेन दोषेणास्य सर्वे गुणा दूषिता इति भावः ॥

अत्रावसरे त्यागाभावमाह-अत्र 'न रावणः' इत्यस्मादेव त्यागो युक्त इति । अयमाशयः-एकोऽपि दोषो गुणग्रामं दूषयतीत्युपक्रम्य तत्समर्थनायैवायं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जगदाक्रन्दकारित्वाद्यर्थान्तरं प्रतिपादयज्जनकस्य धर्मवीरं प्रत्यनुभावतां प्रतिपद्यते, ऐश्वर्यं पाण्डित्यं परमेशभक्तिर्देशविशेषोऽभिजन इत्येतत्सर्वं लोकमपबाधमानस्याधर्मपरस्य नार्थक्रियाकारकमिति तावतोऽर्थस्य तिरस्कारकत्वेनैव रावणचेष्टितं निर्वाहणीयम्। यत्त्वन्यदुपात्तं 'क्व नु पुनर्' इति, तद् यदि ससंदेहत्वेन योज्यते अथाक्षेपत्वेनाथापि नेदृग्वरो लभ्यत इत्यत्रार्थान्तरन्यासत्वेन तथापि प्रकृतस्य धर्मवीरस्य न कथञ्चिन्निर्वाहः।

---

श्लोक उक्त इत्युक्तं प्राक्, अस्यां दशायां रावणोपेक्षैव विवक्षितेति निश्चितम्, सा च 'स्याच्चेदेष न रावणः' इत्येतावतैव समर्थिता, रावणपदस्य जगदाक्रन्दकारकत्वरूपार्थान्तरसङ्क्रमितवाच्यत्वात्, इति तत्पर्यन्तमेव कथनीयं, क्व नु पुनरित्यादि ना प्रतिपादनीयमिति, तदेव प्रदर्शयति–तथाहीत्यादिना। **जगदाक्रन्दकारित्वाद्यर्थान्तरं प्रतिपादयदिति**–रावण इति पदं लोकपीडनद्वारा जगदाक्रन्दकारिरूपेऽर्थान्तरे संक्रमितवाच्यमित्युक्तपूर्वम्, तादृशं च तत् पदं जनकस्य हृदि स्थितं स्वप्रतिज्ञानिर्वाहकत्वादिरतिस्थायिभावं धर्मवीररसं प्रत्यनुभावतां [अस्य रावणत्वाभावे मत्प्रतिज्ञातपूर्तावयं सम्यक् सहायकः स्यादिति बुद्धिर्हि तादृशरसस्यानुभावस्तद्विषयत्वेनास्यार्थस्य तत्ताव्यवहार इति] कार्यतां प्रतिपद्यते, किन्तु **ऐश्वर्यम्** आज्ञाशक्रशिखामणिप्रणयिनीति शब्देन प्रतिपादितम्, **पाण्डित्यं** शास्त्राणि चक्षुर्नवमिति रीत्योपनिबद्धम्, **परमेशभक्तिः**, भक्तिर्भूतपतौ पिनाकिनीत्येतावताऽभिहिता, **देशविशेषो** लङ्केति दिव्या पुरीत्यनेन वर्णितः, **अभिजनः** 'उत्पत्तिर्द्रुहिणान्वये' इत्यनेन निरूपितः, **इत्येतत् सर्वं** धर्मवीररसोद्दीपनविभावजातम्, **लोकमपबाधमानस्येति** रावणपदेनार्थान्तरसंक्रमितेनोक्तस्य धर्मवीरसामग्रीविरुद्धस्य, **अधर्मपरस्य** दशमुखस्य, **नार्थक्रियाकारकत्वं** न प्रतिज्ञातार्थपूर्तिकारकत्वेन सम्मतमिति **तावतः** पूर्वोक्तैश्वर्यादिरूपस्यार्थस्य, **तिरस्कारकत्वेनैव** दूषकत्वेनैव एतच्छ्लोकोपक्रमणिकोक्तशतानन्दवाक्यवाच्येन, **रावणचेष्टितं** जगदाक्रन्दकारणादिरूपं, **निर्वाहणीयं** समर्थनीयम्। **यत्त्वन्यत्** तद्विरुद्धम्, **क्व नु पुनरिति**–एतदादिपद्यांशेन, **उपात्तम्** प्रतिपादितम्, **तद् यदि ससन्देहत्वेन** संशयोक्तिरूपससन्देहालङ्कारत्वेन, **अथ** अथवा, **आक्षेपत्वेन** विवक्षितस्य निषेधकल्पत्वेन, **अथ** अथवा, **नेदृग्वरो लभ्यत**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**नात्यन्तं निर्वाहो यथा-**

"कोपात् कोमललोलबाहुलतिकापाशेन बद्ध्वा दृढं,
नीत्वा वासनिकेतनं दयितया सायं सखीनां पुरः।
भूयो नैवमिति स्खलत्कलगिरा संसूच्य दुश्चेष्टितं,
धन्यो हन्यत एव निह्नुतिपरः प्रेयान् रुदत्या हसन्॥"

[अ० श० ९.]

**इत्यर्थान्तरन्यासत्वेनापि** नेदृग्वरो लभ्यते इत्यनेनोक्तस्य दुर्लभत्वस्य समर्थनरूपार्थान्तरन्यासालङ्कारत्वेनापि, उपात्तं भवेदिति शेषः, तथापि **प्रकृतस्य** प्रकरणगतस्य जनकहृदि वर्तमानस्य–पादत्रयश्रवणेनोद्भिन्नप्रायस्य, धर्मवीररसस्य न कथञ्चन निर्वाह इति, ततः पूर्वमेव [ क्व नु पुनरित्यतः पूर्वमेव ] त्याग उचित इति तन्न कृतमित्येतदनुचितमिति, त्याज्यमिदमिति भावः। अयमाशयः–अत्रत्यो हि धर्मवीरः स्वानुभावतया रावणदुश्चेष्टितपर्यन्तमेवार्थमपेक्षते, तदीयदुश्चेष्टितसमर्थनरूपस्य क्व पुनरित्यादेरर्थान्तरन्यासात्मना परिणतस्य समाधानस्य दर्शनेन तु तत्र ग्राह्यत्वप्रसक्त्या पूर्वोक्तशतानन्दवाक्येन दूषणोपन्यासार्थत्वेनास्य पद्यस्य प्रवृत्ततया तत्समर्थनरूपो धर्मवीररसोपकारो न भवति, तथा च रावणगुणग्रामं प्रति एकस्यापि गुणस्य दूषकतासमर्थनार्थमुपात्तस्यार्थान्तरन्यासालङ्कारस्य 'न रावणः' इत्येतावतैव त्यागे कृते धर्मवीरस्य निर्वाहः स्यादिति तथा न कृतमित्यवसरे त्यागाभावस्योदाहरणमिदमिति निर्गलितोऽर्थः॥

रसोपकारकत्वस्य चतुर्थं प्रकारमुदाहर्तुमाह–**नात्यन्तं निर्वाहो, यथा**–कमप्यलङ्कारं निर्वोढुमारभ्य तस्य रसानुगुण्यापेक्षया निर्वाहे मन्दा प्रवृत्तिर्नात्यन्तनिर्वाहपदेनोच्यते। तदुदाहरणम्–**कोपात् कोमलेत्यादि**–**सायं** दिवसावसानसमये, कोमला–मृद्वी, लोला–क्रोधावेशादथवा दुःखोद्रेकाच्चञ्चला च, बाहु-लतिकेव-भुजलतेव, पाशः–बन्धनसाधनम्, तेन दृढं–सुसंयतं यथा स्यात् तथा, बद्ध्वा नियम्य, तथा **वासनिकेतनं** भोगागारं च, **नीत्वा** प्रापय्य, **सखीनां पुरः** साक्षितासम्पादनाय ताभिः पूर्ववन्नाथं त्वत् शङ्कितापराधकारीति विश्वासिततया तासामेव समक्षं तदीयदुश्चरितप्रकाशनमुचितमिति बुद्ध्या वा तासामग्रे, 'भूयः–पुनरप्येवं दुश्चेष्टितं न कुर्याः' इति स्खलन्ती–कोपवशात् त्रुट्यन्ती, कला–प्रकृतिमधुरा च, गीर्यस्यास्तया, श्लथगद्गदमनोरमव्याहारया, दयितया **रुदन्त्या** अश्रुपरिप्लुतनेत्रया, प्रियापराधेन क्रन्दन्त्याऽपि तं प्रति सस्नेह-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र रूपकमारब्धमनिर्व्यूढं च रसोपकाराय।

न त्वेवं यथा—

"स्वञ्चितपक्ष्मकपाटं नयनद्वारं स्वरूपताडेन।
उद्घाट्य मे प्रविष्टा देहगृहं सा हृदयचोरी॥ १०॥"
[भासस्य]

---

येत्यर्थः, दुश्चेष्टितं प्रेयसो दुर्व्यवहारं, संसूच्य दन्तक्षत-करजाघातादिचिह्न-विशेषप्रकाशनेनाङ्गुलिनिर्देशादिपूर्वकं प्रख्याप्य, धन्यः सौभाग्यशाली, हसन् हासेन स्वापराधापलापपरायणः, प्रेयान् प्रियतमः, हन्यत एव ताड्यत एव, न तु तदीयसख्यादिकृतमनुनयं मनागपि हृदये कृत्वा तादृशापराधाद् विरमतीत्येवकारेण सूच्यते, हन्यत एव न तु हननस्य किमपि फलं भवति, अथवा कतिवारमयमेवमाहत इत्यस्यायं स्वभाव एव जात इति वा। अत्र बाहुलतिका-पाशेनेत्यनेन बन्धनकारणे कोमलप्रतीतिपूर्वकं स्वीयसौन्दर्यप्रकटनं तत्स्पर्शकृत-तत्सौख्यस्मारणं च व्यङ्ग्यम्, वासनिकेतननयनेन च तत्र पूर्वकृतनानाविध-स्वकीयसुरतचातुर्यस्मारणम्, तेन च नायिकान्तरापेक्षया स्वस्यावैलक्षण्यमप्युद्घो-षितं भवति॥ अत्र 'नात्यन्तं निर्वहणं' कथमिति संगमयति-अत्र रूपकमार-ब्धमनिर्व्यूढं च रसोपकारायेति। इह प्रकृतविप्रलम्भप्रतिकूलरौद्ररसाङ्गानां कोपबन्धनाङ्गानां विप्रलम्भानुकूल्याय बाहुलतिकायाः पाशत्वेन रूपणमारभ्य यदि साङ्गताविधानपूर्वं समाप्तिं नीयेत, तर्हि दयिता व्याधवधूत्वेन वासगृहं च कारागारत्वेन निरूपणीयं स्यादिति तद्रसस्य भङ्ग एव स्यान्न परिपोष इत्यारब्धमेव तत् त्यक्तमिति युक्तं कृतमिति भावः॥

एवं रसोपकारमनपेक्ष्य निर्वहणं न युक्तमित्याह—न त्वेवं यथेति-यथो-दाहियमाणे पद्येऽत्यन्तं निर्वाहः कृतस्तथा न करणीयमिति भावः। क्वेत्याह— 'स्वञ्चितपक्ष्मकपाटमिति-स्वञ्चितं-सुशोभितं सुघटितं, पक्ष्मैव-लोमैव, कपाटं-काष्ठपट्टस्थानीयं पिधानसाधनं यस्य तादृशं, नयनद्वारं देहगृहद्वारभूतं नयनम्, नयनमेव द्वारमिति विग्रहः, नयनरूपं प्रवेशमार्गमिति भावः, स्वं रूप-मेव ताड-कपाटताडनसाधनं तेन अथवा ताडनं-ताडः, स्वरूपेण ताडः-स्वरूप-ताडस्तेन, उद्घाट्य विपाटितदलद्वयं विधाय, सा बुद्धिस्था निरुपमलावण्यवती, हृदयचौरी मानसापहारिणी, मे देहगृहं शरीरान्तः, देह एव गृहम्, प्रविष्टा,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र नयनद्वारमित्येतावदेव सुन्दरं शृङ्गारानुगुणं न त्वन्यद्रूपणम् ।

निर्वाहेऽप्यङ्गत्वं यथा—

"श्यामास्वङ्गं चकितहरिणीप्रेक्षिते दृष्टिपातान्,
गण्डच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्,
हन्तैकस्थं क्वचिदपि न ते भीरु ! सादृश्यमस्ति ॥ ११ ॥"
[ मे० दू० उ० श्लो० ४१ ]

---

भासस्य वासवदत्तानाटके राज्ञ उक्तिः । अन्याऽपि चुराशीला केनापि साधनेन द्वारमपावृतं कृत्वा गृहं प्रविश्य तदन्तरवस्थितं द्रव्याद्यपहरति, तद्वदियमपि मानसचौर्यशीला रूपविपाटितपक्ष्मकपाटेन नेत्रद्वारेण देहरूपं गृहमाविश्य हृदयं चौर्यवृत्त्याऽपहृतवतीति, चौर्येणापहृतस्य वस्तुनो यथा न पुनः प्राप्तिसम्भावना तथा मम चेतसोऽपि न पुनः प्राप्तिः सम्भाव्यत इति तदीयाभिप्रायः । किमत्र युक्तमित्याह—**अत्र नयनद्वारमित्येतावदेवे**ति। नयनस्य द्वारत्वनिरूपणमात्रार्थं रूपकाश्रयणमिह शृङ्गारानुकूलं तदतिरिक्तं 'स्वरूपताडेन' 'देहगृहम्' इत्यादि रूपकनिबन्धनं नावश्यकं न वा प्रकृतरसानुकूलं, केवलं रूपणप्रयासव्यग्रकविप्रवृत्तेरनुमापकतया रससन्दर्भणप्रयासशैथिल्यमनुमापयति; अतश्चैवं न निबन्धनीयमिति भावः ॥

अथ पञ्चमं प्रकारमत्यन्तनिर्वाहेऽपि रसोपकारकत्वं निरूपयितुं तदवतरणमाह—**निर्वाहेऽप्यङ्गत्वं यथे**ति-अलङ्कारस्याद्यन्तं निर्वाहेऽपि रसानुकूल्यस्येदमुदाहरणम्—**श्यामास्वङ्ग**मित्यादीति तदर्थः । **श्यामासु** प्रियङ्गुलतासु, "श्यामा तु महिलाह्वया । लता गोवन्दिनी गुन्द्रा प्रियङ्गुः फलिनी फली" इत्यमरः, अङ्गं शरीरम्, **उत्पश्यामि** तत्र पाण्डिम्नः कण्टकितत्वस्य सत्त्वात् सौकुमार्यादिसाम्याच्च धैर्याय वाऽङ्गत्वेन तर्कयामीत्यर्थः, तथा चकितानां—सम्भ्रान्तानां, हरिणीनां प्रेक्षणे विलोकने, ते **दृष्टिपातान्** दृष्टिव्यापारम्, उत्पश्यामि, **शशिनि** चन्द्रे, वक्त्रस्य—मुखस्य, छायां—कान्तिम्, तथा **शिखिनां** बर्हिणां, **बर्हभारेषु** पिच्छसमूहेषु, केशान्, **प्रतनुषु** स्वल्पासु, नदीनां वीचिषु, भ्रूसाम्यनिर्वाहाय नदीनां प्रवाहाधिक्यगुणस्याप्यकथनं न दोषोऽपि त्वनुकूलत्वमेव, तथोक्तं रसरत्नाकरे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र ह्युत्प्रेक्षायास्तद्भावाध्यारोपरूपाया अनुप्राणकं सादृश्यं यथोपक्रान्तं तथा निर्वाहितमपि विप्रलम्भरसोपकाराय।

न त्वेवं यथा—

"न्यञ्चत्कुञ्चितमुत्सुकं हसितवत् साकूतमाकेकरं,
व्यावृत्तं प्रसरत् प्रसादि मुकुलं सप्रेमकम्प्रं स्थिरम्।

---

"ध्वन्युत्पादे गुणोत्कर्षे भोगोक्तौ दोषवारणे।
विशेषणादिदोषस्य नास्त्यनुक्तगुणग्रहः" ॥ इति,

भ्रूविलासान् भ्रुवो विभ्रमान्, उत्पश्यामीति सर्वत्र सम्बध्यते, तव साम्यस्य यत्र तत्रोपलब्धावपि नास्ति मनसो निर्वृतिरित्याह–हे भीरु! कातरे! हन्तेति विषादे, क्वचिदपि कस्मिन्नप्येकवस्तुनि, ते तव, सादृश्यं, नास्ति, अतो न निर्वृणोमीति भावः ॥ अनेनास्या अनुपमसौन्दर्यं व्यज्यते, 'भीरु!' इति विशेषणेनैकत्र सर्ववस्तुधारणे कातरत्वं स्वसादृश्योपलब्ध्या शङ्कितं स्ववैरस्य शङ्काकातर्यं च ध्वनितम्, क्वचित् 'चण्डि' इति सम्बोधनमुपलभ्यते, तस्य च प्रियस्यान्यसङ्गमशङ्कया कोपनत्वं व्यङ्ग्यम्, आंशिकसादृश्यस्य तत्र तत्रोत्प्रेक्षाकृतबुद्धिप्रयासेन कथञ्चिदुपलम्भे सत्यपि सर्वात्मना सादृश्योपलम्भाभावसूचनेन तद्विषयाऽनुरागोऽक्षुण्ण इति च सूचितम्। निर्वाहेऽप्यङ्गत्वं निगमयति–अत्र ह्युत्प्रेक्षाया इत्यादिना–तद्भावस्य–तद्रूपतापत्तेः, अध्यारोपः–तदात्मना सम्भावने रूपं यस्यास्तादृश्याः, उत्प्रेक्षाया अनुप्राणकं जीवनभूतं यत् सादृश्यं तत्, यथा येन रूपेण, उपक्रान्तं आरब्धम्, तथा निर्वाहितं परिसमापितमिति विप्रलम्भशृङ्गाररसोपकारसमर्थमिति भावः। अत्र निरूढसाम्यस्य रसोपकारत्वांशे कवेः सतर्कतयाऽलङ्कारस्याङ्गत्वमिति रसस्य प्राधान्यमक्षुण्णम्। 'भीरु!' इति सम्बोधने गुणाभावश्चिन्त्यः, अत एव तत्स्थाने 'चण्डि!' इति साम्प्रदायिकः पाठः ॥ एवमत्यन्तनिर्वाहस्योपकारकत्वमुदाहृत्य तदनुपकारकत्वमुदाहर्तुमाह–'न त्वेवमिति' यथोदाह्रियमाणे पद्येऽलङ्कारनिर्वाहव्यापृतेन कविना रसमनादृत्य तत्रैव, सर्वः प्रयासः क्षपितस्तथा न युक्तमिति भावः। कुत्रेत्याह–न्यञ्चत्कुञ्चितमिति। बालरामायणनाटके [२।१९] सीताऽप्राप्तिदुःस्थितो रावणः स्वावस्थां वर्णयन् 'हन्त! हन्त! नैकप्रकारो मदनव्यापारः, यतो मम वैदेहीदर्शनतः प्रभृति' इत्युपक्रम्याह–रसवशाद् विभिन्नरसव्यापारानुगुणम्, एकैकं चक्षुः प्रत्येकं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उद्भ्रु भ्रान्तमपाङ्गवृत्ति विकचं मज्जत् तरङ्गोत्तरं,
चक्षुः साश्रु च वर्तते रसवशादेकैकमन्यक्रियम् ॥ १२ ॥"
[ बा० रा०, अं० २, श्लो० १९ ]

---

नयनम्, अन्यक्रियं भिन्नव्यापारमस्ति, तादृशव्यापारानेव वर्णयति— न्यञ्चदित्यादि—न्यञ्चत्—नम्रीभवत्, स्वानुरागशून्यसीताकामनाकृतत्रपापारवश्यादितिभावः, कुञ्चितं—कूणितप्रान्ततां गतम्, अप्राप्तिशङ्कया तद्विषयकश्रमस्य वैयर्थ्येन वा, उत्सुकं उत्कण्ठाकुलम्, अद्यापि कथञ्चित् प्राप्त्याशायाः सत्त्वादिति भावः, हसितवत् सहासम्, एतादृशेऽप्यल्पप्रयाससाध्ये वस्तुनि एतावत्कष्टानुभवेन, तत्पितृकृतस्वकीयावहेलनाया बाललीलायितत्वबुद्ध्या वा, साकूतम्, अभिप्रायविशेषसूचकम्, एतद्विषयको निर्बन्धो न जाने कमनर्थमुपस्थापयिष्यतीति तर्केणेत्यर्थः, आकेकरं किञ्चित् वक्रिततारम्, कियानयं मदर्थं चिन्ताविषयः, ध्रुवमहं सर्वापायमपनेतुं समर्थं इति शौर्योदयेनेति भावः, व्यावृत्तं विभिन्नदिगभिमुखम्, सीताचिन्तनशून्यमिति भावः, बह्व्यो ह्युत्तमोत्तमाः स्त्रियो मया लभ्या इति विचारेणेत्यर्थः, प्रसरत् विकासशीलम्, एवमनपेक्षितवस्तुन्यपि मनः प्रवर्तत इति विस्मयोदयेनेति भावः, प्रसादि सहर्षम्, पूर्वरीत्या तदप्राप्तिदुःखापगमादिति भावः। मुकुलं कुड्मलितम्, खेदापगमेन तत्प्राप्तिकृतव्यापारव्यग्रताया अपगमात् अलसमिति भावः, सप्रेम सीताविषयकप्रेमसहितम्, पूर्वोक्तरीत्या कथञ्चित् समाधानेऽपि हृदयात् तदनुरागानपगमादिति भावः, कम्प्रं चलम्, त्यागात्यागयोरन्तःस्थिततयाऽनवस्थितमिति भावः, स्थिरं निश्चलम्, निश्चयान्वेषणार्थमिति भावः, उद्भ्रु उत्थितभ्रु, कस्यचिन्नवीनस्य भावस्योदयेन विस्फारितभ्रूलतम्, भ्रान्तं भ्रमिभाजनम्, मदशालितयेति भावः, अपाङ्गवृत्ति नयनप्रान्तमात्रप्रसारम्, कश्चिदन्यो मदवस्थामिमां न लक्षयेदित्याकलनायेति भावः, विकचं उत्फुल्लम्, नास्ति मे हृदि कश्चन विकारलेश इति सूचनायेति भावः, मज्जत् रसोदधौ ब्रुडत्, अनेकभावोदयेन रसानां बाहुल्यादिति भावः, तरङ्गोत्तरम् तरङ्गाः—उन्मेषादिव्यापारा आधिक्येन यत्र तथाभूतम्, कर्तव्यसंशयस्याद्याप्यनुवर्तनादिति भावः, साश्रु जलाप्लुतं च, महाभिजनस्य स्वस्येदृशदुष्पथप्रवृत्तिस्मरणाद् दुःखोद्रेकादिति भावः। अत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अत्र रावणस्य दृग्विंशतौ वैचित्र्येण स्वभावोक्तिर्निर्वाहितापि रसस्याङ्गत्वेन न योजितेति ॥ १४ ॥**

रावणे स्वस्यानेकभावसङ्कुलितत्वं कामोन्मादपरवशत्वं वाऽभ्यूहितम्, सहैव तत्तत्सामग्रीसन्निपाते रावणस्य विंशतिर्नयनानि तत्तद्भावजनितत्तद्रसोद्रेकमहिम्ना तत्तद्भिन्नक्रियाणि भवन्ति। अत्र निर्वाहेऽप्यनङ्गत्वं कथमिति दर्शयति—अत्र **रावणस्य दृग्विंशताविति**–**वैचित्र्येण** वैलक्षण्येन, **स्वभावोक्तिः** स्वक्रियावर्णनम्, तद्रूपो जात्यलङ्कारः, **निर्वाहिता** आरभ्य समुचितरूपेण समापिताऽपि, **रसाङ्गत्वेन** प्रकृतविप्रलम्भशृङ्गाराङ्गत्वेन तदुपकारकत्वेनेति भावः, **न योजिता** रसोपकारकत्वेन तत्संघटने न कवेरभिप्रायो नवा तथोपपत्तिरिति भावः। यद्यपि रसभेदाद् दृष्टिभेदवर्णनं कविसम्प्रदायः, यथा—

"एकं ध्याननिमीलनान्मुकुलितप्रायं द्वितीयं पुनः,
पार्वत्या वदनाम्बुजस्तनभरे सम्भोगभावालसम्।
अन्यद् दूरविकृष्टचापमदनक्रोधानलोद्दीपितं,
शम्भोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः ॥" [ ] इत्यत्र,

अत्र च 'समाधिसमये' इत्यस्य स्थाने 'समाधिविगमे' इति पाठः समुचितः, तपस्यतः शम्भोः पार्वत्या परिचर्यमाणस्य कामदेवकृतोपद्रवेण समाधिभङ्गे सति त्रयाणामपि नेत्राणां भिन्नभिन्नरसत्वेन वर्णनं कृतम्, तथाहि—प्रथमे पादे शान्तः, द्वितीये शृङ्गारः, तृतीये क्रोधः, तदीयविभावादयोऽपि च वर्णिताः, इत्यत्रापि भिन्नक्रियत्वेन सर्वेषां रावणनेत्राणां वर्णनं नानुचितं तत् तथापि रसवशादेकैकमन्यक्रियमित्येतावन्मात्रेऽप्युक्ते तत्तद्रसव्यभिचारिभेदप्रवृत्तये यौगपद्याशुभावित्वसंभावनाय च किञ्चिद् विभाववैचित्र्यमुदाहृतश्लोकवदुदाहियमाणपद्यवद्वा वाच्यम्, तदिह तत्तद्रसानुगुणविभावादिकृतं तत्तद्रसव्यभिचारिभावजागरणप्रदर्शनं सावलेपतया कविना न कृतमिति रसानुगुण्याभाव इति भावः। कृतश्चात्र प्रदर्श्यमाने श्लोके विभावप्रदर्शनादिकृतो वैचित्र्यहेतुनिर्देशो यथा—

"सभायां तादृश्यां नरपतिशतैरक्षकितवैः,
समभ्याकीर्णायामृतुपरिचितामेकवसनाम्।
यदक्राक्षीद् दुःशासननरपशुः केशनिचयान्,
न कस्यासीत् तेन भ्रुकुटिविषमो बाष्पविसरः ॥" [ ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शब्दार्थयोः स्वरूपमाह—

**मुख्य-गौण-लक्ष्य-व्यङ्ग्यार्थभेदात् मुख्य-गौण-लक्षक-व्यञ्जकाः शब्दाः ॥ १५ ॥**

---

अक्षक्रीडायां पाण्डवैर्द्रौपद्यां हारितायां दुर्योधनादेशात् तत्सभायामृतुधर्मपरिगतां द्रौपदीं दुःशासने केशेषु कर्षति तत्रत्यानां सत्पुरुषाणां शोकक्रोधयोरुदयस्य वर्णनमिदम्—**अक्षकितवैः** अक्षक्रीडायां चतुरैः, नरपतिशतैः, **समभ्याकीर्णायां** व्याप्तायां, **तादृश्याम्** अक्षक्रीडासमुचितायां, सभायां, दुःशासननरपशुः, **ऋतुपरिचितां** स्त्रीधर्मे [ ऋतुसमये ] वर्तिनीम्, अत एव **एकवसनां** एकवस्त्रमात्रच्छन्नशरीराम्, **केशनिचयान्** केशसमूहेषु, कृषेर्द्विकर्मकत्वेनाकथित कर्मत्वं केशानाम्, यत् **अक्राक्षीत्**, कृष्टवान्, तेन कस्य **भ्रुकुटिविषमः** भ्रुकुट्या क्रोधसंसूचकभ्रूभङ्गेण, विषमः–विरुद्धः, बाष्पविसरः–अश्रुनिपातः शोकसूचको **नासीत्** नाभूत्, अपि तु सर्वस्यैव क्रोधशोकयोरनुभावाविमौ जातावित्यर्थः ॥ अत्र भ्रुकुटिबाष्पयोः क्रोधशोकानुभावयोः यौगपद्यमाशुभावो वा, ऋतुपरिगतकुलवधूवस्त्राकर्षणकारिदुःशासनरूपेण क्रोधविभावेन तदाकृष्यमाणतादृग्द्रौपदीरूपेण शोकविभावेन च प्रदर्शितेनानुभाववैचित्र्यमाधीयते, इति युक्तं विरुद्धरूपदीप्ततम-मसृणतमचित्तवृत्त्युचितानुभावयोजनम् ॥ १४ ॥

काव्यलक्षणे शब्दार्थयोर्विशेषणत्वेनोक्तानाम् 'अदोषौ' 'सगुणौ' 'सालङ्कारौ' इति पदानामर्थबोधायापेक्षितानां दोषगुणाऽलङ्काराणां सामान्येन स्वरूपमुक्त्वा सम्प्रति तद्विशेष्यभूतयोः शब्दार्थयोरपि स्वरूपनिरूपणमवसरप्राप्तमिति तत्प्रदर्शनपरसूत्रावतरणमाह—**शब्दार्थयोः स्वरूपमाहे**ति–शब्दस्योपजीव्यत्वेन पूर्वनिर्देशः, अत्र काव्यव्यवहार्यशब्दस्वरूपप्रदर्शनमेव प्रकृतमिति–शब्दार्थयोरिति पदात् पूर्वम् 'अत्र' इति पदं पठनीयम् तथा च काव्ये एव वक्ष्यमाणचतुर्विधत्वं शब्दस्येत्यर्थलाभादन्यत्र दार्शनिकैर्व्यञ्जनावृत्तेरस्वीकारेण व्यञ्जकशब्दाभावेऽपि न क्षतिः । गौण-लाक्षणिक-व्यञ्जकानां मुख्यः [ वाचकः ] उपजीव्यः, लक्षकव्यञ्जकयोर्मुख्यगौणावुपजीव्यौ, व्यञ्जकस्य च त्रयोऽप्येते उपजीव्या इति तत्क्रमेणैव सूत्रे उपादानमाश्रितम्—**मुख्य-गौण-लक्ष्यव्यङ्ग्यार्थे**त्यादि–अत्रोपाधीनामेव त्रित्वं न ह्युपधेयानां शब्दानाम्, नहि कश्चिद् वाचक एव, कश्चिल्लाक्षणिक एव, कश्चिद्व्यञ्जक एवेत्यस्ति नियमः, अर्थविशेषमुद्दिश्य वाचकस्य तदितरार्थ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मुख्यार्थविषयो मुख्यो गौणार्थविषयो गौणो लक्ष्यार्थविषयो लक्षको व्यङ्ग्यार्थविषयो व्यञ्जकः शब्दः, विषयभेदाच्छब्दस्य भेदो न स्वाभाविक इत्यर्थः ॥ १५ ॥**

---

विषये लक्षकत्व-व्यञ्जकत्वयोरवेक्षणात्, यथा 'गङ्गायां घोषः' इत्यत्रैक एव गङ्गाशब्दो जलरूपार्थस्य वाचकः, तटरूपार्थस्य लक्षकः, शैत्यपावनत्वादेश्च व्यञ्जकः । शब्दानां चातुर्विध्यहेतुमूलमर्थचातुर्विध्यमुक्तं सूत्रे प्रथमं पञ्चम्यन्तपदेन, तानर्थान् क्रमशोऽग्रे निरूपयिष्यमाणान् विहाय प्रथमं चतुर्विधतया विभक्तस्य शब्दस्य स्वरूपं निर्वक्ति–**मुख्यार्थविषयो** मुख्य इत्यादिना–मुख्यः–अर्थान्तरप्रतीतिनिरपेक्षप्रतीतिको योऽर्थः स विषयो यस्य तदभिधानेच्छयोच्चरितो यः स मुख्यः शब्दो वाचको वा; एवं गौणः–गुणवृत्त्या प्रवृत्तः, अर्थः–विषयो वाच्यो यस्य स गौणः; एवं लक्ष्यः–लक्षणया प्रतिपाद्योऽर्थो विषयो यस्य स लाक्षणिकः; एवं व्यञ्जनया प्रतिपाद्योऽर्थो विषयो यस्य स व्यञ्जक इति भावः । नन्वयं भेदो वास्तविकोऽवास्तविको वा ? आद्यश्चेत् ? पूर्वोदाहृते 'गङ्गायां घोष' इत्यत्रैकस्यैव गङ्गाशब्दस्यार्थत्रयभेदो नोपपद्येत, तथा च द्वितीयः पक्ष आदर्तव्य इत्याह–**विषयभेदाच्छब्दस्य भेदो न स्वाभाविक** इति–विषयो वाच्योऽर्थस्तस्य भेदकृत एव शब्देऽयं भेद उक्तः, स्वभावतस्तु नायं चतुर्विधः सर्वस्य शब्दस्य वाचकत्वात् । तत्तदर्थवाचकस्यैव शब्दस्य मुख्यार्थबाधादिभिर्लक्ष्यादर्थपरत्वमिति सिद्धान्तात् ।

नन्विदमनुपपन्नमर्थचातुर्विध्यमूलं शब्दचातुर्विध्यमिति, तात्पर्यार्थस्यापि कतिपयैराचार्यैरास्थितत्वात्, तथाहि–आकाङ्क्षा-योग्यता-सन्निधिवशाद् वक्ष्यमाणजात्यादिस्वरूपाणां पदार्थानां परस्परसम्बन्धे तात्पर्याख्यवृत्तिप्रतिपाद्यो वाच्यार्थविलक्षणशरीरोऽपदार्थोऽपि [ प्रत्येकपदगतवृत्त्यविषयीभूतोऽपि ] वाक्यार्थः पदसमूहगम्यः समुल्लसतीत्यभिहितान्वयवादिन आहुः; तेषामयमाशयः–लाघवात् पदानां पदार्थमात्रे शक्तिः, न त्वन्वयांशेऽपि गौरवादन्यलभ्यत्वाच्च, तदंशोऽपि तात्पर्यार्थो वाच्यार्थविलक्षणशरीर आकाङ्क्षादिवशादपदार्थोऽपि प्रतीयते, आकाङ्क्षाप्रतीतिपर्यवसानविरहः, योग्यता बाधविरहः, सन्निधिर्व्यवधानविरह आसत्तिरिति वा; न चापदार्थप्रतीतौ स्वीकृतायां पदवृत्त्यविषयस्यापि शाब्दधीविषयत्वे कथञ्चिदुपस्थितस्य गगनादेरपि शाब्दबोधविषयत्वापत्तिरिति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुख्यमर्थं लक्षयति—

**साक्षात्संकेतविषयो मुख्यः ॥ १६ ॥**

अव्यवधानेन यत्र संकेतः क्रियते स मुखमिव हस्ताद्यवयवेभ्यो-

---

वाच्यम्, शक्यान्वयत्वस्य नियामकत्वात् । अयमत्र संग्रहः–घटं करोतीत्यत्र घटवृत्तिकर्मत्वानुकूलाकृतिरित्यर्थो बोध्यते, तत्र घटशब्दस्य घटोऽर्थः, कर्मत्व-मम्प्रत्ययार्थः, वृत्तित्वं तु न कस्यापीत्यपदार्थोऽपि वृत्तित्वरूपोऽर्थोऽनयोः संसर्ग-विधया तात्पर्यवशाद् भासत इत्यभिहितानां स्वस्ववृत्त्या पदैरुपस्थापितानामर्था-नामन्वयः परस्परं सम्बन्धः' इति वादिनां भाट्टमीमांसकानां मतम् । तथा च तात्पर्यार्थः पञ्चम इति तदकथनं न्यूनतेति चेत्? न–यद्यप्यन्वयं प्रति प्रतिपत्ति-निमित्तं तात्पयार्थशक्तिरप्यस्ति, तद्विषयस्तात्पर्यरूपोऽर्थोऽपि, तथापि तौ वाक्य-विषयावेवेति न्यूनताया अनुत्प्रेक्ष्यत्वात्, शब्दस्वरूपे प्रतिपिपादयिषिते वाक्य-विषयार्थानुक्तेरदोषत्वादिति काव्य-प्रकाशादिकृद्भिस्त्रैविध्यमेव शब्दार्थयोरुक्तम्—

'स्याद् वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा,। [का. प्र. उ. २, सू. ५]

'वाच्यादयस्तदर्थाः स्युः, इति च [का० प्र० ३, २, सू० ६] सूत्राभ्याम्।

गौणार्थश्च तैर्लक्षणायामेवान्तर्भावितस्तस्या गौणीशुद्धाभेदेन द्वैविध्यकरणात् । एवं च प्रतिपादनप्रकार एव वैचित्र्यं न तु वास्तविको भेद इत्यवसेयम् ॥ १५ ॥

शब्दचातुर्विध्यमर्थचातुर्विध्यमूलकमिति पूर्वसूत्रे प्रतिपाद्यार्थस्य चातुर्विध्यं कथमिति जिज्ञासायां क्रमेण तल्लक्षणानि प्रतिपादयितुं प्रवृत्तानि सूत्राणि व्याख्यातुं मुख्यार्थलक्षणसूत्रभूमिकामाह–**मुख्यमर्थं लक्षयतीति** । सूत्रस्थसाक्षात्पद-स्यार्थमाह—**अव्यवधानेनेति** । **यत्र** यस्मिन्नर्थे, **संकेतः** 'अस्माच्छब्दादयमर्थो बोद्धव्यः' इत्येवं व्यवहाररूपः, **क्रियते** पूर्वं सर्वज्ञेन तत्परम्परया चास्मदादि-भिर्व्यवह्रियते, **स** तादृशसंकेतविषयोऽर्थः, **मुखमिव हस्ताद्यवयवेभ्य** इति–अयमर्थः शब्दप्रयोगे जाते योऽर्थोऽर्थान्तरेभ्यो लक्ष्यादिभ्यः प्राथम्येन प्रतीयते स मुखमिव प्रधानत्वान्मुख्यः, यथा मुखं शरीरान्यावयवापेक्षया प्रथमं प्रतीयते, अङ्गान्तरोपजीव्यत्वेन प्राधान्यं च भजते, तथाऽस्याप्यर्थस्य प्राधान्यात्, अर्थान्त-रोपजीव्यत्वाच्च मुख्यत्वम्, मुखशब्दादिवार्थे यः प्रत्ययः । ननु लक्षणे संकेतस्य साक्षादिति विशेषणमधिकम्, तेन विनाऽपि लक्ष्यार्थादीनां संकेतविषयत्वाभावा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देव वारणादिति वाच्यम्, वटादिनामा प्रधानवृक्षो यत्र ग्रामे सग्रामोऽपि तन्नामा यथा 'वटो ग्रामः इत्यादि, तथा च वटादिनामकवटयोगिनि ग्रामे प्रतिपाद्ये वटादिपदस्य संकेतितत्वेन तादृशार्थस्य संकेतविषयत्वसत्त्वादतिव्याप्तेः, साक्षात् पदे दत्ते च तत्र वटादियोगिनि ग्रामेऽव्यवहितसंकेताभावान्न दोषः, तत्र हि यः संकेतः स शब्दसंकेतव्यवहितः, व्यवहितत्वं च शब्दसंकेतग्रहप्रयोज्यग्रहविषयत्वम्, स चेत्थम्-वृक्षविशेषो वटपदाद् बोद्धव्यः, तद्योगी ग्रामश्च तत्पदाद् बोद्धव्य इति । न च वटयोगिनि ग्रामेऽपि वटपदशक्तिरेव, अन्यथा तद्वृक्षनाशे तत्प्रतीत्यनापत्तेरिति वाच्यम्, वटादियोगिनि ग्रामे वटपदप्रयोगस्य लक्षणयैवोपपत्तेः, तद्वृक्षनाशेऽपि साम्प्रतिकाभावे भूतपूर्वगतिरिति न्यायेन भूतपूर्वशब्दसम्बन्धेनापि तत्प्रतीत्युपपत्तेर्न शक्तिकल्पनेति भावः, यदि तु लाक्षणिके 'वटो ग्रामः' इत्यादिप्रयोगे 'वटादिपदात् तत्तल्लक्ष्यार्थो बोध्यः' इत्यादिस्वरूपः सङ्केत एव नास्ति, तेन तद्विशेषणतया साक्षात्पदोपादानस्य तत्रापतन्त्या अतिव्याप्तेर्निरासायावश्यकता नास्ति, संकेतविषयत्वस्यैवाभावेन तद्वारणादित्युच्यते, तदा यत्र पूर्वोक्तसंसर्गाद्यन्यतमेन प्रकरणेनाभिधायां नियन्त्रितायां शब्दान्तरध्वननं, यथा—

''भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसङ्ग्रहस्य ।
यस्यानुपप्लवगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत् ॥''

इत्यादौ-राज्ञो वाच्यतायां हस्तिनः प्रतीयमानतायां च, तत्र द्वितीयस्य हस्तिविषयकार्थस्य मुख्यत्वं माऽभूदिति संकेतविषय इति पदस्य विशेषणं साक्षादिति, 'भद्रात्मनः' इत्यत्र तु राजपक्षीयार्थप्रतीतिव्यवधानेनैव हस्तिपक्षीयार्थप्रतीतिरिति नातिप्रसङ्गः । श्लोकार्थश्च—यस्य-प्रकृतस्य राज्ञः, करः-पाणिः, सततं-निरन्तरं, दानस्य-वितरणस्य, सम्बन्धि यदम्बु-जलं, तस्य सेकेन-सेचनेन, सुभगः-सुन्दरः, अभूत्, कीदृशस्य राज्ञः ? भद्रः-शोभनः, आत्मा-स्वरूपमन्तःकरणं यस्य तथाभूतस्य; तथा दुरारोहा-परैरनभिभवनीया, तनुः-शरीरं यस्य, तथा विशाले-महति, वंशे-कुले, उन्नतिः-आधिक्यं महत्त्वं ख्यातिर्वा यस्य तथाविधस्य, विशालस्य वंशस्योन्नतिर्यस्मादिति वा; तथा कृतः शिलीमुखानां-बाणानां, संग्रहः-अभ्यासदार्ढ्यं येन तस्य; तथा-अनुपप्लुता-अबाधिता, गतिः-ज्ञानं यस्य तादृशस्य, अनुपप्लुतानाम्-अदुष्टानां, गतिः-हितकर्त्ता, तस्येति वा; तथा परान्-शत्रून्, वारयतीति तथाभूतस्तस्येति राजपक्षे । अप्राकरणिकगजपक्षे तु-यस्य परस्योत्कृष्टस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**ऽर्थान्तरेभ्यः प्रथमं प्रतीयत इति मुख्यः, स च जाति-गुण-क्रिया-द्रव्यरूपः, तद्विषयः शब्दो मुख्यो वाचक इति चोच्यते, यथा-गौः शुक्लश्चलो देवदत्त इति; यदाह महाभाष्यकारः "चतुष्टयी शब्दानां प्रवृत्तिः" [ अ. १. पा. १. आ. २ "ऋलृक्" सूत्रे ] इति ।**

वारणस्य–गजस्य, करः–शुण्डादण्डः, सततं, दानाम्बुसेकसुभगः–मदसलिलसिञ्चनसुन्दरः, अभूदित्यन्वयः, कीदृशस्य वारणस्य ? भद्रात्मनः–भद्रजातीयस्य, "भद्रो मन्द्रो मृगो मिश्रश्चतस्रो गजजातयः" इति [ ४. २८४ ] हैमे; दुरधिरोहतनोः–अत्युच्चत्वाद् दुःखाधिरोह्यशरीरस्य; विशालवंशवत्-दीर्घवेणुवत्, उन्नतिः–उच्चता, यद्वा विशाला वंशस्य–पृष्ठदण्डस्योन्नतिर्यस्य तस्य; "वंशः संघेऽन्वये वेणौ, पृष्ठाद्यवयवेऽपि च" इति हैमः; कृतः शिलीमुखानां-भ्रमराणां संग्रहो येन तस्य; अनुपप्लवगतेः–अनुद्धतधीरगमनस्येति । वसन्ततिलका च्छन्दः "उक्ता वसन्ततिलका तभजा जगौ गः" इति तल्लक्षणात् । अत्र राजा वाच्यो हस्ती प्रतीयमानः । अनेकार्थकानां 'भद्रात्मनः' इत्यादिशब्दानां राज्ञि तदन्वययोग्ये चार्थे प्रकरणेन नियमनेऽपि सहृदयानां वासनाबलाद् या गजस्य तदन्वययोग्यस्य चार्थस्य प्रतीतिः सा व्यञ्जनयैव, तस्य चार्थस्य मुख्यत्वं मा भूदिति 'सङ्केतविषय' इत्यत्र साक्षादिति विशेषणमित्यलं पल्लवितेन ॥

एवं मुख्यमर्थं लक्षयित्वा तस्य विभागमाख्याति–**स चेति**–मुख्यार्थश्च । **जाति-गुण-क्रिया-द्रव्यरूप** इति–जातिश्च गुणश्च क्रिया च द्रव्यं चेति तानि रूपाणि–स्वरूपाणि यस्य स इति भावः । **तद्विषयः** तद्वाचकः शब्दः, मुख्य इति वाचक इति चोच्यते, मुख्यत्वं चास्याव्यवधानेनोपस्थितिजनकत्वमेव, वाचकत्वं च तदर्थवचनादेव । एकत्र वाक्ये चतुर्विधानामपि शब्दानामुदाहरणमाह— **यथा गौरित्यादि**–गोरित्येष जातिशब्दो गोत्वसामान्यप्रवृत्तिनिमित्तकत्वात्, शुक्ल इति गुणशब्दः शुक्लगुणरूपप्रवृत्तिनिमित्तत्वात्, चलतीति च क्रियैव साध्यस्वरूपा, तादृशं रूपमादायैव तस्याः प्रवृत्तेः, 'देवदत्त' इति तन्नाम, तच्च तद्व्यक्तिरूपद्रव्यमादाय प्रवृत्तमिति द्रव्यप्रवृत्तिनिमित्तकमेवेति चतुर्विधत्वं तेषाम् । अत्र प्रामाणिकसम्मतिमाह–**यदाह–महाभाष्यकार** इति । यतः शब्दानां चातुर्विध्यं महाभाष्यकारोऽप्याह "ऋलृक्" सूत्रे [अ. १. पा. १ आ. २.], तदुक्तं चातुर्विध्यं च–"जातिशब्दा गुणशब्दाः क्रियाशब्दा यदृच्छाशब्दाश्च" इति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अयमत्र प्रकारः चातुर्विध्योपपत्तेः—सर्वेषां शब्दानां स्वं स्वमर्थमभिधातुं प्रवर्त्तमानानां प्रवृत्तिनिमित्तभेदः स्पष्टमुपदृश्यते, स च भेदः [ विवेकः ] किंनिबन्धन इति जिज्ञासायामुपाधिनिबन्धनत्वमेतस्य प्रतिभाति, उपाधेरेव भेदकतया प्रसिद्धेः। उपाधिश्च द्विविधः—वक्तृसन्निवेशितो, वस्तुधर्मश्च, तत्र प्रथमो वक्त्रा यदृच्छया संज्ञितत्तद्रव्यादिविषयकशक्तेरभिव्यक्तिं परिकल्प्य संज्ञिनि संनिवेशितः, यथा डित्थादीनां शब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं संज्ञिनि सन्निवेश्यते, डित्थ-डवित्थ-देवदत्त-यज्ञदत्तादिशब्दाः प्रथमादिवर्णबुद्धिजनितसंस्कारसहकृतान्तिमवर्णबुद्धिनिर्ग्राह्यस्वरूपा वक्त्रा तद्व्यक्तिबोधकत्वशक्तिमभिव्यञ्जयता तत्र तत्रार्थे निवेश्यन्ते, तत्र च शब्दे तेषां तादृशं स्वरूपमेवोपाधिः, तन्निबन्धनैव च तेषां प्रवृत्तिः, त एव च यदृच्छाशब्दा इत्युच्यन्ते । अयमाशयः—डित्थोऽयमिति संकेतेन डकारोत्तरेकारोत्तरतकारसहितथकारोत्तरात्स्वरूपाऽनुपूर्वी तत्र द्रव्ये बोधकत्वेन सन्निवेशिता, तत्र तादृश्या आनुपूर्व्याः स्वरूपमेकीकृत्य दर्शयितुं न शक्यमिति पूर्वपूर्ववर्णजनितसंस्कारसहकृताऽन्त्यवर्णोऽभिव्यक्तः स्फोट एव तादृशानुपूर्वीबोधक इति तादृशानुपूर्व्येव यत्रोपाधिः स यदृच्छाशब्दः । ये च स्फोटं न मन्यन्ते तेषां मते डकारादिवर्णातिरिक्तं डित्थादिशब्दस्वरूपं संहृतक्रमं निर्देष्टुमशक्यमिति वक्तृयदृच्छाभिव्यज्यमानशक्तिभेदानुसारेण काल्पनिकसमुदायरूपस्य डित्थादेः शब्दस्य तत्तत् तत्तत्संज्ञ्यभिधानाय प्रवृत्तत्वात् डित्थादीनां यदृच्छाशब्दत्वमुपपद्यत एव ।

द्वितीयस्य वस्तुधर्मस्य च द्वैविध्यं सिद्धसाध्यभेदात्, तत्र साध्योपाधिमूलकत्वं क्रियाशब्दानाम्, साध्यत्वं हि उत्पाद्यमानत्वं पूर्वापरीभूतावयवक्रियारूपत्वमिति यावत्, पूर्वापरीभूताः—क्रमिकाः, अवयवाः—एकदेशा अधिश्रयणाद्यवश्रयणान्ता यस्यास्तादृशी क्रियैव साध्यत्वेनाभिधीयत इति यावत् । क्रियान्तराकाङ्क्षानुत्थापकताऽवच्छेदकरूपवत्त्वं कारकान्वयितावच्छेदकरूपवत्त्वं वा साध्यत्वमिति केचित्, यथा-पचतीति, पचतीत्यत्र हि साध्यत्वेनैव क्रिया प्रतीयते । सिद्धोपाधेरपि द्वैविध्यं जाति-गुणभेदात्, तत्र वस्तुनः प्राणप्रद उपाधिर्जातिः, प्राणनं प्राणो व्यवहारयोग्यता, तत्प्रदः—तन्निर्वाहक इत्यर्थः । तथा च 'प्राणप्रदत्वं यावद्वस्तुस्थितिसम्बन्धित्वम्' इति नरसिंहठक्कुरादयः, सर्वथाऽपि वस्तुनस्तन्मात्रमूलस्तद्व्यवहार इति भावः । नहि कश्चित् पदार्थो जातिसम्बन्धं विना स्वरूपं

का० १२

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिलभते, स च वस्तुनि समवेतो गोत्वादिरूपः । तदुक्तं वाक्यपदीयेऽपि "नहि गौः स्वरूपेण गौर्नाप्यगौर्गोत्वाभिसम्बन्धात् तु गौः" इति, अयमर्थः-गोपद-व्यवहार्यो धर्मी अज्ञातगोत्वकेन धर्मिमात्रस्वरूपेण गौरिति व्यवहारयोग्यो न, नाप्यगौरिति व्यवहारविषयः, गोत्वज्ञानाभावेन तदभावस्याप्यनिर्णयात्, किन्तु गोत्वसमवायादेव स गौरित्याख्यायते व्यवह्रियते वा । एतदेवं व्याख्यानं रस-गङ्गाधरेऽपि द्वितीयानने-"गौः-सास्नादिमान् धर्मी, स्वरूपेण-अज्ञातगोत्वकेन धर्मिकस्वरूपमात्रेण, न गौः—न गोव्यवहारनिर्वाहकः, नाप्यगौः-नापि गोभिन्न इति व्यवहारस्य निर्वाहकः, तथा सति दूरादनभिव्यक्तसंस्थानतया गोत्वाग्रहदशायां गौरिति [प्रथमे], गोभिन्न इति [द्वितीये] व्यवहारः स्यात्, स्वरूपस्याविशेषाद् घटे गौरिति गवि चागौरिति व्यवहारः स्यात्" इति । द्वितीयो गुणरूपश्च लब्धसत्ताकस्य जात्या प्राप्तव्यवहारयोग्यताकस्य वा वस्तुनो विशेषाधानहेतुः, लब्धसत्ताकं हि वस्तु शुक्लादिना रूपेण विशिष्यते-सजातीयेभ्यो व्यावर्त्यते, उत्पन्नस्य हि द्रव्यस्य पश्चाद् गुणेन सम्बन्धः, तथा च नैयायिकाः-उत्पन्नं द्रव्यं क्षणं निर्गुणं निष्क्रियं च तिष्ठतीति, अयमेव च जातिगुणयोर्भेदः, यत्-जातिर्जन्मनैव सह तिष्ठति, गुणश्च पश्चादायाति नश्यति चेति गुणलक्षणं चैवमुक्तं "को नो गुणवचनाद्" [४. १. ४४.] इति सूत्रे महाभाष्ये—

"सत्त्वे निविशतेऽपैति, पृथग्जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च, सोऽसत्त्वप्रकृतिर्गुणः ॥" इति,

एतद्व्याख्यानं तु तत्रत्यकैयटादौ स्पष्टमिहानावश्यकत्वान्न प्रपञ्चितम् । नन्वयं विभागोऽनुपपन्नः, साक्षात् संकेतितो विषयो मुख्य इति लक्षितस्य मुख्यार्थस्य अवान्तरधर्मप्रकारकारक-ज्ञानानुकूलशब्दप्रयोगरूपे विभागे प्रक्रम्यमाणेऽसंके-तितस्य जात्यादेरुक्तेरनवसरप्राप्तत्वात् । न च तत्रापि संकेत इति वक्तुं शक्यम्, मुख्यार्थतासम्पादकाद्यसंकेतग्रहस्य प्रवृत्तिनिवृत्तिविषयीभूतायां व्यक्तावेव सम्भवात्, व्यवहारेण हि शक्तिग्रहः, व्यवहारश्च प्रवृत्तिनिवृत्तिरूपो व्यक्तावेव, तस्यैव गमनागमनानयनादिसम्बन्धसम्भवादिति चेत्? अत्राहुः-आनन्त्याद् व्यभिचाराच्च व्यक्तौ संकेतः कर्तुं न शक्यत इति तदुपाधिष्वेव जाति-गुण-क्रिया-द्रव्येषु शक्तिः (संकेतः) स्वीक्रियते । किञ्च व्यक्तिमात्रे संकेतग्रहे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'गौः, शुक्लः, चलो, देवदत्तः' इत्यादिशब्दानां विषयविभागो न स्यादिति तदुपाधिष्वेव सङ्केत इति कल्प्यते । अयमाशयः–व्यक्तावेव संकेतो युक्त इति वादिना, किं सर्वासु गोव्यक्तिषु संकेतग्रहो व्यवहारस्य कारणं, कस्याञ्चिदेकस्यां गोव्यक्तौ वा संकेतग्रहस्तत्र कारणमित्यभिधातव्यम्, तत्राद्यमतस्वीकारेऽनन्तानां गोव्यक्तीनां सहैकदोपास्थित्यसम्भवेन तत्र संकेतग्रहासम्भवो दोषः; द्वितीयपक्षे तु यस्यां गोव्यक्तौ संकेतः कृतस्तदतिरिक्ताया गोव्यक्तेर्गोशब्दाद् भानं न स्यात्, तत्र संकेतस्यागृहीतत्वात्, न चैकत्र व्यक्तौ जाते संकेतग्रहे द्वितीयाऽपि गोव्यक्तिर्ग्रहीष्यत इति वाच्यम्, तथा च सत्यगृहीतसंकेतोऽप्यर्थः प्रतीयत इत्यायातमित्यकृतसंकेतं गवान्तरं यथा गोशब्दः प्रतिपादयेत् तथा तादृशमश्वरूपमर्थं कुतो न प्रतिपादयेदगृहीतसंकेतत्वाविशेषादित्यापत्तेः । संकेतविषयगोव्यक्ति–तदितरगोव्यक्त्योः साजात्येन गोव्यक्तौ गृहीतः सङ्केतोऽपरत्र गोव्यक्तावेवोपयोगमाधास्यति न विजातीयाश्वव्यक्ताविति कल्पनायां तु साजात्यकल्पितायां जातावेव सङ्केत इति कल्पनमेव लघु । इत्थमुपपादित आनन्त्यव्यभिचारदोषो येन व्यक्तौ सङ्केतो ग्रहीतुं न शक्यत इति ।

अथ व्यक्तिपक्षे–व्यक्तावेव शक्तिरिति पक्षे 'गौः शुक्लश्चलो देवदत्तः' इत्येतेषां विषयविभागो न स्यादित्युक्तं तदुपपाद्यते, व्यक्तावेव सङ्केतग्रहे सर्वेषां पदानां व्यक्तिवाचकत्वेनैषां पदानां पृथक्पृथगर्थबोधकत्वं यदनुभूयते तन्न स्यात् । तथाहि–उक्तप्रयोगे गोत्वरूपजातिमदभिन्नः शुक्लरूपगुणवान्, चलनक्रियाश्रयो देवदत्तनामेति बोधो भवति, स च सर्वेषां पदानां विषयविभागेनैव प्रवृत्तिनिमित्तभेदेनैवोपपद्यते, सति च सर्वेषां व्यक्तिवाचकत्वे सर्वैरेव पदैरेकैव गोव्यक्तिरुच्यत इति विषयविभागो न स्यात् । न च माऽस्तु विषयविभागस्तेन का नो हानिरिति वाच्यम्, यतो विषयविभागाभावे सर्वेषामपि शब्दानां गौरित्यादीनां समानार्थकत्वेन 'घटः कलशः' इति समानार्थशब्दयोः सहप्रयोगाभाववत् तेषामपि शब्दानां सहप्रयोगो न स्यात् । उपाधिवादे तु जाति-गुण-क्रिया-यदृच्छानां प्रवृत्ति-निवृत्तिरूपविषयाणां भेदे सति तेषां सर्वेषां पर्यायत्वाभावादुपपद्यते सह प्रयोग इति । इत्थमुक्तदोषद्वयनिरासाय विषयविभागोपपादनाय च पूर्वोक्तजात्यादिविषयविभागो नितरामावश्यक इति सुस्थम् । एषां च कथमुपाधित्वमित्युपपादितं पूर्वम्, तथा चोपाधिचतुष्टेन शब्दानामपि चतुष्टम्, एषां च भेद उपाधिकृतो न वास्तविक इत्यपि ज्ञेयम्, तेषां सर्वेषां वस्तुत एकरूपत्वात्, यथैकस्यैव मुखस्य खड्ग-मुकुर-तैलाद्यालम्बनभेदाद् भेद इव । अयमाशयः—शङ्ख-पयः-पटादिनिष्ठानां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**जात्यादिस्वरूपं च प्रकृतानुपयोगान्नेह विपञ्च्यते । जातिरेव सङ्केतविषय इत्येके, तद्वानित्यपरे, अपोह इत्यन्ये ॥ १६ ॥**

शुक्लादिगुणानां गुड-तण्डुलादिनिष्ठानां पाकादिक्रियाणां तत्तदुदीरितयदृच्छाशब्दानां च प्रतिधर्मि वैधर्म्यदर्शनान्नानात्वेन तत्र शक्तौ स्वीकृतायां व्यक्तिपक्षवदानन्त्यव्यभिचारयोर्दोषयोरापात इति न शङ्कनीयम्, उक्तभेदस्योपाधिनिबन्धनत्वेनानन्त्यादिदोषानावहत्वात्, यथैकस्यैव मुखस्य कृपाण-दर्पण-तैलादिषु प्रतिबिम्बितस्य भेद इव लक्ष्यते, तथैकरूपाणामपि तेषां भिन्नत्वेन प्रतिभासस्याश्रयौपाधिकत्वस्य कल्पयितुं युक्तत्वात् ।

इत्थं जात्यादिभेदेन शब्दानां चातुर्विध्यमूरीकृत्यापि जात्यादिप्रदर्शनं विना कथं तत्स्वरूपं ज्ञातुं शक्यते इति तदप्रदर्शननिमित्तां न्यूनताशङ्कां परिजिहीर्षुराह—**जात्यादिस्वरूपं च प्रकृतानुपयोगादिति**—जाति-गुण-क्रिया-द्रव्याणां स्वरूपं सर्वैर्विज्ञातमेव, तत्प्रतिपादनपरग्रन्थेषु तस्य प्रतिपादितत्वात्, एकत्रैव ग्रन्थे सर्वविधविषयप्रतिपादनं हि दुःशकमनावश्यकं चेति प्रकृतोपयोगमसमीक्ष्य न तथा निरूपणं कृतमिति भावः ॥

अथ मीमांसकमतमाह—**जातिरेव सङ्केतविषय इत्येक इति** । अयमाशयः—हिम-पयः-शङ्ख-बलाकाद्याश्रयेषु समवेतशुक्लादिगुणेषु विभिन्नतया प्रतीतेषु यद्वशेन 'शुक्लः शुक्लः' इत्यभिन्नाभिधानप्रत्ययोत्पत्तिस्तत्तद्गतं सामान्यमेवेति तद्वाचकत्वमेव तेषामित्याश्रयणीयम्; गुड-तण्डुलादिपाकेषु विभिन्नतया प्रतीयमानेषु यद्वशात् 'पाकः पाकः' इत्यभिन्ना प्रतीतिर्जायतेऽभिधीयते च, तत्पाकत्वाद्येव तेषां क्रियाशब्दानां वाच्यम्; एवं यदृच्छाशब्दानामपि द्रव्यमात्रवाचकानां डित्थादिशब्दानां शुक-सारिका-मनुष्याद्युच्चारणवशेन प्रतिक्षणं भिद्यमानानां यत्कृता भेदप्रतीतिस्तत् डित्थादिशब्देषु समवेतं डित्थत्वादि सामान्यमेव यथायोग्यं तत्तत्संज्ञिष्वध्यस्तं वाच्यम्, अथवा डित्थादिसंज्ञिन्येकस्मिन्नपि प्रतिपलमुपचयापचययोगितया भिद्यमाने यन्महिम्ना 'डित्थो डित्थः' इत्यभिन्नाकारोऽबाधितः प्रत्ययो जायते, तत् डित्थादिशब्दवाच्यवस्तुसमवेतं डित्थत्वादिसामान्यमेव तेषां वाच्यमिति; इति गुण-क्रिया-यदृच्छाशब्दानामपि जातिशब्दत्वात् सर्वेषां जातिरेव वाच्येति तत्रैव सङ्केतग्रहः। ननु महाभाष्यकार-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रीत्योपाधिष्वेव सङ्केतः मीमांसकरीत्या जातावेवेत्थं च द्वयोरपि मतयोर्व्यक्तौ संकेताभावात् कथं तद्बोधः कथं वा तस्यानयनादिक्रियान्वयित्वमिति चेत् ? सत्यम्-व्यक्त्यविनाभावाज्जात्या व्यक्तेराक्षेपात्; न चाक्षिप्तस्य [अनुमितस्य] कथं शाब्देऽन्वयः ? शब्दोपस्थितस्यैव तत्रान्वयस्वीकारादिति वाच्यम्। अनुमान-सहकारेण तत्र शब्दादेव व्यक्त्युपस्थितिस्वीकारादिति।

अथ नैयायिकमतमाह—तद्वानित्यपरे इति–जातेर्व्यक्त्यविनाभूताया एवार्थ-क्रियाकारित्वदर्शनात् व्यक्तिं विना तस्याः क्वाऽप्यनुपलम्भाच्च व्यक्तिविशेष-मनन्तर्भाव्यसामान्यतो जातिमत्त्वेन तस्य शब्दार्थत्वम्, जातिमान् [गोत्ववान्] गोशब्दार्थ इति स्वीकरणीयम्, केवलव्यक्तिशक्तिवादे आनन्त्यव्यभिचारयो-र्दर्शितत्वात् केवलजातिशक्तिवादे च व्यक्तेरभानादिति जातिसहिता व्यक्तिरेव वाच्यत्वेनाभ्युपेयेति तेषामाशयः॥

बौद्धास्तु–जातेरदृष्टत्वेन विचारासहत्वाद् व्यक्तेश्च क्षणिकत्वादानन्त्याच्चोभय-त्रापि सङ्केतः कर्तुमशक्य इति गवादिशब्दानामगवादिव्यावृत्तिरूपोऽपोहोऽर्थः स्थिरं सामान्यं तैर्नाभ्युपेयते सर्वस्यापि क्षणिकत्वाभ्युपगमात्। तथा चोक्तं काव्यप्रदीपेऽपि–व्यक्त्यवानन्त्यादिदोषसद्भावात् भावस्य जात्यादिरूपस्य देश-कालानुगमाभावात् तदनुगतायामतद्व्यावृत्तौ संकेत इति, ते आहुरिति 'अपोह' इत्यत्र विवेके तु-जातिव्यक्तितत्सम्बन्धजन्यजातिमतां बुद्ध्याकाररूपाणामवास्त-विकानां शब्दार्थावस्यानुपपन्नत्वाद् गवादिशब्दानामगोव्यावृत्तिरूपस्तद्विशिष्टं वा बुद्धौ प्रतिबिम्बभूतं सर्वथा बाह्यार्थशून्यमन्यापोहशब्दवाच्यं शब्दार्थः इत्युक्तम्॥

एतेषु मतेषु कतमन्मतमलंकारशास्त्रे समादरणीयमिति स्वानुमतमिति वा विचारे पूर्वोक्तोपाधिचतुष्टयसङ्केतवाद एवेति निश्चीयते, तथाहि–तन्मतं प्रतिपाद्य महाभाष्यकारवचनेन च समर्थ्य 'जातिरेवेत्येके' 'तद्वानित्यपरे' 'अपोह इत्यन्ये' इत्येतेषु 'एकेऽपरेऽन्ये' शब्दैः स्वारुचेः स्पष्टं प्रतिपादितत्वात्। किञ्च, सदसन्नि-बन्धननियमादिशिक्षाप्रदर्शनस्थले जात्यादिकृतार्थविभागस्य स्वेन समुल्लेखात्। किञ्च, "अर्थानां विरोधाभासो विरोधः" [का. शा. अ. ६, सू. १२] इति सूत्र-व्याख्यायामपि 'जाति-गुण-क्रिया-द्रव्यरूपाणां पदार्थानां सजातीयेन विजातीयेन वा वस्तुवृत्त्याऽविरोधेऽपि' इत्यादिना जात्यादिरूपस्यैव पदसङ्केतत्वमाश्रितम्,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गौणं लक्षयति—

**मुख्यार्थबाधे निमित्ते प्रयोजने च भेदाभेदाभ्यामारोपितो गौणः ॥ १७ ॥**

**गौर्वाहीको गौरेवायमित्यादौ मुख्यस्यार्थस्य सास्नादिमत्त्वादेः**

---

अन्यपक्षाणां च क्षोदक्षमत्वाभावात् तदुपेक्षा कृता, तथाहि–जातिमात्रस्य शक्यत्वमिति मीमांसकमते, गोपदात् गोव्यक्तिभानानुपपत्तिः, व्यक्ति-जात्योः सामानाधिकरण्याभावेन व्याप्तेरभावेनाक्षेपरूपानुमानासंभवात्, तादात्म्येन व्यक्तेर्जातेश्च तत्र व्याप्तेरभ्युपगमेऽनुमाने जायमानेऽपि व्यक्तेर्वृत्त्या पदोपस्थित्यभावेनापदार्थत्वेन तत्र विभक्त्यर्थसंख्या-कर्मत्वादीनामन्वयानुपपत्तिः । न चापदार्थभूतव्यक्तौ विभक्त्यर्थोन्वयः शक्यः कर्तुम्, सुब्विभक्तीनां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः । न चात्र व्युत्पत्तौ प्रकृत्यर्थ इत्यस्य प्रकृतितात्पर्यविषय इत्यर्थमुपवर्ण्य जातिशक्तौ व्यक्तिमाक्षेपलब्धां तत्तात्पर्यविषयतया सुबर्थो विशेषयिष्यतीति पादप्रसारिकानिस्ताराय शक्तिग्राहकानयनादिव्यवहारस्य जातिविषयत्वाभावात् । जाति-व्यक्त्योरुभयत्र शक्त्यभ्युपगमे च गौरवम्, तथा चोपाधिचतुष्टयपक्ष एव साधीयानित्यलम् ॥ १६ ॥

मुख्यमर्थं सविभागं निरूप्य क्रमप्राप्तं गौणमर्थं निरूपयितुं प्रवृत्तं सूत्रमवतारयति–**गौणं लक्षयतीति** । '**मुख्यार्थबाधे०**' इत्यादि सूत्राक्षराणि व्याचष्टे–**गौर्वाहीक** इत्यादिना । अत्र परगतस्य गुणस्य परस्मिन्नारोपादेव गुणादागतत्वमूलकं गौणत्वं शब्देऽर्थे च, तत्रारोपश्च द्विरूपो भेदेनाभेदेन च, तथा च मुख्यमिमं प्रकारद्वयमादायोदाहरणद्वयमाश्रित्य सूत्रार्थसङ्गमनपुरःसरं पदानि व्याख्याति–**गौर्वाहीकः, गौरेवायमिति**–प्रथममुदाहरणं भेदेनारोपस्य, अत्रोभयोरपि भिन्नतया समुल्लेखात्, गौरेवायमिति चाभेदेनारोपस्योदाहरणम् । वाहीको हि शास्त्रीयाचारबहिर्भूतो म्लेच्छादिः, अथवा वाहीको नाम देशविशेषः ।

"पञ्चानां सिन्धुषष्ठानां, नदीनां येऽन्तराश्रिताः ।
तान् धर्मबाह्यानशुचीन्, वाहीकान् परिवर्जयेत्" ॥

इति महाभारतकर्णपर्वोक्तः पञ्चनद( पंजाब )प्रान्तैकभागः, तत्रभवोऽपि वाहीक इत्येव । शब्दस्तोममहानिधौ च–'वह-ईकण् ।' जातिभेदे ( जाट ),

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**प्रत्यक्षादिना प्रमाणेन बाधे, निमित्ते च–सादृश्यसंबन्धादौ प्रयोजने च सादृश्यताद्रूप्यप्रतिपत्तिरूपे सत्यारोप्यारोपविषययोर्भेदाभेदेन च समारोपितोऽतथाभूतोऽपि तथात्वेनाध्यवसितो गुणेभ्य आयातत्वाद् गौणः, तद्विषयः शब्दोऽपि गौण उपचरित इति चोच्यते।**

---

देशभेदे चेत्युक्तम्, तथा च तन्मतेन पञ्चनदप्रदेशे प्रसिद्धा 'जाट'नाम्नी जातिर्वाहीकपदवाच्येति, तत्र च गोशब्दस्य सामानाधिकरण्येन प्रयोगो गौर्वाहीक इति, गोत्वस्यैवातिशयेन प्रतिपादनाय गौरेवायमिति च, तत्र गोशब्दस्य मुख्योऽर्थः सास्नादिमत्त्वादिः, तदर्थस्यैव तत्र साक्षात्संकेतविषयत्वात् तत्रैव च तत्पदं रूढम्, तस्य वाहीकेन सह सामानाधिकरण्यं बाधितं प्रत्यक्षतस्तत्र तदभावस्य गृहीतत्वात्। **प्रत्यक्षादिने**त्यत्र आदिपदं प्रमाणान्तरोपसंग्रहाय स्थलान्तरापेक्षया, तथा च मुख्यार्थस्य वाहीकेऽन्वयासम्भवेन बाधे सति, **निमित्ते च सादृश्यसम्बन्धादा**विति–वाहीकादौ गोशब्दादीनां प्रयोगो हि किमपि निमित्तमभिसमीक्ष्यैव क्रियतेऽन्यथाऽसम्बद्धतापत्तेः, तन्निमित्तं च सादृश्यं सम्बन्धान्तरं च। **प्रयोजने** तादृशाख्यानेन प्रतिपादनीये फले, तदाह–**सादृश्य-ताद्रूप्यप्रतिपत्तिरूपे** इति–सादृश्यम्–आरोप्येन सह साधर्म्यम्, ताद्रूप्यम्–तादात्म्यं तयोः प्रतिपत्तिः–भानं, तदेव तद्रूपं तस्मिन्, सादृश्यभानरूपे तादात्म्यभानरूपे च प्रयोजने सतीति भावः। **आरोप्यारोपविषययो**रिति–आरोप्यं–गोत्वम्, आरोपविषयः–आरोपाश्रयो वाहीकादिः, तयोः, **भेदाभेदेन** चेति–भेदेनाभेदेन चेत्यर्थः। '**आरोपित**' इति सूत्रस्थं पदं व्याख्याति–**समारोपित** इति। तदेव स्पष्टयति–**अतथाभूतोऽपि तथात्वेनाध्यवसित** इति–वाहीको हि न गौः सम्पन्नस्तथापि तत्त्वेनाध्यवसीयते, विषयनिगरणेन विषयिणोऽभेदप्रतिपत्तिरध्यवसानम्, विषयो वाहीकादिरिह निगीर्यते–अन्तः प्रवेश्यते–गोशब्दार्थेनात्मनि प्रविलाप्यते। **गौण** इति विशेष्यवाचकं पदं व्याख्याति–**गुणेभ्य आयातत्वा**दिति–गोसहचारिजाड्यमान्द्यादिगुणेभ्यस्तस्यार्थस्य वाहीकादावायातत्वादागतत्वात् सोऽर्थो गौण इत्याख्यायत इत्यर्थः। **तद्विषयः**–गौणार्थविषयः, गौणार्थप्रतिपादक इति यावत्, **शब्दोऽपि गौण** इति–तस्यापि तद्वाच्यगतगुणकारणादेवायातत्वात् तस्याऽपि तेन पदेनोक्तिरुचितैवेति भावः। तस्याभिधान्तरमप्याह–**उपचरित इति चोच्यत** इति। सूत्रार्थं वर्णयित्वोदाहरति–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**तत्र सादृश्ये निमित्ते भेदेनारोपितो यथा–गौर्वाहीकः, इदं वक्ष्यमाणस्य रूपकालङ्कारस्य बीजम् । अभेदेन यथा–गौरेवायमिति,**

---

**तत्र सादृश्ये निमित्ते भेदेनारोपितो यथेति**–अयमाशयः–गौर्वाहीक इत्यादौ गो-वाहीकपदयोः पृथगर्थयोः प्रयोगेऽन्वयो नोपपद्यत इति गोशब्दार्थस्य सादृश्यसम्बन्धेन तत्रारोपः, तथा चात्र वाहीकस्याऽप्युपादानात् तयोरर्थयोर्भेदोऽपि प्रतिभासत एव, सादृश्यस्य च भेदमूलकत्वात्, एवं च गोसदृशो वाहीक इत्यर्थप्रतीतिः । **इदं सादृश्यारोपणं, रूपकालङ्कारस्य बीजमिति**– "सादृश्ये भेदेनारोपो रूपकम् [ एकानेकविषयम्, का. शा. अ. ६, सू. ५ ]" इति सूत्रेण सादृश्ये निमित्ते सति भेदेन विषय-विषयिणो निर्देशेनारोपो + + + रूपकमिति तल्लक्षणेन परस्परविरुद्धधर्मवत्त्वेनोपस्थिततया प्रकाशितभिन्नस्वरूपयोरप्युपमानोपमेययोरतिसाम्यप्रदर्शनाय काल्पनिकोऽभेदारोपो रूपकनामाऽलङ्कार इत्यायाति । तथा च गौर्वाहीक इत्यत्र गोत्ववाहीकत्वरूपपरस्परविरुद्धधर्मवत्तयोपस्थितयोर्गो-वाहीकयोरभेदारोप इति रूपकालङ्कारलक्षणसङ्गतिः । अत्र वाहीके गोत्वस्य बाधितत्वात् सदृशरूपार्थे गौणीं वृत्तिमकल्पयित्वा नास्ति सम्भवोऽभेदान्वयस्येति तथा कल्प्यते । यत् तु केचित्–'रूपकस्थले नास्ति गौणीवृत्तिस्वीकारस्यावश्यकता, समानविभक्तिकत्वेनाभेदान्वये बाधाभावात्' इति कथयन्ति, तत् तुच्छम् 'गौर्न वाहीकः' 'मुखं न चन्द्रः' इत्यादिप्रबलप्रत्यक्षज्ञानेनाभेदबोधेऽप्रामाण्यग्रहोत्पादनात्, मन्यतां वा तथा बोधे बाधाभावस्तथापि तादृशबोधश्चमत्कारकारी न स्यात्, तथा चालङ्कारजीवातुभूते चमत्कारे गते रूपकमनवसरभ्रष्टमेव स्यात्; तथा चेदं भेदेनारोपस्योदाहरणं सुस्थम् । अभेदेनारोपस्योदाहरणमाह–**यथा–गौरेवायमिति** । इदम् अभेदेनारोपणम्, अतिशयोक्तिनामालङ्कारे प्रथमस्य प्रभेदस्योदाहरणं बीजं वा, "विशेषविवक्षया भेदाऽभेदयोगाऽयोगव्यत्ययोऽतिशयोक्तिः" [ का. शा. अ. ६, सू. १० ] इति हि तल्लक्षणम्, तत्र प्रथमातिशयोक्तिरित्थं निरूपिता—"प्रकृतस्यार्थस्य विशेषविवक्षया [ विशेषवर्णनेच्छया ] भेदस्य व्यत्ययोऽभेदाभिधानं यत् तदतिशयाभिधानादेका [ प्रथमा ] अतिशयोक्तिः ।" तथा चेह प्रकृतोऽर्थो वाहीकस्तस्य विशेषमतिशयजाड्यमान्द्यादिगुणं वक्तुमिच्छया गवाभेदस्य व्यत्ययोऽभेदाभिधानं च कृतमित्यसावलङ्कारः स्फुटः । सोऽयं गौणीवृत्तिलभ्यो गौणोऽर्थः, अयमेवोपचरितो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इदमतिशयोक्तिप्रथमभेदस्य । अत्र स्वार्थसहचारिणो गुणा जाड्य-मान्द्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने निमित्तत्व-मुपयान्तीति केचित् । स्वार्थसहचारिगुणाभेदेन परार्थगता गुणा

---

मात्र इत्यादिपदाभिलप्यः । केचन च गौणीं वृत्तिमनभिमन्यमाना लक्षणायामेव [ तेषां मते गौणी शुद्धाभेदेन लक्षणाया द्वैविध्येन गौण्यां लक्षणायां ] गौणीवृत्तिमन्तर्भावयति, कुर्वन्ति च तस्याः 'सारोपा साध्यवसाना' इति भेदद्वयम्, भवति चेत्थं शाब्दबोधं प्रति लक्षणाजन्यत्वेनोपस्थितेः कारणत्वे लाघवम्, तत्र भेदनिबन्धना सारोपा, अभेदनिबन्धना च साध्यवसानेति काव्यप्रकाशादिषु स्पष्टम् ।

अत्र वादिभेदेन लक्ष्यार्थस्य स्वरूपे भेदमाह—**अत्र स्वार्थसहचारिण** इत्यादि-स्वस्य-गोशब्दस्य, अर्थः-गोत्वं जातावेव शक्तेः, तस्य सहचारिणः-समानाधिकरणाः, [ गोत्वाधिकरणवृत्तयः, ] जाड्यमान्द्यादयो गुणा हि गोत्वेन सह गवि व्यक्तौ तिष्ठन्तीति तत्सहचारित्वं तेषाम्, **लक्ष्यमाणा अपि** गो-शब्देन लक्षणया बोध्यमाना अपि, गोशब्दस्य **परार्थाभिधाने**, परार्थः-वाहीक-रूपः, तस्याभिधाने अभिधया बोधने, **निमित्तत्वं** शक्यतावच्छेदकत्वम्, **उपयान्ति** प्राप्नुवन्ति । गोशब्दाद् गौण्या वृत्त्या प्रथमं जाड्याद्युपस्थितिः, ततस्तद्बलेन वाहीकार्थस्याभिधया बोधः, गोशब्दो हि भिन्नार्थकत्वाद् वाहीकेन सहानुपपद्यमानसमानाधिकरणत्वेन बाधितमुख्यार्थः सन् स्वार्थसहचारित्वसम्बन्धेन जाड्यादिगुणान् गौण्योपस्थाप्य तानेव प्रवृत्तिनिमित्तीकृत्य [ शक्यतावच्छेदकी-कृत्य ] वाहीकमभिधया बोधयतीति निष्कर्षः । तथा च प्रदीपकाराः—"गोशब्दस्य शक्त्या गोत्वं प्रवृत्तिनिमित्तं, [ गौण्या ] लक्षणया च गोशब्दार्थगतं जाड्यमान्द्यादिप्रवृत्तिनिमित्तं भवतीति गोशब्देन जडत्वेन रूपेण वाहीकः, शक्त्या बोध्यते" इति । तथा चात्रमते जाड्यमान्द्यादिवदभिन्नो वाहीक इति बोधः ।

अत्र केचिदित्यनेनास्वरस उद्भावितः, तद्बीजं तु– गोपदस्य वाहीके संकेता-भावेनाभिधाभावः, जाड्यादिगुणानां गौण्योपस्थापितत्वेनाशक्यतया शक्यताव-च्छेदकत्वासम्भवश्च, गोवृत्तिजाड्यादिगुणानां वाहीकावृत्तित्वरूपं चेति त्रयम् ।

मतान्तरमुपन्यस्यति-**स्वार्थसहचारिगुणाभेदेने**त्यादिना-स्वं-गोशब्दः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**एव लक्ष्यन्ते, न तु परार्थोऽभिधीयत इत्यन्ये । साधारणगुणाश्रयेण परार्थ एव लक्ष्यत इत्यपरे ।**

---

तदर्थः–गोत्वं, तत्सहचारिणः–तत्समानाधिकरणाः, तदधिकरणवृत्तय इति यावत्, गुणाः–जाड्य-मान्द्यादयः, तैरभेदः–साजात्यं [ भेदो वैजात्यं तद्विरुद्धं साजात्यम् ] तेन, पदार्थगता परार्थाः–वाहीकाः, तद्गता **गुणाः** तद्वृत्तयो गुणा एव, **लक्ष्यन्ते** गौण्या उपस्थाप्यन्ते, न तु परार्थो वाहीकरूपोऽभिधीयते [ अभिधया प्रतिपाद्यते ] तस्याक्षेपेण वाहीकशब्दादेव लाभसंभवादिति भावः । तथा च गोगतजाड्यादिसजातीयजाड्यादिमान् वाहीक इति बोधः ॥

अत्राऽपि 'अन्ये' इत्युक्त्याऽरुचिः सूचिता, तद्बीजं तु–एकधर्मिबोधकत्वाभावात् गौर्वाहीक इति सामानाधिकरण्यानुपपत्तिः । न च जातिशक्तिवाद इवानुमानरूपाऽऽक्षेपसहकृतेन पदेन व्यक्तिबोधान्नानुपपत्तिरिति वाच्यम् , मुख्यार्थबाधे समाद्रियमाणाया गौण्या साक्षादन्वययोग्याऽर्थोपस्थापनस्यैवौचित्यात् । स्वसंमतं मतमाह–**साधारणगुणाश्रयेणे**त्यादि–साधारणाः–सजातीयाः, गुणाः–जाड्यादयः, तदाश्रयत्वेन रूपेणेत्यर्थः, गोवृत्तिजाड्यादिगुणसमानजाड्यादिगुणाश्रयत्वरूपसम्बन्धेनेति यावत्, **परार्थः** वाहीक एव, **लक्ष्यते**, गौण्या [ लक्षणया ] समुपस्थाप्यते । अत्र च मते जाड्यादिगुणविशिष्टे पदार्थे [ धर्मिणि ] एव गौणी वृत्तिरिति न सामानाधिकरण्यानुपपत्तिरिति । अत्रार्थे मानं तु—

"मानान्तरविरुद्धे तु मुख्यार्थस्य परिग्रहे ।
"अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते ॥
लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता ।"

इति भट्टवार्त्तिकमेव, मुख्यार्थस्य सास्ना-लाङ्गूलादिमद्व्यक्तिरूपस्य परिग्रहे–स्वीकारे, मानान्तरेण–प्रत्यक्षादिना, विरुद्धे सति, अभिधेयेन–वाच्येन, गोत्वादिरूपेणार्थेन, अविनाभूतं–सादृश्यादिसम्बन्धेन सम्बद्धं वाहीकादि, तदर्थस्य प्रतीतिः–प्रतीतिकरणभूतो व्यापारः, लक्षणा, गौणी वृत्तिर्वा, उच्यते–कथ्यते । गौण्याः कारणमाह–लक्ष्यमाणाः–'जाड्यादिगुणविशेष एव लक्षणा' इत्युक्तरीत्या लक्ष्यार्थविशेषणतया लाक्षणिकबोधविषयाः, ये गुणाः–जाड्यमान्द्यादयः, तैर्योगात्–सम्बन्धात् , या वृत्तिः–गोपदस्य वाहीकार्थोपस्थापकता, तस्या गौणता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**संबन्धे-कार्यकारणभावे-आयुर्घृतं, आयुरेवेदम्, अत्रान्यवैलक्षण्येनाव्यभिचारेण च कार्यकारित्वादि प्रयोजनम्, तादर्थ्ये-इन्द्रार्था स्थूणा इन्द्रः, स्वस्वामिभावे-राजकीयः पुरुषो राजा ग्रामस्वामी**

---

इष्टेति वार्त्तिकार्थः, अविनाभावोऽत्र न व्याप्तिः किन्तु सम्बन्धमात्रमिति सादृश्यस्यापि परिग्रह इति बोध्यम्। पूर्वोक्तयोर्गौण्यावृत्तेरुदाहरणयोर्मध्ये गौर्वाहीक इति प्रथमभेदे वाहीकपदप्रयोगात् गो-वाहीकयोर्वैधर्म्ये भासमानेऽपि ताद्रूप्यप्रतीतिः प्रयोजनम्; गौरयमित्यत्र गोत्व-वाहीकत्वयोर्भेदप्रतीतिं विनैवाभेदप्रतीतिर्गौणवृत्त्युपाश्रयणस्य प्रयोजनं बोध्यम्। परमते च यथाऽस्या लक्षणायामेवान्तर्भावस्तदुक्तपूर्वम्॥

सूत्रे 'निमित्ते' इत्यस्य पदस्य 'सादृश्यसम्बन्धादौ च' इति व्याख्या कृता, तत्र सादृश्यनिमित्तिकां गौणीं वृत्तिं भेदाभेदाभ्यामुदाहृत्य साम्प्रतं सम्बन्धनिमित्तां तामुदाहर्तुमारभते-**सम्बन्धे** इत्यादिना। सम्बन्धश्च बहुरूपः, तत्र प्रथमं जन्यजनकभावरूपं सम्बन्धमाह-**कार्यकारणभावे** इत्यादिना। **आयुर्घृतमिति** भेदेन, **आयुरेवेदमिति** चाभेदेनोदाहरणम्, आयुः-दीर्घकालजीवनम्, घृतं जनकम्, आयुर्जन्यम्, जन्यजनकभावः सम्बन्धः, तयोश्च गौण्या वृत्त्याऽभेदः, तेनायुरभिन्नं घृतमिति बोधः। आयुर्जनकं घृतमित्यनुक्त्वा आयुर्घृतमिति गौण्याश्रयणस्य किं फलमित्याशङ्कायामाह-**अत्रान्यवैलक्षण्येनाव्यभिचारेण चेत्यादि**-यान्यन्यायुर्जनकानि वस्तूनि तेभ्यो विलक्षणेन रूपेणेदमायुर्जनकम्, अन्यानि च क्वचित् तज्जनने व्यभिचरन्त्यपि, घृतं तु न कदाचिद् व्यभिचरतीति च बोधनं गौणीवृत्तिसमाश्रयणस्य फलमिति भावः। तस्मै इदं तदर्थं, तस्य भावस्तादर्थ्यम्, तस्मात् तादर्थ्यरूपात् सम्बन्धादुपचारमुदाजिहीर्षुराह-**तादर्थ्ये इन्द्रार्था स्थूणा इन्द्रः** इति-इन्द्रार्था इति तादर्थ्यप्रदर्शनमात्रार्थं, न तु प्रयोगान्तर्गतम्, 'स्थूणा इन्द्रः' इत्येतावन्मात्रस्यैव प्रयोगत्वात्। तादर्थ्यं चोपकार्योपकारकभावः, यात्र्ये कर्मणि स्थूणा [स्तम्भविशेषः] इन्द्रसम्बन्धिपूजादिकर्मोपकारकत्वेन निर्मिता, इन्द्राय निवेदिता वा इन्द्रशब्देनोपचर्यते, तत्रेन्द्रशब्दो गौण्या वृत्त्या स्थूणया सहाभेदेन सम्बन्धमाप्नोति, तद्वत् [इन्द्रवत्] इष्टप्रदत्वरूपं प्रयोजनं व्यङ्ग्यम्। सम्बन्धान्तरस्योदाहरणमाह-**स्वस्वामिभावे** इति-स्वं स्वामिनाधिकृतं वस्तु, स्वामी-स्वत्वेन स्थितस्य वस्तुनः स्वत्वनिरूपकः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**ग्रामः; अवयवावयविभावे-अग्रहस्त इत्यत्राग्रमात्रेऽवयवे हस्तः; मानमेयभावे-आढको व्रीहिः, संयोगे-रक्तद्रव्यसंयोगाद् रक्तः पटः; तात्कर्म्ये-अतक्षा तक्षा; वैपरीत्ये-अभद्रमुखे भद्रमुखः ॥ १७ ॥**

---

यथा-राजकीये पुरुषे 'राजा' इति प्रयोगो राजनिरूपितस्वत्ववान्-राजकीयः अमात्यादिः, पुरुषः जनः, राजा अलङ्घनीयाज्ञत्वेन तत्सादृश्यात्, तत्त्वेन [ अलङ्घनीयाज्ञात्वेन ] प्रत्यायनमेव चोपचाराश्रयणप्रयोजनम् । सम्बन्धो हि सम्बन्धिभ्यां भिन्नो द्विष्ठो विशिष्टबुद्धिनियामकः पदार्थः, एवं स्वस्वामिभावस्यापि सम्बन्धत्वेन तत्रापि सम्बन्धिद्वयावश्यंभावनियमः, एकः स्वं तदन्यश्च स्वामी, तत्र द्वयोरप्युपचारास्पदत्वं सम्भवति, तयोः स्वामिसमर्पकस्य राजपदस्योपचाराश्रयत्वमुदाहृतं, साम्प्रतं स्वस्य [ अधिकृतस्य ] उपचारास्पदत्वमुदाहरति-**ग्रामस्वामी ग्राम** इति-अत्र स्वामिनि अतिस्निग्धत्वनिर्भरत्वादिप्रतीतिः प्रयोजनम् । अथ सम्बन्धान्तरमुदाहरति-**अवयवावयविभाव** इति । **अग्रहस्त** इति प्रयोगः, अग्रमात्रे हस्तावयवे हस्तत्वव्यवहारोऽवयवाऽवयवि-भावसम्बन्धमूलक एवेति भावः, तत्र-अग्रं च तद्धस्तश्चेति कर्मधारयसमासः, तेन पूर्वोक्तेन सम्बन्धेनैव अग्रमात्रे हस्तावयवे हस्तत्वव्यवहारः, तन्मूलकमेव च तयोः सामानाधिकरण्यं, तच्च गौणीवृत्तिकृतमेव । हस्तसमकार्यकारित्वप्रदर्शनेच्छया चायं प्रयोगः । अग्रमात्रे बलाधिक्यप्रतीतिश्च प्रयोजनम् । अवयवपुञ्ज एवावयवीति मतेऽवयवान्तरव्युदासायाग्रपदम् । केचित् तु-'अग्रहस्त' इत्यखण्ड एवायं शब्दो हस्ताग्रवाचक इति वदन्ति । अन्ये तु-हस्तस्याग्रमित्येव विगृह्य अग्रशब्दस्याहिताग्निपाठात् पूर्वनिपातं, राजदन्तादिपाठाद्धस्तशब्दस्य परनिपातं वाऽऽश्रित्यात्र मुख्यामेव वृत्तिं कथयन्ति, तन्मते 'पीता कर्पटिकैर्गङ्गा' इति गङ्गैकदेशे गङ्गात्वोपचार उदाहार्यः । एवं सम्बन्धस्यासंख्येयत्वेन मानमेयभावसम्बन्धस्यापि विशिष्टबुद्धिनियामकत्वस्य दृष्टतया तद्धेतुकमुपचारमप्युदाहर्तुमाह-**मानमेयभावे-आढको व्रीहिरिति**-

"पलं प्रकुञ्चकं मुष्टिः, कुडवस्तच्चतुष्टयम् ।
चत्वारः कुडवाः प्रस्थः, चतुःप्रस्थमथाढकम्" [ ]

इत्यादि परिभाषितमाढकपदं चतुःप्रस्थपरिमाणवाचकम्, तेन सह मानमेयभावसम्बन्धविधया आढकमितो व्रीहिरिति प्रयोक्तृत्वे सामानाधिकरण्येन प्रयोगो न्यूनाधिकत्वाभावप्रतीतिरूपप्रयोजनाय । यद्यपि वैयाकरणमतेऽत्राढकशब्दोत्तर-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विभक्त्या परिमाणार्थबोधने परिच्छेद्यपरिच्छेदक-भावप्रतीतिस्तन्मूलिकैवेति शक्त्यैवात्र तदर्थबोध इति नोपचारावश्यकतेति प्रतीयते तथापि परिमाणे प्रथमा-विधानविरोधिमते सर्वथा तदप्रतीतौ, सिद्धान्तेऽपि तत्परिच्छिन्नत्वबोधेऽपि तद-भिन्नत्वविधया माननिर्वाहायोपचाराश्रयणे चारुतेति तदुदाहरणं युक्तमेव । संयोगसम्बन्धमूलकमुपचारमाह–**रक्तद्रव्यसंयोगादिति**–रक्तद्रव्यं रञ्जनसाधनं द्रव्यं, तस्य संयोगे सति पटोऽपि रक्त इत्युपचर्यत इति भावः । यद्यपि रक्तं रूपं गुणः, तस्य च समवाय एवेति न संयोगोदाहरणत्वं युक्तं तथापि रक्तत्वं रञ्जनसाधनद्रव्यगतो गुणः, स च द्रव्यान्तरयोगेनैव तत्र स्वाश्रयद्रव्येण सह समवैति, न तु स्वत इति तत्समवाये संयोग एव हेतुरिति संयोगोदाहरणमेवेदमिति निर्विवादम् । तथा च संयोगसम्बन्धमूलके उपचारेऽतिरक्तत्वं सर्वावयवेन तत्त्वं वा प्रतीयते, तदेव प्रयोजनम् । तात्कर्म्यरूपमपि सम्बन्धमाश्रित्य तन्मूलकमुप-चारमुदाहरति– **तात्कर्म्ये-अतक्षा तक्षा** इति-तात्कर्म्यं च तत्कर्मकारित्वं, तत् कर्म यस्यासौ तत्कर्मा, तस्य भाव इति व्युत्पत्तेः, तथा च तत्कर्मकारित्वरूपेण सम्बन्धेन तत्त्वोपचार इहेति, जातिविशेषावच्छिन्ने [ वर्धकौ ] रूढं तक्षेति पदमिह तत्कर्मकारिणि तद्विजातीयेऽपि तत्त्वोपचारः, **अतक्षा** तक्ष्णोऽन्यो गोपालादिः, **तक्षा** तज्जातीयगृहनिर्माणादिकार्ये पटुरिति प्रतीयते, परमनिपुणत्वादिकप्रतीतिः प्रयोजनम् । वैपरीत्यं-विरुद्धत्वं विरोधो वा, तेन सम्बन्धेनोपचारमुदाहरति– **अभद्रमुखे भद्रमुख** इति–अभद्रमुखे–कटुभाषिणि, तद्वैपरीत्येन भद्रमुखत्वो-पचारः, तेन च तत्र अतिकटुभाषित्वं प्रतीयते, तदेव च प्रयोजनम् । यथा वाऽनुपकारिण्युपकारित्वव्यवहारः, यथा—

"उपकृतं बहु तत्र किमुच्यते, सुजनता भवता प्रथिता परम् ।
विदधदीदृशमेव सदा सखे ! सुखितमास्स्व ततः शरदां शतम् ॥" इति ।

'बहुभिरपकारैस्तप्यमानस्य कस्यचिदुक्तिरियम्' इति शब्दव्यापारविचार-नाम्नि ग्रन्थे मम्मटः । त्वया यत् बहु उपकृतं तत्र विषये किमुच्यते–किं वाच्यम्, भवता परं-केवलं, सुजनता प्रथिता-प्रकटिता, तथा च सौजन्यप्रयुक्त एवैता-वानुपकारो न तु प्रत्युपकारलोभप्रयुक्त इत्याशयः । हे सखे! ततः–यस्मात् सुजनता प्रथिता तस्मात्, ईदृशमेव सदा विदधत्–कुर्वत्, शरदां–वर्षाणां शतं व्याप्य, सुखितं–सुखयुक्तं यथा स्यात् तथा, आस्स्व–तिष्ठेति मुख्यया वृत्त्या

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लक्ष्यमर्थं लक्षयति—

**मुख्यार्थसंबद्धस्तत्त्वेन लक्ष्यमाणो लक्ष्यः ॥ १८ ॥**

मुख्योऽर्थो गङ्गादिशब्दानां स्रोतःप्रभृतिस्तेन संबद्धस्तटादिरर्थस्तत्त्वेनाभेदेन लक्ष्यमाणो लक्ष्यः । तत्त्वेन लक्ष्यमाण इति वचनाद् भेदाभेदाभ्यामारोपित इति न वर्तते, शेषं तु गौणलक्षणमनुवर्तत

---

बोध्योऽर्थः । स च प्रकरणादिना ज्ञातापकारिणं प्रति बाधितः सन् विपरीते उपचर्यते, तथा 'उपकृतम्' इत्यस्य 'अपकृतम्', 'सुजनता' इत्यस्य 'दुर्जनता' 'सखे' इति 'शत्रो' इति, 'सुखितम्' इति 'दुःखितम्' इत्यर्थे चोपचरितमिति । उक्तं च तत्रैव ग्रन्थे मम्मटेन 'अतो वक्तृमहिम्ना मूर्खे बृहस्पतिशब्देन मूर्खत्वमिव 'अपकारि-दुर्जनत्वादि लक्ष्यत' इति । अपकाराद्यतिशयो व्यङ्ग्यः, तत्प्रतीतिरेव च प्रयोजनम् ॥ १७ ॥

मुख्य-गौणावर्थौ लक्षयित्वा क्रमप्राप्तं लक्ष्यमर्थं लक्षयितुं प्रवृत्तं सूत्रमवतारयति-**लक्ष्यमर्थं लक्षयतीति** । '**मुख्यार्थसम्बद्ध०**' इत्यादिसूत्रस्य पदार्थमाह-**मुख्योऽर्थ** इत्यादिना । शब्दव्यापाराद् योऽर्थोऽव्यवधानेन गम्यते सोऽभिधाशक्त्युपस्थाप्यो मुख्यः, तस्य शक्त्यन्तरानन्तरितशक्तिद्वारा समुपस्थाप्यत्वमेव मुख्यत्वे बीजम् । तादृशश्चार्थो **गङ्गादिशब्दानामग्रे** लक्षणाश्रयतया प्रतिपादितानां, **स्रोतःप्रभृति** प्रवाहादिः गङ्गापदस्य भगीरथखातावच्छिन्नप्रवाहे शक्तिरिति साम्प्रदायिकोक्तेः, तेन **सम्बद्धः** सामीप्यादिसम्बन्धेन संयुतः, **तटादिः** लक्ष्यमाणोऽर्थः-पदार्थः, **तत्त्वेने**त्यस्यार्थमाह-**अभेदेने**ति-प्रवाहत्वेन रूपेणेत्यर्थः, **लक्ष्यमाणो** लक्षणाजन्यप्रतीतिविषयः सन्, '**लक्ष्यः**' इत्यभिधीयते इति शेषः । इदं च सूत्रं पूर्वसूत्रस्थपदान्यपेक्षते, तत्र यावानंशस्ततो नूतनः स उक्तः शेषार्थपूर्त्तिस्तु तत्सूत्रस्थपदानामनुवृत्त्यैव, तथा च, निमित्त-प्रयोजन-प्रकाराणां ततोऽनुवृत्तिरिति प्रकाररूपोपस्थापकस्य तत्त्वेनेति पदस्य सत्त्वेन पूर्वत्र प्रकारवाचकस्य भेदाभेदेनेति पदस्य नोपस्थितिरित्याह-**तत्त्वेन लक्ष्यमाण इति वचनादि**ति । तद्वर्जापेक्षितपदानुवृत्तिमनुजानाति-**शेषं तु गौणलक्षणमनुवर्तत** **एवे**ति-तथा च मुख्यार्थबाधे निमित्ते प्रयोजने चेति पदत्रयमनुवर्त्तत एवेति भावः । तथा च गङ्गायां घोष इत्यादौ प्रत्यक्षादिना

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**एव तद्विषयः शब्दो लक्षको यथा-गङ्गायां घोषः, कुन्ताः प्रविशन्ति, अत्र गङ्गायां घोषाधिकरणत्वस्य कुन्तानां प्रवेशस्य चासम्भवान्मुख्यार्थबाधः, सामीप्यं साहचर्यं च निमित्तम्। गङ्गातट इति, कुन्तवन्त इति च प्रयोगाद् येषां न तथाप्रतिपत्तिस्तेषां पावनत्व-रौद्रत्वादीनां धर्माणां तथाप्रतिपादनं प्रयोजनम्।**

---

प्रमाणेनाभिधया [-मुख्यया वृत्त्या] प्रतिपाद्यस्य मुख्यार्थस्य प्रवाहरूपस्य घोषाद्यधिकरणत्वाद्यसम्भवरूपे बाधे सति [ वस्तुगत्या तु तात्पर्याविषयत्वे सतीत्यर्थः, विवेचयिष्यते चैतदग्रे ] निमित्ते स्वमते सामीप्यादौ सम्बन्धेऽन्यमते रूढ्यादौ च, प्रयोजने-'गङ्गातटे घोषः' इति शब्देन प्रतिपादनेऽलभ्यानां शैत्य-पावनत्वादीनां प्रतीतिरूपे सति, मुख्यार्थेन-प्रवाहादिना सम्बद्धः, सामीप्यादि-नान्वितः, तत्त्वेन प्रवाहत्वेन रूपेण, **लक्ष्यमाणः** लक्षणाजन्यप्रतीतिविषयी क्रियमाणः प्रतिपाद्यमानो वा तटादिरर्थो लक्ष्य इति सूत्रार्थसंगतिः। तदेतत् **अत्र गङ्गायां घोषाधिकरणत्वस्ये**त्यादिना प्रतिपादयिष्यते। **तद्विषयकः** लक्ष्यार्थप्रतिपादकः शब्दो लक्षक 'इत्युच्यते' इति शेषः। उदाहरणमाह-**गङ्गायां घोषः, कुन्ताः प्रविशन्ती**ति। अनयोः सूत्रार्थं सङ्गमयति-**अत्र गङ्गायां घोषाधिकरणत्वस्ये**त्यादिना-" घोष आभीरपल्ली स्यात्" इत्यमर-स्वारस्येन गोपग्रामो गोपानां कुटी वा "कुटि-ग्रामकयोः पल्लिः" इति शाश्वत-कोशात् घोषः, तदधिकरणत्वं हि जलमयस्य प्रवाहस्यासंभवम्; एवं कुन्ताः प्रविशन्तीत्यत्राचेतनानामस्त्रविशेषाणां कुन्तानां प्रवेशनक्रियाकर्तृत्वाऽसम्भव इति मुख्योऽर्थ एतयोर्बाधितः। **सामीप्यमि**ति पूर्वत्र, **साहचर्यमि**ति च परत्र निमित्तम्। प्रयोजनं प्रतिपादयति-**गङ्गातट इति कुन्तवन्त इति च** प्रतिपादनादिति, 'गङ्गातटे घोषः, कुन्तवन्तः प्रविशन्ति' इति प्रतिपादनाद् येषां पावनत्वादीनां पूर्वत्र, रौद्रत्वादीनामुत्तरत्र न तथा प्रतिपत्तिर्यथा लक्षणया प्रतिपाद्यते, तेषां धर्माणां तथात्वेन रूपेण प्रतिपादनं प्रयोजनमिति वृत्त्यन्वयः। अत्र 'गङ्गायां घोषाधिकरणत्वस्यासम्भवान्मुख्यार्थबाधः' इत्युक्त्या-ऽन्वयानुपपत्तेर्लक्षणाबीजत्वमिति स्वमतं यद्यपि लभ्यते, तथापि तस्य [ असंभव-पदस्य ] तात्पर्याविषयत्वे इत्येवार्थो युक्तः। तथा च मुख्यार्थस्य तात्पर्याविषय-त्वरूपे बाधे सतीत्यर्थः, तदुक्तं लक्षणाविवेचनप्रकरणे काव्यप्रकाशटीकायां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रभायां—"मुख्यार्थबाधश्च शक्यतावच्छेदकरूपेण तात्पर्यविषयान्वयबाधः" इति, तत्रैव च कमलाकरभट्टादिटीकाकारैः—'मुख्यार्थस्यान्यपदार्थासंसर्ग एव बाधः' इत्युक्त्वाऽन्ते 'वक्तृतात्पर्यविषयवाक्यार्थबोधाभावोऽत्र बाधः' इति स्वीकृतम्। यद्यपि 'गङ्गायां घोषः, यष्टीः प्रवेशय' इत्यादावुभयाऽपेक्षादर्शनाद् विनिगमनाविरहः, तथापि 'गङ्गायां घोष' इत्यत्र वक्तृतात्पर्याभावे घोषपदे एव मीने लक्षणा किं न स्यात्? कुतश्च गङ्गापदेऽपि स्वार्थसम्बन्धिनौकादौ लक्षणा न स्यात्? तावताप्यन्वयानुपपत्तिशान्तेः, अतस्तात्पर्यानुपपत्तिरेव लक्षणाबीजमित्याहुः। उक्तं च परमलघुमञ्जूषायां नैयायिकमतानुवादावसरे नागोजीभट्टेन "शक्यसम्बन्धो लक्षणा, अन्वयाद्यनुपपत्तिप्रतिसन्धानं च लक्षणाबीजम्। वस्तुतस्तु तात्पर्यानुपपत्तिप्रतिसन्धानमेव लक्षणाबीजम्, अन्यथा गङ्गायां घोष इत्यत्र घोषे एव मकरादिलक्षणापत्तिः, तावताऽप्यन्वयानुपपत्तिपरिहारात्; गङ्गायां पापी गच्छतीत्यादौ गङ्गापदस्य नरके लक्षणापत्तेश्च अस्माकं तु भूतपूर्वपापावच्छिन्नलक्षकत्वे तात्पर्यान्न दोषः, नक्षत्रं दृष्ट्वा वाचं विसृजेदिति विधावन्वयसम्भवेऽपि तात्पर्यानुपपत्त्यैव लक्षणास्वीकारात्। एकानुगमस्वीकारेण निर्वाहेऽनेकानुगमस्वीकारे गौरवाच्च" इति। केचित् तु—अन्वयानुपपत्तेस्तात्पर्यानुपपत्तेश्च लक्षणाबीजत्वे मुख्यार्थबाधावगममुखेनैव प्रयोजकताऽऽस्थेया, मुख्यार्थबाधश्च समभिव्याहृतपदतात्पर्यविषये मुख्यार्थतावच्छेदकरूपेण मुख्यार्थासंसर्गरूपः, एवं च 'छत्रिणो यान्ति, यष्टीः प्रवेशय, काकेभ्यो दधि रक्ष्यताम्' इत्यादौ छत्र्यादिमुख्यार्थानां समभिव्याहृतः, तत्तत्क्रियासु कर्तृत्वादिरूपेणान्वयाबाधेऽपि तात्पर्यविषयेषु च्छत्र्यच्छत्रिगमनभोजनार्थप्रवेशन-दध्युपघातकावधिकरक्षणेषु मुख्यार्थतावच्छेदकरूपेण तदन्वयबाधोऽस्त्येवेति नान्वयानुपपत्तेर्लक्षणाबीजत्वे दोष उद्भावयितुं शक्य इत्याहुः। सा चेयं लक्षणा नानाप्रकारमतानुसारं नानाप्रकारा—शक्यतावच्छेदकारोपरूपा, संस्काररूपा, शक्यसम्बन्धरूपा, सम्बन्धज्ञानरूपा, वक्तृतात्पर्यरूपा च; तत्र प्रथमप्रकार एवालङ्कारिकसम्मतः, अत एव—

"कचतस्त्रस्यति वदनं, वदनात् कुचमण्डलं त्रसति।
मध्याद् बिभेति नयनं, नयनादधरः समुद्विजति॥" [ ]

इत्यत्र कचत्वादिना राहुत्वविशिष्टस्य बोधनाद् न त्रासाद्यन्वयानुपपत्तिः; कचत्वविशिष्टे राहुत्वारोपाद् राहुत्वविशिष्टत्वात् कचेभ्यस्त्रासोत्पत्तिः, कचत्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**गौरनुबन्ध्य इति तु नोदाहरणीयम्, अत्र हि श्रुतिनोदितमनुबन्धनं जातौ न संभवतीति जात्यविनाभावित्वाद् व्यक्तिराक्षिप्यते, न तु शब्देनोच्यते "विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे"**

---

वैशिष्ट्याच्च चमत्काराधानमिति हृदयम्। श्लोकार्थश्च–कचतः [ राहुत्वेन ज्ञातात् ] केशसमूहात्, वदनं–मुखं [ चन्द्रत्वेनारोपितं ] त्रस्यति–बिभेति, वदनात् [ चन्द्रात् ] कुचमण्डलं [ कमलकुड्मलत्वेन विज्ञातं ] त्रसति, तथा मध्यात्–कटीप्रदेशात् [ सिंहकटीसादृश्यात् सिंहत्वेन विज्ञातात्, ] नयनं नेत्रं [ मृगनेत्रसादृश्याद् मृगत्वेन विज्ञातं, ] बिभेति, सिंहान्मृगस्य भयं स्वाभाविकमेवेति भावः। पुनर्नयनात् [ खञ्जनत्वेन विज्ञानात् खञ्जनसादृश्येन च तत्र तत्त्वस्याप्यारोपात्, ] अधरः [ बिम्बसादृश्यात् तत्त्वेन विज्ञातः, ] समुद्विजति–उद्वेगं भजते, खञ्जनस्य बिम्बफलभक्षणप्रवृत्तेरिति भाव इति।

अत्र मीमांसकैर्जातिशक्तिवादिभिर्मण्डनमिश्रादिभिर्लक्षणाया उदाहरणं गौरनुबन्ध्य इत्युक्तम्। अयं हि तेषामाशयः–"गौरनुबन्ध्योऽजोऽग्नीषोमीयः" [ ] इत्यादिश्रुतौ गोरनुबन्धनं चोदितम्, गोशब्दश्च गोत्ववाची, गोत्वं च सामान्यम्, तस्य चानुबन्धनम्–आलम्भनं बाधितम्, श्रुतेश्च प्रभुसम्मितशब्दत्वेन तदुक्ताननुष्ठाने दोषः, ततश्च तस्यावश्यकर्त्तव्यत्वं कथं निर्वाहितं स्यादिति जात्या व्यक्तिर्लक्ष्यत इति, तत् खण्डयति–**गौरनुबन्ध्य इति तु नोदाहरणीयमिति**। कुत इत्याह–**अत्र ही**त्यादिना **जात्यविनाभावित्वादि**ति–व्यक्तिं विना जातेरभावादित्यर्थः। **व्यक्तिराक्षिप्यत** इति–जात्या व्यक्तिरनुमीयत इति भावः। जातिर्व्यक्त्याश्रिता जातित्वादित्यनुमानं सामान्येन; न चानुमिताया व्यक्तेरशाब्दत्वात् कथं शाब्देन संख्याकर्मत्वादिना अन्वयः, "शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्यते" इति न्यायादिति वाच्यम्, अनुमानस्य शब्दसहकारित्वोपगमात्, तथा चानुमानसहकारेण शब्देन जातिविशिष्टधीरित्यर्थः, न च वृत्त्या पदजन्यधीविषयत्वं शाब्दबोधे तन्त्रमिति वाच्यम्, लाघवात् पदजन्यत्वस्यैव तत्त्वौचित्यादिति।

स्वमतं प्रतिपाद्य तन्मतं खण्डयति–**न तु शब्देनोच्यत** इति। तत्र हेतुमाह–"**विशेष्यं नाभिधे**त्यादि–अभिधा–शक्तिः, विशेष्यं–व्यक्तिरूपं धर्मिणं, न गच्छेत्–न यायात्, न स्पृशेदित्यर्थः। तत्र हेतुमाह–**क्षीणशक्तिरि**त्यादि–



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति न्यायात्, न चात्र प्रयोजनमस्ति। अविनाभावादाक्षेपे च यदि लक्ष्यत्वमिष्यते तदा क्रियतामित्यत्र कर्तुः, कुर्वित्यत्र कर्मणः, प्रविश पिण्डीमित्यादौ 'गृहं भक्षय' इत्यादेश्च लक्ष्यत्वं स्यात्। पीनो देवदत्तो दिवा न भुङ्क्त इत्यादौ न पीनत्वेन रात्रिभोजनं लक्ष्यते, अपि त्वर्थापत्त्या आक्षिप्यत इति। इह च यत्र वस्त्वन्तरे वस्त्वन्तरमुप-

---

यतो विशेषणे—जातिरूपे उपाधौ [ धर्मे ], क्षीणशक्तिः—विरतव्यापारा, "नागृहीतविशेषणा बुद्धिर्विशेष्ये उपजायते" इति न्यायेन विशेषणं प्रत्याय्य विरामादित्यर्थः; एवं चाभिधया व्यक्तेर्बोधोऽसम्भवीत्यनुमानाश्रितमिति भावः। नन्वेवं लक्षणैव कुतो नाश्रितेति चेत्? अत्राह—**न चात्र प्रयोजनमस्तीति**—गङ्गायां घोष इत्यादौ पावनत्वादिप्रतीतिवदत्र किमपि प्रयोजनं नास्तीति न लक्षणासम्भव इति भावः। विपक्षे बाधकमाह—**अविनाभावादाक्षेपे** चेत्यादि—एवमाक्षेपस्थले लक्षणास्वीकारे चेति भावः। **'क्रियताम्, कुरु प्रविश पिण्डीम्'** इत्येतानि चत्वारि पदात्मकानि वाक्यानि, तत्र क्रियायाः कर्तृ-कर्मादिसाधनाविनाभावात् कर्तृ-कर्मादीनामाक्षेपो भवति, पिण्डीमित्यत्र गुडस्य पिण्याकस्य ग्रासस्य वा कर्मणः क्रियां विनाऽसम्भवाच्च भक्षयेति क्रियाया आक्षेपो भवति; तत्रापि भवद्रीत्या लक्षणैव स्यादिति भावः।

केचित् तु—'पीनो देवदत्तो दिवा न भुङ्क्ते' इति वाक्ये देवदत्तो रात्रिभोजनवानिति लक्ष्यते, भोजनाभावसमानाधिकरणपीनत्वयुक्तोत्कर्षस्य प्रतीतेः प्रयोजनस्य सत्त्वात्। अर्थवादे प्राशस्त्यलक्षणावद्वाक्येऽपि लक्षणा साध्वी, पीनत्वेनैव सामानाधिकरण्यात्, रात्रिभोजनं वा लक्ष्यते' इत्याद्याहुः, तन्मतं दूषयति—**पीनो देवदत्त** इत्यादिना। **न पीनत्वेन रात्रिभोजनं लक्ष्यत** इति—तर्हि कथं तत्र रात्रिभोजनार्थावगतिरिति चेदत्राह—**अपि त्वर्थापत्त्या आक्षिप्यत** इति—अर्थादर्थस्यापत्तिरापतनमित्यर्थापत्तिः, शब्दव्यापारमन्तराऽप्यर्थस्य प्रतीतिरिति भावः, इयं च पञ्चमप्रमाणभूता भट्टसम्मता, वेदान्तिभिरपि 'व्यवहारे भट्टनयः' इति सिद्धान्तात् स्वीक्रियत एव; सा चेयं द्विविधा—श्रुतार्थापत्तिर्दृष्टार्थापत्तिश्च, श्रुतं—शब्दः, तत्कल्पिकाऽर्थापत्तिः—श्रुतार्थापत्तिः' इति उद्द्योतकारः, यत्रानुपपद्यमानः शब्दः शब्दान्तरं कल्पयति सा श्रुतार्थापत्तिः, यथा—'द्वारम्' इति शब्दः 'पिधेहि' इति क्रियापदं कल्पयति, अयमेव पदाध्याहारः शब्दाध्याहारो वोच्यते;

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चर्यते स गौणोऽर्थो, यत्र तु न तथा स लक्ष्य इति विवेकः । कुशल-द्विरेफ-द्विकादयस्तु साक्षात्संकेतविषयत्वान्मुख्या एवेति न रूढि-

---

यत्र च दृष्टः श्रुतो वाऽर्थोऽनुपपन्नोऽर्थान्तरं कल्पयति सा दृष्टार्थापत्तिरर्थापत्तिमात्रं वा, यथा तत्रैव द्वारमित्यर्थोऽनुपपन्नः पिधेहीति क्रियामर्थरूपेण कल्पयति, इय-मेव चार्थाध्याहार इति कथ्यते । एवं च प्रकृते पीनत्वरूपोऽर्थोऽनुपपन्नं रात्रि-भोजनरूपमर्थं कल्पयतीति नात्र लक्षणेति ।

इत्थं लक्ष्यार्थं निरूप्य गौणार्थेन सह तस्य भेदमवगमयितुमाह-इह च यत्र वस्त्वन्तर इति-वस्त्वन्तरे-वाहीकादौ, वस्त्वन्तरं-गोत्वादि, उपचर्यते-समा-रोप्यते-गुणसाधारण्यमहिम्ना समाश्रीयते, अयमुपचारो व्यवहारसमर्थकः, अय-मेव चार्थो गौणः । यत्र तु सादृश्यप्रयोजकगुणादिसाधारण्यमनपेक्ष्य जन्यजनक-भावादिकं सम्बन्धमनुसन्धाय स्ववाच्यार्थातिरिक्तेऽर्थान्तरे वृत्तिः स लक्ष्य इति, यथा-'आयुर्घृतमिति, अत्रायुःकारणमपि घृतमायुस्तादात्म्येनोक्तम्, अन्य-वैलक्षण्येनाव्यभिचारेण चायुःसाधनत्वप्रतिपत्तिः प्रयोजनमिति गौणी वृत्तिः । गङ्गायां घोष इत्यादिषु च तटाद्यर्थान्तरे वृत्तिरिति लक्षणावृत्तिरिति । कुशल-द्विरेफादिशब्देषु कुशं लाति-गृह्णातीत्यर्थेन कुशग्रहणकारिणि, रेफद्वयभाजि भ्रमरादिपदे च मुख्यतया वर्त्तमानेषु विवेचकत्वरूपं साधर्म्यं सम्बन्धं रूढिं चाश्रित्य चतुर-भ्रमराद्यर्थे लक्षणेति रूढिरपि लक्षणा निमित्तमिति वदतां मतं खण्डयति-कुशलद्विरेफ-द्विकादयस्तु साक्षात्सङ्केतविषयत्वान्मुख्या एवेति न रूढिरित्यादि । अयमाशयः-कुशग्राहिरूपार्थस्य व्युत्पत्तिलभ्यत्वेऽपि चतुररूपार्थस्यैव तत्र मुख्यतया प्रतीतत्वेन मुख्यार्थबाधाभावान्न लक्षणेति । ननु व्युत्पत्त्या लभ्यमर्थमुपेक्ष्य प्रवृत्तिनिमित्तभूत एव मुख्योऽर्थ इत्यत्र किं मानमिति चेत्? न-'गौः शेते' इत्यत्र लक्षणामन्तरेण निर्वाहस्य सकलसम्मतत्वमेव मानमिति गृहाण, गमेर्गत्यर्थकात् कर्त्रर्थे निष्पन्नो गोशब्द इह शयानां गामाह, व्युत्पत्तिलभ्यार्थापेक्षया प्रवृत्तिनिमित्तभूतार्थस्य मुख्यत्वं विना तथा प्रतीतिर्न सम्भाविनी । उक्तं च महाभाष्यकृताऽपि "अन्यद्धि शब्दानां व्युत्पत्ति-निमित्तमन्यच्च प्रवृत्तिनिमित्तम्" इति, व्युत्पत्तेः-योगार्थप्रतीतेः, निमित्तं-कारणं योगार्थतावच्छेदकम्, अन्यत् भिन्नम्, प्रवृत्तेः-शक्तेः सङ्केतस्य, निमित्तं-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लक्ष्यस्यार्थस्य हेतुत्वेनास्माभिरुक्ता ॥ १८ ॥

शक्यतावच्छेदकं चान्यदिति तदर्थः । एवं च योगार्थतावच्छेदक-शक्यताव-च्छेदकयोरत्यन्तभेदात् । योगार्थ-शक्यार्थयोरपि भेदः स्वीकर्त्तव्य एवेति कुशलपदस्य कुशग्राहिरूपे सत्यपि योगार्थे 'कृती कुशल इत्यपि' इत्याद्यमरादि-कोशकारवचनात् तस्य 'चतुर' एव मुख्योऽर्थ इति तद्बाधाभावाल्लक्षणा न स्वीकर-णीयेति । ननु कुशल-गवादिशब्दानां व्याकरणात् कुशग्रहणगमन—कर्त्राद्यर्थप्रतीतौ कोषाद् दक्ष-सास्नादिमत्त्वाद्यर्थग्रहणे किं मानम् ? उभयोरपि शक्तिग्राहकत्व-साम्येन बलवत्त्वे बीजाभावादिति चेत् ? अत्र ब्रूमः, प्रकृति-प्रत्ययार्थज्ञानसापेक्षतया योगार्थप्रतीतौ गौरवं विलम्बश्च, तदुभयार्थज्ञाननिरपेक्षरूढ्यर्थप्रतीतौ लाघवमवि-लम्बश्चेति रूढ्यर्थसम्भवे योगार्थो विप्रकृष्यते, तदुक्तं भट्टेन "लब्धात्मिका सती रूढिर्भवेद् योगापहारिणी" इति, यत्र तु न रूढ्यर्थसम्भवस्तत्र योगार्थ एवाद्रियत इति सर्वं सुस्थम् । एवं द्विरेफशब्दस्य रेफद्वयघटिता भ्रमरादिसंज्ञा वाच्या चेत् तदुपस्थाप्ये षट्चरणचारिणि मधुलिड्रूपेऽर्थे लक्षणा स्वीकर्त्तव्या भवति, तथैव द्विकपदस्य काकरूपेऽर्थे, परं स्थलद्वयेऽपि रूढ्या भ्रमरकाकयोरेव प्राधान्येनोप-स्थित्यङ्गीकारे का लक्षणाया आवश्यकतेति । अत एव लक्ष्यार्थपरिभाषावसरे रूढिः प्रयोजनवत् कारणत्वेन नोक्ता, सर्वत्रापि रूढ्या समुपस्थापितस्यार्थस्य प्राधान्यस्वीकारात् । साक्षात्संकेतविषयत्वादिति हेतूपन्यासेन तादृशरूढ्यर्थस्य वाच्यतामभिधाय लक्षणाऽसम्भवरूपः स्वीयसिद्धान्तः स्फुटमुक्तः । अत्रेदं विचारणीयम्—कुशलपदे कुशग्राहिरूपार्थापेक्षया चतुररूपार्थस्य मुख्यत्वेन लक्षणाऽसम्भवेऽपि द्विरेफ-द्विकादिपदानां न तथा प्रत्ययो भवति, द्विरेफपदं बहुव्रीहिबलाद् रेफद्वयघटितं भ्रमरशब्दमेव वक्तुं क्षमम्, एवं द्विकपदमपि द्विक कारवत्त्वेन रूपेण काकशब्दं, न तु तयोः शब्दयोरभिधेयं मधुकरादिकम्, एवं च शब्दाऽर्थयोरभेदेन सम्बन्धेनैव तयोरर्थयोरुपस्थितिरित्यास्थेयम्; तथा चाभेद-सम्बन्धमूलिका लक्षणाऽत्रावश्यकीति मत्वैव प्राचीनैः काव्यप्रकाशादिकृद्भिरनादि-तात्पर्यमूला निरूढलक्षणा स्वीकृता । परंतु क्रमशस्तेषामर्थानां मुख्यतया प्रतिभासनान्न बाधप्रतिसन्धानपूर्विका 'गङ्गायां घोषः' इत्यादि स्थलवत् तत्रार्थ-प्रतिपत्तिरिति मत्वैवोक्तम्—नास्माभिरुक्तेति— । न तु भट्टमुकुल—मम्मटादिभि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यङ्ग्यं लक्षयति—

**मुख्याद्यतिरिक्तः प्रतीयमानो व्यङ्ग्यो ध्वनिः ॥ १९ ॥**

मुख्य-गौण-लक्ष्यार्थव्यतिरिक्तः प्रतीतिविषयो व्यङ्ग्योऽर्थः । स च

---

यदुक्तं तस्य खण्डनेऽस्माकमाग्रह इति भावः । तथा च तै रूढिमपि प्रयोजनं स्वीकृत्य लक्षणा समाश्रिता–"रूढेः प्रयोजनाद् वापि व्यवहारोऽवलोक्यत" इति मम्मटेन च–"मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।

'अन्योऽर्थो लक्ष्यते यत् सा लक्षणाऽऽरोपिता क्रिया ॥ इति, [ का० प्र०, द्वि० उ० ९ ]

रूढेरनादितात्पर्यात् प्रयोजनादर्थविशेषप्रतिपादनरूपात्, व्यवहारः–अन्यार्थकस्य शब्दस्यान्यत्र प्रयोगोऽवलोक्यत इति भट्टकारिकार्थः । मुख्यार्थस्य वाच्यार्थस्य, बाधे–घोषाद्यधिकरणत्वासम्भवरूपे बाधे सति, वक्तृतात्पर्याविषयत्वे सतीति वा, तस्य–मुख्यार्थस्य, योगे–सम्बन्धे [ अमुख्येन लक्षणीयेन तटादिनाऽर्थेन हस सामीप्यादिसाक्षात्सम्बन्धे सतीत्यर्थे ] सति, रूढितः–प्रसिद्धेः, प्रयोगप्रवाहात्, अथ–अथवा, प्रयोजनात्–शैत्य-पावनत्वादिप्रतीतिरूपात्, [ शब्देन ] अन्योऽर्थो यद् लक्ष्यते सा लक्षणा' इत्यन्वयः । 'आरोपिता क्रिया' इति च तत्स्वरूपं पदान्तरेणाहेति काव्यप्रकाशीयकारिकार्थः ॥ १८ ॥

मुख्य-गौण-लक्ष्यानर्थान् व्याख्याय क्रमप्राप्तं व्यङ्ग्यमर्थं लिलक्षयिषुराह–**व्यङ्ग्यं लक्षयतीति**"–मुख्याद्यतिरिक्त०" इति सूत्रेणेति शेषः । **मुख्यादी**-त्यत्रादिपदेन गौण-लक्ष्ययोः संग्रह इत्याह–**मुख्य-गौण-लक्ष्यार्थव्यतिरिक्त** इति–अयं भावः–यद् यतो भिन्नत्वेन प्रतीयते तत् ततोऽन्यदिति व्यवहर्त्तव्यम्, यथा नीलं पीताद् भिन्नं प्रतिभासत इति ततोऽन्यत्वेन प्रसिद्धम्, वाच्याद्यर्थव्यतिरिक्तः–मुख्य-गौण-लक्ष्यविलक्षणो यतो व्यङ्ग्योऽर्थः प्रतिभासतेऽतो विभिन्न एभ्योऽयमिति स्वीकर्तव्यम् । नन्वस्य पृथगवभासने किं विनिगमकमित्याह–**प्रतीतिविषय** इति–स्वसंवेदनगम्य इत्यर्थः, न हि स्वसंवेदनसिद्ध आत्मनीव तत्रापि वस्तुनि विवाद इति भावः । तथा चाहानन्दवर्धनाचार्यो ध्वन्यालोके—

"प्रतीयमानं पुनरन्यदेव, वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत् तत् प्रसिद्धावयवातिरिक्तं, विभाति लावण्यमिवाङ्गनासु ॥"
[ उ० १, श्लो० ४ ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**ध्वन्यते द्योत्यत इति ध्वनिरिति पूर्वाचार्यैः संज्ञितः। अयं च वस्त्वलङ्काररसादिभेदात् त्रेधा। तथाहि-आद्यस्तावत् प्रभेदो मुख्यादि-**

---

अङ्गनासु–प्रशस्तस्त्रीषु, प्रसिद्धेभ्योऽवयवेभ्यो–मुखनयनादिभ्योऽतिरिक्तं-भिन्नं, लावण्यं–"मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमितीरितम् ॥" इति शिङ्गभूपेन लक्षितं, कान्तिपूरमिव महाकवीनां वाणीषु–कवितात्मकवाक्षु, प्रसिद्धेभ्योऽवयवेभ्यः–शब्दार्थतदुभयालङ्कारादिभ्योऽतिरिक्तं यत् 'त्रिशाखं' प्रतीयमानं वस्तु विभाति तद् अन्यदेवास्ति, न तु वाच्यलक्ष्यार्थरूपं विद्यते। यथा प्रशस्तसौन्दर्यायाः स्त्रियः सर्वावयवप्रातिस्विकसौन्दर्यव्यतिरिक्तं सहृदयलोचनामृतं लावण्यं प्रतीतिबलादभ्युपेयते तथैव महाकविवाणीष्वपि तादृशं वाच्यादिव्यतिरिक्तं किमपि तत्त्वान्तरं 'व्यङ्ग्य' शब्दाभिलप्यमिति भावः। **स चेति**–प्रतीयमानोऽर्थश्चेत्यर्थः **ध्वन्यते**–शब्दाप्रतिपाद्यतया केवलं व्यञ्जनया बोध्यते इति ध्वनिरिति **पूर्वाचार्यै**र्ध्वनिकारादिभिः, **संज्ञितः** ध्वनिरिति संज्ञया संकेतितः। तस्य त्रिशाखत्वमित्याह-**वस्त्वलङ्काररसादिभेदा**दिति। अयमाशयः–अर्थो हि लौकिकोऽलौकिकश्चेति द्विप्रकारकः, तत्राद्यः शब्देनाभिधातुं शक्यः, स च द्विविधः–विचित्रोऽविचित्रश्च, तत्राविचित्रः स्वभावसिद्धो वस्तुमात्रं, विचित्रः प्रतिपादनवैचित्र्यानुसार्यलङ्कारादिः, एष च द्विविधोऽप्यर्थो वाच्यतासहः, स्वशब्देन स्वप्रतिपादकशब्दान्तरेण वाऽभिधानेऽपि चमत्कारकारित्वादस्य तत्त्वम् ननु वस्त्वलंकारयोरपि स्वशब्देन [ वस्त्वलङ्कारपदाभ्यां ] प्रतिपादनेन चमत्कार इति कथं वाच्यतासहत्वमिति चेत्? न–वाक्यार्थबोधविषयत्वे चमत्कारित्वस्यैव वाच्यतासहत्वात्, तच्चैतयोरेवेति तात्पर्यात्। ननु विचित्रस्यालङ्काररूपस्यार्थस्य व्यङ्ग्यत्वे मुख्यतया तस्यालङ्कार्यत्वेन कथमलङ्कारत्वव्यपदेशोऽन्यानलङ्करणादिति चेत्? सत्यम्–ब्राह्मणश्रमणन्यायेन तस्यालङ्कारत्वव्यपदेशात्। अयमाशयः–श्रमणः–संन्यासी, बौद्धसंन्यासी वा, यथा तस्याशास्त्रीयविधिना त्यक्तशिखासूत्रस्यापि-त्यक्तब्राह्मणोचितनित्यादिकर्मणश्च तदानीं ब्राह्मणत्वाभावेऽपि पूर्वकालिकब्राह्मणत्वमादाय ब्राह्मणत्वव्यवहारस्तथाऽलङ्कार्यस्यापि व्यङ्ग्यतादशायामलङ्कारत्वाभावेऽपि वाच्यतादशायां विद्यमानमलङ्कारत्वमादायालङ्कारत्व-व्यपदेश इति। अनयोश्च न सर्वत्र वाच्यत्वं व्यङ्ग्यत्वस्यापि सत्त्वात्, तथापि तयोर्विध्यादिरूपत्वेन क्वचन वाच्यत्वं दृष्टमिति तदभिप्रायेण लौकिकत्वं वाच्यतासहत्वं वेति प्रागपि प्रतिपादि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भ्योऽत्यन्तं भिन्नः। स हि वाच्यविधिरूपे प्रतिषेधरूपो यथा—

भम धम्मिय! वीसत्थो सो सुणओ अज्ज मारिओ तेण।
गोलाणइकच्छकुडङ्गवासिणा दरियसीहेण॥ १॥

[ गा० स० २. ७५ ]

---

तम्। अवशिष्टोऽलौकिको रसादिलक्षणोऽर्थः, स स्वप्नेऽपि वाच्यत्वं न स्प्रष्टुं क्षमते, रसादिपदेन भाव-रसाभास-भावाभासादिः सर्वोऽपि गृह्यते, स हि रसादिशब्देन शृङ्गारादि शब्देन वाऽभिधीयते, न चाभिधीयते, तादृशशब्दप्रयोगेऽपि विभावाद्य-प्रयोगे रसादेरप्रतिपत्तेः। "नयननलिनीलीलाकृष्टं पिबन्ति रसं प्रियाः।" इत्यादौ रसशब्देन, "शृङ्गारस्योपनतमधुना राज्यमेकातपत्रम्" इत्यादौ शृङ्गाऽरादिशब्देन वा प्रतिपादनेऽपि विभावानुभावाद्यभावेन चमत्काराभावात्, विभावादिप्रयोगे च रसादि शब्दाप्रयोगेऽपि रसप्रतीतेर्दृष्टत्वाच्चान्वय-व्यतिरेकाभ्यां तस्य वाच्यत्वा-भावावधारणात्, मुख्यार्थबाधाद्यभावाच्च न लक्षणीय इति तादृशोऽर्थः [ रसादि-रूपो ] व्यङ्ग्य एवेत्यत एव तस्यालौकिकत्वम्। मुख्यादिभ्यो भेदं विस्तरेण प्रदर्श-यितुमुपक्रमते—तथाहीत्यादिना। आद्यः वस्तुरूपः, प्रभेदः त्रिष्वेकतमो भेदः, **मुख्यादिभ्यः** वाच्य-गौणलक्ष्येभ्योऽत्यन्तं भिन्न इति, तत्र येऽर्था वाच्यत्वा-दिना प्रतीयन्ते तेभ्योऽतिशयं भिन्न इति भावः। तादृशं भेदमेव दर्शयति—**स हि वाच्यविधिरूपे** इति—हि यतः, **स** व्यङ्ग्योऽर्थः, वाच्ये विधिरूपे सति प्रति-षेधरूपो भवत्यतस्तस्माद् भिन्न इत्यर्थः। तदुदाहरति—यथा—**भम धम्मियेति**—'भ्रम धार्मिक! विश्वस्तः स शुनकोऽद्य मारितस्तेन। गोदानदी कच्छकुञ्जवासिना दृप्तसिंहेन॥" इति संस्कृतम्।

काचित् पुंश्चली नादेयपानीयनयनादिव्याजेन गृहान्निर्गत्य प्रच्छन्नकामुकेन सह गोदावरी कूललतागहने सदा रममाणा पुष्पोच्चयलताविलोपादिना विघ्न-कारिणं धार्मिकं प्रति विदग्धाऽपि मुग्धेव वक्ति—हे धार्मिक! विश्वस्तः—स्वैरं यथा स्यात् तथा, न तु पूर्ववत् सत्रासम्, भ्रम—सञ्चर, यतः स—यस्तवास्मद्गृहे-सविधे सञ्चरतो भयमकरोत् स शुनकः—कृपापात्रं दीनो निर्विचारो वा श्वा, तेन—प्रसिद्धेन, [ केवलं त्वयैवाज्ञातेन ] गोदानदी—गोदावरीसरित्, तस्याः कच्छकुञ्जे कूलस्थलतामण्डपे, वासिना—सन्ततवासशीलेन,—दृप्तः—गर्वितः, [ ग्राममपि प्रविश्य हठाद् घातुकः, येन कृपापात्रमसौ श्वाऽपि न त्यक्तः ] स चासौ सिंह-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र विस्रब्धो भ्रमेति विधिवाक्ये तत्र निकुञ्जे सिंहस्तिष्ठति त्वं च शुनोऽपि बिभेषि तस्मात् त्वया तस्मिन् न गन्तव्यमिति निषेधः प्रतीयते ।

---

स्तेन, [ अशक्यप्रतीकारेणेत्यर्थः ] मारितः–उन्माथितः, न तु बुद्धिपूर्वकं हतः, औचित्यैकवसतेः [ स्वसदृशेष्वेव पराक्रमो दर्शयितव्य इति विचारस्वभावस्य ] तस्य बुद्ध्यैवमनुचितकार्यप्रवृत्तेरसंभवात्, न च सिंहस्तेऽत्र संचरणे भयकारणं, यतोऽसौ गोदावर्या नद्यास्तीरे, न तु सरस्वत्यादिनदीसन्निहिते धार्मिकसंचारभूते देशे, कूलेऽपि न, किन्तु ततो दूरे लतागहने दर्शनागोचरे स्थाने, येन दूरतोऽपि दृष्ट्वा परिहरणीयः स्यात्, वसति–सततं तत्रैव कृतास्पदो न तु यतस्ततः सञ्चरति, तेन निर्भयमिदानीं सञ्चर भिक्षादिकृते, इति वाच्यार्थः । एवमादौ विषये च यद्यपि रसादिरपि व्यङ्ग्योऽस्ति, तथापि विवाहकरणप्रवृत्तत्वेन महाराजशब्दव्यपदेश्यस्य सचिवस्य यात्रायामनुगच्छतो राज्ञ इव व्यङ्ग्यवस्त्वपेक्षयाऽप्राधान्यमुपगतत्वान्न गण्यते, किन्तु शुनोऽपि भीरोः सिंहोपलम्भोक्त्या तत्र सुतरां भ्रमणनिषेधस्तु वस्तुरूपः संकेतरहस्यभङ्गभीरुपुंश्चलीवैशिष्ट्येन व्यङ्ग्य इति वाच्य–व्यङ्ग्ययोर्भेदः । तदुक्तम्–अत्र **विस्रब्धो भ्रमेति विधिवाक्य** इत्यादिना । 'लतागहनस्थयैवेदमुच्यते' इति व्याख्यानं तु न शोभनम्, तथा सति लाक्षणिकोऽयमर्थो भवेत्, ततः प्रयोजनांशे व्यङ्ग्ये निषेधो व्यङ्ग्य इति च न संगच्छेत; किञ्चेह वासिनेति चाभिधेयं न संगच्छेत, तत्रैव स्ववृत्तेर्विरोधात् ॥

अत्र केचित् निषेधस्य वाच्यतामेवाहुः, तन्न युक्तम् । तथाहि–अभिहितान्वयवादेऽगृहीतसंकेतः शब्दोऽर्थं न प्रतिपादयितुं शक्त इति गृहीतसंकेत एव शब्दोऽर्थं प्रतिपादयति । वाक्यार्थस्यानन्त्यादेकत्र वाक्ये योऽर्थः प्रतीयते तस्मिन्नेव वाक्ये परत्र सोऽर्थो न प्रतीयत इति व्यभिचाराच्च यथा वाक्यार्थे संकेतः कर्तुमशक्यस्तथा विशेषरूपे पदार्थेऽपि संकेतः कर्तुं न पार्यते, इति सामान्य एव पदार्थे संकेतो गृह्यते । सामान्यभूतानामेव पदार्थानामाकाङ्क्षा–योग्यता–सन्निधिवशात् परस्परमन्वयरूपो विशेषः, तदुक्तं–"सामान्यान्यथाऽसिद्धेर्विशेषं गमयन्ति हि ।" इति सामान्यानि–जातिरूपाण्यभिधेयानि, अन्यथाऽसिद्धेः–व्यक्तिं विना जातेरभावात्, विशेषं–व्यक्तिरूपं–वाक्यार्थरूपं वा, गमयन्ति–आक्षिपन्त्यनुमापयन्ति वेति कारिकार्थः । विशेषरूपो व्यक्त्यादिस्तत्स-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



म्बन्धश्च, "विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे" इत्युक्तदिशा पदाप्रतिपाद्योऽपि वाक्यार्थेऽवभासते । एवं चास्मिन् मते यदा विशेष एवापदार्थस्तदा व्यङ्ग्यस्य तृतीयकोटौ स्थितस्याभिधेयतायां का सम्भावना । अयमाशयः—पदेभ्यः प्रथमं पदार्थस्मृतिः, अथ पदार्थविशेषाणामन्वयविशेषरूपस्य वाक्यार्थस्य प्रत्ययः, ततो व्यङ्ग्यार्थप्रतीतिरिति तृतीयकक्षायां कुतोऽभिधायाः प्रसरणम्, द्वितीयकक्षायामेवा [ तत्र मते ] भिधाया अनपेक्षणात्, यतोऽभिहितान्वयवादेऽशक्य एव पदार्थानां परस्परान्वय आकाङ्क्षाऽवशेन प्रतीयते, शब्द-बुद्धि-कर्मणां विरम्य व्यापाराभाव इति च सर्ववादिसिद्धम् ।

येऽप्यन्विताभिधानवादिनः—'अनन्वितार्थं पदमप्रयोज्यम्' [ ] इत्याहुः, तेषामयं सिद्धान्तः—

"शब्द-वृद्धा-ऽभिधेयांश्च प्रत्यक्षेणात्र पश्यति ।
श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया ॥
अन्यथानुपपत्त्या तु बोधेच्छक्तिं द्वयात्मिकाम् ।
अर्थापत्त्यावबोधेत सम्बन्धं त्रिप्रमाणकम् ॥ [ ] इति ॥

अत्र कारिकाद्वये प्रतिवाक्यं बाल इत्यध्याहार, तथा च बालः, शब्दः—श्रूयमाणो देवदत्त! गामानयेत्यादिः, वृद्धौ—प्रयोजक-वृद्ध-प्रयोज्य-वृद्धौ, अभिधेयः-ऽर्थो गवानयनादिरूपः,' एतान् प्रत्यक्षेण—प्रत्यक्षहेतुना श्रोत्रादीन्द्रियेण, अत्र—व्युत्पत्तिकाले, पश्यति—साक्षात्करोति, शब्दं स्रोत्रेण वृद्धाभिधेयार्थं च चक्षुषेति बोध्यम्, श्रोतुः—प्रयोज्यवृद्धस्य, प्रतिपन्नत्वं—वाक्यार्थाभिज्ञत्वम्, अनुमानेन—अनुमितिकरणभूतया श्रोतुश्चेष्टया—गवानयनादिचेष्टारूपेण हेतुना, पश्यतीति सम्बन्धः, तस्य च जानाति, अनुमिनोतीति वाऽर्थः । अन्यथाऽनुपपत्त्या—अर्थापत्त्या अन्यथानुपपत्तिरूपार्थापत्तिप्रमाणेन, द्वयात्मिकां—वाच्यत्वं वाचकत्वं चेति द्विरूपां, शक्तिं—संकेतापरनामिकां, वाक्य-वाक्यार्थयोः सम्बन्धं बोधेत्—जानीयात्, तदनन्तरं त्रिप्रमाणकम्—उक्तरीत्या प्रत्यक्षा-ऽनुमाना-ऽर्थापत्तिरूपप्रमाणत्रयाधिगतं संकेतम्, अवबोधेत—आवापोद्वापाभ्यां गोशब्दस्य गौरेवार्थः, अम्विभक्तेः कर्मत्वम्, इति रीत्या विशेषतः पदपदार्थनिष्ठतयाऽवधारयेदिति कारिकाद्वयार्थः । अयमाशयः—'देवदत्त गामानय' इत्यादि प्रयोजकवृद्धवाक्यं श्रुत्वा तदनन्तरं प्रयोज्यवृद्धेन सास्नादिमन्तमर्थमानीयमानमवलोक्य 'अयमेतद्विषयैतत्क्रियागोचरार्थज्ञानवान्, तद्विषयकप्रवृत्तिमत्त्वात्, मद्वत्, इति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रयोज्यवृद्धस्य ज्ञानमनुमिमीते व्युत्पित्सुर्बालः, ततः कारणं विना कार्यानुपपत्त्याऽखण्डवाक्यस्यान्वयव्यतिरेकाभ्यां तज्ज्ञानेन कार्यत्व-कारणत्वरूपां शक्तिमवधारयति, अथ ज्ञेयसम्बन्धं विना वाक्यस्य सा शक्तिरनुपपन्नेत्यर्थापत्त्याऽखण्डवाक्यार्थेनाखण्डवाक्यस्य वाच्यवाचकभावरूपं सम्बन्धमवधारयति; अनन्तरं, तेनैव प्रयोजकेन 'देवदत्त ! अश्वमानय, चैत्र गां ! नय' इत्यादिवाक्येषु कस्यचिदन्यस्य पदस्यावापे कस्यचिदुद्धारे च सति यस्य वाक्यभागस्यान्वयव्यतिरेकाभ्यां यस्य वाक्यार्थभागस्यान्वयव्यतिरेकावुपलभते तस्य तत्र शक्तिमवधारयति, तच्च शक्त्यवधारणमन्वित एव पदार्थे प्रथममन्वय एव वाक्यस्य शक्तिग्रहात्, व्यवहारेणान्वितज्ञानस्यैवोपस्थापनाच्च, न च वाक्यं विना क्वचिदाद्यव्युत्पत्तिः, व्यवहारेणैवाद्यव्युत्पत्तेः, व्यवहारस्य प्रवृत्ति-निवृत्तिरूपस्य पदमात्रेण कर्तुमशक्यत्वात्, अतो वाक्यस्थितानामेव परस्परसाकाङ्क्षाणां पदानामन्वितेष्वेव पदार्थेषु सङ्केतग्रहादन्विता एव पदशक्याः, न त्वभिहितानां पदार्थानामन्वयोऽशक्य एव योग्यतादिवशात् प्रतीयत इति युक्तम् । तदेतत्सर्वमवधार्योक्तं विवेके—"प्रयोगयोग्यं वाक्यमेव, तत्र च संकेतो गृह्यत इत्यपरपदार्थान्वित एव पदार्थः संकेतभूः इति" । ननु गामानयेत्यादिवाक्ये यदानयनपदं तदेवाश्वमानयेति वाक्येऽपीति प्रत्यभिज्ञाबलेनोभयत्रैकमेवानयनपदमिति निश्चीयते, एवं चानयनपदस्य गवान्वितत्वमश्वान्वितत्वं वा नार्थः, किन्तूभयसाधारण्याय पदार्थान्तरान्वितत्वेन रूपेण सामान्येन पदार्थान्तरान्विताऽऽनयनमेवार्थ इत्येव वाच्यम्, अयमाशयः—यथा पदार्थत्वेन रूपेण पदार्थपदवाच्योऽपि घटो घटत्वेन रूपेण तद्वाच्यस्तथाऽऽनयनत्वेन रूपेणानयनपदवाच्यमप्यानयनं गवानयनत्वेनावाच्यमेवेति, तथा च गामानयेत्यादौ गवान्वयरूपविशेषार्थबोधाय तात्पर्याख्या वृत्तिः स्वीकार्येति चेत् ? न—पदार्थत्वेन सामान्येन विशेषाणामन्वये शक्तिग्रहात्, नहि निर्विशेषं सामान्यम्, व्यतिषक्तानां [परस्परमन्वितानां] पदार्थानां तथा—भूतत्वात् [विशेषरूपत्वात्] इति । अत्रापि मते—सामान्यविशेषरूप एव [सामान्येनैव रूपेण विशेषः] शक्य इत्यतिविशेषभूतो व्यङ्ग्यार्थो वाक्यार्थान्तर्गतोऽशक्य एवेति, तथा च यत्र संकेतितत्वादवाच्य एव पदार्थः प्रतिपद्यते तत्र दूरेऽर्थान्तरभूतस्योक्तस्थलीयनिषेधस्य वाच्यताचर्चा । अयमत्र सारः—अभिहितान्वयवादेऽनन्वित एवार्थः पदशक्यः, अन्विताभिधानवादे पदार्थान्तरमात्रेणान्वित इत्यन्वितविशेषस्त्ववाच्य एवेत्युभयनयेऽपदार्थ एव वाक्यार्थः, इति वाक्यार्थान्तरभूतो व्यङ्ग्यार्थः सुतरामवाच्य इति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ कैश्चिन्मीमांसकैकदेशिभिरित्थमुच्यते–'नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते' इति। तेषामयमाशयः–शब्दश्रवणानन्तरं यावानर्थः प्रतीयते स सर्वोऽपि शब्दादेवेति सर्वत्र शब्द एव निमित्तम्, यतो नैमित्तिकस्य कार्यस्यानुरोधेन–निमित्तानि–कारणानि कल्प्यन्ते, कार्यं दृष्ट्वा हि कारणे तदनुकूला शक्तिरवधार्येत इति शब्द एव तत्र कारणमिति नान्या वृत्तिरङ्गीकार्येति। तत्रेदं पृच्छयते–तत्र निमित्तत्वं कारकत्वं ज्ञापकत्वं वा? शब्दस्यार्थप्रकाशकत्वान्न कारकत्वम्, न द्वितीयः–स्वयमज्ञातस्य ज्ञापकत्वायोगात्, ज्ञातत्वं च संकेतेनैव, संकेतश्च सामन्यारूपेणान्वितमात्रे, एवं च निमित्तस्य यावन्नियतनिमित्तत्वं न निश्चितं तावन्नैमित्तकस्य प्रतीतिरेव कथम्?। अस्तु विशेष एव संकेतग्रह इति चेत्?, गवाद्यन्वितानयनादेर्विशेषस्योपस्थापकान्तराभावेन शब्दादेवोपस्थितिर्वाच्या, तथा च तत्र संकेतग्रहे शब्दात् तदुपस्थितिः, शब्दाच्च तदुपस्थितौ संकेतग्रह इत्यन्यन्योन्याश्रयान्नैमित्तिकानुसारेण निमित्तानि कल्प्यन्त इत्यविचारितमेवाभिधानमिति।

अयमेतन्निष्कर्षः–व्यङ्ग्योपस्थितौ शब्दस्य ज्ञापकत्वरूपे निमित्तत्वे वयमपि कृतसम्मतिकाः, परं व्यञ्जनाया अस्वीकारे तन्नोपपद्यते, शब्दस्यार्थनिमित्तत्वस्य व्यापारसापेक्षत्वात्; एवं च यथा वाच्यार्थलक्ष्यार्थस्थले अभिधा-लक्षणे व्यापाररूपे, तथेहापि केनापि व्यापारेण भाव्यम्, अन्यथा शब्दस्य निमित्तत्वानिश्चयेन नैमित्तिको व्यङ्ग्यार्थ इति भवन्मतं न सिद्ध्यति। अथैतादृशव्यापारमन्तराऽपि शब्दस्य निमित्तत्वमाश्रीयते तदाऽभिधा-लक्षणयोरपि तिरस्कारः सुकर इति निमित्तानि नैमित्तिकानुसारं कल्प्यन्ते' इति यदुक्तं तन्न युक्तमिति।

अथ भट्टपादोपजीविनो भट्टलोल्लटप्रभृतय, इत्थमभिदधति–'सोऽयमिषोरिव दीर्घदीर्घो [ अभिधायाः ] व्यापारः' इति "यत्परः शब्दः स शब्दार्थ इति प्रतिषेध एवात्र वाच्यः" इति। तेषामयमाशयः—यथा बलवता प्रेरित एक एवेषुरेकेनैव प्रयत्नेन रिपोर्वर्मभेदं मर्मच्छेदं प्राणहरणं च विधत्ते, तथा सुकविना प्रयुक्त एक एव शब्द एकेनैवाभिधाख्यव्यापारेण पदार्थोपस्थितिमन्वयबोधं व्यङ्ग्यप्रतीतिं च विधत्ते, अतो व्यङ्ग्यत्वाभिमतस्यार्थस्य वाच्यत्वमेव; न चैकार्थप्रतीतौ शब्दस्य विराम इति वाच्यम्, विवक्षितार्थप्रतीत्युत्तरमेव विरामाङ्गीकारात्; किञ्च 'यदर्थे यस्य शब्दस्य तात्पर्यं स शब्दार्थः' इति प्रकृतेर्निषेधस्य तात्पर्यविषयत्वेन स शब्दार्थ एवेति। तदिदं 'यत्परः शब्दः स शब्दार्थः' इति तात्पर्यवाचोयुक्तेस्तात्पर्यमबुद्ध्वैव तेषामभिधानम्। तथाहि "भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यते"

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति कारकपदार्थाः क्रियापदार्थेनान्वीयमानाः प्रधानक्रियानिर्वर्तकस्वक्रियाभिसम्बन्धात् साध्यायमानतां प्राप्नुवन्ति ततश्चादग्धदहनन्यायेन यावदप्राप्तं तावदेव विधीयते 'यथा रक्तं पटं वय' इत्यादावेकविधिर्द्विविधिस्त्रिविधिर्वा। अयमाशयः-भूतं-सिद्धं कारकादि, भव्यं-साध्यं क्रियारूपं, तयोः समुच्चारणे-समभिव्याहारे-सहोच्चारणे वा, भूतं-सिद्धं, भव्याय-साध्याय-साध्यार्थतयोपदिश्यते, अज्ञातं ज्ञाप्यत इति न्यायार्थः। भूतं ननु कारकपदार्थानामक्रियारूपत्वात् कथं प्रवर्तनाविषयत्वमिति चेत् ,सत्यम्- कारकपदार्थाः 'गामानय' इत्यादौ गां इत्यादय आनयनादिक्रिया पदार्थेनान्वीयमानाः प्रधानानयनक्रियानिर्वर्तकचलनादिरूपस्वक्रियाभिरभिसम्बन्धात् साध्यायमानतां प्राप्नुवन्ति, ततश्च तृणभस्मसमूहे स्थितो वह्निरदग्धं तृणमेव दहति, न तु दग्धं भस्मेतिवद् यावदसिद्धं तावदेव साध्यतां व्रजति, न तु सिद्धं कारकादि तावदेव च विधेयमिति तत्रैव विधेस्तात्पर्यमप्राप्तप्रापणार्थत्वात् तस्य यथा रक्तं पटं वयेत्यादौ रक्तगुण-पटभाव-वयनानां मध्ये यत्रैकं रक्तत्वमेव निवर्तनीयं तत्रैकविधिः, यत्र रक्तत्वं सूत्रेषु सिद्धं तत्र पटभाव-वयनयोर्द्वयोरेव विधिः, यत्र सर्वमसिद्धं तत्र त्रयाणामपीति भवति, तथा यावत् साध्यं तावत् परत्वमेव वाक्यस्य स्वीक्रियत इत्येव तात्पर्यम्—'यत्परः शब्दः स शब्दार्थः' इत्यस्य, ततश्च यदेव विधेयं तत्रैव तात्पर्यमित्युपात्तस्यैव [उच्चारितस्यैव] शब्दस्यार्थे वाच्ये तात्पर्यं न तु प्रतीतमात्रे, तथा सति पूर्वो धावतीत्यस्यापरो धावतीत्यत्रापि कदाचित् तात्पर्यं स्यात्।

ननु उपात्तस्यैव शब्दस्यार्थे तात्पर्यमिति यदुक्तं तदसङ्गतम्- 'विषं भक्षय मा चास्य गृहे भुङ्क्थाः' इत्यत्र अनुपात्तार्थेऽपि निषेधे तात्पर्यस्य सर्वसम्मतत्वादिति चेत्? अत्रोच्यते, तत्र चकार एकवाक्यतासूचनार्थः। आख्यातघटितवाक्यद्वयस्याङ्गाङ्गिभावेनैकवाक्यता च न दृष्टा, तथापि विषभक्षणवाक्यस्य सुहृद्वाक्यत्वेन सुहृदश्च विषभक्षणकथने तात्पर्यस्य निर्धारयितुमशक्यत्वेन तद्वाक्यस्योत्तरवाक्याङ्गता कल्पनीया, तथा च 'विषभक्षणादपि दुष्टमेतद्गृहे भक्षणम्' इति तात्पर्यावधारणात् सर्वथैतद्गृहे न भोक्तव्यमित्युत्तरवाक्योपात्तशब्दार्थ एव तात्पर्यमिति न व्यभिचारः। यच्च 'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः' इत्युक्तं तदपि न समीचीनम्, तथाहि शब्दश्रुतेरनन्तरं यावानर्थोऽवगम्यते तावति शब्दस्याभिधैव व्यापार इति स्वीकारे 'ब्राह्मण! पुत्रस्ते जातः, ब्राह्मण! कन्या ते गर्भिणी' इत्यादौ हर्ष-शोकादीनामपि वाच्यत्वं स्यात्, न च तेषां वाच्यत्वं कैरपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वीक्रियतेऽतिप्रसङ्गात्, दृश्यते च पूर्वत्र वाक्ये हर्षोदयः, परत्रानूढाया गर्भिणीत्व-श्रुत्या शोकोद्गमश्च, स च व्यञ्जनयैव प्रत्याय्यो नाभिधया। किञ्चैवं दीर्घदीर्घतर-व्यापारस्वीकारे किमिति लक्षणाऽपि न त्यज्यते। लक्षणीयेऽप्यर्थे तेनैव व्यापारेण-सिद्धेः, इष्टापत्तिरिति चेत्? मीमांसका [अन्विताभिधानवाद्य] भिमतश्रुति-लिङ्ग-वाक्य-स्थान-प्रकरणसमाख्यानां पूर्वपूर्वबलीयस्त्वमपि न संघटेत, सर्वत्र शब्दस्याभिधाव्यापारेणैवार्थप्रत्यायकत्वोपगमे। अयमाशयः—विध्यादिस्थले परस्परविरोधो दृश्यते, तत्र कुत्र कस्य प्राबल्यमिति निर्णयाय श्रीमता जैमिनिना—"श्रुति-लिङ्ग-वाक्य-प्रकरणस्थान-समाख्यानां समवाये पारदौर्बल्य-मर्थविप्रकर्षात् [मी०. अ०३., पा०३., सू० १४] इति सूत्रं निर्मितम् श्रुत्यादीनां लक्षणानि चैवमुक्तानि—

अभिधातुं पदेऽन्यस्मिन्, निरपेक्षो रवः श्रुतिः।
सर्वत्रावगता शक्तिर्लिङ्गमित्यभिधीयते॥
संहत्यार्थं ब्रुवद् वृन्दं, पदानां वाक्यमुच्यते।
प्रधानवाक्यस्याङ्गोक्त्याऽऽकाङ्क्षा प्रकरणं मतम्॥
स्थानं समानदेशत्वं, समाख्या यौगिको रवः।" इति,

अयमाशयः—स्वकरणीये अङ्गत्वबोधे प्रमाणान्तरनिरपेक्षः शब्दः श्रुतिः, सा च विभक्त्यादिरूपा, यथा-'व्रीहीन् प्रोक्षति' इत्यत्र द्वितीयाश्रुत्या व्रीहीणां प्रोक्षणाङ्गत्वम्। शब्दस्यार्थप्रकाशनसामर्थ्यं लिङ्गम्, सामर्थ्यं रूढिरेव, यथा 'बर्हिर्देवसदनं दामि' इत्यत्र दामीति 'दाप् लवने' इत्यस्य रूपम्, देवसदनं-पुरोडाशसदनभूतं, बर्हिः-कुशं, दामि—खण्डयामि इत्यर्थेऽस्य मन्त्रस्य दामीति श्रुतपदसामर्थ्यात् लिङ्गात् बर्हिर्लवनाङ्गत्वम्। परस्पराकाङ्क्षावशात् क्वचिदेकाभि-प्रार्थे पर्यवसितानि पदानि वाक्यम्, यथा—'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये त्वा जुष्टं निर्वपामि' इति मन्त्रे निर्वपामीति लिङ्गेन निर्वापे विनियुज्यमानस्य समवेतार्थभागस्यैकवाक्यताबलेन 'देवस्य त्वा' इत्यादिभागस्यापि निर्वापे एव विनियोगः परस्पराकाङ्क्षाप्रकरणम्, यथा-'दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्र दर्शपौर्णमासयागाभ्यां स्वर्गं भावयेदिति बोधानन्तरं कथमाभ्यां स्वर्गं भावयेत् इत्याकाङ्क्षा भवति। एवं 'समिधो यजति, तनूनपातं यजति, आज्य-भागौ यजति' इत्यादिवाक्यैः फलरहिताः प्रयाजादयस्तत्सन्निधौ पठिताः। तेषां च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रयोजनाकाङ्क्षा सम्भवति–किमेषां प्रयोजनमिति; एवं चोभयाऽऽकाङ्क्षया प्रयाजादीनां दर्शपौर्णमासाङ्गत्वं कल्प्यते। समानदेशत्वं–स्थानम्, तदेव क्रम इत्युच्यते, तच्च द्विविधं–पाठसमानदेशत्वमनुष्ठानसमानदेशत्वं च, पाठोऽपि द्विविधः–यथासंख्यपाठः सन्निधिपाठश्च। तथा च पाठक्रमेणानुष्ठानक्रमेण चाङ्गत्वं स्थानाख्येन प्रमाणेन कल्प्यते यौगिकः शब्दः–समाख्या, यत्रावयवार्थ एव ज्ञायते स यौगिकः शब्दः, सा द्विविधा–लौकिकी वैदिकी च, याज्ञिकैः परिकल्पिता लौकिकी, वेदे एव प्रसिद्धा च वैदिकी, तत्र तत्र याज्या-पुरोवाक्यापाठादीनि ऋग्वेदप्रतिपादितानि कर्माणि 'हौत्रम्' इति लौकिक्या समाख्यया होतुः कर्तव्यानि भवन्ति, यः ऋग्वेदेन कर्म करोति स होतेति समाख्यातत्वात्, एवं 'होतृचमसः' इति वैदिक्या समाख्यया होतुश्चमसभक्षणाङ्गत्वमिति दर्शितः, एषां प्रमाणानां स्वस्वविषयः संक्षेपेण, एषां च विरोधे सति पूर्वस्य बलीयस्त्वमिति श्रुतिलिङ्गेत्यादिसूत्रेण प्रतिपाद्यते, यथाक्रममुक्तानां श्रुत्यादीनां द्वयोर्बहूनां वैकत्रोपनिपाते परस्परस्य विलम्बेनार्थोपस्थापकतया दुर्बलत्वं पूर्वपूर्वस्य च प्राबल्यमिति सूत्रार्थः। यदि शब्दश्रुतेरनन्तरोपस्थितान् सर्वानेव प्रत्ययान् प्रति अभिधैव व्यापारः स्यात् तदा श्रुत्युपस्थापितार्थस्येव लिङ्गाद्यनुगृहीतार्थानामप्यभिधेयतया सर्वेषां समकालमर्थोपस्थापकत्वप्रसक्त्याऽर्थविप्रकर्षाभिधानं जैमिनेरनुचितं स्यात्। तथा च दीर्घदीर्घतराभिधाव्यापारस्वीकारोऽनुचित इति भ्रमधार्मिकेत्यादौ निषेधप्रतिपत्तये व्यञ्जनान्विताभिधानवादिभिरपि स्वीकार्यैव॥

ननु शब्दश्रुतेरनन्तरं यावानर्थः प्रतीयते स केवलमभिधयैव बोध्यत इति नाभ्युपगच्छामः, किन्त्वाकाङ्क्षादिसापेक्षयाऽभिधयेति श्रुत्यादेः पूर्वपूर्वसहकारेणोत्तरोत्तरस्य बोधकत्वमित्यर्थविप्रकर्षो युज्यत एवेति न जैमिनिसूत्रविरोध इति पूर्वोक्त भ्रमधार्मिकेति पद्ये निषेधो वाच्य एवेति न व्यञ्जना स्वीकार्येति चेत्? अत्र ब्रूमः— 'कुरु रुचिम्' इति पदयोर्वैपरीत्येन काव्यान्तर्गते पाठे यद् दुष्टत्वं भवति तन्न संगच्छेत, पदपाठवैपरीत्येऽभिधाया वैपरीत्याभावादर्थभेदेन न भाव्यमिति दोषाभावात्, व्यङ्ग्यस्वीकारे तु 'चिकु'शब्दस्य व्यञ्जनया स्त्रीगुह्याङ्गोपस्थापकत्वेन दुष्टत्वस्य प्रतीतेः। तथा चैवमादयः काव्यदोषा अपरित्याज्या भवेयुः, किञ्च यदि वाच्यवाचकव्यतिरेकेण व्यङ्ग्य-व्यञ्जकभावो नाभ्युपेयते तदाऽसाधुत्वादीनां नित्यदोषत्वं कष्टत्वादीनामनित्यदोषत्वमिति विभागकरणमनुपपन्नं स्यात्; न च तदनु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पपन्नमेवेति वाच्यं, सर्वस्य विभक्ततया प्रतिभासनात्। अयमाशयः—वाच्यवाचकभावाद् भिन्नो व्यङ्ग्यव्यञ्जकभाव इत्यवश्यमभ्युपेयं काव्यज्ञानाम्, अन्यथा वाच्यस्यार्थस्याविशेषेण कष्टत्वादीनां शृङ्गारादावेव दोषत्वमन्यत्र नेत्यनित्यत्वम्, असाधुत्वादीनां च सर्वत्र दोषत्वमेवेति या व्यवस्था स्वीक्रियते सा न संगच्छेत विशेषस्य निर्वक्तुमशक्यत्वात्, व्यञ्जनायां स्वीकृतायां तु व्यञ्जनीयस्य बहुविधत्वेन रौद्रादौ व्यङ्ग्येऽनुकूलत्वं शृङ्गारादौ व्यङ्ग्ये च दुष्टत्वमिति युज्यते व्यवस्थेति।

एवं व्यञ्जनानङ्गीकारे पर्यायेषु मध्ये कस्यचिदेव कुत्रचित् काव्यानुगुणत्वमिति व्यवस्था न स्यात्, वाच्यार्थस्याविशेषात्, दृश्यते च सा व्यवस्था, यथा—

"द्वयं गतं सम्प्रति शोचनीयतां, समागमप्रार्थनया कपालिनः।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी॥

[ कु० सं० सर्गः–५. श्लोकः–७१ ]

"इत्यत्र 'कपालिनः' इत्यस्य स्थाने 'पिनाकिनः' इति पदप्रक्षेपे न तादृशार्थप्रतीतिर्य' 'कपालिनः' इत्यस्य सत्त्वे प्रतीयते। इदं हि पद्यं पार्वत्या भावपरीक्षणपरेण ब्रह्मचारिरूपधरेण शिवेनोक्तम्, कान्तिमती कलावतः सा कला, अस्य लोकस्य नेत्रकौमुदीत्वं चेति द्वयं कपालिनः समागमप्रार्थनया सम्प्रति शोचनीयतां गतमित्यन्वयः। कपालधारणादशुचितरस्य शिवस्य समागमः, यतोऽनेन द्वयेन प्रार्थितं तत एव शोचनीयत्वम्, यदि च पिनाकिपदमिह दीयते तर्हि पिनाकधारिणो वीरमुख्यस्य समागमप्रार्थनया शोचनीयत्वं न समर्थ्येतेतिन तस्येह काव्यानुगुणत्वमितीयं व्यवस्था व्यञ्जनामङ्गीकृत्यैव संगच्छते, वाच्यार्थस्योभयत्र तुल्यत्वात्। किञ्च वाच्यव्यङ्ग्ययोर्वाच्योऽर्थः सर्वसाधारणः, व्यङ्ग्यस्तु नानारूपः प्रकाशत इत्यतोऽपि वाच्याद् व्यङ्ग्यस्य भेदः, तथाहि 'गतोऽस्तमर्कः' इत्यादौ वाच्यार्थो न क्वचिदन्यथा भवति, व्यङ्ग्योऽर्थस्तु, तत्तत्प्रकरणवक्तृप्रतिपत्त्रादिविशेषसहायतया नानात्वं भजत एव, तथा चात्र वाच्योऽर्थः सूर्यकर्तृकास्ताचलगमनरूपः सर्वान् प्रत्येक एव, व्यङ्ग्यस्तु युद्धप्रकरणे शत्रुं प्रत्यवस्कन्दनस्य प्रसभमाक्रमणस्यावसर इति, रात्रियुद्धस्य छलबहुलत्वेनाधमत्वाद् युद्धनिवर्तनस्य वाऽवसर इति ज्ञायते, पुंश्चल्यां बोधनीयायामभिसरणमुपक्रम्यतामिति, या च जारमेवाभिसारयति तां प्रति प्राप्तप्रायस्ते प्रेयानिति; कर्मणि दिवसं व्यापारितानां परस्परं प्रति कर्मकरणान्निवर्तामह इति; माणवकादिश्रोतृस्थले सान्ध्यो [ संध्यावन्दनादिः ] विधिरुपक्रम्यतामिति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पथिके श्रोतरि 'दूरं मा गाः' इति; गोपाले बोध्ये सुरभयः [ गावो ] गृहं प्रवेश्यन्तामिति, आपणिकानां परस्परालापे 'विक्रयवस्तूनि संह्रियन्ताम् [ आपणे प्रसारितानि सम्प्रति संकोच्यन्ताम् ] इति; प्रोषितभर्तृकोक्तौ नागतोऽद्य प्रेयानिति [ सन्ध्यासमयपर्यन्तं सर्वैर्गृहप्राप्तेर्नियतत्वादिति भावः ] एवंभूता अनवधिसंख्या अर्थाः प्रतीयन्ते, इति तस्य वाच्याद् भेद आवश्यक इति 'निःशेषच्युतचन्दनं स्तनतट'मित्यग्रे वक्ष्यमाणे पद्ये निषेधस्य वाच्यस्य प्रतिषेधात्मना व्यङ्ग्यत्वम्। किञ्च—

"मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमुदाहरन्तु ।
सेव्या नितम्बाः किमु भूधराणां, किमु स्मरस्मेरनितम्बिनीनाम् ॥"
[ भ० शृं० श० श्लोकः-३७ ]

आर्याः–पण्डिताः, मात्सर्यं–असूयां, पक्षपातमिति यावत्, उत्सार्य–निराकृत्य [ तस्य यथार्थकथनप्रतिबन्धकत्वादिति भावः ] कार्यं–कर्तुं योग्यं, विधेयमित्यर्थः, विचार्य–ऊहापोहाभ्यां सम्यगालोच्य, ततः, मर्यादया–सन्मार्गानतिक्रमणेन, सहितं यथा भवति तथा, इदमेतदुदाहरन्तु–कथयन्तु, भुवो धराः–पर्वताः, तेषां नितम्बाः–कटिदेशाः, सेव्याः, किमु–आश्रयणीया वा, उत–अथवा, स्मरस्मेराः–कामोल्लसिताः, मदनमदोत्कटा इत्यर्थः, यद्वा स्मरेण–मदनावेशेन हेतुना स्मेराः–सम्भोगौत्सुक्यसूचकमन्दस्मितसुन्दरवदनारविन्दानि यासां ताश्च विलासिन्यः–विलासशीलास्तरुण्यः, तासां नितम्बाः–कटिप्रदेशाः, आश्रयणीया वेति वदन्त्विति सम्बन्धः ॥ अत्र वाच्यः संशयः, व्यङ्ग्यस्तु शान्तश्चेद् भूधरनितम्बान् सेवेत, शृङ्गारी चेद् विलासिनीनितम्बानिति निश्चयरूपः, स च वाच्यादत्यन्तं भिन्नः ॥ किञ्च—

"कथमवनिप ! दर्पो यन्निशातासिधारा—
दलनगलितमूर्ध्ना विद्विषां स्वीकृता श्रीः ।
ननु तव निहतारेरप्यसौ किं न नीता,
त्रिदिवमपगताङ्गैर्वल्लभा कीर्तिरेभिः ॥" [ ]

हे अवनिप !–पृथ्वीपालक [ त्वया ] यत् निशाता–तीक्ष्णा या असिधारा–खड्गधारा, तया दलनं–छेदनं, तेन गलिताः–पतिता, मूर्धानो–मस्तका येषां तेषां, विद्विषां–शत्रूणां, श्रीः–सम्पत्तिः, स्वीकृता-गृहीता, तत्-तस्माद्धेतोः, दर्पो–गर्वः, कथं, युक्त इति शेषः, कथमयुक्तो दर्पस्तत्राह—नन्विति—यत इत्यर्थः, निह-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तारेरपि-मारितशत्रोरपि, तव, असौ-प्रसिद्धा, कीर्तिरेव वल्लभा-प्रिया [ स्त्री ], एभिः-शत्रुभिः, अपगताङ्गैः-हीनाङ्गैरपि, किं त्रिदिवं-स्वर्गं, न नीता—अपि तु नीतैवेत्यर्थः। अत्र जीवत्येव रक्षणसमर्थे त्वयि त्वत्प्रियाया हीनाङ्गैः शत्रुभिरपहरणात्, मृतानां तेषां श्रीहरणे ते गर्वोऽनुचित इत्यापाततः प्रतीयमानया निन्दया सकलशत्रुविनाशनेन त्रैलोक्यश्रुतकीर्तिस्त्वमिति वस्तु व्यज्यते। तथा च वाच्यव्यङ्ग्ययोरत्यन्तं भेदः॥ एवं—

"हे हेलाजितबोधिसत्त्व ! वचसां किं विस्तरैस्तोयधे !
नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः॥
तृष्यत्पान्थजनोपकार-घटनावैमुख्यलब्धायशो—
भारप्रोद्वहने करोषि कृपया साहायकं यन्मरोः॥"

[ पुञ्जराजः-वाक्यपदीयटीकायां २,२४९ ]

हेलया-अनायासेन, जितो बोधिसत्त्वो-बुद्धो येन सः, तत्सम्बुद्धौ-हे हेलाजितबोधिसत्त्व [ बुद्धस्यातिकारुणिकत्वप्रसिद्धेस्ततोऽपि विशिष्टः कारुणिकस्त्वमसीति भावः ] तोयधे-जलनिधे [ लवणाकर ! ] वचसां विस्तरैः किम् ?, परहिताधाने-परोपकारकरणे, गृहीतं व्रतं-नियमो येन स, त्वत्सदृशः-त्वया समः, परोऽन्यो नास्ति, यत्-यस्मात् कारणात्, तृष्यन्तः-तृषार्ताः, पान्थजनाः-पथिकाः, तेषां य उपकारः-जलदानेन तृषाच्छेदरूपः, तस्य घटनायां-सम्पादनविषये, वैमुख्येन-पराङ्मुखत्वेन, लब्धं-प्राप्तं, यत्, अयशः-अकीर्तिः, तस्य यो भारो महदाधिक्यं, तस्य प्रोद्वहने-प्रकर्षेण समुत्तोलनरूपे निर्वहणविषये, मरोः-म्रियते पिपासया जन्तुर्यस्मिन् स मरुः, तस्य निर्जलदेशस्य, [ 'मारवाड' इति प्रसिद्धस्य ] साहायकं साहाय्यं, कृपया करोषीत्यर्थः। अत्र समुद्रस्य स्तुतिव्याजेन निन्दाप्रतिपादनाच्चमत्कारातिशयः, इति स्तुतिरूपो वाच्यो, निन्दा च व्यङ्ग्येति तयोः स्वरूपे भेदः॥

पूर्वं वाच्यार्थः प्रतीयते, स एव च व्यञ्जक इति व्यङ्ग्योऽर्थः पश्चात् प्रतीयत इति वाच्य-व्यङ्ग्ययोः कालभेदोऽपि। वाच्यश्च शब्दमात्रमाश्रयते, व्यङ्ग्यार्थश्च शब्दार्थ-शब्द-तदेकदेशवर्णसंघटनां श्रयतीति तयोराश्रयभेदोऽपि, वाच्योऽर्थः शब्दानुशासन-व्याकरणाद्यर्थानुशासन-व्याकरणकोशादिज्ञानेन च सर्वैरेव ज्ञातुं शक्यते, व्यङ्ग्यार्थस्तु प्रकरणादिसहायप्रतिभानैर्मल्यसहितेन शब्दाद्यनुशासनेन



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ञायत इत्यवगमप्रकारभेदस्तयोः, वाच्योऽर्थो बोद्धृमात्रस्य-सकलबोद्धृजनस्य प्रतीतिमात्रविषयो न च चमत्कारकारी, व्यङ्ग्यार्थस्तु विदग्धव्यपदेशभाजां सहृदयानामेव चमत्कारकृदिति कार्यस्य 'गतोऽस्तमर्कः' इत्यादौ प्रदर्शितदिशा संख्यायाश्च भेदाद् वाच्यार्थादतीव भिन्नः । किञ्च 'कस्स वण होई' इत्याद्युदाहियमाणे पद्ये सखीगतत्वेन तत्कालगतत्वेन च विषयस्य भेदः [ तत्र वाच्यस्य नायिकाविषयः, व्यङ्ग्यस्य च "इयं भ्रमरेण दष्टाधरा न तूपपतिना" इत्यस्य तत्पतिविषयः ] इति, एतावति भेदे सत्यपि यदि वाच्यार्थ-व्यङ्ग्यार्थयोरैक्यं तर्हि क्वचिदपि [ नील-पीतादावपि ] परस्परं भेदो न स्यात्, यतश्चोक्तं वृद्धैः-"अयमेव हि भेदो भेदहेतुर्वा यद् विरुद्धधर्माध्यासः कारणभेदो वा" इति, विरुद्धस्य-तद्वृत्तेर्धर्मस्य, अध्यासो-ज्ञानमेव भेदः भेदकारणं वा, किञ्च कारणस्य भेदोऽपि भेदहेतुरिति तदर्थः । उक्तञ्च विरुद्धधर्माध्यासः कारणभेदश्च वाच्यार्थ-व्यङ्ग्यार्थयोः पूर्वमेवेति तयोर्भेदः सुसिद्ध इति । न केवलं तयोरर्थयोरेव वैधर्म्यं, किन्तु तदाश्रययोर्वाचक-व्यञ्जकयोरपि, यतश्च वाचकानामर्थापेक्षा, वाचकागृहीतसंकेतं तं तमेवार्थं बोधयन्ति, व्यञ्जकास्तु असदेव पावनत्वादिकं पूर्वमसङ्केतितं तद्बोधयन्तीति न वाचकत्वमेव व्यञ्जकत्वम् । किञ्च "वाणीरकुडंगु" इत्यादौ [ द्वितीयाध्याये व्याख्याते पद्ये ] प्रतीयमानं 'दत्तसंकेतः कश्चिल्लतागहनं प्रविष्टः' इति व्यङ्ग्यम्, अर्थमभिव्यज्य वाच्यं 'वध्वाः सीदन्त्यङ्गानीति शब्दप्रतिपाद्यमङ्गावसादरूपं स्वरूपे एव यत्र विश्राम्यति [ चारुत्वेन तात्पर्यविषयीभवदास्वाद्यतां गच्छति ] तत्र गुणीभूतव्यङ्ग्ये मध्यमकाव्यप्रभेदे व्यङ्ग्यार्थे तात्पर्याभावादतात्पर्यभूतोऽप्यर्थः प्रतीतिपथमवतरन् व्यञ्जनभिन्नस्य कस्य व्यापारविषयो भवत्विति विचारणीयम् । अयमाशयः-यदुक्तं तात्पर्यविषयेऽर्थे शब्दः प्रमाणं, तदनुपपन्नं, यतो व्यङ्ग्यस्य वाच्यताभ्युपगमेऽपि नानार्थन्यायेन तात्पर्यादेव नियमो वाच्यः, अन्यथा सर्वत्र सर्वव्यङ्ग्यप्रतीतिप्रसङ्गात् । तथा च यत्र 'वाणीरकुडङ्गुड्डीना' इत्यादौ व्यङ्ग्यप्रतीतावपि वाच्ये एव चारुत्वविश्रामस्तत्र तात्पर्याविषयो व्यङ्ग्योऽर्थः कथं प्रतीयेत ? । यत्परः शब्दः स शब्दार्थ इत्युक्तमतेऽप्ययं दोषो दुर्वारः । एतेन तात्पर्यमेव व्यङ्ग्यप्रतीतौ व्यापार इत्यपि निरस्तम् । तस्मात् तात्पर्यमभिधा वा न प्रतीयमानेऽर्थे व्यापारः । ननु व्यङ्ग्यार्थस्य भेदे नानात्वम्, अर्थान्तरसङ्क्रमितवाच्यत्वादि-विशेषव्यपदेशविषयत्वम्, शब्दार्थोभयाधीनत्वं-प्रकरणादिसापेक्षत्वमित्यादिकारणरूपेणोक्तं तच्च लक्ष्येष्वपीति व्यङ्ग्यस्य लक्षणागम्यत्वमेव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुतो न स्वीक्रियते ?, तथाहि-'रामोऽस्मि सर्वं सहे' [उदाहियमाण-स्निग्ध-श्यामलकान्तीत्यादिपद्यस्थे] इत्यत्र रामपदस्य सर्वदुःखभाजनत्वे, एवं—

"प्रत्याख्यानरुचेः कृतं समुचितं क्रूरेण ते रक्षसा,
सोढं तच्च तथा त्वया कुलजनो धत्ते यथोच्चैः शिरः ॥
व्यर्थं सम्प्रति बिभ्रता धनुरिदं त्वद्व्यापदः साक्षिणा,
रामेण प्रियजीवितेन तु कृतं प्रेम्णः प्रियेणोचितम् ॥ [प्रसन्नराघवे]

[केनचिद् दर्शिते लङ्कावृत्तान्तनाटके रावणेन सीताशिरश्छेदनं दृष्ट्वा राम आह—] हे प्रिये! प्रत्याख्याने-निराकरणे रुचिर्यस्यास्तथाभूतायास्ते, क्रूरेण रक्षसा-रावणेन समुचितं [शिरश्छेदनं कृतं, त्वया च तत्-शिरश्छेदादि तथा सोढं यथा कुलजनः-रघुकुलमनुष्यः, उच्चैः-उन्नतं शिरो धत्ते-धारयति। त्वयि चारित्राद-पेतायां लज्जया शिरो नतं स्यादिति भावः, तु-किन्तु, व्यर्थम्, इदं धनुर्बिभ्रता। त्वद्व्यापदः साक्षिणा, प्रियजीवितेन रामेण तु प्रेम्ण उचितं न कृतमित्यन्वयः। इत्यत्र रामशब्दः कातरेऽर्थे संक्रमितवाच्यः। किञ्च-

"रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परा-
मस्मद्भाग्यविपर्ययाद् यदि परं देवो न जानाति तम्।
बन्दीवैष यशांसि गायति मरुद् यस्यैकबाणाहति-
श्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः॥" [राघवानन्दे]

रावणमुद्दिश्य बिभीषणोक्तिरियम्— रामः- सकलभुवनजनमनोरमणः, [एतेन सर्वे तद्धितकारिण इति व्यज्यते] असौ-खरदूषणादिनिहन्तृत्वेनातिप्रसिद्धो विलक्षणधैर्यगाम्भीर्यादिशाली भावनया प्रत्यक्षायमाणश्च, विक्रमगुणैः-न तु भवता समं लोकविद्रावणादिभिः, भुवनेषु,-न ग्रामे नापि नगरे नापि कस्मिंश्चिद् भुवने, किन्तु भुवनेषु [सर्वेषु लोकेषु] परां-उत्कृष्टां, प्रसिद्धिं प्राप्तः-प्रख्यातिं प्रकृष्टां सिद्धिं वा गतः, एतेन तस्याजेयत्वं समर्थितम्। ननु मया तु न ज्ञायत इति चेत्? अत्राह-तं यदि परं देवोऽस्मद्भाग्यविपर्ययाद् न जानाति। यदि परमिति निपातोऽवधारणार्थः, तं देवो-दिव्यज्ञानवानपि भवान्, अस्माकं-सकलरक्षसां, भाग्यविपर्ययादेव न जानाति, भवतस्तु तद्धस्तेन मरणेऽपि परमपदप्राप्तिः, किन्त्वस्माकं त्वद्विरहे महद् दुःखमनुभवनीयमिति भावः। विक्रमगुणानाह-एष मरुत्-वायुः, बन्दीव-वैतालिक इव, सप्तभिः स्वरैर्यस्य-रामस्य यशांसि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गायति, कीदृशैः स्वरैः ? एकबाणाहत्या जातानि यानि श्रेणीभूतविशालतालानां विवरणानि–रन्ध्राणि, तैरुद्गीर्णाः–प्रकाशिताः तैरित्यर्थः। श्रीरामेण सुग्रीवप्रत्ययाय सप्त तालवृक्षा एकबाणेन विभिन्ना इति वाल्मीकीये रामायणे किष्किन्धाकाण्डे १२ सर्गे प्रसिद्धम् । अत्र रामपदस्य खरदूषणादिहन्तरि लक्षणेत्येकस्यैव रामपदस्य नानार्थत्वमर्थान्तरसंक्रमितवाच्यत्वं प्रकरणाद्यधीनार्थप्रतीतिविषयत्वं चेति व्यङ्ग्यार्थसाम्येन लक्षणैव व्यङ्ग्यमर्थमपि बोधयिष्यतीति नातिरिक्तव्यापारस्वीकारापेक्षेति चेत् ? अत्रोच्यते–लक्षणीयार्थस्य नानात्वेऽपि यथानेकार्थशब्दाभिधेया नियता एव तथैव तदर्थानां, [ लक्ष्यार्थानां ] नियतत्वमेव, यतश्च मुख्येनार्थेन नियतसम्बन्धस्यैव लक्षणीयत्वात्, प्रतीयमानस्त्वर्थः प्रकरणादिविशेषवशेन क्वचिन्नियतसम्बन्धः, क्वचन नियतसम्बद्धसम्बद्धश्च [ परम्परितसम्बन्धः ] द्योत्यत इति तत्र लक्षणाया व्यापारत्वायोगः किञ्च लक्षणयाऽर्थबोधने मुख्यार्थबाधादित्रयं हेतुत्वेनोक्तम्, तत्र 'अत्ता एत्थ निमज्जती' त्याद्युदाह्रियमाणे पद्ये विवक्षितान्यपरवाच्ये ध्वनौ, "मम धम्मिय" इत्युदाहृते पद्ये वाऽर्थशक्तिमूले व्यङ्ग्ये मुख्यार्थबाधो नास्त्येवेति कथं लक्षणा ?। किञ्च लक्षणायामपि प्रयोजनप्रतीतये व्यञ्जनमाश्रीयमाणमित्युपपादितं प्राक् किञ्च यथाऽभिधाशक्तिः संकेतमपेक्षते, तथा लक्षणाऽपि, मुख्यार्थबाध-तद्योगप्रयोजनरूपसमयविशेषमपेक्षत एव, अत एव तामभिधापुच्छभूतामाहुः। न च लक्षणात्मकमेव व्यञ्जनम् । तस्य लक्षणामूलकत्वेन, तद्भिन्नाभिधामूलकत्वेन च दर्शनात्; न च केवलं तदुभयानुसारिण्येव व्यञ्जना, अपि तु निरर्थकवर्णानुसारिण्यपि किञ्च लक्षणाशब्दानुसारिण्येव व्यञ्जना तु शब्दभिन्ना नेत्रत्रिभागावलोकनादिगताऽपि प्रसिद्धा। इत्थं चाभिधालक्षणातात्पर्यव्यापारत्रयातिवर्ती व्यञ्जनाव्यापारोऽनपद्रवनीय एवेति सिद्धमेवोक्तस्थले निषेधस्य व्यङ्ग्यत्वम् । तत्र 'अत्ता एत्थ निमज्जतीति' [ उदाह्रियमाणे ] नियतसम्बन्धः, 'कस्स व ण होइ रसो' इत्यादावुदाह्रियमाणेऽनियतसम्बन्धः ।

"विवरीयरए लच्छी बंभं दट्ठूण णाहिकमलत्थं ।
हरिणोदाहिणणयणं रसाउला झत्ति ढकेई ॥" ( स० श० ८१५ )

'विपरीतरते लक्ष्मीर्ब्रह्माणं दृष्ट्वा नाभिकमलस्थं हरेर्दक्षिणनयनं रसाकुला झटिति स्थगयति, इति संस्कृतम् । विपरीतरतिसमये लक्ष्मीः–कमला नाभिकमलस्थं– हरेर्नाभिकमले विद्यमानं, ब्रह्माणं दृष्ट्वा [ लज्जमाना ] रसेन–सुरतावेशेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ततो निवर्त्तितुमक्षमा] हरेः–विष्णोः, दक्षिणनयनं [सूर्यात्मकं] स्थगयति–आच्छादयति, इति वाच्योऽर्थः। अत्र सम्बद्धसम्बद्धस्य व्यङ्ग्यत्वं तथाहि–हरिपदेन दक्षिणनयनस्य सूर्यात्मकत्वं व्यज्यते,। तन्निमीलनेन सूर्यास्तमयः, तेन च कमलसंकोचः, तेन च ब्रह्मणः स्थगनं, तथा सति च रतिक्रीडायास्तेनादर्शनमिति स्वच्छन्दं निधुवनविलसितमिति व्यज्यते।

अथ ये वेदान्तिन इत्थमाहुः–अखण्डवाक्यस्य वाक्यार्थे शक्तिः। तथा च वाक्यगम्ये व्यङ्ग्येऽपि वाक्यस्य शक्तिरेवेति, तैरपि सांसारिकदशायामाविधिकव्यवहारावलम्बिभिः, पदपदार्थकल्पना कर्तव्यैवेति तन्मतेऽप्यवश्यमेव "मम धम्मिय" इत्यादौ व्यञ्जना समाश्रयणीयैव। इत्थं हि वेदान्तिनामभिप्रायः–क्रियाकारकादिपुरस्कारेण शब्दानां प्रवृत्तिर्धर्मधर्मिभावमपुरस्कृत्य न संभवति, धर्मधर्मिभावश्च प्रपञ्चगोचरो वा स्याद् ब्रह्मगोचरो वा, नाऽऽद्यः– प्रपञ्चस्य मिथ्यात्वात्, नान्त्यः–ब्रह्मणो धर्मशून्यत्वात्, अतः पदपदार्थविभागमन्तरेणैव 'सत्यं विज्ञानम्' इत्यादिवाक्यमखण्डमेवाखण्डब्रह्मवाचकमिति प्रतीयमानेऽपि वाक्यस्य शक्तिरेव। तत् तु न शोभनम्–व्यवहारमार्गे तैरपि पदपदार्थकल्पनाया अवश्यमङ्गीकार्यत्वात्। व्यवहारे तेषां भट्टनयस्वीकारात्॥

महिमभट्टस्त्वेवमाह–वाच्यादसम्बद्धोऽर्थो वाक्यान्न प्रतीयते, तथा सति सर्वस्मात् सर्वप्रतीतिप्रसङ्गात्, सम्बन्धात् व्यङ्ग्य-व्यञ्जकभावो भवन्नवश्यमप्रतिबन्धे [अनियतसम्बन्धे] न भवतीति व्याप्तत्वेन, नियतं [यत्] विपक्षव्यावृत्तत्वेन रूपेण धर्मिनिष्ठत्वं [पक्षवृत्तित्वं] तेन त्रिरूपात् [सपक्षसत्त्व-विपक्षासत्त्व-पक्षसत्त्वरूपलक्षणत्रयवतो] हेतोः [लिङ्गादेव] संभवतीति लिङ्गाल्लिङ्गिज्ञानरूपादनुमानान्नासावतिरिक्त इति एवं च "मम धम्मिय" इत्यादौ भीरुभ्रमणस्य कारणं भयकारणाभावः तद्विरुद्धं च भयकारणं सिंहः, तदुपलब्धेः साध्यस्य भ्रमणस्याभावोऽनुमीयत इति विध्यादौ वाच्येऽपि निषेधोऽनुमानादेव प्रतीयते अनुमानाकारश्च 'इदं गोदावरीतीरनिकुञ्जं भीरुभ्रमणायोग्यं सिंहवत्त्वात्' इति, अत्र गोदावरीतीरनिकुञ्जं पक्षः, भीरुभ्रमणायोग्यत्वं साध्यं, सिंहवत्त्वं हेतुः, विपक्षो ग्रामादिः, सपक्षश्च सिंहादिनिवासवनादिः, तदर्थं व्यञ्जनावश्यकतेति, तन्न युक्तम्–हेतुभूतस्य सिंहस्याप्रमाणभूत-पुंश्चलीवाक्यप्रतीतत्वेन संदिग्धासिद्धत्वात् न च तादृशो हेतुः साध्यमनुमापयितुं शक्नोति, किञ्च स्वाम्यादेशेन, अनुरागेण, लोभेनान्येन वा केनचिद् विशिष्टेन कारणेन भय-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्वचिन्निषेधे विधिर्यथा—

"अत्ता एत्थ तु मज्जइ एत्थ अहं दियसयं पुलोएसु ।
मा पहिय! रत्तिअंधय! सेज्जाए महं नु मज्जिहसि ॥"
[ गा० स० ७. ६७. स० श० ६६९ ]

---

कारणसत्त्वेऽपि भीरोर्भ्रमणं भवतीत्यनैकान्तिकत्वं हेतोः अथवा शुनः कृपापात्रत्वेनाप्रतीकार्यत्वं तदीयस्पर्शस्याशुक्तिकरत्वं चेति हेतोरयं धार्मिकस्ततो बिभेति,सिंहे तेजस्विनि तु पराक्रमं प्रदर्शयितुं शक्नोतीति विरुद्धश्चेति दोषत्रयदुष्टेनानेन हेत्वाभासेन कथमनुमानं स्यात्? व्यञ्जनावादिनस्तु-एवं विधाद् [ विधिरूपात् ] अर्थादेवंविधः [ निषेधरूपः ] अर्थः, उपपत्तिव्याप्त्यादि युक्त्यनपेक्षत्वेऽपि प्रतीयते, इत्यसिद्धत्वादिकं न दूषणमिति तथा चोक्तमुद्द्योते—व्यभिचारस्फूर्तिमतामपि सामाजिकानामसत्यपि पक्षधर्मतानिश्चये संभावितादप्यर्थाद् व्यक्तेरुदयादिति, किञ्च व्याप्तिस्मरणादिकल्पनातो व्यञ्जनायाः कारणत्वकल्पनमेवोचितमिति न चोपपत्त्यनपेक्षत्वेऽपि व्यङ्ग्यप्रतीत्यभ्युपगमेऽतिप्रसङ्ग इति वाच्यम्, वक्त्रादिवैशिष्ट्यस्य नियामकत्वात्, एवं चावाग्गोचरब्रह्म [ तत्स्वरूपरस ] प्रदिपादिकेयं व्यञ्जनावृत्तिब्रह्मणाऽप्यपलपितुमशक्येति संक्षेपः । तस्मात् साधूक्तम्—'अत्र विस्रब्धो भ्रमेति विधिवाक्य०' इत्यादिना वृत्तिग्रन्थेनात्र निषेधस्य व्यङ्ग्यत्वम् ।

क्वचिन्निषेधे विधेर्व्यञ्जनमाह-**क्वचिन्निषेधे विधिरिति। अत्ता एत्थेति** श्वश्रूरत्र निमज्जति, अत्राहं दिवसकं प्रलोकय, मा पथिक! राज्यन्धक! आवयोः शय्यायां माङ्क्षीः ॥ इति संस्कृतम्। हे राज्यन्धक!—तैमिरिक!, पथिक!—पान्थ!, अत्र—अस्मिन् स्थाने, श्वश्रूः—मत्पतिजननी, निमज्जति—जराधिक्येन निश्चेतनं शेते, अत्र—तदितरस्थाने अहं ( शये ) तत् त्वं दिवसकं—दिनं व्याप्य, सम्यक् पश्य [ अन्यथा ] आवयोः—श्वश्रू-स्नुषयोः शय्यायां मा माङ्क्षीः—निःसंज्ञो मापतेः। अत्र श्वश्रूरित्यनेनासहिष्णुत्वं व्यज्यते, तेन चाभिलाषस्य गुप्तत्वेन पोषणीयत्वं व्यज्यते, तेन चाभिलाषस्य गुप्तत्वेन पोषणीयत्वं प्रतीयते। ननु तर्हि कथमवसर इति शङ्कापनोदाय तस्याः सर्वदा भयकारणत्वाभावमाह-अत्र निमज्जतीति—अत्रेत्यनेन स्वस्वापस्थानाद् दूरे स्थितिः, निमज्जतीति निर्जागरणं च स्वापो बोधितः, अत्रेत्यनेन तन्मार्गसमीपदेशः परिचायितः, अहमित्यात्मनोऽङ्गुल्या निर्देशेनोपभोगयोग्यत्वं सूचितम्, 'दिवसक' इत्यत्र साम्प्रतं विघ्नकारित्वेन कुत्सा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्रावयोः शय्याया मा निषत्स्यसीति निषेधवाक्ये 'इयं श्वश्रू शय्या' 'इयं मच्छय्या' इति दिवाप्युपलक्ष्य रात्रौ त्वयेहागन्तव्यमिति विधिः प्रतीयते।

क्वचिद् विधौ विध्यन्तरं यथा—

"बहलतमा हयराइं अज्ज पउत्थो पई घरं सुन्नं।
तह जग्गिज्ज सयज्झय! न जहा अम्हे मुसिज्जामो"
[ गा० स० ४. ३५. स० श० ३३५ ]

---

बोधकः कन्, तस्मात् सम्प्रति केवलं परस्परावलोकनसुखमेवानुभवावः, पथिक!' राज्यन्धक!' इति सम्बोधनं च चेति तेऽपि तव न दोषावहम्, इति न भेतव्यमिति सूचितम्। रात्रावधिकमदनोद्रेकादेवान्ध इति वा राज्यन्धेति व्यङ्ग्यम्, तेन च शय्याविभागानभिज्ञताऽपि। शय्यायां मा शयिष्ठा अपि तु मयि मा आवयोरपि तु मय्येव, मा शयिष्ठा अपि तु प्रहरचतुष्टयमपि निधुवनेन क्रीडावहे, इत्यादिक, मनेकमर्थं 'अहम्' इति निपातो द्योतयति। आवयोर्न तु ममेत्युक्त्वा विशेषवचनेन शङ्काऽपनोदिता। अत्र कथं विधेर्व्यङ्ग्यत्वमित्याह—अत्रावयोरित्यादिना-इत्थं हि शय्यायामापतनस्य निषेधो वाच्यः, व्यभिचारिणोः प्रतिपाद्यप्रतिपादकतया चेयं श्वश्रूशय्येयं च ममेति दिवाप्युपलक्ष्य रात्रौ त्वया निःशङ्कमागन्तव्यमिति विधिर्ध्वन्यते।

क्वचिद् विधौ वाच्ये विध्यन्तरप्रतीतिर्यथा—बहलतमा हयराइं इति–बहलतमा हतरात्रिरद्य प्रोषितः पतिर्गृहं शून्यम्। तथा जागृहि प्रतिवेशिन्! न यथा वयं मुष्यामहे॥ इति संस्कृतम्। हतरात्रिः—निन्दापात्रमियं निशा। बहलं—बहुतमो-ध्वान्तं यस्यां तथाभूता, प्रगाढान्धकारा, पतिः—स्वामी, [ न तु प्रियः ] अद्य प्रोषितः—अद्यैव प्रवासाय गतः, गृहं शून्यं—जनसंपर्करहितम्, हे प्रतिवेशिन्!—समीपतमगृहवासिन्!, तथा—तेन प्रकारेण, जागृहि—निवृत्तनिद्रत्वमुपेहि, यथा—येन प्रकारेण, वयं न मुष्यामहे। अत्र स्वामीत्युक्त्या तद्गतप्रीतिविरहसूचनद्वारा तद्विषयकचिन्ताशून्यत्वप्रकटनेन मन्मथविलसितस्याबाधप्रसरत्वमुक्तम्। अद्य प्रोषित इति तत्परावर्तनजन्याया भीतेरभावः सूचितः। गृहं शून्यमित्यनेन परकर्तृकविघ्नराहित्यं द्योतितम्। प्रतिवेशिन्नित्यनेन गृहान्तरावस्थितजनकर्तृकदर्शन-विषयत्वेऽपि त्वयि कार्यान्तरप्रयुक्तागमनसमर्थनसम्भावनया क्षत्यभावः। 'वयम्' इत्यनात्मीयत्वमात्मनि बद्धाशत्वं चोक्तम्। तथा यथा पदाभ्यां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र यथा वयं न मुष्यामहे तथा त्वं जागृहीति विध्यभिधाने रात्रिरत्यन्धकारा, पतिः प्रोषितः, गृहं शून्यम्, अतस्त्वमभयो मत्पार्श्वमागच्छेति विध्यन्तरं प्रतीयते।

क्वचिन्निषेधे निषेधान्तरं यथा—

"आसाइयं अणाएण जेत्तियं तेत्तियण बंध दिहिं।
ओरमसु वसह! इण्हि रक्खिज्जइ गहवईच्छित्तं॥"
[स० श० ९५८]

अत्र गृहपतिक्षेत्रे दुष्टवृषवारणापरे निषेधवाक्ये उपपतिनिवारणं निषेधान्तरं प्रतीयते।

क्वचिद्विधिनिषेधे विधिर्यथा—

"महुएहिं किं व पंथिय! जइ हरसि नियंसणं नियंबाओ।
साहेमि कस्स रण्णे गामो दूरे अहं एक्का॥"
[स० श० ८७७]

---

च सन्निहितप्रतिवेशिपुरुषकृतप्रवेशसरक्रीडादिरखिलोऽप्यर्थः समुद्द्योतितः। तथा चोक्तं वृत्तौ–अत्र यथा वयं न मुष्यामहे तथा जागृहीत्यादिना। तथा च समीपोपसर्पणपूर्वकनिधुवनादिविधिर्व्यज्यत इति॥

एवं विधौ विध्यन्तरव्यञ्जनरूपविशेषमुक्त्वा प्रतिषेधे प्रतिषेधान्तरध्वनिरूपं विशेषमुदाहरति–असाइयं अण्णाएणेति"आसादितमज्ञातेन यावत् तावता बधान धृतिम्। उपरम वृषभेदानीं रक्ष्यते गृहपतिक्षेत्रम्॥" इति संस्कृतम्।

काचिदुपपतिं निवारयन्ती वृषभाऽन्योक्त्या आह– हे वृषभ! अज्ञातेन–क्षेत्रपतिनाऽनवलोकितेन, यावत्, आसादितं–क्षेत्रगतं धान्यादि भक्षितं, तावता धृतिं–संतोषं बधान, इदानीं रक्षकेन गृहपतेः क्षेत्रं रक्ष्यते, आगतो रक्षकस्तेन चावलोकने बन्धनादिसम्भावनेत्युपरमेति वाच्यम्। हे वृषभ!–वृषवद् यतस्ततः सर्वासु गमनशील! जार! गृहपतिनाऽज्ञातेन यावत्कालं त्वया तदीयक्षेत्रस्य [दाराणाम्] उपभोगः कृतस्तावतैव संतोषं कृत्वा साम्प्रतं, तस्य क्षेत्रस्य रक्षके गृहपतौ समागते उपरमेति निषेधान्तरं च व्यङ्ग्यमित्यत्र 'गृहपतिक्षेत्रम्' इत्यादिनोक्तम्॥

एवं चतुर्विधं वैचित्र्यं प्रतिपाद्य क्वचिद् विधि-निषेधयोरुभयोरभावेऽपि विधिप्रतीतिस्थलमाह—महुएहिं किं वेति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र विधिनिषेधयोरनभिधाने अहमेकाकिनी, ग्रामो दूर इति विविक्तोपदेशान्नितम्बवासोपि मे हरेति विधिः प्रतीयते।

क्वचिद्विधिनिषेधे निषेधो यथा—

"जीविताशा बलवती धनाशा दुर्बला मम।
गच्छ वा तिष्ठ वा कान्त! स्वावस्था तु निवेदिता॥"

---

"मधुकः किं वा पान्थ! यदि हरसि निवसनं नितम्बात्।
कथयामि कस्यारण्ये, ग्रामो दूरेऽहमेकाकिनी॥" इति संस्कृतम्।

अरण्ये मधुकपुष्पाणि चिन्वन्तीं वनितां दृष्ट्वा साभिलाषः पथिकस्ततो मधुकानि ययाचे, ततः सा तस्य भावं विज्ञायाह—'हे पान्थ!, मधुकैः किं—मधुकानां याचनया किं गोपयसि स्वाभिप्रायं, यदि नितम्बात् निवसनमपि हरसि तथापि अस्मिन्नरण्ये कस्मै कथयिष्यामि न च कस्यापि इहागमनशङ्काऽपि, यतो ग्रामो दूरे, त्वया सह काचिदन्येह तिष्ठन्ती सम्भाव्यत इति चेदत्राह–अहमेकेति। अत्र व्यङ्ग्यं दर्शयति—**अत्र विधिनिषेधयोरनभिधाने** इत्यादिना–न चात्र विधिरुक्तो नवा निषेधः, तथापि 'अहमेकाकिनी [स्वतन्त्रा] ग्रामो दूरे' इति विविक्तोपदेशान्नितम्बवासोऽपि मे हर इति विधिः प्रतीयते एव, कस्मै कथयामीत्याद्युक्त्या च तस्य भयापनोदनं कृतमिति विज्ञेयम्॥

तुल्यन्यायेन विधिनिषेधयोरुभयोरभावे निषेधं व्यङ्ग्यमुदाहरति—**जीविताशा बलवतीति**—

धनोपार्जनाय परदेशं यियासोः प्रियतमस्य यात्रानिश्चयं विज्ञाय 'गच्छेयं न वा' इति तेन पृष्टा वा नायिका 'मा गाः' इत्यस्य मङ्गलतया, तिष्ठेत्यस्य प्रभुताद्योतकतया, गच्छेत्यस्य स्वप्रतिकूलतया च विधि-निषेधयोः कथनेऽक्षमा प्राह हे **कान्त**! कामनाविषयीभूत! **मम जीविताशा बलवती** कथञ्चित् त्वदागमनपर्यन्तं जीवेयमित्येव प्रयत्नेनाशास्यते, जीवनस्यैवाशास्यत्वेनानिश्चितत्वे च **धनाशा** त्वयि समागते त्वदानीतधनोपभोगाशा च सुतरां दुर्बला, ततश्च मया स्वीयावस्था निवेदितैव, तां विज्ञाय, गच्छ वा तिष्ठ वेति। तथा च विधि-निषेधाभावेऽपि त्वयि गते त्वदायत्तजीविताऽहं न जीविष्यामीति प्रतिपादनद्वारा निषेधो गम्यत

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र गच्छ वा तिष्ठ वेत्यविधिनिषेधे जीविताशा बलवती धनाशा दुर्बला ममेति वचनात् त्वया विनाहं जीवितुं न शक्नोमीत्युपक्षेपेण गमननिषेधः प्रतीयते ।

क्वचिद् विधिनिषेधयोर्विध्यन्तरं यथा—

"नियदइयदंसणुक्खित्त ! पहिय ! अन्नेण वच्चसु पहेण ।

गहवइधूआ दुलंघवाउरा इह हयग्गामे ॥" [ स० श० ९५७ ]

अत्रान्येन पथा व्रजेति विधि-निषेधयोरभिधाने हे स्वकान्ताभिरूपताविकत्थन ! पान्थ ! अभिरूपक इह ग्रामे भवतो गृहपतिसुता द्रष्टव्यरूपेति विध्यन्तरं प्रतीयते ।

---

एव । तदाह—गच्छ वा तिष्ठ वेत्यविधिनिषेधे इति । गच्छेति विधिः, तिष्ठेति गमनाभावप्रयोजकस्थितिविधेर्निषेधरूपत्वान्निषेध एवेत्यविधिनिषेधत्वं स्पष्टम् ॥

क्वचिद्विधिनिषेधयोरुभयोः सतोर्विध्यन्तरमेव प्रतीयते, तदुदाहरति—यथा—नियदइयदंसणेति–निजदयितादर्शनोत् क्षिप्त ! पथिक ! अन्येन व्रज पथा । गृहपतिदुहिता दुर्लङ्घ्या वागुरा इह हतग्रामे ॥ इति संस्कृतम् । निजदयितायाः–निजवध्वाः अदर्शनेन उत्क्षिप्त ! भ्रान्तान्तरङ्ग ! पथिक ! पान्थ ! अन्येन–सम्प्रति समधिष्ठितान्भिन्नेन, पथा व्रज–गच्छ, [ मार्गान्तराश्रयणपूर्वकप्रयाणेनैव त्वया स्वग्रामः शीघ्रं प्राप्तुं शक्यते, येन च स्वीयदयिता द्रष्टुं शक्यते, यामनीक्षितवतस्तवेयान् सम्भ्रमो दृश्यते ] नन्वयमपि मार्गोऽस्मद्ग्रामाभिमुखमेव प्रयाति, तथा चानेनापि ग्रामप्राप्तिर्निश्चितैवेति किमिति मार्गान्तरोपसर्पणमादिशसीति चेदत्राह इह त्वया सम्प्रति प्रविश्यमाने, हतग्रामे–दुःशीलखर्वटे, गृहपतिदुहिता–ग्राममुख्यस्य कन्या, दुर्लङ्घ्यवागुरा–दुरतिक्रमः पाशः । अयमाशयः–त्वं स्वप्राणप्रियाविरहोत्कण्ठितो येन मार्गेण चलितोऽसि तेन पथा व्रजता त्वयाऽस्य ग्रामस्य मुख्यगृहपतेर्दुहिताऽवश्यं द्रष्टव्या, तस्यां च दृष्टायां तव तद्रूपलावण्याहृतचेतसस्ततो गमनं झटित्यसम्भावितमिति यदि स्वदयितां शीघ्रं द्रष्टुमिच्छसि तर्हि त्यजैनं मार्गमिति वाच्योऽर्थः । अथ किं व्यज्यते तदाह—अत्रान्येन पथेत्यादिना । एवं सम्भ्रममालोक्य ते स्वकान्ताया अभिरूपता ख्याप्यते, त्वमपि च तामेव स्वसमानामभिरूपां जानासि नान्यामिति, त्वया स्वीयमप्याख्प्यं मन्यते, तथा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्वचिद् विधिनिषेधयोर्निषेधान्तरं यथा—

"उच्चिणसु पडियकुसुमं मा धुण सेहालियं हलियसुण्हे ?।
एस अवसाणविरसो ससुरेण सुओ वलयसद्दो ॥"
[ स० श० ९५९ ]

---

च त्वयाऽन्यया गृहपतिदुहिताऽवश्यं द्रष्टव्या यथाऽयं तवोभयविषयाभिरूपतामदो यास्यति, प्राप्स्यसि च इष्टिफलम्। सा च गृहपतिदुहितेति तस्या दुर्ललितात्वेन स्वाच्छन्द्यं, ग्रामस्य हतत्वोक्त्या चात्र दुष्टं व्यवहरन्त्या अपि तस्याः कोऽपि निवारको नास्ति, दुर्लङ्घ्यवागुरेति कथनेन रूपयौवनसमृद्धत्वं युवजनाकर्षकत्वं च सूच्यते । तथा चानेनैव पथा व्रजेति विधिः प्रतीयते। अत्रान्येन पथा व्रज, नानेनेति रीत्या विधिनिषेधावुभावुक्तावपि विध्यन्तर एव पर्यवस्यतो न तु स्वार्थे तयोस्तात्पर्यम् ॥

अथ विधि-निषेधयोरुभयोः सतोरपि निषेधान्तरप्रतीतिरुदाह्रियते—उच्चिणसु इति—"उच्चिनु पतितानि कुसुमानि, मा धुनीः शेफालिकां हालिकस्नुषे !। एष तेऽवसानविरसः श्वशुरेण श्रुतो वलयशब्दः ॥" इति संस्कृतम्। क्वचिदिह 'विसमविरावो' इति पाठः समुपलभ्यते तस्य च 'विषमविरावः' इति च्छाया। काचिद् गृहपतिस्नुषा अविनीतकामुकेन पुष्पवाहिकायामुद्वेलं क्रीडन्ती वलयशब्देन बहिरपि श्रूयमाणा गोपनकामनया बहिःस्थितया सख्या प्रतिबोध्यते—हे हालिकस्नुषे!–हलवाहपुत्रवधु! क्रियाकौशलानभिज्ञे!, पतितानि–वृक्षाद् भूतले स्वयं निपतितानि, कुसुमानि–शेफालिकायाः पुष्पाणि, उच्चिनु–संगृहाण, शेफालिकां–श्वेतनिर्गुण्डीलतां मा धुनीः–पुष्पाणि पातयितुं मा कम्पय, यतः, अवसानविरसः–अत्यन्तविकृतः, तव, वलयशब्दः–कङ्कणध्वनिः, एषः-यो मया प्रत्यक्षीक्रियमाणः, स श्वशुरेण–त्वत्पतिपित्रा श्रुतः, तस्य चास्यां लतायां महानादर इत्यस्यामधिकं धुतायामसौ कुप्यति । अत्र पतितकुसुमानि उच्चिन्विति विधिः, शेफालिकां मा धुनीरिति निषेधः, तयोरुभयोरिह केवलमन्यं प्रति वक्तव्यत्वेन, हालिकस्नुषां प्रति तु चौर्यरते–एव'मवसानकालिकः पुरुषे श्रान्तेऽन्ते विपरीतरतप्रसक्तौ नायिकाया विशेषचेष्टया तत्समय एव वलयशब्दस्याधिक्येन स तत्कालिकतयोक्तः, स च यद्यपि विशिष्टरसयुक्तस्तथापि परश्रवणगोचरतया तव रसस्य विरुद्धो भविष्यतीति विरसत्वं तस्येति स निवारयितव्य इति ध्वनिः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र पतितं कुसुममुच्चिनु मा धुनीहि शेफालिकामिति विधिनिषेधयोरभिधाने सखि! चौर्यरते प्रसक्ते वलयशब्दो न कर्तव्य इति निषेधान्तरं प्रतीयते।

क्वचिद् विधावनुभयं यथा—

"सणियं वच्च किसोयरि; पए पयत्तेण ठवसु महिवट्ठे।
भज्जिहिसि वत्थयत्थणि विहिणा दुक्खेण निम्मविया॥
[ ]

अत्र शनैर्व्रजेति विध्यभिधानेन विधिर्नापि निषेधोऽपि तु वर्णना मात्रं प्रतीयते।

---

क्वचिद् विधौ वाच्ये–विधि-निषेधयोः कस्याप्यप्रतीतिरिति तदुदाहर्तुमाह— क्वचिद्विधावनुभयमिति। सणियं वच्च किसोयरीति–"शनकैर्व्रज कृशोदरि!, पदौ प्रयत्नेन स्थापय महीपृष्ठे। भङ्क्ष्यसि विस्तृतस्थानानि, विधिना प्रयत्नेन निर्मितानि॥" इति संस्कृतम्। कश्चित् कामुकः क्वचिद् यान्तीमभिसारिकां दृष्टाऽसि' इति प्रतिबोधनपूर्वकं स्वाभिमुखीकरणायाह–हे कृशोदरि!–कृशम्–अस्थूलम्, उदरं–मध्यभागो यस्याः सा, तत्सम्बुद्धौ हे तनुमध्ये!, शनैः–मन्दं, व्रज–याहि, तत्प्रकारमेवाह–पदौ–चरणौ, प्रयत्नेन–सावधानतया निम्नोन्नतप्रदेशं दृष्ट्वा, महीपृष्ठे पृथ्वीतले, स्थापय, कुत इति चेत्–[अशनैर्गमने] विधिना–ब्रह्मणा, प्रयत्नेन–महता श्रमेण, निर्मितानि–संघटितानि, विस्तृतस्थानानि–ऊरुनितम्बवक्षःस्थलादिप्रदेशान्, भङ्क्ष्यसि विघटयिष्यसीत्यर्थः, मध्यस्य कृशतया निम्नोन्नतप्रदेशे कदाचित् पतितौ पादौ तदा मध्यस्य भङ्गे भारभूतानां तेषां भङ्गोऽवश्यं भावीति भावः। अत्र विधिः–शनकैर्व्रजेति स्पष्टः, किन्तु वक्तुर्गमने गमननिषेधेऽन्यत्र वा क्वापि तात्पर्यमिति निर्धारयितुं न शक्यते, तदाह— अत्र शनैर्व्रजेति विध्यभिधानेनेति, तर्हि किं प्रतीयत इति चेदत्राह— वर्णनामात्रमिति–तस्याः स्वरूपवर्णनमात्रं प्रतीयत इति भावः॥

क्वचिन्निषेधे वाच्ये विधि-निषेधयोरुभयोर्मध्ये कस्याप्यप्रतीतिः, यथा–दे आ पसिएति–"प्रार्थये प्रसीद निवर्तस्व मुखशशिज्योत्स्नाविलुप्ततमोनिवहे! अभिसारिकाणां विघ्नं करोष्यन्यासामपि हताशे!॥" इति संस्कृतम्। काचिदभिसर्तुं प्रस्थिता स्वयमेव गृहमागतं प्रियतममवलोक्य, स्वयं निवर्ति-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्वचिन्निषेधेऽनुभयं यथा—

"दे आ पसिअ निअत्तसु मुहससिजोण्हाविलुत्तमोनिवहे।
अहिसारिआण विग्घं करेसि अण्णाण वि हयासे॥ [ ]

अत्र निवर्तस्वेति निषेधाभिधाने न निषेधो नापि विधिरपि तु मुखेन्दुकान्तिवर्णनामात्रं प्रतीयते।

क्वचिद् विधिनिषेधयोरनुभयं यथा—

"वच्च महं च्चिअ एक्काए होंतु नीसासरोइअव्वाइं।
मा तुज्झ वि तीए विणा दक्खिण्णहयस्स जायंतु॥"
[ स० श० ९४४ ]

---

च्यमाणाऽपि गच्छन्तीव तेनैवमुच्यते। मुखस्य शशिरूपस्य ज्योत्स्नया विलुप्त तमसां निवहः-समूहो यया तत्सम्बुद्धौ–हे वदनेन्दुचन्द्रिकानिरस्ततमस्तोमे !, [ त्वामहं ] प्रार्थये–निवर्तस्वेति–मा प्रयासीः, कुत इति चेत् ? शृणु–हे हताशे ! हता मदीया आशा यया तथाभूते ! [ बहुकालं ] मया सङ्केतस्थाने त्वदागमनप्रत्याशया स्थितेन त्वामनायातां वीक्ष्यैवेहायातमिति तादृशासि, एवं चैतस्य सम्बोधनस्य समर्थनसम्भवे 'हताशे' इति सम्बुद्धेरनौचिती ध्वन्यालोकटीकोक्ता चिन्त्या, न च संकेतस्थानमनायातामपरागां गच्छतोऽस्यानौचिती प्रतीयेतेति चेत् ? बहुशः परीक्षितरागायाः कारणविशेषविनिपातेन सम्भाव्यमानानागमनायाः स्थितिज्ञानायागमनस्य विशेषस्नेहव्यञ्जकत्वात्। अन्यासामपि अभिसारिकाणां विघ्नं करोषि, कृष्णपक्षेऽभिसारिका नीलनिवसनाः सत्योऽभिसरन्ति, त्वया च स्वमुखप्रकाशेन दिशो वितिमिराः क्रियन्त इति ता अपि जनवीक्षणभयान्नाभिसरिष्यन्तीति भावः। ध्वन्यालोकटीकायां तु–अस्य पद्यस्य प्रकरणनिर्देशो इत्थमुक्तः—

"नायकः स्वापराधमवधाय सङ्केतस्थलान्निवर्तमानां दयितां निवर्तयँश्चाटुनाऽनुनयति, अथवा नायकस्य गृहमेवागच्छन्तीं प्रत्यप्रत्यभिज्ञानच्छलेन, तटस्थस्य वाऽभिसारिकासामान्यं प्रत्यदो वचनमिति अत्रानुभयप्रतीतिमाह–

**निवर्तस्वेति निषेधाभिधान** इत्यादिना। **मुखेन्दुकान्तिवर्णनामात्रमिति**–मुखेन्दुकान्तेः शुक्लपक्षकारकत्वप्रत्यायनेनातिशयकान्तिमत्त्वं तेन च तद्गत आत्माभिलाषो व्यक्त इत्येतावदेव प्रतीयते, नवा विधिर्नवा निषेध इति॥

क्वचित् विधि-निषेधयोः सतोरपि तयोर्मध्ये कस्याप्यप्रतीतिमुदाहरति-**वच्च महं च्चिएत्ति**–"व्रज ममैवैकस्याः भवन्तु निःश्वासरोदितव्यानि मा तवापि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र ममैव निःश्वासरोदितव्यानि भवन्तु, मा तवापि तां विना तानि जायन्तामिति विधिनिषेधयोरभिधाने न विधिर्नापि निषेधोऽपि तु कृतव्यलीकप्रियतमोपालम्भमात्रं प्रतीयते ।

क्वचिद्विधिनिषेधेऽनुभयं यथा—

"णहमुहपसाहिअंगो निद्दाघुम्मंतलोअणो न तहा।
जह निव्वणाहरो सामलंग ! दूमेसि मह हिअयं ॥
[ स० श० ९३७ ]

---

तया विना दाक्षिण्यहतस्य जनिषत ॥" इति संस्कृतम् । सपत्नीसमासक्तं तदन्तिके गन्तुमुत्सुकं स्वानुरोधेनाप्रकटिताभिप्रायं निःश्वासादिना विज्ञाय काचिन्नायकं प्रत्याह, अथवाऽद्य ममैव सन्निधे स्थातव्यमिति प्रार्थनामनङ्गीकुर्वन् केवलं निःश्वसन् कश्चित् कयाचिदेवमुच्यते–व्रज स्वप्रेयसीगृहं गच्छ, एकस्याः–एकाकिन्या ममैव निःश्वासरोदितव्यानि भवन्तु, त्वद्वियोगदुःखभागिन्यहमेकैव तिष्ठेयमिति वरम्, किन्तु, दाक्षिण्येन अनेककान्ताविषयाविषमानुरागेण, हतस्य नष्टस्य, [ न तु प्रेमगुणोत्कर्षापकर्षविवेकिनः ] तया–प्रेप्सितप्रेयस्या विना, तद्विरहेण निःश्वासरोदितव्यानि मा जनिषत । इह 'दुःखी स्यामहमेक एव सकलो लोकः सुखं जीवतु" इति न्यायेन सर्वथाऽनिष्टस्यापि प्रियगमनस्य विधिर्वाच्यः । त्वन्मनो नितरां तस्यामासक्तमिति त्वदीयं शठत्वमवधारितं मया, अतो मत्समीपे स्थित्वा कृतं कृतकदाक्षिण्यप्रकटनेनेति, विधिनिषेधाभ्यामुदासीनमनुभयात्मकं तदुपालम्भनात्मकं वस्तु व्यङ्ग्यमिति तदाह-अत्र ममैव निःश्वासरोदितव्यानीत्यादिना-ममैवेति कथनेन न तव न वा तस्याः इति, यतो न सा मत्समा हतभाग्या, भवन्त्विति—दुःसहान्यपि सन्तु, न तु त्वत्समागमसुखानि, दाक्षिण्यमात्रेणैवेह स्थितोऽसीति विज्ञाते त्वयि स्थितेऽपि मम निःश्वासादीनि न निवर्तन्ते, तद् द्वयोरपि क्लेशस्यावश्यम्भावे वरमेकस्या ममैव क्लेशभाजनत्वम्, तया विनेति कथनेन न मत्कोपकृतस्तव कोऽप्यनुशय इति चाविद्यते ॥

अथ क्वचिद् विधि-निषेधयोरुभयोरभावेऽनुभयप्रतीतिमुदाहरति-णमुहेति–"नखमुखप्रसाधिताङ्गो, निद्राघूर्णलोचनो न तथा । यथा निर्व्रणाधरः श्यामलाङ्ग ! दूनयसि मम हृदयम्" ॥ इति संस्कृतम् । काचिदन्यासङ्गसूचकचिह्नितं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विगतमत्सराया मम न तथा नखपदादि चिह्नं भवदङ्गसङ्गि खेदावहं यथा—अर्धनिष्पन्नसंभोगतयाऽधरदशनासंपत्तिरितीर्ष्याकोपगोपनमुपभोगोद्भेदेन कृतं-वाच्योऽर्थः । तद्बलसमुत्थस्तु—सहृदयोत्प्रेक्षितोऽत्यन्तवाल्लभ्यान्मुखचुम्बनपर एव तस्यास्त्वं यत् त्वदधरखण्डनावसरोऽस्या वराक्या न संपन्न इति न केवलं तस्या भवानतिवल्लभो यावद्भवतोऽपि सा सुतरां रोचत इति वयमिदानीं त्वत्प्रेमनिराशाः संजाता इति नायिकाभिप्रायो -व्यङ्ग्यः ।

क्वचिद्वाच्यादविभिन्नविषयत्वेन व्यवस्थापितो यथा—

"कस्स व न होइ रोसो दट्ठूण पिआइ सव्वणं अहरं
सभमरपउमग्घाइरि वारिअवामे सहसु इर्णिह ॥
[ स० श० ८८६ ]

---

कान्तं प्रत्याह—नवमुखैः—नखाघातैः, प्रसाधितं—भूषितमङ्गं यस्य तादृशः, निद्रया घूर्णन्ती लोचने यस्य स त्वं तथा मम हृदयं न दूनयसि यथा, हे श्यामलाङ्ग! निर्व्रणाधरः—नायिकाकर्तृकाधरपानसूचकचिह्नरहिताधरः, मम हृदयं दूनयसि—दुःखीकरोषीत्यन्वयः । अत्र किं वाच्यं किं वा व्यंग्यमिति वृत्तावेव स्पष्टम् तथा हि—विगतमत्सरायाः त्वामन्योपभोगचिह्नितमपि विलोक्य मत्सरेण—ईर्ष्यया रहिताया मम, भवदङ्गसङ्गि नखपदादिचिह्नं, मत्सपत्नीकृतं भवदङ्गे वर्त्तमानं नखाघातादि चिह्नं तथा अत्यन्तं, न खेदावहं दुःखजनकं, यथाऽर्धनिष्पन्नसम्भोगतयाऽधरदशनस्यासम्पत्तिः अधरस्य निर्व्रणत्वेन तयाऽधरो न दष्ट इति सम्भोगस्यार्धनिष्पन्नत्वं प्रतीतम्, खेदावहेति, उपभोगोद्भेदेन सपत्नीसंगमप्रकटनपूर्वकम्, ईर्ष्याकोपगोपनं कृतं, वाच्योऽर्थः । तद्बलसमुत्थस्तु-वाच्यार्थेन प्रतीयमानस्तु "अत्यन्तवाल्लभ्यात् तस्या अतिशयवल्लभात्वेन त्वं स्वयमेवान्तं यावत् मुखचुम्बनपर आसीः, यत् यस्मात्, अस्या वराकयाः [ व्यञ्जनया महाभाग्यायाः] तवाधरस्य खण्डनायावसर एव न त्वया दत्तः, इति न केवलं तस्या भवानतिवल्लभः [ नखपदादिसूचितत्वात् ] किन्तु [ निर्व्रणाधरत्वेन सूचिता ] साऽपि तवातिवल्लभेति वयमिदानीं त्वत्प्रेमनिराशा इत्यादि नायिकायाः अभिप्रायः" व्यङ्ग्यः सहृदयैरुत्प्रेक्षित इति ॥

इत्थं कथञ्चिद्वाच्यसम्बद्धान् व्यङ्ग्यानुदाहृत्य साम्प्रतं वाच्याद् विभिन्नविषयं व्यङ्ग्यमुदाहरति—कस्स व ण होइ इति । "कस्य वा न भवति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र वाच्यं सखीविषयं, व्यङ्ग्यं तु तत्कान्तोपपत्त्यादिविषयम् ।

रोषो दृष्ट्वा प्रियायाः सव्रणमधरम् । सभ्रमरपद्माघ्राय्रिणि वारितवामे ! सहस्वेदानीम् ॥" इति संस्कृतम् । प्रियायाः—स्वपत्न्याः, सव्रणम्-अनात्म(पर)कृतक्षतभाजम्, अधरं दृष्ट्वा—अपूर्वतया विलोक्य, कस्य वा—अनीर्ष्यालोरपि रोषो न भवति—अपि तु सर्वस्यापि भवत्येव । भ्रमरेण सहितं-सभ्रमरं यत् पद्मं, तदाघ्रातुं शीलमस्या इति तथाभूते ! [ शीलं हि केनापि प्रकारेण वारयितुं न शक्यत एव ], अत एवाह—वारितवामे इति—वारिते-मा सभ्रमं पद्मं घ्रासीरिति निवारणे कृतेऽपि, वामे—तदनङ्गीकारिणि !, इदानीं—पतिसंशयदशायां स्वानुचिताचरणफलभोगावसरे वा, सहस्व—स्वदुरभिनिवेशसम्भवां पतिकृतामुपालम्भपरम्परां रोषनियन्त्रणां वा मर्षयेति भावः । एतच्च—अविनयरमणेन खण्डिताधरां काञ्चिन्नायिकां प्रति तद्दर्शनकृतपतिकोपमोषाय तत्पतिं तत्र स्थितं जानन्त्यप्यविदितमिव प्रकाशयन्ती काचिद् विदग्धा सख्याह । तच्च वाच्यायाः [ वाच्यत्वेन विषयभूतायाः नायिकायाः ] विभिन्नाः—तत्पतितत्सपत्न्यादयो विषया यस्य तथात्वेन व्यवस्थापितव्यङ्ग्यं वाक्यम् । तथा हि—पूर्वोक्तं वाच्यं सखी [ अविनयवती ] विषयम्, भर्तृविषयं व्यङ्ग्यं तु पत्युर्मुग्धत्वे भ्रमरकृतोऽयं दंशो नोपपतिकृत इति नास्या अपराध इति, पत्युर्वैदग्ध्ये मयाद्येत्थं संवृतमिति, तथा च प्रियेयमिति कृत्वैकमपराधं सहस्वेति व्यङ्ग्यम् । प्रातिवेश्मिकलोकविषयं तु प्रियेण गाढमुपालभ्यमानायां तस्यां तद्व्यलीकशङ्कापनोदनपूर्वकमविनयप्रच्छादनं व्यङ्ग्यम् । तदुपालम्भन-तदविनयप्रकाशप्रहृष्टायां तत्सपत्न्यां तु 'प्रियाया' इति शब्दबलात् सौभाग्यातिशयस्थापनमिति सपत्नीविषयं व्यङ्ग्यम् । सपत्नीमध्ये इयती खलीकृतासीति लाघवमात्मनि गृहीतुं न युक्तम्, प्रत्युतायं बहुमानो यतः पत्यौ रुष्टे त्वमपि रुष्टा पादपतनादि लभस इति सहस्व शोभस्वेदानीमिति सखी [ नायिका ] विषयं सौभाग्यख्यापनं व्यङ्ग्यम् । किञ्च अद्येयं तव प्रच्छन्नकामुकी हृदयवल्लभा रक्षिता, अतः परं प्रकटदशनरदनविधिरत्र न युक्त इति तच्चौर्यकामुकविषयं सम्बोधनं व्यङ्ग्यम् । तटस्थविदग्धलोकं प्रति तु इत्थं मयैतदपह्नुतमिति स्ववैदग्ध्यख्यापनं व्यङ्ग्यम् । इत्येवंप्रकारा विभिन्नविषया बहुशो व्यङ्ग्या इहोहितुं शक्या इति विस्तृताभिलाषिभिर्ध्वन्यालोकलोचने विलोकनीयम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवम्-अलङ्कारभेदा रसादिभेदाश्च व्यङ्ग्या मुख्यादिभ्यो व्यतिरिक्ता ज्ञेयाः। तद्विषयो व्यञ्जकः शब्दः ॥ १९ ॥

**मुख्याद्यास्तच्छक्तयः ॥ २० ॥**

मुख्या-गौणी-लक्षणा-व्यञ्जकत्वरूपाः शक्तयो व्यापारा मुख्यादीनां शब्दानाम्। तत्र समयापेक्षा वाच्यावगमनशक्तिर्मुख्याऽभिधा चोच्यते। मुख्यार्थबाधादिसहकार्यपेक्षाऽर्थप्रतिभासनशक्तिर्गौणी लक्षणा च। तच्छक्त्युपजनितार्थावगमपवित्रितप्रतिपत्तृप्रतिभासहायार्थद्योतनशक्तिर्व्यञ्जकत्वम्।

---

तदयमुपसंहृतो व्यङ्ग्योदाहरणविभागः, तस्य च वाच्यताविलक्षणत्वमित्यपि प्रदर्शितमेव, तदेवं पुनर्ग्राहयति-**एवमलङ्कारभेदा रसादिभेदाश्चेति**। **मुख्यादिभ्य** इत्यत्रादिशब्देन गौणलक्ष्ययोः संग्रहः। तथा च यथा वाच्यगौणलक्ष्यभिन्नत्वं व्यङ्ग्यार्थस्य तद्वृत्तावुदाहरणमुखेन प्रदर्शितं, विवेके च विविच्य प्रतिवादिमतनिराकरणपूर्वकमुपपादितमिति व्याख्यातपूर्वम्। **तद्विषयः**-स व्यङ्ग्योऽर्थो विषयः प्रतिपाद्योऽस्य स शब्दो 'व्यञ्जकः' कथ्यत इति शेषः ॥१९॥

तदेवं मुख्य-[वाचक] गौण-लक्षक-व्यञ्जकभेदेन काव्यशरीरभूतानां शब्दानां, तदर्थानां च मुख्य-गौण-लक्ष्य-व्यङ्ग्यानां वर्णनेऽवसिते तादृशार्थप्रतिपादनाय तेषु शक्तेरपि स्वीकार आवश्यक इति तच्छक्तीनां प्रदर्शनाय सूत्रमाह-"**मुख्याद्यास्तच्छक्तयः**" [२०] इति। आदिपदसंग्राह्यान्नामतो निर्दिशति-**मुख्या-गौणी-लक्षणा-व्यञ्जकत्वरूपाः** इति-साक्षात्संकेतितत्वेनाभिधाया मुख्यात्वेन व्यवहारः, गुणादागतत्वमिति गौण्या योगार्थः, लक्ष्यते परगतो धर्मो यया सा च लक्षणा, व्यञ्जयति-विविधरूपेण प्रकाशयत्यर्थमिति व्यञ्जकः शब्दस्तस्य भावस्तत्त्वम्, तथा च व्यञ्जकशब्दनिष्ठोऽसाधारणधर्मरूपो व्यञ्जनापदप्रतिपाद्यः। तेषां-मुख्यादीनां शक्तयः-तच्छक्तय इति विग्रहे शक्तिपदार्थं परिचाययति-**व्यापारा** इति-व्यापारत्वं च तज्जन्यत्वे सति तज्जन्यजनकत्वम्, तथा च ताः शक्तयस्तेभ्य एव समुद्भूतास्तज्जन्यार्थप्रत्यायनकारिकाश्चेति तासां व्यापारत्वम् यद्यप्यभिधाशक्तेरनादित्वमिति नास्ति जन्यत्वं तथापि तत्र समवायेन सम्बन्धित्वमात्रे तात्पर्यान्न दोषः सर्वासां लक्षणानि क्रमश आह-**तत्र समयापेक्षेति**-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अभिधानन्तरं च यद्यप्यन्वयप्रतिपत्तिनिमित्तं तात्पर्यशक्तिरप्यस्ति, तद्विषयस्तात्पर्यलक्षणोऽर्थोऽपि, तथापि तौ वाक्यविषयावेवेति नात्रोक्तौ ॥ २० ॥

**वक्त्रादिवैशिष्ट्यादर्थस्यापि व्यञ्जकत्वम् ॥ २१ ॥**

वक्तृ-प्रतिपाद्य-काकु-वाक्य-वाच्या-ऽन्यासत्ति-प्रस्ताव-देश-काल-चेष्टादिविशेषवशादर्थस्यापि मुख्या-ऽमुख्यव्यङ्ग्यात्मनो व्यञ्जकत्वम्।

---

तत्र-तासु चतसृष्वपि शक्तिषु मध्ये, **समयेत्यादि**-समयम्-पुराणपुरुषकृतं सङ्केतमपेक्षत इति तदपेक्षावाच्योऽर्थो मुख्योऽर्थोऽवगम्यते यया सा शक्तिर्मुख्या, अभिधा च सा कथ्यते। गौणी-लक्षणे च समाननिमित्तके इति ते एकदैव लक्षयति—**मुख्यार्थेत्यादि**-मुख्यार्थबाध आदौ येषां ते मुख्यार्थबाध-मुख्यार्थ-सम्बन्ध-प्रयोजनरूपाः सहकारिणो—निमित्तकारणान्यपेक्षत इति तथाभूता; अर्थस्य प्रतिभासनं-मुख्यार्थानुगतत्वेन रूपेणावगमनं यया सा शक्तिर्गौणी लक्षणा चाभिधीयेते। एतेन च परैरेकत्रैव लक्षणायामुभयोर्वृत्त्योः समावेशोऽपि संगृहीतः। व्यञ्जनां लक्षयति-**तच्छक्तीति**-ताभिः-पूर्वमुपवर्णिताभिस्तिसृभिः, शक्तिभिः-अभिधा-गौणी-लक्षणाख्याभिः, उपजनितः-सम्पादितो योऽर्थावगमः-मुख्याद्यर्थ-बोधः, तेन पवित्रिता—परिष्कृता या प्रतिपत्तॄणां-बोद्धॄणां प्रतिमा—नवनवोल्लेख-शालिनी बुद्धिः तत्सहाया-तदपेक्षा, अर्थद्योतनस्य-विलक्षणप्रकारेणार्थप्रतिपाद-नस्य, शक्तिः सैव व्यञ्जकत्वमुच्यत इत्यर्थः। ननु तात्पर्याख्यामपि वृत्तिं केचन मन्यन्ते, दृश्यते च तदनुकूलो व्यवहारः सर्वत्रेति तदनिरूपणेन न्यूनतेति चेत्? अत्राह-**अभिधानान्तरं च यद्यपीति**-अभिधायाः साक्षात्संकेतितार्थबोधकत्वेन शक्त्यन्तराऽनन्तरितशक्तित्वेन वा प्राथम्येऽपि तदव्यवहितोत्तरत्वेन यद्यपि शब्दार्थसम्बन्धप्रतिपत्तिनिमित्तं तात्पर्याख्या शक्तिरप्यस्ति, सर्वसम्मता, तथा च तद्विषयस्तात्पर्यविषयोऽर्थोऽप्यवश्यमेषितव्यः, तथापि तौ-सा वृत्तिः सोऽर्थश्च, वाक्यविषयौ-वाक्यगताविति शब्दगतशक्त्यर्थयोर्विवेचनप्रकरणे तयोर्विवेचनम-प्रासङ्गिकमिति न तावत्रोक्ताविति ॥ २० ॥

न केवलं शब्द एव व्यञ्जकः, अपि त्वर्थोऽपीत्यर्थस्यापि व्यञ्जकत्वं दर्शयितुं सूत्रमाह—**वक्त्रादिवैशिष्ट्यादित्यादि** । आदिशब्दग्राह्यानुदाहरति-**वक्तृप्रति-पाद्येत्यादिना**। यः परप्रतिपत्तये वाक्यमुच्चारयति स वक्ता, स च कविस्तन्निबद्धो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वक्तृविशेषाद् यथा—

"दृष्टिं हे प्रतिवेशिनि ! क्षणमिहाप्यस्मद्गृहे दास्यसि,
प्रायो नास्य शिशोः पिताद्य विरसाः कौपीरपः पास्यति ।
एकाकिन्यपि यामि तद्वरमितः स्रोतस्तमालाकुलं,
नीरन्ध्राः पुनरालिखन्तु जरठच्छेदा नलग्रन्थयः ॥"

[ क० व० स० ५०० विद्यायाः ]

नायकादिर्वा; यं बोधयितुं शब्द उच्चार्यते स प्रतिपाद्यो बोद्धव्य इति यावत्; काकुर्जिह्वा तत्सम्पाद्यत्वात् क्रोध-शोकभीत्यादिभिर्ध्वनिविकारः काकुः, तथा चोक्तममरेणापि-"काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः"। इति; साकाङ्क्षाणां पदानां समूहो वाक्यम्; शक्त्योऽर्थो वाच्यः; अन्यस्य वक्तृबोद्धव्य-भिन्नस्य, आसत्तिः-सन्निधानं सामीप्यमिति यावत्; प्रस्तावः प्रकरणम्; देशो विजनादिः; कालो वसन्तादिः; चेष्टाऽवयवव्यापारविशेषः; एते आदौ येषां ते च ते विशेषाः-अर्थं विशेषयितारः, तेषां वशात्-साहाय्यात्, मुख्यामुख्यव्यङ्ग्या-त्मनोऽर्थस्यापि व्यञ्जकत्वमिति सूत्रार्थः । क्रमेणोदाहरति-**वक्तृविशेषाद् यथा-दृष्टिं हे प्रतिवेशिनीति** । परपुरुषेण सह रमणायाभिसरन्त्याः कस्याश्चिद्-विनयवध्वा गृहान्तरवर्तिनीं काञ्चित् स्त्रियं प्रतीयमुक्तिः-हे **प्रतिवेशिनि !** समीपस्थगृहवासिनि !, **क्षणं** मत्प्रत्यावर्त्तनकालपर्यन्तम्, **इह** अस्मद्गृहेऽपि स्वगृहावेक्षणवदस्मद्गृहावेक्षणायापि **दृष्टिं दास्यसि** मद्गृहगतागतमपि द्रक्ष्यसि, यथा निषिद्धगतयः श्वादयोऽन्ये वा चौर्यकामुका जना नात्र प्रविशेयुरिति भावः । कुतस्त्वयि सत्यां ममायं नियोग इति चेदत्राह-**अस्य** दृश्यमानस्यानवबोधस्य, **शिशोः** मत्तनयस्य, पिता, जनको मत्पतिरिति यावत्, **प्रायेण** बाहुल्येन, तृप्येत्यर्थः, **विरसाः** कुस्वादाः, **कौपीः** कूपसम्भवाः, **अपः** जलानि न **पास्यति** तस्याऽयं कादाचित्कः स्वभाव इति द्योतनाय भविष्यकालप्रयोगः। **इतः** कारणात्, **एकाकिन्यपि** सहायान्तररहितापि, अहं, **सत्वरं** शीघ्रं, **तमालाकुलं** तमालतरु-परिवृतं **स्रोतो** नदीप्रवाहस्थानं, **यामि**, तत्र च **नीरन्ध्राः** अत्यन्तघनाः, **जरठ-च्छेदाः** चिरच्छिन्नतया कठोरतमाग्राः, **नलग्रन्थयो** नलाख्यतृणपर्वप्रदेशाः, **तनुं** मम सकलमेव शरीरम् **आलिखन्तु** क्षतविक्षतं कुर्वन्तु । अत्र विशिष्टे संकेतस्थाने

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र चौर्यरतगोपनं गम्यते ।

प्रतिपाद्यविशेषाद्यथा—

"निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो,
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि ! दूति ! बान्धवजनस्याज्ञातपीडागमा,
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥"

[अ० श० १०५ ]

परपुरुषसंभोगात्मकं स्वप्रवृत्तिप्रयोजनं, तथा तत्र कर्मणि जायमानतयाशङ्क्यमानानि नखरदनक्षतादीनि संभोग चिह्नानि च गात्रलग्नानि-अपह्नोतुं भर्तृपिपासाक्षपानीयानयनं प्रयोजनं, तमालाकुलं नदीकुलं गन्तव्यस्थानमतिनिबिडतयाऽशक्यपरिहारैर्नलग्रन्थिभिर्गात्रगतविकारविशेषोद्गमं चाभिदधे। तस्याश्चासाध्वीत्वेनावगतौ चौर्यरतगोपनरूपं व्यङ्ग्यं प्रतीयत इति वक्तृवैशिष्ट्यस्य व्यञ्जकत्वं स्पष्टम् । तदाह–अत्र चौर्यरतगोपनं व्यङ्ग्यमिति ।

प्रतिपाद्यविशेषाद् व्यङ्ग्यमुदाहरति–निःशेषच्युतचन्दनं स्तनतटमिति–नायकानयनाय प्रेषितां तं समुपभुज्य समागतां दूतीं प्रति स्नानकार्यप्रकाशनमुखेन संभोगं प्रकाशयन्त्या विदग्धोत्तमनायिकाया उक्तिरियम् । अयि मिथ्यावादिनि ! [ तदन्तिकमगत्वैव 'मया गत्वा बहुशः प्रसादितोऽपि नायातः' इति ] मिथ्याभाषणशीले ! बान्धवजनस्य मद्रूपस्य सुहृज्जनस्य, अज्ञातः–[ स्वार्थपरायणतया ] अनाकलितः, पीडागमो–दुःखप्राप्तिर्यया तथाभूते ! दूति ! सन्देशहरे ! न तु सखि ! मत्प्रतारणपरायणत्वात्, अनेन सम्बोधनेन च मिथ्याभाषणयोग्यताऽपि व्यज्यते ] त्वम् इतः मत्सकाशात्, वापीं दीर्घिकां, स्नातुं जलावगाहनं कर्तुं, गतासि, तस्य बहुधाकृतापराधस्य, अत एव अधमस्य दुःखप्रयोजककर्मशीलस्य [ नायकस्य ], अन्तिकं समीपं, न पुनः नैव गतासि । वापीस्नानोपपादकान्याह–निःशेषेत्यादि । यतस्तव स्तनयोः-कुचयोः, तटं–प्रान्तसमदेशः, निःशेषं यथा स्यात् तथा, च्युतं–स्खलितं चन्दनं यस्मात् तथाभूतम्, न तु उरःस्थलं, नापि सन्ध्यादिरूपनिम्नोन्नतभागोऽपि, वापीगतबहलयुवजनत्रपापारवश्यात्, अंशद्वयलग्नाग्रस्वस्तिकीकृतभुजलतायुगलेन तटस्यैवोन्नततया मुहुर्मुहुः, परामर्शात्, अत एव च्युतमित्युक्तं न तु च्यावितं क्षालितं वेति, युवजनसम्मर्दन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र दूत्यास्तत्कामुकोपभोगो व्यज्यते।

काकुर्ध्वनेर्विकारस्तद्विशेषाद् यथा—

"तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां,
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं,
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ?॥"
[वे० सं० अं० १ श्लो. ११]

---

तदनवकाशात्; व्यङ्ग्यपक्षे तटे एव मर्दनाधिक्यात्, सन्ध्यादौ नायककरपरामर्शायोगाच्च तटमेव स्तनयोस्तथाभूतमिति व्यक्तमेव। एवम् अधरः अधरोष्ठः, निःशेषं मृष्टो [न तु ईषन्मृष्टो] रागः–ताम्बूलरक्तिमा यस्य तथाभूतः, उत्तानत्वे बहुलजलसम्बन्धात्, न तूत्तरोष्ठो न्युब्जत्वेन जलासम्बन्धात्; व्यङ्ग्यपक्षे तु अधरोष्ठ एव कामशास्त्रे चुम्बनविधेरुक्तत्वेन उत्तरोष्ठे तदनुक्तेः, तत्रैव [अधरोष्ठ एव] चुम्बनकृतं निर्मृष्टरागत्वम्। किञ्च नेत्रे चक्षुषी, दूरं प्रान्तभागे एव, अनञ्जने कज्जलरहिते, स्नानकाले नयनयोर्मुद्रणात्, मध्ये जलसम्बन्धाभावात्, व्यङ्ग्यपक्षे तु प्रान्ते एव कामशास्त्रे चुम्बनविधेर्मध्ये तन्निषेधाच्च तत्रैवानञ्जनत्वम्, तथा इत्थं दृश्यमाना, तव तनुः शरीरं, तन्वी कृशा–स्नानजन्यशीतत्वात् संकुचिता, अत एव च पुलकिता सञ्जातरोमोद्गमा; व्यङ्ग्यपक्षे तु कार्श्यं सुरतश्रमात्, पुलकश्च तत्रानुभूताद्भुतरसस्मरणादित्यर्थः। विदग्धाया गूढतात्पर्ययाऽनया वाचोयुक्त्या स्नानसाधारण्येन संभोगचिह्नेष्ववगतेषु प्रतिपाद्य (बोद्धव्य) वैशिष्ट्यात् तदन्तिकमेव रन्तुं गतासीति दूत्याः स्वयं तत्कामुको भोगो व्यज्यते। तदाह–अत्र दूत्या इत्यादिना॥

काकुशब्दव्याख्यानपूर्वकमुदाहरणावतरणमाह—काकुः–ध्वनेर्विकारः, तद्विशेषाद्यथेति। काकुः पूर्वं व्याख्याता, तदुदाहरणं यथा–तथाभूतामिति। वेणीसंहारनाटके दुर्योधनादिभिः सह सन्धिप्रस्तावो युधिष्ठिरेण क्रियते न तु युद्धोद्यम इति श्रुत्वा तमुपलभमानं भीमं प्रति 'आर्य! कदाचित् खिद्यते गुरुः [युधिष्ठिरः] इति वचसा तमुपलम्भान्निवर्तयन्तं सहदेवं प्रति भीमः 'गुरुः किं खेदं जानाति' इत्युपक्रम्याहेदम्–गुरुः साक्षादनभियोज्यो ज्येष्ठो भ्राता [युधिष्ठिरः] इत्थममुना कारणेन खिन्ने म्लाने मयि, खिद्यतेऽनेनेति–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र मयि न योग्यो खेदः, कुरुषु तु योग्य इति काक्वा प्रकाश्यते। वाक्यविशेषाद् यथा—

"प्राप्तश्रीरेष कस्मात् पुनरपि मयि तं मन्थखेदं विदध्यात्,
निद्रामप्यस्य पूर्वामनलसमनसो नैव संभावयामि।

---

खेदस्तं भजति, कुरुषु कुर्वपत्येषु, [अस्यात्मपक्षसामान्यशब्दस्यापि विशेषसन्निधानाद्विशेषान्तरपरता, तेन दुर्योधनादिलाभः] अद्यापि एवं दुरवस्थायां जातायामपि, यद्वा अज्ञातवासनिस्तारात् प्रत्यपकारक्षमकालेऽपि, [खेदं] न भजतीति सोपहासो वाक्यार्थः, काका खेदकारणमेवाह–तथाभूतां दृष्ट्वेति। तथाभूतां–स्त्रीधर्मिणीं [रजस्वलां] दुःशासनाकृष्टवसनकेशपाशां, विशिष्याकथनीयदुरवस्थां [नग्नीक्रियमाणामिति यावत्] नृपसदसि राजसभायां न तु यत्र कुत्रापि, पाञ्चालस्य–द्रुपदराजस्य पुत्रीं, न तु यस्य कस्यचित्, तेनातः पूर्वं जन्मप्रभृत्यपरिभूतत्वमस्यास्सम्बन्धेनैव तथात्वमिति भावः। तथा वल्कलधरैः [अस्माभिः], वने व्याधैः सार्धं सुचिरं बहुकालं यावत्, उषितं निवासः कृतः, [तदृष्ट्वेति सम्बन्धः] विराटस्य राज्ञः, आवासे गृहे, अनुचितस्य–सूदादिकर्मणः, आरम्भेण–उद्योगेन, निभृतं–गुप्तं यथा स्यात् तथा स्थितम् [अस्माभिरिति शेषः], तदपि दृष्ट्वा, खिन्ने मयि खेदं भजति, कुरुषु नेति सम्बन्धः। काका किं प्रकाश्यत इत्याह–मयि न योग्यः खेदः, कुरुषु तु योग्य इति। न च वाच्यस्य भ्रातरि खेदस्य दुर्योधनादिषु तदभावस्याङ्गभूतं व्यङ्ग्यमिति गुणीभूतव्यङ्ग्यमिदमिति वाच्यम्, अत्र वाच्यार्थे पर्यवसन्ने सति व्यङ्ग्यप्रतीतिरिति गुणीभावाभावात्॥

वाक्यविशेषाद् व्यङ्ग्यप्रतीतिमुदाहरति–प्राप्तश्रीरिति। वाक्यविशेषादित्यस्य विलक्षणैतद्वाक्यसहकृतेन वाक्यार्थेनैकस्यान्यस्यार्थस्य व्यञ्जनं भवतीति। तथा हि–हे राजन्! त्वयि आयाते उपगते सति प्राप्ता श्रीर्येन स एष, पुनरपि भूयोऽपि, मयि तं पूर्वानुभूतं, मन्थखेदं मन्दरगिरिविलोडनकष्टं, विदध्यात् कुर्यात्, श्रियः प्राप्त्यर्थमेव हि पूर्वमहमनेन मन्थितः, तत्प्राप्तौ च प्रयोजनान्तरं पुनर्मन्थनस्य नावबुध्यते इति भावः, अनलसमनसः आलस्यशून्यहृदयस्यास्य पूर्वां प्राचीनां [महाप्रलयान्तरभाविनीं] निद्रामपि न संभावयामि। सकलानां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सेतुं बध्नाति भूयः किमिति च सकलद्वीपनाथानुयात-
स्त्वय्यायाते वितर्कानिति दधत इवाभाति कम्पः पयोधेः ॥"
[ ]

अत्र नारायणरूपता गम्यते ।

वाच्यविशेषाद् यथा—

"उद्देशोऽयं सरसकदलिश्रेणिशोभातिशायी
कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः ।

द्वीपानां नाथैः-अधिपैः, अनुयाताः-अनुगतोऽयं, सेतुं किमिति कस्मै प्रयोजनाय भूयो बध्नाति, लङ्काद्वीपाधिपस्य प्रतिकूलस्य दमनाय सेतुबन्धः कृतः, सम्प्रति च सकलद्वीपनाथेष्वनुगतेषु तद्बन्धस्यापि प्रयोजनं न दृश्यते इति भावः, इत्येवं वितर्कान् दधतो धारयत इवाम्बोधेः समुद्रस्य कम्प आभाति। अत्र संदेहोत्प्रेक्षयोः संकरो वाच्यः, तेन च प्रस्तुतस्य राज्ञो नारायणरूपता गम्यत इति रूपकध्वनिः, न च नात्र रूपकस्य ध्वनिरपि तु सन्देहोत्प्रेक्षानुपपत्तिबलात् तदाक्षेप इति वाच्यालङ्कारसंकराङ्गत्वं ध्वनेरिति गुणीभूतव्यङ्ग्यमिदं काव्यमिति वाच्यम्, यो योऽसंप्राप्तलक्ष्मीको निर्व्याजजिगीषाक्रान्तश्च स स मां मथ्नीयादित्याद्यर्थसंभावनया संदेहोत्प्रेक्षयोरुपपन्नत्वात्। न च 'पुनरपि' 'पूर्वाम्' 'भूयः', इत्यतैः शब्दैरेवास्य नाराथणरूपताऽऽकृष्टेति वाच्यम्, कर्तृभेदेऽपि समुद्रैक्यमात्रेण पुनरादीनामर्थस्योपपत्तेस्तेनाक्षेपासंभवात्। कर्तृभेदे कर्मण ऐक्ये क्रियाभेदश्च 'पूर्वं पृथ्वी कार्तवीर्येण जिता, पुनर्जामदग्न्येनेति व्यवहारे प्रसिद्धिः। पूर्वा निद्रा च राजपुत्राद्यवस्थायां शासनवैयग्र्याभावाद् यथाऽऽसीत् तथा पुनर्न संभाव्यत इत्यनेनापि उपपन्ना, ततश्च नारायणत्वं नानुपपत्तिकल्प्यमपि तु रूपकध्वनिरेवेति सिद्ध्यति। स च ध्वनिर्वाक्यपर्यालोचनयाऽवसीयत इति ॥

वाच्यविशेषाद् व्यङ्ग्यप्रतीतिर्यथा-उद्देशोऽयं सरसेति । नायिकां प्रति रत्यर्थस्य कामिनो रतौ प्रवर्त्तिकाया दूत्या वा उक्तिरियम्। हे तन्वि कृशतायोगिनि! अयम् अग्रे दृश्यमानः, नर्मदायाः तन्नामक-नद्याः, उद्देशः उच्चतीरप्रदेशः, अस्तीति शेषः, कीदृशोऽयं तत्राह-सरसानां—स्निग्धानां कदलीनां श्रेणयः-पङ्क्तयस्ताभियां शोभा-कान्तिस्तया अतिशाययत इति तच्छीलः; तथा कुञ्जानां-लतागृहाणाम्, उत्कर्षेण-गुञ्जन्मधुकरकरम्बितकुसुमसौन्दर्यादिना,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किञ्चैतस्मिन् सुरतसुहृदस्तन्वि! ते वान्ति वाताः
येषामग्रे सरति कलिताकाण्डकोपो मनोभूः ॥" [ ]

अत्र रतार्थं प्रविशेति व्यज्यते।

अन्यासक्तेर्यथा—

"णोल्लेइ अणोल्लमणा अत्ता मं घरभरंमि सयलंमि।
खणमेत्तं जइ संझाए होइ न व होइ वीसामो ॥"

[स० श० ८७२]

---

अङ्कुरितः-असन्नप्युत्पादितः, विभ्रमः-'चित्तवृत्त्यनवस्थानं शृङ्गाराद् विभ्रमो मतः' इत्युक्तलक्षणो हावभेदो यत्र तादृशः। किञ्च अपि च, एतस्मिन् प्रदेशे ते मानिनीमानभङ्गेऽतिनिपुणत्वेन प्रसिद्धाः, सुरतस्य सुहृदः-सुरतश्रमहरणेन पुनः पुनस्तस्मिन् कर्मणि प्रवर्तनपटवः, वाता वान्ति, येषां वातानाम्, अग्रे पुरः, मनोभूः कामदेवः, कलितः-धृतः, अकाण्डे-अनवसरेऽपि, कोपो येन तादृशः सन् सरति चलतीत्यर्थः ॥

अत्र तन्वीत्यनेन कंदर्पवेदनावत्त्वं, श्रमापनायकसत्त्वादत्रैव रतौचित्यं च व्यज्यते। नर्मदेत्यनेन नर्मक्रीडां ददातीति नर्मदा न तु नदीमात्रमिति व्यज्यते। उद्देश इत्यनेन दूरादेतैर्व्यजनैरुद्दिश्यते न तु तत्र गम्यत इति निर्जनत्वं व्यङ्ग्यम्, ऊर्ध्वदेशत्वेनाधः सञ्चरतां जनानामनवलोकनीयत्वं च, सरसेत्यशुष्कदलकृतकटुशब्दराहित्यम्, श्रेणीत्यनेन वेष्टनम्, तथा तत्पत्रावरणच्छायाऽनवलोकनीयता च सूच्यते। कुञ्जोत्कर्षाङ्कुरितेत्यादिना यासामपि न स्मरोद्भेदस्तासामप्यसौ तमावहतीति भक्त्या कामवैमुख्ये गुरुतरं व्यसनं संसूच्यते, किंचेत्यादीनामपि तद्दार्ढ्यजनकत्वमेव, तदेवाकलिताकाण्डकोपादिपदैरपि व्यङ्ग्यम्, मनोभूरित्यनेन सचेतसां दुष्परिहरत्वं व्यज्यते। इत्थं च वाच्यस्य नर्मदातीरस्य प्रदेशविशेषस्य सामर्थ्यात् 'रतार्थं प्रविशेति' व्यङ्ग्यत इति स्पष्टम् ॥

अन्यस्यासक्तेर्व्यञ्जकत्वं यथा—णोल्लेइ अणोल्लमणा० इति—"नुदत्यनार्द्रमनाः श्वश्रूर्मां गृहभरे सकले। क्षणमात्रं यदि सन्ध्यायां भवति न वा भवति विश्रामः ॥ इति संस्कृतम्। गुरुजनसान्निध्येन विशिष्य वक्तुमशक्नुवती काचित् तटस्थतयेव सन्निहितमुपनायकं प्रति संकेतकालसूचनाय प्रतिवेशिनीं संबोध्य श्वश्रूपालम्भमाह—अनार्द्रम्—अकरुणं मनो यस्याः सा अनार्द्रमनाः, अनेन श्रमादि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र सन्ध्या संकेतकाल इति तटस्थं प्रति कयाऽपि द्योत्यते।

प्रस्तावाद् यथा—

"सुव्वइ समागमिस्सइ तुज्झ पिओ अज्ज पहरमित्तेण।
एमेय किंति चिट्ठसि ता सहि! सज्जेसु करणिज्जं"
[स० श० ९६२]

अत्रोपपतिं प्रत्यभिसर्तुं न युक्तमिति ध्वन्यते।

देशविशेषाद् यथा—

"अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः!।

---

व्याजालम्बनेनापि नावकाश इति ध्वन्यते। श्वश्रूरित्यनेनानतिक्रमणीयाज्ञता, सकले–समग्रे गृहभरे गृहकार्यनिर्वाहे, [सकले इत्यनेन सार्वकालिकी व्यग्रता] मां नुदति–प्रेरयति। यदि क्षणमात्रं विश्रामो भवति तर्हि सन्ध्यायामेवेति। अत्र सुरतसंकेतकालाभिलाषिणस्तटस्थस्यान्यस्य साक्षिध्यात् सन्निहितं तं प्रति यत् समयसङ्केतबोधनं तद् व्यज्यते, तदाह–सन्ध्यासंकेतकाल इति तटस्थं प्रति कयाऽपि द्योतत इति॥

प्रस्ताववैशिष्ट्याद् व्यञ्जकत्वमर्थस्योदाहरति–सुव्वइ० इति। "श्रूयते समागमिष्यति तव प्रियोऽद्य प्रहरमात्रेण। एवमेव किमिति तिष्ठसि, तत् सखि! सज्जय करणीयम्॥" इति संस्कृतम्। उपपतिं प्रति प्रस्थितां नायिकां प्रति श्रुततत्पत्यागमनवार्त्तायास्तत्सख्या जनान्तरसन्निधानेऽभिसारनिवारणायोक्तिरियम्। अद्य–अद्यैव, प्रहरमात्रेण तव पतिः समागमिष्यतीति श्रूयते, तत्–तस्मात् कारणात् हे सखि! एवमेव–तदीयभोजनादिव्यापारराहित्येनैव, किमिति–किमर्थं तिष्ठसि, करणीयं–रन्धनादिकं, सज्जय–साधयेत्यर्थः।

अत्राद्येत्यनेन कालान्तरपरिहारः, तत्रापि प्रहरमात्रेण न तु विलम्बेन, श्रूयते इति वर्तमाननिर्देशेन, न तु यदा कदाचिच्छ्रुतत्वप्रयुक्तो विस्मारादिसम्भवः। अत्र प्रस्तावेनोपपतिं प्रति अभिसरणप्रकरणेन तं प्रत्यभिसर्तुं न युक्तमिति व्यज्यते। तदाह–अत्रोपपतिं प्रतीति॥

देशवैशिष्ट्याद् वाच्यस्यार्थस्यार्थान्तरव्यञ्जकत्वमुदाहरति–अन्यत्र यूयमिति। सखीवेषधारिणा स्वोपनायकेन सहाऽऽयातां प्रियसखीं दृष्ट्वा सखीः प्रति नायिकाया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाहं हि दूरं भ्रमितुं समर्था प्रसीदतायं रचितोऽञ्जलिर्वः ॥"
[ ]

अत्र विविक्तोऽयं देशः, प्रच्छन्नकामुकस्त्वया विसर्ज्य इति विश्वस्तां प्रति कयाचिन्निवेद्यते ।

कालविशेषाद् यथा—

"गुरुयणपरवस ! पिय ! किं भणामि तुह मंदभाइणी अहयं ।
अज्ज पवासं वच्चसि वच्च सयं च्चेव सुणसि करणिज्जं ॥"
[स० श० ८५१]

---

उक्तिरियमिति वामनाचार्यः । हे सख्यः ! अपरिहार्यप्रणयाः, यूयं कुसुमानां—पुष्पाणाम्, अवचाय—हस्तेनादानम्, इतोऽन्यत्र दूरे, कुरुत, अत्र अस्मिन् प्रदेशे, अस्मि अहम्, अस्ति क्षीरागौरित्यादाविवास्मीति विभक्तिप्रतिरूपकमव्ययम्—अहमर्थे प्रयुज्यते, करोमि० कुसुमावचायमिति शेषः, अस्माभिः सह कुतो नागच्छसीति चेत् ? हि यस्मात्, अहं दूरं भ्रमितुं सञ्चरितुं न समर्था शक्ता अयम् अञ्जलिः अपराधक्षमापनसूचकः प्रणामाञ्जलिः वः युष्मभ्यं, रचितः, प्रसीदत प्रसन्ना भवत । अत्र कुसुमावचायमित्यत्र हस्तादानेऽर्थे चिनोतेः प्रत्ययविधानाद् यावद् हस्तप्रचेयकुसुमलाभस्तावद् दूरं व्रजतेति तासां निकटेऽसञ्चरणं स्वाभिलषितं व्यज्यते, यूयमिति बहुत्वादन्यत्र गमनेऽपि भयाद्यभावः, अत्रेत्यनेन श्रूयमाणमानवशब्दे कुञ्जादिमति च प्रदेशे इत्यर्थकेन भयाद्यभावो विजनता च, अञ्जलिरित्येकवचनेन सर्वाभ्य एकोऽञ्जलिरिति स्वासामर्थ्यमेव प्रकटितम् ।

अत्र व्यङ्ग्यमाह—अत्र विविक्तोऽयं देश इति—सख्योऽन्यत्र प्रेषिताः, तेन विविक्तः—विजनोऽयं देशो जात इति प्रच्छन्नः सखीवेषेणाच्छादितः, कामुकस्त्वया विसर्ज्यः मां प्रति प्रेर्यतामिति विश्वस्तां स्वविश्वासभूमिभूतां काञ्चित् सखीं प्रति, कयाचित् निवेद्यते देशवैशिष्ट्याद् व्यज्यत इति तदर्थः । अत्र वाच्यार्थोऽन्यसखीविषयो, व्यङ्ग्यस्तु प्रियसखीविषय इत्यर्थः ॥

कालविशेषाद् व्यङ्ग्यप्रतीतिर्यथा—गुरुयणपरवसेति—"गुरुजनपरवश ! प्रिय ! किं भणामि तव मन्दभागिनी अहकम् । अद्य प्रवासं व्रजसि, व्रज, स्वयमेव श्रोष्यसि करणीयम् ।" इति संस्कृतम् । गुरुजनानां—पित्रादीनां,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अद्य मधुसमये यदि व्रजसि तदहं तावन्न भवामि, तव तु न जानामि गतिमिति व्यज्यते।

चेष्टाया यथा—

द्वारोपान्तनिरन्तरे मयि तया सौन्दर्यसारश्रिया,
प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादितम्।

---

परवशः-अत्यन्ताधीनः, तत्सम्बुद्धिः, अथवा गुरुजन० एव पराः-शत्रवः, तद्वश! तदायत्त!, वसन्तसमये प्रियतमावियोजकप्रवासाय प्रयोजकतया तेषां शत्रुत्वम्, तव-त्वन्मात्रायत्तसर्वभावा, मन्दभागिनी—अल्पभाग्या, अहकम्-अनुकम्पनीयाहं, किं भणामि-किमपि कथयितुं न पारयामि, परायत्ते विषये वाक्प्रवृत्तेः साफल्यस्य सन्दिग्धत्वात्, अनौचित्याद्वा। ननु ततो मौनमेव किमिति नाश्रितम्, अलमुभयोश्चित्तविक्षेपकरेणाशक्त्यादिप्रकाशेनेति चेत्? अत्राह—अद्य-वसन्तस्य रमणीयतमे समये, यत्र चिरप्रवासिनोऽपि गृहमायान्त्येव, तत्र, प्रवासं परदेशं प्रति, यदि व्रजसि-गच्छसि तर्हि, व्रज, स्वयमकृतौचित्यविचारस्य परवशतामापन्नस्य कृतसर्वसन्नाहस्य दुर्निरोधत्वादनुज्ञानमेव वरमिति भावः, किन्तु, करणीयम्—अस्मिन् समये भवता किं कर्तव्यमासीदिति, मया वाऽस्मिन् समये किं करणीयमिति वा, स्वयमेव, न तु परद्वारा श्रोष्यसि। कतिचित्सु पदेषु गते त्वेवाहं त्यक्तजीविता भविष्यामिति तत् त्वया स्वयमेव श्रोष्यते, ततस्त्वं किमाचरिष्यसीति त्वमेव जानासीति व्यङ्ग्यमित्याह-अद्य मधुसमय इत्यादिना।

चेष्टाया व्यञ्जकत्वमुदाहरति-'द्वारोपान्तनिरन्तरे० इति। स्वगोचरचेष्टा-विशेषेण स्वविषयकभावमवधारितवतो नायकस्य सखायं प्रत्युक्तिरियम्-मयि, द्वारोपान्तस्य-द्वारसमीपदेशस्य, निरन्तरे-सन्निहिते सति, सौन्दर्यसारात्—प्रधानसौन्दर्यात्, श्रीः-शोभा यस्यास्तया, कमनीयतरकान्त्या, ऊरुयुगं सक्थि-युग्मं, प्रोल्लास्य प्रसार्य, परस्परसमासक्तम् अन्योन्यसंलग्नं, समासादितं कृतम्, स्वयमेव विपरीतसुरतप्रदानमस्य व्यङ्ग्यम्, स्पृष्टनामकमालिङ्गनमनेन सूचितमिति केचित्, तत्स्वरूपं तु 'सम्मुखागतायां [प्रियायां] प्रयोज्यायाम-न्यापदेशेन गच्छतो गात्रेण गात्रस्य स्पर्शनम्' इति वात्स्यायनेनोक्तम्। तथा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आनीतं पुरतः शिरोंऽशुकमधः क्षिप्ते चले लोचने,
वाचस्तत्र निवारितं प्रसरणं संकोचिते दोर्लते ॥" [ ]

अत्र चेष्टायाः प्रच्छन्नकान्तविषय आकूतविशेषो ध्वन्यते । एवं वक्त्रादीनां द्विकादियोगेऽपि व्यञ्जकत्वमवसेयम् ।

तत्र वक्तृ-बोध्ययोगे यथा—

अत्ता इत्थेत्यादि ।

अत्र वक्तृ-बोध्यपर्यालोचनया शेष्वेति विधिरूपव्यङ्ग्यार्थप्रतीतिः। एवं द्विकयोगान्तरे त्रिकादियोगे च स्वयमप्यूह्यम् । एषु मुख्यार्थस्य व्यञ्जकत्वमुदाहृतम् ।

---

शिरोंऽशुकं शिरःसम्बन्धिवस्त्रं, पुरतः अग्रतः आनीतम्, अनेन गूढमागच्छेति व्यङ्ग्यम् । ततः तदनन्तरं, चले चञ्चले, लोचने नेत्रे, अधःक्षिप्ते सञ्चारिते, एतेन सूर्यास्तसमयः संकेतकाल इति सूचितम् । तत्र तस्मिन् काले वाचः वचनस्य, प्रसरणं निर्गमनं, निवारितं मुखमुद्रणेनेत्यर्थः, अनेन निःशब्दे समये निःशब्दं यथा स्यात् तथा वा समागन्तव्यमित्यावेदितम् । ततः दोर्लते भुजवल्ल्यौ, संकोचिते संकुच्य मिथःसंयोजिते, अनेनागमनपारितोषिकमालिङ्गनं करोमीति ध्वनितम् । तदाह–अत्र चेष्टयेत्यादि–आकूतविशेषोऽभिप्रायविशेषः, स च प्रतिचेष्टं व्याख्यात एव ।

प्रत्येकं वक्त्रादीनां व्यञ्जकत्वमुदाहृत्यैषां मध्ये द्वयोस्त्रयाणां बहूनां वा सन्निपातेऽपि विशेषार्थप्रतीतिरिति गमयति–एवं वक्त्रादीनां द्विकादियोगेऽपीत्यादि । तत्र मार्गप्रदर्शनायैकमुदाहरति–तत्र वक्तृबोध्ययोगे' इति–'अत्ता एत्थे'त्यादि–समुदाहृतपद्य इति शेषः । किमत्र व्यङ्ग्यमिति प्रतिपादयति–अत्र वक्तृबोध्यपर्यालोचनयेति–उभयोरपि साभिलाषतया अत्र गृहे श्वश्रूरहं च, तत्र श्वश्रूश्च निःसञ्चारा, जनान्तरसञ्चाराभावश्च सिद्ध एवेति तात्पर्यपर्यालोचने सति, शेष्व स्वपिहि, मयि सङ्गम्येति शेषः । द्विकान्तरयोग इति–वक्तृ-बोद्धव्यभिन्नकाकादिद्विकयोगे त्रिकयोगे चानुदाहृते स्वयमेवोहनीयं तेषां भूयस्त्वसंभावनया ग्रन्थगौरवभिया नात्रास्माभिः प्रदश्यंत इति भावः । प्रकृतसूत्र-व्याख्यायामर्थस्यापीत्यस्य मुख्या-ऽमुख्य-व्यङ्ग्याऽऽत्मनोऽर्थस्येति व्याख्या कृता-तत्र पूर्वोक्तोदाहरणेषु मुख्यार्थस्यैव व्यञ्जकत्वमुक्तमिति तदाह—एषु मुख्यार्थ,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अमुख्यस्य यथा—

"साहंती सहि सुहयं खणे खणे दूमिया सि मज्झ कए।
सब्भावनेहकरणिज्जसरिसयं दाव विरइयं तुमए॥"
[स० श० ८६०]

अत्र मत्प्रियं रमयन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यम्, तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यङ्ग्यम्।

व्यङ्ग्यस्य यथा—

"वाणियय हत्थिदंता कुत्तो अम्हाण वग्घकित्तीओ।
जा विलुलियालयमुही घरंमि परिसुक्कए सुण्हा॥"
[स० श० ९५१]

---

स्येति। ततश्च शिष्टयोरमुख्यव्यङ्ग्ययोरुदाहरणीयतया प्रथममुख्यस्य लक्ष्यस्योदाहरणमाह-साहन्तीति-"साधयन्ती सखि! सुभगं क्षणे क्षणे दूनासि मत्कृते। सद्भावस्नेहकरणीयसदृशकं तावद् विरचितं त्वया॥" इति संस्कृतम्। प्रियस्यानयनार्थं तंप्रति प्रेषितां तं स्वयमुपभुज्यागतां सखीं प्रति नायिकाया उक्तिरियम्-हे सखि! मत्कृते-मदर्थं, सुभगं-सुन्दरं, [तन्नायकं] साधयन्ती,-अनुनयन्ती, त्वं क्षणे क्षणे-प्रतिक्षणं, दूनासि खिन्नासि, त्वया तावत् सद्भावः- साधुत्वं स्नेहः-वात्सल्यं, तयोः करणीयं-कर्त्तव्यं, सदृशम्-उचितं-विरचितं कृतमिति सद्भावस्य यत् करणीयं स्नेहस्य यत् सदृशं तत् त्वया कृतमिति भावः। लक्ष्य-व्यङ्ग्यौ परिचाययति-अत्र मत्प्रियं रमयन्त्येत्यादिना। प्रत्यक्षवीक्षितक्षामतादिचिह्नानुमितनिजप्रियोपभोगत्वात् मित्रत्वरूपस्य मुख्यार्थस्य बाधप्रतिसन्धानात् सदृशपदेन विसदृशं लक्ष्यते, तच्च मत्प्रियरमणेन शत्रुत्वाचरणरूपम्, अत्र मुख्यार्थ-लक्ष्यार्थयोर्वैपरीत्यरूपः सम्बन्धः, तेन लक्ष्यार्थेन च, कामुकविषयं [कामुकी च कामुकश्चेत्येकशेषादुभयोर्ग्रहणमित्युभयोर्विषये] सापराधत्वप्रकाशनं व्यङ्ग्यमिति भावः। तदुक्तं प्रदीपेऽपि—"अत्रापकारिण्यां बाधावतारान्मुख्यार्थः श्रोत्रा प्रत्येतुं न शक्यत इति सद्भाव-स्नेहकरणीयविसदृशं मत्प्रियरमणेन शत्रुत्वाचरणरूपं विरचितमिति मुख्यविपरीतं लक्ष्यते, तेन च कामुकविषयसापराधत्वप्रकाशनं व्यङ्ग्यम्" [का० प्र० उ० २ श्लो० ७] इति। व्यङ्ग्यस्यार्थस्य व्यञ्जकत्वमुदाहरति-वाणिययेति-"वाणिजक! हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्तयश्च। यावल्लुलितालकमुखी गृहे परिष्वक्कते स्नुषा॥" इति संस्कृतम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र विलुलितालकमुखीत्वेनानवरतक्रीडासक्तिस्तया च सतत-संभोगक्षामता ध्वन्यते ॥ २१ ॥

व्यङ्ग्यस्य भेदानाह—

**व्यङ्ग्यः शब्दा-ऽर्थशक्तिमूलः ॥ २२ ॥**

शब्दशक्तिमूलोऽर्थशक्तिमूलश्चेति व्यङ्ग्यो द्विधा, उभयशक्ति-

---

त्वद्गृहे हस्तिदन्ता व्याघ्रकृत्तयश्च विक्रेयाः सन्तीति तद्वाणिजकेन पृष्टो व्याधवृद्ध उत्तरयति–हे वाणिजक !–वणिज्याशील ! अस्माकं [ गृहे इति शेषः ] हस्तिनां दन्ता व्याघ्राणां कृत्तयः–चर्माणि च तावत् कुतः [ स्युः ], यावत् लुलिताः–उल्लुठिताः, अलकाः–चूर्णकुन्तला मुखे यस्यास्तादृशी, स्नुषा–पुत्रस्य वधूः, गृहे परिष्वक्कते–सविभ्रमं परिभ्रमति, इति वाच्योऽर्थः । अलकालंकृतमुखत्वेन मनोहरतमायाः स्नुषाया विभ्रमावेक्षण-सुरतविलासाक्षिप्तचेत्ताः सन्ततत्तदुपभोग-क्षामो मत्सुतो मृगयार्थं क्षणमपि बहिर्न याति, तेन कुतो मद्गृहे हस्तिदन्तादीनां सम्भव इत्यमुमर्थं स्वतः सम्भविना तादृशस्नुषासत्त्वादिरूपार्थेन व्यज्यमानं विलुलितालकमुखीत्येतत्पदं प्रकाशयति । तदाह–**विलुलितालकमुखीत्वेनेति**–विलुलितालकमुखीत्वेनानवरतक्रीडासक्तिव्यञ्जनमित्यर्थः । **तया** चेत्यस्य अनवरत-क्रीडासक्त्या च, सततसंभोगक्षामता पुत्रस्येति शेषः, **ध्वन्यते** प्रकाश्यते । तेनापि च मृगयाविहारागमनमिति व्यङ्ग्यस्यार्थस्य व्यञ्जकत्वं स्पष्टमिति ॥ २१ ॥ व्यंग्यार्थसत्तां सप्रपञ्चं सोदाहरणं च प्रदर्श्य तद्भेदप्रदर्शकसूत्रमवतारयति–**व्यङ्ग्यस्य भेदानाहेति** । व्यङ्ग्यस्य व्यञ्जनया वृत्त्या प्रकाशितस्यार्थस्य, **भेदान्** प्रकारान्, **आह**—प्रतिपादयति—'**व्यङ्ग्यः शब्दाऽर्थशक्तिमूलः**, इत्यनेन सूत्रेणेति । शब्दश्चार्थश्च शब्दाऽर्थौ तयोः शक्तिर्मूलं–व्यञ्जकं यस्येति विग्रहे शक्तिशब्दस्य द्वन्द्वान्ते श्रूयमाणतया प्रत्येकं सम्बन्धात्–शब्दशक्तिमूलः, अर्थ-शक्तिमूलश्चेति लभ्यते । काव्यप्रकाशादिषु शब्दार्थोभयशक्त्युद्भवोऽपि भेदः 'शब्दार्थोभयशक्तिमूलः' इति शब्देनैव प्रतिपादितः, तथा हि–तत्रत्या कारिका–'शब्दा-र्थोभयशक्त्युत्थास्त्रिधा स कथितो ध्वनिः'' [ चतुर्थोल्लासे ३८ ] शब्द-शक्तिमूलानुरणनरूपव्यङ्ग्यः, अर्थशक्तिमूलानुरणनरूपव्यङ्ग्यः, उभयशक्तिमूला-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मूलस्तु शब्दशक्तिमूलान्नातिरिच्यते, शब्दस्यैव प्राधान्येन व्यञ्जकत्वात्।**

नुरणनरूपव्यङ्ग्यश्चेति त्रिविध इति च तद्वृत्तिः। तं भेदमनावश्यकं प्रकटयितुमाह–द्विधेति–न तु परोक्तस्तृतीयः प्रकार इति भावः। तत्प्रकारमुक्तयोरेव मध्येऽन्तर्भावयति–**उभयशक्तिमूलस्तु शब्दशक्तिमूलान्नातिरिच्यत** इति–योऽयमुभयशक्तिमूलस्तत्र शब्दार्थयोरुभयोरपरिवर्तनीयत्वस्य वाच्यतया शब्दशक्तिमूलान्न भिन्नं तदिति भावः। ध्वनिकारेण आनन्दवर्धनाचार्येणापि–"क्रमेण प्रतिभात्यात्मा योऽस्यानुस्वानसन्निभः। शब्दार्थशक्तिमूलत्वात् सोऽपि द्वेधा व्यवस्थितः॥" [ध्वन्या० उ० २ का० २१] इति। अस्य–विवक्षितान्यपरवाच्यस्य ध्वनेः, स क्रमव्यङ्ग्यत्वादनुरणनप्रख्यो य आत्मा सोऽपि शब्दशक्तिमूलोऽर्थशक्तिमूलश्चेति द्विप्रकार इति तद्वृत्तिं कुर्वता तृतीयो भेदो न स्वीकृतः, तस्य ग्रन्थस्य ध्वनिमात्रनिरूपणप्रधानतया च तद्विषये तन्मतादर एव युक्तः। यद्यपि व्यङ्ग्यस्य गुणीभावे गुणीभूतव्यङ्ग्यत्वमिति सार्वजनीनः सिद्धान्तः, तथा च यो ध्वनिकारो विवक्षितान्यपरवाच्यध्वनेर्भेदगणनावसरे "शब्दार्थशक्त्या वाऽऽक्षिप्तो व्यङ्ग्योऽर्थः कविना पुनः। यत्राविष्क्रियते स्वोक्त्या सान्यैवालङ्कृतिर्ध्वनेः॥ [ध्वन्या० उ० २ का० ४६] इति कारिकायाः "शब्दशक्त्या अर्थशक्त्या शब्दार्थशक्त्या वाऽऽक्षिप्तोऽपि व्यङ्ग्योऽर्थः कविना पुनर्यत्र स्वोक्त्या प्रकाशीक्रियते" इति वृत्तौ प्रतिपादयन् उभयशक्त्युद्भवध्वनेर्गुणीभावस्य "दृष्ट्या केशवगोपरागहृतया किञ्चिन्न दृष्टं मया" इत्युदाहरन् व्यङ्ग्यस्य शब्दार्थोभयशक्त्युद्भवतामङ्गीचक्रे। उचितं चैतत्—यत्रोभयोरपरिवृत्तिसहत्वं तत्र विलक्षणतायाः सत्त्वेन तस्य पार्थक्येन गणयितुं शक्यत्वात् तथापि तदीयोदाहरणे "हिममुक्तचन्द्ररुचिरः सपद्मको मदयन् द्विजान्, जनितमीनकेतनः। अभवत् प्रसाधितसुरो महोत्सवः प्रमदाजनस्य स चिराय माधवः॥" [शि० व० १३,३८] इत्यत्र 'सपद्मकः' 'द्विजान्' जनितमीनकेतनः इत्यादिषु पदेषु उभयशक्त्या व्यञ्जकत्वसत्त्वेऽपि शब्दस्यापि व्यञ्जकत्वम्, हिममुक्तचन्द्ररुचिरः प्रमदाजनस्येत्यत्र श्लिष्टशब्दाभावादर्थस्य व्यञ्जकत्वमिति प्रत्येकं व्यञ्जकतास्वीकारेणैव निर्वाहे सम्मिलितरूपेणोभयस्य व्यञ्जकतास्वीकारे प्रयोजनाभावः, तदाह–"**उभयशक्तिमूलस्तु शब्दशक्तिमूलान्नातिरिच्यत** इति–। उभयशक्त्या कृते कार्ये एकशक्तिकृत-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वमपि व्यपदेष्टुं शक्यत एवेति भावः। तदनतिरिक्तत्वे हेतुमाह–**शब्दस्यैव प्राधान्येन** व्यञ्जकत्वादिति–उक्तस्थलेऽर्थव्यञ्जकतायामपि शब्द एव कारणमिति तस्य प्राधान्यं स्पष्टमेवेति भावः, अत एव मल्लिनाथेन तट्टीकायां 'शब्दशक्तिमूलो ध्वनिरित्येवोक्तं न तु साहित्यदर्पणोक्त उभयशक्तिमूलो ध्वनिरिति। अयमत्र निर्गलितोऽर्थः–काव्यप्रकाशादौ "अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा। तारकातरला श्यामा सानन्दं न करोति कम् ॥" [ ] इति पद्यमुभयशक्तिमूलकध्वनेरुदाहरणत्वेनोपन्यस्तम्, तत्र–अतन्द्रचन्द्र-तारकाश्यामादिशब्दानां परिवृत्त्यसहत्वम्, आभरणा-समुद्दीपितमन्मथेत्यादीनां च परिवृत्तिसहत्वमित्युभयोः शब्दा-ऽर्थयोर्व्यञ्जकत्वमिति तेषामाशयः। तत्र वयं कथयामः–प्रत्येकमुभयोरेव व्यञ्जकत्वं स्वीक्रियतामिति कृतं तृतीयभेदस्वीकारेण। वस्तुतस्तु–तत्रातन्द्रादिपदानामर्था अपि व्यञ्जका इत्युभयोः सम्मिल्य व्यञ्जकताया भेदस्य स्वीकर्तुमावश्यकत्वमेव। अत एव पश्चाद् वृत्तिकृताऽपि तत्स्वीकृतमित्युपपादितमधस्तात् ॥ २२ ॥

हिममुक्तचन्द्रेत्याद्युदाहृतश्लोकार्थश्चायम्–श्रीकृष्णस्य हास्तिनपुरप्रवेशसमये वर्णनमिदम्, हिमेन मुक्तश्चन्द्र इव रुचिरः-सुन्दरः, इति श्रीकृष्णपक्षे, हिममुक्तेन चन्द्रेण रुचिर इति वसन्तपक्षे, पद्मया सहितः पद्मेन वा हस्तस्थितेन सहितः श्रीकृष्णः, पद्मेन–पुष्पेण सहितो वसन्तः, द्विजान्–ब्राह्मणानिति श्रीकृष्णपक्षे, पक्षिणो वसन्ते, आनन्दयन् श्रीकृष्णः, उन्मादयन् वसन्तः, जनितः–उत्पादितो मीनकेतनः–प्रद्युम्नो येन स श्रीकृष्णः, अथ च उत्पादितः–वर्धितः, मीनकेतनः–कामो येन स वसन्तः, प्रसादिताः–राक्षसमारणेन प्रसन्नतां नीताः, सुरा येन स श्रीकृष्णः प्रसादिता–निर्मलीकृता सुरा येन स वसन्तः, एवंभूतो माधवः–श्रीकृष्णो वसन्तर्तुश्च, प्रमदाजनस्य–स्त्रीजनस्य, चिराय–बहोः समयादनन्तरम्, महोत्सवः–अत्यानन्दप्रदः अभवदिति कृष्णवसन्तयोरुपमानोपमेयभावः प्रतीयत इत्युपमालङ्कारो व्यङ्ग्यः, स च शब्दैरर्थेन चेत्युक्तमधस्तात् ॥

अतन्द्रचन्द्राभरणेत्यादिश्लोकार्थश्चायम्–अतन्द्रः–मेघाद्यनावृततया स्फुरद्रूपश्चन्द्रः, आभरणं यस्याः सा, अत एव समुद्दीपितमन्मथा–सम्यगुद्दीपितकामा तारकाः–नक्षत्राणि तरलानि–अल्पानि यस्यां सा श्यामा–रात्रिः, विशेषणबलाच्च तस्या ज्यौत्स्नीत्वं लभ्यते। कं सानन्दं न करोति? अपि तु सर्वमेव करोतीत्यर्थः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र शब्दशक्तिमूलमाह—

**नानार्थस्य मुख्यस्य शब्दस्य संसर्गादिभिरमुख्यस्य च मुख्यार्थबाधादिभिर्नियमिते व्यापारे वस्त्वलङ्कारयोर्वस्तुनश्च व्यञ्जकत्वे शब्दशक्तिमूलः पदवाक्ययोः ॥ २३ ॥**

---

श्यामा च षोडशवार्षिकी स्त्रीपरिभाषिता, सापि-अतन्द्रा-सुरतादावालस्यरहिता, न्द्रः-कर्पूरमाभरणं यस्याः, चन्द्रः शिरोभूषणविशेष इति केचित्, समुद्दीपितमन्मथत्वं तु-तस्या अपि, तारका-अक्षिकनीनिका, तरला-चञ्चला यस्याः तारकावद् दीप्रः, तरलः-हारमध्यमणिर्यस्या इति वा । अत्र च स्त्रीविशेष इव रात्रिरित्युपमा, ज्यौत्स्नी रात्रिरिव नायिकेति वा ध्वन्यते ।

शब्दशक्तिमूलोऽर्थशक्तिमूलश्चेति ध्वनेर्द्वैविध्यं प्रदर्श्य तत्र प्रथमं लक्षयितुं प्रवृत्तस्य सूत्रस्य भूमिकामाह-**तत्र शब्दशक्तिमूलमाहेति**-तत्र तयोर्ध्वन्योः शब्दशक्तिमूलमनेन सूत्रेण कथयतीत्यर्थः । **नानार्थे**त्यादिसूत्रार्थं व्याख्याति-**अनेकार्थस्येति**-पदान्तरसमभिव्याहारं विनापि विभिन्नानेकार्थ-बोधकत्वं नानार्थत्वम् । **मुख्यस्य** अभिधावृत्त्यार्थोपस्थापकस्य, शब्दस्य **अभिधालक्षणे** शक्तिरूपे व्यापारे, **संसर्गादिभिः** वक्ष्यमाणैरनेकार्थशब्दस्यार्थनिर्णायकहेतुभिः, **नियमिते** इत्यस्यार्थमाह-**नियन्त्रिते** इति एकत्र निर्णीते, **अमुख्यस्य** गौणीं लक्षणां वा वृत्तिमाश्रित्यार्थबोधकस्य, तदाह-**गौणलाक्षणिकरूपस्य शब्दस्येति** गौण्या [ अप्रसिद्धया ] वृत्त्याऽर्थबोधको गौणः, लक्षणयाऽर्थबोधको लाक्षणिकः, तस्य शब्दस्य, **मुख्यार्थबाधनिमित्तप्रयोजनैरिति**-मुख्यार्थस्य बाधेन, निमित्तेन-प्रयोजनेन चार्थोपस्थापनसामर्थ्यरूपे व्यापारे **नियन्त्रिते** रुद्धे सति, **मुख्यस्य** वाचकस्य, शब्दस्य, वस्त्वलङ्कारोभयव्यञ्जकत्वे, **अमुख्यस्य** गौणलाक्षणिकस्य च, वस्तुमात्रव्यञ्जकत्वे सति **शब्दशक्तिमूलः** शब्दशक्तिनिमित्तकस्तत्पदव्यपदेश्यो व्यङ्ग्यः ध्वनिरिति । अयमर्थः-वाचकशब्दस्यार्थाभिधानसामर्थ्यरूपे व्यापारे संसर्गादिभिर्नियन्त्रिते गौणलक्षकशब्दयोश्च तथाभूते मुख्यार्थबाधादिभिर्नियन्त्रिते यद् वस्त्वलङ्कारयोः, पूर्वत्र परत्र च वस्तुमात्रस्य व्यञ्जनं भवति स शब्दशक्तिमूलो व्यङ्ग्य इति । तदुक्तं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनेकार्थस्य मुख्यस्य शब्दस्याभिधालक्षणे व्यापारे संसर्गादिभिर्नियन्त्रितेऽमुख्यस्य च गौणलाक्षणिकरूपस्य शब्दस्य मुख्यार्थबाधनिमित्तप्रयोजनैर्गौणीलक्षणारूपे व्यापारे नियन्त्रिते मुख्यस्य शब्दस्य वस्त्वलङ्कारव्यञ्जकत्वेऽमुख्यस्य च वस्तुव्यञ्जकत्वे सति शब्दशक्तिमूलो व्यङ्ग्यः, स च प्रत्येकं द्विधा-पदे वाक्ये च ।

संसर्गादयश्चेमे भर्तृहरिणा प्रोक्ताः—

"संसर्गो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥"

[ वा० प० का० श्लो० ३१७-१८ ]

---

काव्यप्रकाशेऽपि—"अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते । संयोगाद्यैरवाच्यार्थधीकृत् व्यापृतिरञ्जनम् ॥" [ द्वि० उ० का० २९ ] अस्यार्थः—एकस्य वर्णसमूहात्मनः पदस्यानेकत्रार्थेऽनेकैव शक्तिः, शक्यतावच्छेदकभेदेन शक्तिभेदात्, ततश्च यत्रार्थे तात्पर्यग्राहकं प्रकरणादिकमवतरति, उद्बुद्धया तद्गोचरवृत्त्या तदर्थोपस्थापनम्, अन्यस्याश्च तिरोधानम्, तथा संयोगाद्यैः विरुद्धयाऽभिधया बोधयितुमशक्यस्यार्थस्य बोधने प्रभवन्ती वृत्तिर्व्यञ्जना नाम । ननु श्लेषस्थल इवाभिधात एव द्वितीयार्थोऽपि प्रतीयतां कृतं व्यञ्जनयेति चेत्? न—'वाचकत्वे नियन्त्रिते' इत्यनेन हि अभिधायाः प्रसरस्य निरोधोक्तेः । 'अत एव अन्यार्थग्रहे वृत्त्यन्तरापेक्षा' इत्यादि विस्तृतं तट्टीकाकृद्भिः ॥

शब्दशक्तिमूलव्यङ्ग्यस्य लक्षणमुक्त्वा तद्भेदमाह—स च प्रत्येकं द्विधेति—वाचक-गौण-लाक्षणिकानां प्रत्येकमित्यर्थः । द्विधेत्युक्तं तत् प्रकारद्वयमाह—पदे वाक्ये चेति—यद्यपि मीमांसकादयो वाक्यं वाचकं न मन्यन्ते, तथाऽपि स्वमते तस्यापि वाचकत्वेन तथोक्तम्, तथा च शब्दशक्तिमूलस्य ध्वनेः षट् प्रकारा जाताः । 'संसर्गादिभिर्व्यापारे नियन्त्रिते' इत्युक्तं तत्र संसर्गादयः के क सन्निविष्टाश्चेत्याकाङ्क्षायामाह—संसर्गादयश्चेमे भर्तृहरिणा प्रोक्ता इति—वाक्यपदीयद्वितीयाकाण्डस्थं कारिकाद्वयम्, संसर्गादीनां स्वरूपं निरूपयिष्यते, कारिकार्थश्चायम्-संसर्गादयः स्वरान्ताश्चतुर्दश, आदिपदगृहीताश्चेष्टाऽभिनयाद-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथा—

"वनमिदमभयमिदानीं यत्रास्ते लक्ष्मणान्वितो रामः" [ ]
इति "विना सीतां रामः प्रविशति महामोहसरणिम्॥" [ ]
इति च संसर्गाद् विप्रयोगाच्च दाशरथौ।
"बुधो भौमश्च तस्योच्चैरनुकूलत्वमागतौ" [ ] इति साहचर्याद् ग्रहविशेषे।

---

यश्च, शब्दार्थस्य शब्दवाच्यार्थस्य, अनवच्छेदेऽनिश्चये [कतमोऽर्थोऽत्र विवक्षित इत्यनिश्चये जायमाने] तदपाकरणद्वारा विशेषार्थस्य विवक्षितार्थस्य, स्मृतिः—ज्ञानं, तद्धेतवः—तज्जनका भवन्तीत्यर्थः। कारिकानिर्दिष्टान् संसर्गादीन् प्रत्येकमुदाहरति। तत्र संसर्गः—नानार्थशब्दस्य शक्यान्तरवृत्तितयाऽप्रसिद्धत्वे सति तच्छक्यवृत्तितया प्रसिद्धः सम्बन्धः, तस्यार्थनिश्चायकत्वं यथा—वनमिदमिति—इदं वनमिदानीमभयं भवमवर्जितम्, तत्र हेतुमाह—यत्र लक्ष्मणान्वितो राम आस्ते लक्ष्मणान्वितरामसत्तया हि तत्र भयस्याभावः, अत्र रामपदस्य जामदग्न्य-बलभद्र दाशरथिषु शक्तेः सत्त्वेऽपि शक्यान्तरजामदग्न्य-बलभद्ररूपार्थद्वयवृत्तितयाऽप्रसिद्धः, तच्छक्यदाशरथिवृत्तितया प्रसिद्धश्च, लक्ष्मणप्रतियोगिकः सम्बन्धो रामपदस्य दाशरथिरूपार्थज्ञाने हेतुः। विप्रयोगस्योदाहरणमाह—विना सीतां राम इति—अत्र सीताया विप्रयोगे रामपदस्य दाशरथिवाचकत्वम्, अत्र विप्रयोगो विश्लेषः, स च नियतं संश्लेषपूर्वः, तथा च विप्रयोगोऽपि तत्रैवाभिधानियामको यत्र संश्लेषः पूर्ववत् दलद्वयाक्रान्तो भवेत्, तथा च ययोः संयोगः प्रसिद्धस्तयोरेव विप्रयोगोऽपि शक्तिं नियमयतीतिसिद्धे यद्यप्यत्रापि संसर्ग एव मूलं तथापि विप्रयोगस्थले स गुणतां भजमानो गुण-प्रधानसन्निधौ प्रधानानुरोध एव न्याय्य इति विप्रयोगस्यैव नियामकत्वमुक्तम्। साहचर्यस्योदाहरणमाह—बुधो भौमश्चेति—साहचर्यम्—एकस्मिन् कार्ये परस्परापेक्षित्वम्, बुधः—पण्डितो ग्रहविशेषश्च, भौमः—भूमिपुत्रो नरकासुरो ग्रहविशेषश्च, तथा चात्र बुधसाहचर्याद् भौमो ग्रह एव, न नरकासुरः, एवं भौमसाहचर्याद् बुधोऽपि ग्रह एव न पण्डित इति विज्ञायते, स्वस्वार्थबोधाय परस्परमुभाभ्यां परस्परस्यापेक्षायाः सत्त्वात्। अथवा सहचरणम्—एककालदेशावस्थायित्वं वा साहचर्यम्, तथा च ग्रहत्वेनोभयोः सहचरणं ज्यौतिषे प्रसिद्ध-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"रामार्जुनव्यतिकरः सांप्रतं वर्तते तयोः [ ] इति विरोधाद् भार्गव-कार्तवीर्ययोः।
"सैन्धवमानय, मृगयां चरिष्यामि" [ ] इत्यर्थात् प्रयोजनादश्वे।
"अस्मद्भाग्यविपर्ययाद् यदि पुनर्देवो न जानाति तम्।" [ ] इति प्रकरणाद् युष्मदर्थे। प्रकरणमशब्दं अर्थस्तु शब्दवानित्यनयोर्भेदः।

---

मिति तेनोभयोः शक्तिनियमः। विरोधिताया उदाहरणमाह—**रामार्जुनव्यतिकर** इत्यादि—'तयोः प्राकरणिकयोः कयोश्चित्, **रामार्जुनव्यतिकरः** रामार्जुनयोरिव सम्बन्धो वर्त्तते' इति वाक्ये विरोधितया रामः—परशुरामः, अर्जुनः—कार्तवीर्योऽर्जुनः सहस्रबाहुरिति लभ्यते। विरोधिता हि प्रसिद्धं वैरं सहानवस्थानं च, प्रसिद्धं च भार्गव-कार्तवीर्ययोर्वैरम्। सहानवस्थानलक्षणं विरोधित्वं तु 'छायाऽऽतपौ' इत्यत्र, तत्र हि "छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः।" इत्यमरकोशेन छायाशब्दस्यानेकार्थत्वेनातपेन सहानवस्थानलक्षणविरोधाच्छायाऽत्राऽनातप इत्यवसीयते। अर्थस्योदाहरणमाह—**सैन्धवमान**येति—अर्थः—प्रयोजनं चतुर्थ्याद्यभिधेयम्, अत्र मृगयाचरणरूपस्य कार्यस्य साधनाय सैन्धवमपेक्षमाणस्य पुंस उक्तावश्व-लवणयोः कतरस्य ग्रह इति संशयेऽर्थेन [प्रयोजनेन] सैन्धवपदस्याश्वरूपार्थनिर्णयः। प्रकरणस्यार्थनिर्णायकत्वमुदाहरति—**अस्मद्भाग्यविपर्ययादि**ति—अत्र देव—शब्दस्य "अमरा निर्जरा देवाः" इत्याद्यमरकोशेन सुरेषु "राजा भट्टारको देवः" इत्यनेन राज्ञि च शक्तौ ज्ञातायामिह प्रकरणाद् देवपदस्य युष्मदर्थता—राजार्थता, प्रकरणं वक्तृ-श्रोतृबुद्धिस्थता, अत्र वक्तुर्बुद्धौ राजैवेति प्रतीयते, तस्यैव सम्बोध्यत्वेन बुद्धिस्थत्वात्। **युष्मदर्थ** इत्यस्य संबोध्य इत्यर्थः। ननु प्रकरणेनैवात्र राजपदस्य बोधो यथा तथा पूर्वत्राऽपि मृगयाऽर्थं यात्राप्रकरणेन सैन्धवपदेनाश्वस्य बोध इति, तथा च यथाऽर्थेन [प्रयोजनेन] तत्र सैन्धवपदस्याश्वार्थनियमस्तथाऽत्रापि सम्बोधनरूपप्रयोजनेन देवपदस्य राजार्थरूपबोध इति विज्ञातुं शक्यत इत्येकेनैव द्वयोरपि लक्ष्ययोः सिद्धा निमित्तद्वयभेदः किमर्थमुपात्त इति चेत्? अत्राह—**प्रकरणमशब्दमर्थस्तु शब्दवानित्यनयोर्भेद** इति—प्रकरणं हि न शब्देन प्रतिपाद्यं, तद्धि वस्तुगतो धर्मः, अर्थस्तु मृगयादिः शब्दप्रतिपाद्य इत्यनयोर्भेद इति भावः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"कोदण्डं यस्य गाण्डीवं स्पर्धते कस्तमर्जुनम्" [ ] इति लिङ्गाच्चिह्नात्पार्थे।

"किं साक्षादुपदेशयष्टिरथवा देवस्य शृङ्गारिणः" [ ] इति शब्दान्तरसंनिधानात्कामे।

---

लिङ्गमुदाहरति–कोदण्डमिति–अत्रार्जुनशब्दस्यानेकार्थत्वम्, तत्र लिङ्गात्–चिह्नाद् गाण्डीवरूपात्, अर्जुनपदं पार्थं [पृथापुत्र] रूपार्जुनबोधकं, न कार्तवीर्यार्जुनबोधकमिति भावः। लिङ्गं चिह्नमिति स्वमतम्। काव्यप्रदीपे च लिङ्गं–संयोगातिरिक्तसम्बन्धेन परपक्षव्यावृत्तो धर्म इत्युक्तम्, तथा च गाण्डीवरूपो धर्मः [विशेषणीभूतोऽर्थः] संयोगसम्बन्धेनैव पार्थे वर्तत इति तल्लिङ्गतया न ग्रहीतुं शक्यत इति। नानार्थपदशक्यान्तरावृत्तिरेकशक्यगतः साक्षाच्छब्दवेद्यो धर्मो लिङ्गमिति नव्याः, तथा चात्र शक्यान्तरकार्तवीर्यार्जुनावृत्तिरेकशक्यपार्थगतो गाण्डीवकोदण्डधरत्वधर्मः, तेन धर्मेणार्जुनोऽत्र पार्थ इति निश्चीयत इति तेषामाशयः। लिङ्गपदस्यात्र चिह्नार्थत्वन्तु प्रदीपकारेण न स्वीक्रियते, तथा हि–काव्यप्रकाशे द्वि० उल्लासे "संयोगो विप्रयोगश्च" इति भर्तृहरिकारिकाव्याख्यानभूतवृत्तिव्याख्याप्रसङ्गे तेनोक्तम्–यत् तु लिङ्गं चिह्नमिति तन्न-[कुपितो मकरध्वज इति काव्यप्रकाशीयलिङ्गस्योदाहरणे] कोपस्य कामचिह्नत्वाभावात्, असाधारणधर्मस्य चिह्नत्वात्, सशङ्खचक्र इत्यादावतिप्रसक्तेश्चेति। एवं च तद्रीत्या कोदण्डं यस्य गाण्डीवमिति न लिङ्गस्योदाहरणं भवितुमर्हति, सशङ्खचक्रो हरिरित्यादिवदस्य संसर्गोदाहरणत्वस्यैव युक्तत्वात्, किन्तूक्तलिङ्गलक्षणस्यात्राऽपि घटनाल्लिङ्गोदाहरणत्वेनेदमुक्तम्, न च संसर्गोदाहरणभूतसशङ्खचक्रो हरिरित्यादितः कोऽस्य भेद इति वाच्यम्, स्वमते संसर्गपदेन संयोगातिरिक्तसंसर्गस्य ग्रहणादत्र संयोगसंसर्गे तदप्रवृत्तेः। काव्यप्रकाशादौ च यद्यपि संसर्गस्य स्थाने संयोग एव पठ्यते, तथापि स्वग्रन्थस्य 'संसर्ग'शब्दपाठमूलकत्वेन भेदस्योपपादयितुं शक्यत्वम्।

अन्यशब्दसान्निध्यस्योदाहरणमाह—**किं साक्षादुपदेशयष्टिरिति**। अन्यस्य शब्दस्य निश्चितार्थबोधकस्य सान्निध्येन–सामीप्येनानेकार्थस्य शब्दस्यैकत्रार्थे नियमनमिह विवक्षितम्, तथा चानेकार्थस्य देवशब्दस्य शृङ्गारिपदसान्निध्ये कामदेवार्थत्वं निर्णीयते, शृङ्गारभूयस्त्ववाचकेन शृङ्गारप्राधान्यवाचकेन वा शृङ्गा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"क्वणति मधुना मत्तश्चेतोहरः प्रिय कोकिलः।" [ ] इति सामर्थ्याद् वसन्ते।

"तन्व्या यत् सुरतान्तकान्तनयनं वक्त्रं रतिव्यत्यये, तत्त्वां पातु चिराय" [ ] इत्यौचित्यात् प्रसादसाम्मुख्ये पालने।

"अहो महेश्वरस्यास्य कापि कान्तिः" [ ] इति राजधानीरूपाद् देशाद्राजनि।

---

रिण इति पदेन विशेषणभूतेनान्यार्थबोधस्य नियमनात्।

सामर्थ्यमुदाहरति—क्वणति मधुनेति-अत्रानेकार्थकं मधुनेति पदम्। "मधु पुष्पे रसे क्षौद्रे, मद्ये ना तु मधुद्रुमे। वसन्त-दैत्यभिच्चैत्रे स्याज्जीवन्त्यां तु योषिति॥" इति मेदिनीकोशेन तस्यानेकार्थत्वप्रतिपादनात्, तत्र कोकिलमादकतारूपं सामर्थ्यं वसन्तर्तावेवेति तेन सामर्थ्येनेह मधुपदेन वसन्त एवाभिधेय इति निश्चीयते, तदन्यस्य कोकिलमदजनकत्वसामर्थ्याभावात्। औचित्यमुदाहरति—तन्व्या यदिति-यत् सुरतान्तसमयस्थितमनोहरनेत्रवत् तन्व्याः-कोमलायाः कामिन्या वक्रं तत् त्वां विपरीतरतिसमये पात्विति पद्यांशार्थः, अत्र दयितामुखकर्तृकरक्षणकर्मत्वाक्षिप्तकामार्तसंबोध्यपुरुषस्य त्राणं हि तस्याः साम्मुख्येनैव भवति, न तु मुखमात्रेण, वैमुख्ये तेन त्राणायोगात्, अत औचित्यात् पातिरिह प्रसादसांमुख्यमूलके पालने वर्तते। कैश्चिदिह वक्रपदस्य मुखपर्यायतया मुखशब्दस्य च " मुखं निःसरणे वक्रे प्रारम्भोपाययोरपि।" इति कोशबलेनानेकार्थत्वादिह औचित्यात् साम्मुख्यपरत्वमिति व्याख्यायते, तन्न युक्तम्-मुखशब्दस्यानेकार्थत्वेऽपि तत्पर्यायस्य वक्रशब्दस्य निश्चितैकार्थवाचित्वेन तत्र शक्तिसन्देहाभावात्। तथा च पातेरेवेह धातूनामनेकार्थत्वेनानिश्चितार्थत्वं शक्यं तस्यैव चोक्तार्थवाचकत्वरूपेण नियमनमौचितीकार्यमिति ध्येयम्। काव्यप्रकाशादाविह पातु वो दयितामुखमित्यस्योदाहृतत्वेन, तत्र तादृशव्याख्यानस्य कर्तव्यत्वात्। देशस्य शक्तिनियामकत्वमुदाहरति—अहो महेश्वरस्यास्येति-अत्र महेश्वरपदं शिवे विष्णौ महति ऐश्वर्ययुक्ते महैश्वर्ययुक्ते वा पुंसि च प्रयोगान्नानार्थकम्, तत्रास्येति पदस्य इदंप्रकृतिकत्वेन, इदमश्च सन्निकृष्टे प्रयोगात् सन्निकृष्टराजधान्यादिदेशस्थस्येति तदर्थः, तथा च राज्ञ एव नगरादिदेशसम्बन्ध-तदभावयोः संभवेन परमात्मनस्तु सर्वगतस्य देशादिसम्बन्धकृतव्यावृत्तेरशक्यत्वेन देश एवात्र परमे-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"चित्रभानुर्विभात्यह्नि" [ ] इति कालविशेषाद्रवौ।

"मित्रं हन्ति तरां तमःपरिकरं धन्ये दृशौ मादृशाम्" [ ] इति व्यक्तिविशेषात् सुहृदि च प्रतीतिः।

---

श्वरपदस्य राजरूपार्थनियमने निमित्तम्। कालस्याभिधानियामकत्वमाह–चित्रभानुर्विभात्यह्नि इति–चित्रा भानवो यस्येति योगार्थेन चित्रभानुपदस्य सूर्यवह्निरूपानेकार्थवाचकत्वेन 'अह्नि' इति कालविशेषोपादानेन तत्र [दिवसे] वह्नेर्भानस्य मन्दतया चित्रभानुशब्दस्य सूर्यार्थत्वनिश्चयः, तस्यैव दिवसेऽधिकभासनात्। व्यक्तेरभिधानियामकत्वमाह—मित्रं हन्तितरामिति। व्यक्तिः पुं-स्त्री-क्लीबलिङ्गानि, अत्र च मित्रशब्दोऽनेकार्थः, सूर्ये सुहृदि च तस्य प्रयोगात्, तत्र यद्यपि तमःपरिकरहननस्य सूर्ये एव प्रसिद्धिस्तथापि मित्रमिति क्लीबनिर्देशेन सुहृद्वाचकत्वमेव तस्य निश्चीयते, भवति च सुहृदप्युपदेशादिनाऽज्ञानतमःसमूहहन्ता, अत एव च मित्रदर्शनकृतं धन्यत्वं दृशोरिति। अथ क्रमप्राप्तं स्वरस्यार्थनियामकत्वमुदाहरणीयं, तदनुदाहरणात् त्रुटिरिति शङ्कामपनेतुमाह–स्वरात् त्वर्थविशेषप्रतीतिरित्यादि–"दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोऽपराधात्" इति व्याकरणमहाभाष्यपस्पशाह्निकस्थशिक्षावचनेन स्वरस्यार्थविशेषनिर्णायकत्वमवसीयते। उक्तश्लोकार्थश्च—"स्वरतः–स्वरकृतदोषाद्धेतोः, वर्णतः–वर्णेषु दीर्घत्वह्रस्वत्वादिदोषात्, दुष्टः–प्रकृतार्थवाचकत्वविशिष्टसाधुत्वहीनः, शब्दः, मिथ्याप्रयुक्तः–अर्थबोधनायैव शब्दस्य प्रयोगेण यदर्थबोधनाय प्रयुक्तस्तदर्थाबोधकत्वे तस्य मिथ्याप्रयुक्तत्वमिति तथाभूतः, तम्–वक्तुर्विवक्षितमर्थम्, न आह–न कथयति, किञ्च नार्थाबोधकत्वमात्रं तत्र दूषणमपित्वनर्थसम्भावनापीत्याह–स वाग्वज्र इति–वागेव वज्ररूपा सती यजमानं, यः किल तादृशशब्दप्रयोगेणोपकर्तुमिष्यते स इह यजमानशब्दवाच्यः, प्रकृते तस्य यजमानरूपत्वात्, तं, हिनस्ति, यथा–'इन्द्रशत्रुः' इति शब्दः स्वरतोऽपराधात्–स्वरदोषात्, यजमानं–वृत्रमवधीत् तथैवेति। अयमाशयः–वृत्रेणेन्द्रशातनार्थं यज्ञ आरब्धः, तत्र इन्द्रशत्रुर्वर्धस्वेत्याशीर्वचनं प्रयुक्तम्, तस्मिन् शब्देऽन्तोदात्ते प्रयोक्तव्ये पूर्वपदान्तोदात्तः प्रयुक्तः, अत्र च शत्रुरित्यस्य शातयितेत्यर्थः, तथा च यद्यत्र इन्द्रः शत्रुर्यस्येति बहुव्रीहिराश्रीयते तदा इन्द्रः शातयिता यस्येत्यर्थो लभ्यते, भवति च पूर्वपद-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वरात् त्वर्थविशेषप्रतीतिः काव्यमार्गेऽनुपयोगिनीति नोदाह्रियते। "मथ्नामि कौरवशतं समरे न कोपात्?" [ ] इति काकुरूपात्

प्रकृतिस्वरत्वेन तस्य शब्दस्य पूर्वपदान्तोदात्तत्वम्, यदि चेन्द्रस्य शत्रुरिति षष्ठीतत्पुरुषः प्रयुज्यते तर्हि इन्द्रस्यायं शातयितेत्यर्थः, समासस्यान्तोदात्तत्वेनास्य शब्दस्यान्तोदात्तता भवति, तथा चान्तोदात्तप्रयोगस्तत्रापेक्षितः, तादृशोच्चारणमकृत्वा मध्योदात्तः प्रयुक्त इतीन्द्र एव तस्य शातयिता जात इति स्वरदोषकृतो यजमानस्य वधः। एतेन च याज्ञे कर्मणि–वैदिके प्रयोगे स्वरस्यार्थविशेषप्रतीतिजनकत्वं सिद्धम्, किन्तु काव्यमार्गे स्वरादर्थविशेषप्रतीतिर्भवन्त्यप्यनुपयोगिनी, एवं सति समासगतश्लेषस्यैवास्तव्यस्तताप्रसङ्गादिति तस्येहोदाहरणं न दीयते, काव्यविषयकनियमस्यैवेहानुशिष्यमाणत्वात्। संसर्गो विप्रयोगश्चेति कारिका च सामान्येन लोकवेदोभयविषयकार्थनिर्णायकपरिगणनायां प्रवृत्तेति तस्यां तत्परिगणनमप्यावश्यकमेव। उक्तं च काव्यप्रकाशेऽपि द्वितीयोल्लासेऽस्य कारिकाद्वयस्य व्याख्याप्रकरणे–'काव्यमार्गे स्वरो न गण्यते' इति। **स्वरात् त्वर्थविशेषे** इति सप्तम्यन्तपृथक्पदपाठे तु अर्थविषयिणी प्रतीतिरिति विषयत्वं सप्तम्यर्थोऽवगन्तव्यः। ननु काकुरूपात् स्वरादर्थविशेषस्य प्रतीतिर्मथ्नामि कौरवशतं समरेन कोपादित्यादिवेणीसंहारस्थ [इदं पद्यं द्वि० अ० ५८ सूत्रे व्याख्यातम्] पद्यादिषु सर्वैरङ्गीकृतेति स्वरादर्थविशेषप्रतीतिः काव्यमार्गानुपयोगिनीति कथमुच्यत इति चेत्? अत्राह–**मथ्नामि कौरवशतं समरे न कोपात्? इति काकुरूपात् तु स्वरादिति**। अयमाशयः–वेदे स्वरत्वेन बाहुल्येन प्रयुक्तानामुदात्तादिस्वराणामेव काव्यमार्गेऽनुपयोगित्वमर्थनियमने, किञ्च मथ्नामीत्यादौ न नानार्थाभिधानियमनं किन्त्वनभिधेयपदार्थस्यैव व्यञ्जनमित्यभिधानियमनानुपयोगित्वमक्षतमेव, काव्यप्रदीपे च काव्येऽपि स्वरेणार्थविशेषनियममभिलक्ष्य काव्ये न स्वरो विशेषप्रतीतिकृत्' इति वृत्तिग्रन्थव्याख्यायां बाहुल्येनेति पदं योजितम्। तथा हि– तत्रत्यः प्रदीपग्रन्थः–'स्वरस्तूदात्तादिर्वेदे बाहुल्येन तेनार्थप्रतीतिर्दृश्यते, यथेन्द्रशत्रुर्वधस्येति + + + काव्ये तु नैवं बाहुल्यम्। ननु 'हरे प्रसीद' इत्यादौ स्वरेण सम्बोधनं प्रकाश्यते, तेन चार्थविशेषेऽभिधा नियम्यते, न तु साक्षात् स्वरेणैव, काकुस्थले तु न नानार्थाभिधानियमनं किन्त्वपदार्थस्यैव व्यञ्जनम्, यद्वा स्वरशब्देनोदात्तादित्रयं विवक्षितम्, अतः काव्ये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**तु स्वराद् भवत्यर्थविशेषे प्रतीतिः। आदिग्रहणादभिनया-ऽप-देश-निर्देश-संज्ञे-ङ्गिताकारा गृह्यन्ते।**

स्वरस्याभिधानियामकत्वं नास्त्येवेति व्यर्थं बाहुल्येनेति विशेषणमिति, मैवम्—'सुधाकरसुहृद्वक्रं दृष्टिः पङ्कजवैरिणी' इत्यादाविन्द्रशत्रुरिति न्यायेन [स्वरेण] अभिधानियमनस्य काव्येऽपि दुर्वारत्वात्''। इति, अत्र 'दृष्टे प्रसीद' इत्यादौ किमिदं सम्बोधनमुत सप्तम्यन्तं दृष्टपदमिति निर्णयाय स्वरोऽपेक्ष्यते, काकुस्थले च स्वरादर्थविशेषप्रतीतिर्दृश्यत इति स्वरस्य काव्येऽपि विशेषार्थप्रतीतिकरत्वमिति मत्वा यद् 'बाहुल्येन' इति विशेषणं दत्तं तन्नावश्यकम्, 'दृष्टे प्रसीद'—इत्यादौ न स्वरेणार्थप्रतीतिरपि तु सम्बोधनमिदं सप्तम्यन्तं वेत्येव निर्णीयत इति तेन निर्णयेन विशेषार्थस्य प्रतीतिरिति स्वरस्य तत्र न साक्षात् प्रयोजकत्वम्, काकु-स्थलेऽपि न नानार्थस्यैकार्थवाचकत्वं नियम्यतेऽपि तु विशिष्ट एवापदार्थो व्यङ्ग्य इति तत्रापि न स्वरस्याभिधानियामकत्वमिति बाहुल्येनेति विशेषणं व्यर्थमिति शङ्काग्रन्थार्थः। 'सुधाकरसुहृद् वक्रं दृष्टिः पङ्कजवैरिणी'त्यत्र सुधाकरस्य सुहृदिति षष्ठीसमासबोधनायान्तोदात्तप्रयोगे उपमालङ्कारः, सुधाकरः सुहृत् यस्येति बहुव्रीह्यभिप्रायेण पूर्वपदप्रकृतिस्वरप्रयोगे तु प्रतीपालंकारः, एवं पङ्कजवैरिणी-त्यत्रापि, इति काव्येऽपि स्वरेणार्थविशेषप्रतीतेः सत्त्वात् बाहुल्येनेति विशेषण-मावश्यकमिति समाधानग्रन्थाशयः। नागोजीभट्टेनोद्योते चात्रात्मनोऽनभिमतत्वं प्रतिपादितम्, तथा हि ''वस्तुत इदं चिन्त्यमेव, अभियुक्तैः क्वापि तथाऽकथनात्। अत एव प्रकाश—इन्द्रशत्रुरित्यादौ वेद एव, न काव्ये स्वरोऽर्थविशेषप्रतीतिकृ-दित्येव बहुषु पुस्तकेषु पाठः। बाहुल्येनेति पाठेऽपि वेद एव बाहुल्येन सोऽर्थ-विशेषप्रतीतिकृन्न तु लोके क्वचिदपीति व्याख्येयम् इत्युक्तम्। अयमाशयः—काव्ये उदात्तादिस्वरकृतार्थभेदे समासविषये श्लेषभङ्ग एव स्यादिति लोके [काव्ये] ऐकश्रुत्येनैव प्रायः प्रयोग इत्याश्रयणीयम्, [ऐकश्रुत्यं स्वरविशेषर-हितत्वं स्वरसर्वनाम्ना वा निर्देशः], अर्थविशेषप्रतीतिस्तु प्रकरणादिनोन्नेयेति बाहुल्येनेति विशेषणमनावश्यकम्, उपलभ्यते च तादृशविशेषणरहित एव काव्यप्रकाशीयपाठो बाहुल्येन, सति च बाहुल्यविशेषणविशिष्टपाठे तस्य पूर्वोक्त-रीत्यैव व्याख्यानमुचितमिति, किमधिकं बाहुल्येन॥

स्वराद्य इति कारिकायामादिपदमुपात्तं, तेन किमनुक्तं संग्राह्यमित्याह—**आदिग्रहणादिति**—अभिनयः, अपदेशः, निर्देशः, संज्ञा, इङ्गितम्, आकारश्चैते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अभिनयो यथा—

"एद्दहमित्तत्थणिया एद्दहमित्तेहिं अच्छिवत्तेहिं ।
एयावत्थं पत्ता एत्तियमित्तेहिं दियहेहिं ॥" [ ]

आदिपदेन गृह्यन्ते, तेऽपि अर्थविशेषप्रतीतिहेतव इति भावः । तत्र अभिनयः—अवस्थानुकारः, स च चतुर्विधः "भवेदभिनयोऽवस्थानुकारः स चतुर्विधः । आङ्गिको वाचिकश्चैवमाहार्यः सात्त्विकस्तथा ॥" इति साहित्यदर्पणोक्तेः [ ६. ३. ], अङ्गक्रियाकृतः—आङ्गिकः, स च साक्षादिवार्थाकारादिप्रदर्शिका हस्तादिक्रिया, वचसा कृतो—वाचिकः, मुकुट-केयूरादिभिर्वेषरचना—आहार्यः, स्तम्भ-स्वेदादिः सात्त्विकः, इत्येवं रूपेणाभिनयस्य चातुर्विध्यम्, इति कारिकार्थः । तत्राङ्गिक एवेहाभिनय उदाहियते—एद्दहमित्तत्थणियेति—"एतावन्मात्र-स्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम् । एतदवस्थां प्राप्ता, एतावन्मात्रै-र्दिवसैः ॥" इति च्छाया । चिरप्रवासिनि नायके नायिकावस्थां बोधयन्त्याः कस्याश्चिदुक्तिरियम्, एतावन्तावेव- एतावन्मात्रौ स्तनौ यस्याः सा, यद्यपि कैवल्यार्थबोधकस्य मात्रशब्दस्य "मात्रं कार्त्स्न्ये च केवले" इत्यादि कोशैः क्लीबत्वं लभ्यते, तथापि कविभिस्तस्य पुंस्त्वमपि प्रयुज्यते, यथा कालिदासः- 'उच्चैःश्रवा जलनिधेरिव जातमात्रः' इति पुंस्त्वं तदनुसारमेव 'एताव-न्मात्रौ' इति स्तनविशेषणे पुंलिङ्गः प्रयुक्तः, एवम्—एतावती एव एतावन्मात्रे, अक्षिपत्रे, ताभ्यामुपलक्षिता, एषा—विवक्षितोन्नतादिपरिमिताऽवस्था यस्याः, एतावन्तः—निर्दिष्टाऽङ्गुल्यादिसंख्यापरिमिता एव, दिवसाः, तैरिति करणे तृतीया । अत्र बुद्धिस्थतत्तदर्थशक्ततया नानार्थानामेतच्छब्दानामर्थविशेषवाचक-त्वमभिनयेन नियम्यते । अभिनयोऽत्र स्तनप्रदर्शने आमलक-कमलमुकुलाद्याका-रकहस्तादिक्रिया, तेन च स्तनस्य पीनत्वमुकुलितत्वाद्यर्थविशेषेऽभिधा नियम्यते, अक्षिप्रदर्शने च पद्मपत्राकारः, अवस्थाप्रदर्शने उन्नता-कृशताद्यभिनयः, दिवस-प्रदर्शनेऽङ्गुल्यादिनिर्देशश्चार्थविशेषनियामक इति । इत्थमाङ्गिकाभिनयरूपाया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपदेशो यथा—

"इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम्।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्॥"

[ कु० सं० स. २. श्लो. ५५ ]

निर्देशो यथा—

"भर्तृदारिके! दिष्ट्या वर्धामहे, यदत्रैव कोऽपि कस्यापि तिष्ठतीति मामङ्गुलीविलासेनाख्यातवत्यः"॥ [ मा० मा० अं-१ ]

---

हस्तादिचेष्टाया उदाहरणमुक्त्वा क्रमप्राप्तमपदेशमुदाहर्तुमाह-अपदेशो यथेति-अपदेशोऽभिमतनिर्देशः, स च हृदये हस्तनिक्षेपः, अर्थाकारप्रदर्शकत्वाभावान्नायमभिनयान्तर्गतः, तस्यार्थनियामकत्वं यथा- इतः स दैत्य इत्यादि- तारकासुरेणात्युपद्रुता देवा ब्रह्माणं शरणं ययुः, तेनोक्तमिदम्- इतः मद्रूपात् स्थानान्मत्सकाशाद् वा, स दैत्यः तारकः, प्राप्तश्रीः प्राप्तैश्वर्यादिसम्पत्, इत एव मत्त एव वधं नार्हति, नायं मया स्वतो मारयितुं योग्य इति भावः। तत्रार्थान्तरन्यासेन समर्थनमाह-विषवृक्षोऽपि संवर्ध्य जलसेकादिना परिपोष्य, स्वयं आत्मनैव, छेत्तुम्, असाम्प्रतं न युज्यत इति भावः, अपिना मतान्तरेऽसाम्प्रतमित्यनेन निपातेन कर्मणोऽभिधानान्न विषवृक्षशब्दाद् द्वितीया, अपि तु प्रथमैव। विषवृक्षस्य सर्वथाऽपकारिणोऽपि स्वपोषितस्य छेदनमयोग्यमिति कथनेन तदन्यस्य स्वकृतस्य नाशो दूरं तिरस्कृतः, एवं च सर्वथापकारिणोऽप्यस्य स्वसंवर्धितस्य मारणायाहं नात्मनाचेष्टिष्ये इति तदभिप्रायः। अत्र 'इतः' शब्दाभ्यां हृदये हस्तदानपूर्वकमात्मार्थो नियमितः, सर्वनाम्न इदमो निष्पन्नस्येतःशब्दस्य नानार्थत्वं प्रसिद्धमिति तस्य वक्तृविशेषार्थनियन्त्रितत्वमपदेशेनैव॥ क्रमप्राप्तं निर्देशमुदाहरति-भर्तृदारिके इत्यादि-पुष्पवाटिकायां मालतीं प्रति कस्याश्चित् सख्याः माधवं वीक्ष्य तमङ्गुल्या निर्दिशन्त्या उक्तिरनूदिता। तर्जन्याऽङ्गुल्या सूचनं निर्देशः। अत्रानिश्चितार्थकस्य किंशब्दस्य निर्देशमहिम्ना 'भावी प्रियतमः, तव' इति चार्थविशेषोऽवगम्यते। यद्यप्यत्र 'अपदेश'स्थल इवाभिमतप्रदर्शनमेवार्थविशेषनियामकम्, अत एव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संज्ञा यथा—

"अप्यवस्तुनि कथाप्रवृत्तये प्रश्नतत्परमनङ्गशासनम् ।
वीक्षितेन परिगृह्य पार्वती मूर्धकम्पमयमुत्तरं ददौ ॥"
[ कु०सं० स. ८ श्लो. ६ ]

इङ्गितं यथा—

"कदा नौ सङ्गमो भावीत्याकीर्णे वक्तुमक्षमम् ।
अवेत्य कान्तमबला लीलापद्मं न्यमीलयत् ॥" [ ]

काव्यप्रदीपे "स्वरादय' इत्यादिपदादभिनयापदेशौ गृह्येते, अन्ये चोक्तान्तर्भूताः" इत्युक्तम्, तथाप्यपदेश-निर्देशपदयोर्भिन्नार्थतया लोके प्रयोगस्य दर्शनात् पृथगुक्तिः, भवति च सहृदयानां कश्चन भेदप्रतिभासोऽनयोरर्थयोरवश्यमेव ॥ संज्ञामुदाहरति—संज्ञा यथा—अप्यवस्तुनि कथाप्रवृत्तय इति—पार्वती, अवस्तुनि—अनभिमते विषयेऽपि, कथाप्रवृत्तये—वार्त्तासञ्चालनाय, प्रश्ने—पृच्छायां, तत्परम्—उद्युक्तम्, अनङ्गशासनम्—शिवं, वीक्षितेन—अवलोकनेन, परिगृह्य—विज्ञाय, मूर्धकम्पमयं—शिरोविधूतनरूपम्, उत्तरं, ददौ, मूर्धसंज्ञया तत्पृच्छां निवारयामासेत्यर्थः । पार्वतीहृदयभावजिज्ञासार्थं शिवो ब्रह्मचारिरूपमास्थाय पार्वत्या सह तदीयतपस्यादिकारणपृच्छाप्रसङ्गेन शिवप्राप्तिर्मेऽभिलषितेति विज्ञाय शिवस्य [ आत्मन एव ] अवाञ्छनीयत्वं बहुभिः प्रकारैः प्रतिपाद्य तदुत्तरं यथोचितमधिगत्यापि पुनः किमपि प्रष्टुमुत्सुक इवायमनभिलषितं प्रस्तोष्यतीति तदीयमुखादिचेष्टामवलोक्यैव—विज्ञाय शिरोविधूननेन तं निवारितवती पार्वतीत्यभिप्रायः । अत्र संज्ञायाः शिरोविधूननस्य निषेधार्थप्रत्यायकत्वमिति । काव्यप्रकाश-प्रदीपकारादीनां मते चेयमभिनयान्तर्गतैवेति न पृथगुदाहृता तैः । इङ्गितेनार्थविशेषावबोधो यथा—कदा नौ सङ्गम इति—प्रच्छन्नकामुकयोर्वर्णनमिदम् । अबला 'कदा नौ सङ्गमो भावी । इति जनाकीर्णे वक्तुमक्षमं कान्तमवगत्य, लीलापद्मं न्यमीलयत्, अत्रोभयोः सङ्गमसमयजिज्ञासायाः समानत्वेऽपि जनाकीर्णतया कान्तं वक्तुं—प्रतिपादयितुमसमर्थम्, एतेन तस्य गुरुजनसमक्षेऽनौद्धत्यमनतिचातुर्यं च ध्वनितम्, अवगत्य स्वयमेव संकेतकालं, परिकल्प्य तं प्रतीङ्गितेन सूचनाय हस्तस्थितकमलसङ्कोचं कृतवती, तेन च संध्यासङ्केतकाल इत्यवगतं तदीयकान्तेन । यद्यपि कारिकायां—"शब्दार्थ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आकारो यथा—

"निवेदितं निःश्वसितेन सोष्मणा मनस्तु मे संशयमेव गाहते।
न विद्यते प्रार्थयितव्य एव ते भविष्यति प्रार्थितदुर्लभः कथम्॥"
[कु० सं० स. ५ श्लो. ४६]

तदेवं संसर्गादिभिर्नियमितायामभिधायां यार्थान्तरे प्रतीतिः सा व्यञ्जनव्यापारादेव। अमुख्येऽपि शब्दे मुख्यार्थबाधादिनियमिते

---

स्यानवच्छेदे विशेषस्मृतिहेतवः।" इत्युक्ततयाऽत्र नास्ति शब्दार्थनिर्णयायेङ्गितस्योपकारः, किञ्च नायं शब्दशक्तिमूलो ध्वनिस्तथापीङ्गितस्यार्थविशेषप्रतिपादकत्वमात्रमुदाहृतमिति ध्येयम्॥ आकारस्यार्थविशेषप्रतिपादकत्वमुदाहरति—**आकारो यथा—निवेदितमिति**। त्वं किमिति कठिनं तपश्चरसीति प्रच्छन्नरूपेण शिवेन ब्रह्मचारिरूपधारिणा पृष्टे निश्वसन्तीं पार्वतीं दृष्ट्वा शिवः प्राह—**सोष्मणा** उष्णेन निःश्वसितेन निःश्वासव्यापारेण, **निवेदितं** तवाभिप्रायः प्रकटितः, त्वं कमपि पतित्वेन कामयसे स च दुष्प्राप इति विज्ञातमिति भावः, तथापि मे मनः संशयमेव **गाहते** व्रजति, किम्? अयमेव तपोहेतुरिति मे सन्देह इति भावः, तत्र कारणमाह—ते प्रार्थयितव्यः—प्रार्थनाविषयीकरणीयः, न विद्यते, भवत्या एव प्रार्थयितारो बहवः सम्भाव्यन्ते, न कश्चित् त्वया प्रार्थनीयः सम्भाव्यते, अथ च त्वया प्रार्थितश्चेत्? तर्हि तस्य दुर्लभत्वं कथमित्येव सन्देहः, अन्यैः प्रार्थनीयायाः स्वतः प्रार्थिनीत्वेऽसंशयमेव प्रार्थनीयप्राप्तिरिति तदाशयः। अत्र निःश्वसितरूपेणाकारेणार्थस्य तन्मनोरथस्य प्रकाशनमित्युदाहरणम्॥

कारिकोक्तार्थमुदाहरणादिभिर्व्याख्याय सूत्रार्थं निगमयति—**तदेवमित्यादिना**। **संसर्गादिभिः** उक्तैः, **अभिधायां** शक्तिपदाख्यायां, **नियमितायां** अर्थान्तरवारणपुरःसरमेकत्रार्थे नियन्त्रितायां, याऽर्थान्तरेऽशक्यार्थविषयिणी प्रतीतिः **सा व्यञ्जनव्यापारादेव** व्यञ्जनाख्यवृत्तिसहकारादेव, एवकारेण तत्र वृत्त्यन्तरस्याभावः प्रकाशितः। अभिधास्थले [ मुख्यशब्दविषये ] व्यञ्जनाव्यापारमुक्त्वा-गौण-लाक्षणिकयोरपि शब्दयोर्व्यञ्जनव्यापारादर्थान्तरप्रत्यायकत्वं प्रतिपादयति—**अमुख्येऽपीत्यादिना**—गौण-लाक्षणिकेऽपि शब्दे, **मुख्यार्थबाधादिना** मुख्यस्य—प्रवाहादेरर्थस्य बाधः, आदिपदेन मुख्यार्थेन सह सम्बन्धो ग्राह्यः, तेन **नियमिते** गौणलाक्षणिकार्थपरत्वेनावधारिते, **प्रयोजनस्य** शैत्य-पावनत्वादेः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रयोजनप्रतिपत्तिर्व्यञ्जनव्यापारादेव, तथाहि-तत्र संकेताभावान्नाभिधा, नापि गौणी लक्षणा वा, मुख्यार्थबाधादिलक्षणाभावात्, न हि लक्ष्यं मुख्यं, नापि तस्य बाधा, न च किञ्चिन्निमित्तमस्ति, नापि

---

**प्रतिपत्तिः** प्रतीतिः, **व्यञ्जनव्यापारादेव** तदर्थप्रतीतावपि न किमपि कारणान्तरमस्तीति। तदेव युक्त्योपपादयति-**तथा हीत्या**दिना-यथाऽभिधादिना न निर्वाहस्तत् प्रदर्शयत इति भावः। **तत्र** द्वितीयार्थे प्रयोजनादौ च, अभिधाशक्तिः, न कुत इत्याह-**संकेताभावा**दिति-ईश्वरसङ्केतो हि शक्तिः, सा च परम्परयाऽस्मदादिभिरुपलब्धा कोशादिप्रतिपादिता च, तत्र तादृशेऽर्थे च न स संकेतो गृहीत इति न तत्र शक्तिः, इति शक्त्या तदर्थबोधो नेति भावः। **नापि गौणी लक्षणा वेति**- गौणी- गुणयोगादर्थप्रत्यायिका वृत्तिः, लक्षणा- शक्यसम्बन्धमूलिका वृत्तिः, तत्र, तादृशेऽर्थे नास्ति कुत इत्याह- **मुख्यार्थबाधादिलक्षणाभावादिति**- मुख्यार्थबाधादयो तल्लक्षणं, तास्तत्र न सन्तीति न तत्र गौणी लक्षणा वा वृत्तिर्बोधने समर्था। अयमाशयः- शक्यभिन्नार्थः शैत्यपावनत्वादिश्च न गङ्गापदनिष्ठगौणीवृत्तिप्रतिपाद्यो मुख्यार्थबाध-मुख्यार्थसम्बन्ध-रूढिप्रयोजनान्यतरैतद्रूपहेतुत्रयाभावात्, एवमेव लक्षणाऽप्युक्तकारणादेव तदर्थबोधनेऽक्षमेति। मुख्यार्थबाधाद्यभावमुपपादयति- **नहि लक्ष्यं मुख्यमिति**- लक्षणास्थले हि लक्ष्यार्थो भवति, स च न मुख्य इति निर्विवादमेव। अस्तु वा कथञ्चित् तस्याऽपि बाधेन कार्यम्, तथापि न तत्सम्भव इत्याह **नापि बाधेति**- नहि तटादिरूपो लक्ष्योऽर्थो बाधितो येन शैत्यपावनत्वादिप्रतीतिर्भवेत्, लक्षणास्थले यथा गङ्गापदशक्यार्थे घोषाधारत्वबाध इति तटे लक्षणा तथा नात्र तटार्थबाध इति भावः। ननु तात्पर्यार्थबाध एव तत्र कारणमस्त्विति चेत्? अत्राह-**न किञ्चिन्निमित्तमस्ति** शक्यसम्बन्धादि हि तत्र निमित्तं तदपि नास्तीति भावः। अथ परम्परासम्बन्धोऽस्त्येवेति चेत्? अत्राह-**न च शब्दः स्खलद्गतिरिति**-स्खलन्ती-प्रतिपाद्यार्थप्रतिपादनेऽसमर्था, गतिः-व्यापारो यस्य तादृशः शब्दो न, अयमाशयः-यथा गङ्गाशब्दस्तटार्थप्रतिपादनेऽसमर्थस्तटं लक्षयति तथा प्रयोजनं प्रतिपादयितुमसमर्थो नेति। अथाऽपि कथञ्चित् तस्यासामर्थ्यं सम्भाव्येत तत्राप्याह-**न च किञ्चित् प्रयोजनमिति** शैत्य-पावनत्वादिप्रयोजनाय हि लक्षणा समाश्रीयते, शैत्य-पावनत्वादेर्लक्षणया प्रतीतौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र शब्दः स्खलद्गतिः, न च किञ्चित् प्रयोजनमस्ति, अथ प्रयोजनेऽपि लक्ष्ये प्रयोजनान्तरमाकाङ्क्ष्यते, तर्हि तत्रापि प्रयोजनान्तराकाङ्क्षाया-मनवस्था स्यात्, तथा च लाभमिच्छतो मूलक्षतिः। न च प्रयोजन-सहितमेव लक्ष्यं लक्षणाया विषय इति वक्तुं शक्यम्, विषयप्रयोज-नयोरत्यन्तभेदात्, प्रत्यक्षादेरपि प्रमाणस्य विषयो घटादिः, प्रयोजनं

---

च किं प्रयोजनान्तरं स्यात्, न च प्रयोजनं विना लक्षणासम्भवतीति भावः। तत्रापि प्रयोजनान्तरस्वीकारे तस्य व्यञ्जनया प्रतीतावभ्युपगम्यमानायामन्ते रण्डा-विवाहन्यायः। अथ तदर्थमपि लक्षणास्वीकारे तत्राऽपि प्रयोजनान्तरापेक्षेत्यन-वस्थेत्याह–**अथ प्रयोजनेऽपि लक्ष्य** इत्यादिना न चेयमनवस्था बीजाङ्कुरवन्न दोषायेति चेत्? अत्राह–**तथा च लाभमिच्छत** इति अयमाशयः–बीजाङ्कुर-स्थले न मूलक्षतिः, तत्र हि न तदङ्कुरजन्येन बीजेन तदङ्कुरस्योत्पत्तिः, अपि तु वृक्षान्तरजन्येन बीजेनेति तत्र न मूलक्षतिः, इह च प्रयोजनं विनाऽसंभवन्त्या लक्षणया प्रयोजनं लक्ष्यते चेत्? तत्राऽपि प्रयोजनान्तरसद्भावं विना मूलभूता लक्षणैव नोदेतुमर्हतीति मूलक्षतिः। तदुक्तम्–मूलक्षतिकरीं चाहुरनवस्थां हि दूषणमिति॥ अथ शैत्य–पावनत्वादिप्रयोजनसहित एव तटार्थो लक्षणया बोध्यते, गङ्गायास्तटे घोष इत्यतोऽधिकस्यार्थस्य प्रतीतिश्च प्रयोजनमिति चेत्? अत्राह–**न च प्रयोजनसहितमेवे**ति। कुत इत्याह–**विषयप्रयोजनयोरत्यन्त-भेदा**दिति–लक्ष्यार्थो विषयस्तटादिः, प्रयोजनं च शैत्य–पावनत्वादिः, विषय–प्रयोजनयोश्च महदन्तरं दृष्टमिति तयोः साहित्यं न सम्भवति। विषय–प्रयोजन-योर्भेदं दृष्टान्तेन द्रढयति–**प्रत्यक्षादेरपि प्रमाणस्ये**ति–अक्षमिन्द्रियं प्रति यदुत्पद्यते तज्ज्ञानं प्रत्यक्षम्, इन्द्रियार्थसन्निकर्षजन्यमिति यावत्, प्रत्यक्षादे-रित्यत्रादिपदेनानुमानादेः परिग्रहो बोध्यः, तस्य **विषयो घटादि**रिति–तस्यैव प्रमेयत्वात्। **प्रयोजनं** फलं तु, **अर्थाधिगतिः**। अर्थ्यते प्रार्थ्यते यः सोऽर्थो घटादिस्तस्याधिगतिर्ज्ञानम्, इति सामान्यतः सकलजनसम्मतः पन्थाः, **प्रकटता** घटज्ञानानन्तरं ज्ञातो घट इति प्रत्ययात् तज्ज्ञानेन तस्मिन् घटे ज्ञाततोत्पद्यते, सैव प्रकटतेति भाट्टमीमांसकानां मतम्, सैव च प्रत्यक्षादिज्ञानस्य फलमिति तैराख्यायते, तार्किक-प्रभाकरयोर्मतमाह–**संवित्तिर्वे**ति–घटज्ञाने सति घटमहं जानामीति प्रत्ययरूपोऽनुव्यवसायो जायते, स एव संवित्तिरित्याख्याता घट-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वर्थाधिगतिः प्राकट्यं संवित्तिर्वा । तदेवं प्रयोजनविशिष्टस्य लक्ष्यस्य गौणी-लक्षणयोरविषयत्वात् प्रयोजने व्यञ्जनमेव व्यापारः ।

तत्र मुख्यशब्दशक्तिव्यङ्ग्यं वस्तु पदे यथा–

"मुक्तिभुक्तिकृदेकान्तसमादेशनतत्परः ।
कस्य नानन्दनिस्यन्दं विदधाति सदागमः ॥" [ ]

---

ज्ञानाज्जायत इति तार्किकाः प्राभाकराश्च । एवं च ज्ञातृधर्मोऽयं प्रत्यक्षादेः फलम्, प्रकटता च ज्ञेयधर्म इत्ययं भेदोऽस्तु, सर्वथा प्रत्यक्षस्य विषय-फलयोः प्रत्यक्षाद् भिन्नत्वं सिद्धम् । तथा लक्षणाजन्यज्ञानात् तत्फलस्य शैत्य-पावनत्वादिज्ञानस्य भिन्नत्वमवश्यं स्वीकर्त्तव्यमिति लक्षणया विषयसहितस्य फलस्य बोधो न सम्भवतीति, तदाह-तदेवमिति-तत् तस्माद्, एवं पूर्वोक्तयुक्तिभिर्विषय-फलयोरत्यन्तभिन्नतया समकाले ज्ञानविषयत्वासम्भावेन, प्रयोजनविशिष्टस्य शैत्य-पावनत्वादिसहितस्य, लक्ष्यस्य तटादेः, गौणी-लक्षणयोरविषयत्वात् ताभ्यां प्रतिपादयितुमशक्यत्वात्, अभिधाऽविषयत्वस्य च पूर्वमेवोपादितत्वात्, वृत्त्यन्तराविषयत्वेन, प्रयोजने प्रयोजनप्रतीतौ व्यञ्जनमेव ध्वननापरपर्यायो व्यञ्जनाख्य एव व्यापार इति ॥

एवं शब्दशक्तिमूलं व्यङ्ग्यं प्रपञ्च्य तदुदाहरणानि दर्शयितुं प्रक्रमते-तत्र मुख्यशब्दशक्तीत्यादि-मुख्य-गौणादिभेदेन शब्दस्य चातुर्विध्यं पूर्वमुपपादितम्, तत्र मुख्यः शब्दः प्रथमः, तन्निष्ठा शक्तिरेव मूलं यस्य तत् व्यङ्ग्यं, वस्तु-[ वस्त्वलङ्कारभेदेन व्यङ्ग्यस्य द्विविधत्वेन ] वस्तुध्वनिरिति यावत्, पदे पदविषये, यथा भुक्तिमुक्तिकृदिति । जनसंकीर्णे स्थले उपनायके समागतेऽप्रस्तुतवेदप्रशंसाव्याजेन तदागमनाधीनहर्षं व्यञ्जयन्त्याः कस्याश्चिन्नायिकाया इयमुक्तिः । सदागमः सन्-आगमः-वेदः, भुक्तिमुक्तिकृत् भुक्तिः-स्वर्गादिभोगः, मुक्तिः-अपवर्गः, तत्कृत्-कर्मकाण्ड-ज्ञानकाण्डाभ्यामुभयोपायबोधनेन तयोः सम्पादकः, एकान्तेति-एकान्तेन-नियमेन, समादेशने-यजेतेत्यादिविध्यादिभिः करणैर्हितोपदेशने तत्परः, कस्य विज्ञस्य, आनन्दनिस्यन्दं सुखोत्पत्तिं, न विदधाति अपि तु विदधात्येव । व्यङ्ग्यपक्षे सतः-सुन्दरस्य वल्लभस्य, आगमः-आगमनम्, भुक्तिः-सुरतादिभोगः, मुक्तिः-विरहादिदुःखत्यागः, ते करोतीति तथाभूतः, एकान्तस्य-संकेतस्थानस्य, समादेशने-निर्देशने, तत्परः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



काचित् संकेतदायिनमेवं मुख्यया वृत्त्या शंसतीति सदागमपदेन प्रकाश्यते, अत्रार्थयोर्वैसदृश्यान्नोपमा ॥

वाक्ये यथा–

"पंथिय ! न एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे ।
उन्नयपओहरं पेक्खिऊण जइ वससि ता वससु ॥"५९ ॥

[ स० श० ८७९ ]

---

कस्य–रमणीयजनस्य, आनन्दनिस्यन्दं न विदधातीति पूर्ववत्, अत्र मुख्यतया विवक्षितोऽपि द्वितीयोऽर्थो गोपनायाप्राकरणिकीकृतो भवतीति बोध्यम् । सदागमपदेन प्राधान्येनोपपतिं प्रति स्तुतिर्व्यज्यते । अत्र च तस्य पदस्य [ सदागम इत्यस्य ] परिवृत्त्यसहत्वेन [ तत्सत्त्व एव व्यङ्ग्यार्थप्रतीतेः ] शब्दशक्तिमूलव्यङ्ग्यत्वमिति तत्रापि पदस्येति च स्पष्टम्, यद्यपि भुक्ति–मुक्तिप्रभृतिपदानामपि व्यञ्जकत्वं तथापि सदागमपदसत्त्वे एव तेषां तत्त्वमिति तस्यैव प्राधान्यमिति । अत्र प्रकरणबोधनपुरःसरं व्यञ्जकपदं परिचाययति–**काचित् संकेतदायिनमिति**–उपपादितमेतत् पूर्वम् । **मुख्यया वृत्त्येति**–अभिधयेत्यर्थः । **शंसति** स्तुतिं व्यञ्जयतीत्यर्थः । अत्र मुख्ययेत्यस्य व्यञ्जनयेत्यर्थ इति उद्द्योतकृत्, तादृशव्याख्यानं तु नावश्यकम्, सम्भवति स्वार्थपरत्वे व्यञ्जनोपलक्षकत्वकल्पनाया अयोग्यत्वात्, तस्य स्वार्थपरत्वं तु व्याख्यातमेव । अत्रालङ्कारध्वनिः [ सदागम इव सदागमः ] इति केचिदाहुः, तन्नेत्याह–**अर्थयोर्वैसादृश्यादिति**–वाच्य–लक्ष्यार्थयोर्हि नास्ति सादृश्यं, येनोपमा स्यात्, किञ्च मुख्यार्थस्य व्यञ्जनयाऽऽच्छादितत्वेन व्यङ्ग्यार्थस्यैव मुख्यतया प्रतीतेरुपमाकल्पकाभावोऽपि । सदृशतया प्रतिभासमानावेवार्थौ प्राकरणिकतामलभमानावुपमानोपमेयभावं व्रजतः, इह च न तथेति भावः ॥ पदगतमभिधामूलं वस्तुध्वनिमुदाहृत्य वाक्यगतमुदाहरति–**वाक्ये यथा–पंथियेति**–पथिक ! नात्र स्रस्तर [ शास्त्र ]-मस्ति मनाक् प्रस्तरस्थले ग्रामे । उन्नतपयोधरं प्रेक्ष्य यदि वससि तदा वस ॥" इति च्छाया । पथिकेन प्रावृडारम्भे ग्रामीणवध्वाः 'सत्थरमेत्थात्थि' इति सम्भवव्याजेन स्रस्तरं पृष्टायां कस्याश्चिदुक्तिरियम् । सा चेयं स्वयं दूती द्व्यर्थैः पदैराच्छाद्य रहस्यं कथयति–**पथिक** ! प्रस्तराणां–पाषाणानां स्थले–तन्मये **अत्र** अस्मिन् ग्रामे, न तु नगरे, **मनाक्** अल्पमपि, **स्रस्तरं** कटाद्यास्तरणं, नास्ति, तच्छयनसामग्र्यभावेऽपि **उन्नतपयोधरं** उपरिनम्रीभूतमेघम्, तेन वर्षाया



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र प्रहरचतुष्टयमप्युपभोगेन नेह निद्रां कर्तुं लभ्यते, सर्वे ह्यत्राविदग्धाः, तदुन्नतपयोधरां मामुपभोक्तुं यदि वससि तदास्स्वेति व्यज्यते । वाच्यबाधेन च व्यङ्ग्यस्य स्थितत्वात् तयोर्नोपमानोपमेयभाव इति नालङ्कारो व्यङ्ग्यः ॥ यथा च-

"शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र ! यस्मै त्वम् ।
यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च" ॥ ६० ॥ [ ]

---

आसन्नत्वं व्यज्यते, वीक्ष्य यदि तत्प्रतिबन्धाद् वससि तदा वस तिष्ठेत्यापाततो वक्रयभिप्रायः । पाषाणबाहुल्येन च तृणदौर्लभ्यप्रयुक्तः स्रस्तराभावः सूपपन्नः । व्यञ्जनया तु पाषाणानां तत्त्वेनाध्यवसितानां मूर्खाणां स्थले तन्मयेऽत्र ग्रामे, सत्थरं-शास्त्रं मनाक्-ईषदपि नास्ति, तथा चाकारेङ्गितज्ञशून्येऽस्मिन् ग्रामे सति चैवंविधे मेघात्मके श्लेषमर्यादयोन्नतस्तनात्मके चोद्दीपने यद्युपभोगक्षमोऽसि तदाऽऽस्स्व, को नामोपभोगक्षम ईदृशे समये सति चेदृशरमणीलाभे स्रस्तरशयनमन्यत्र गन्तुं वार्हतीति व्यङ्ग्यम् । तदाह-अत्र प्रहरचतुष्टयमपीति । उन्नतपयोधरदर्शनेन हि तया स्वस्या अत्युपभोगोत्सुकत्वं व्यक्तमिति तेनैव सर्वसमयोपयोगे शयनार्थं संस्तरस्यापेक्षैव नेति भावः । न च काचिदन्यदर्शनादिकृता बाधेति सूचयितुमाह-सर्वे चात्राविदग्धा इति-उपपादितं च श्लोकव्याख्यायामेतत् ततश्च किं पर्यवसन्नं व्यङ्ग्यमित्याह-तदुन्नतपयोधरामिति । अत्राप्यलंकारव्यञ्जनाभावमाह-वाच्यबाधेनेति । अत्र वाच्यार्थं प्रबाध्यैव व्यङ्ग्यार्थो लब्धजन्मा । व्यङ्ग्यार्थस्य ग्राम्यतापरिहाराय तद्गोपनाय च वाच्यार्थं उपात्तो न तु तत्र तात्पर्यमित्यत्यन्तभिन्नेन तेन सहोपमानोपमेयभावस्यासम्भव एव । पयोधर इव पयोधर इति प्रतीतौ च वैरस्यमेव प्रत्युत स्यादिति नालङ्कारो व्यङ्ग्य इत्येव कल्पनं युक्तमिति अत्र च 'पओहर' 'सत्थर' पदे व्यञ्जके इति पदमूलोऽयमिति केचित् । स्वमते च सम्पूर्णवाक्यस्यैव 'उन्नतपयोधरं प्रेक्ष्य' इत्यस्य व्यञ्जकत्वम् । 'सन्थरमत्थि' इत्यस्यापि च द्वयोरपि वाक्ययोः परिवृत्त्यसहत्वमिति भावः । उदाहरणान्तरमाह-शनिरशनिरिति । हे नरेन्द्र ! तं शनिः ग्रहः, अशनिः वज्रं च उच्चैः अतिशयेन निहन्ति, यस्मै त्वं कुप्यसि; यत्र तु प्रसीदसि स पुरुषः, उदारः उत्कटो दाता, अनुदारश्च अनुगता दाराः स्वप्रासैश्वर्येणाप्रवासाद् यस्य तादृशश्च भातीत्यर्थः, पक्षेऽशनिः-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र विरुद्धावपि त्वदनुवर्तनार्थमेककार्यं कुरुत इति व्यत्ययेन ध्वन्यते ॥ मुख्यशब्दशक्तिव्यङ्ग्योऽलङ्कारः पदे यथा-

"रुधिरविसरप्रसाधितकरवालकरालरुचिरभुजपरिघः।
झटिति भ्रुकुटिविटङ्कितललाटपट्टो विभासि नृप! भीमः ॥६१॥ [ ]

अत्र भीषणीयस्य भीमसेन उपमानम् ॥

---

शनिभिन्नः, अनुदारः-उदारभिन्न इति। तथा च किमत्र व्यङ्ग्यमित्याह-अत्र विरुद्धावपीति-नञो विरुद्धार्थकत्वेन शनिविरुद्धोऽशनिरुदारविरुद्धोऽनुदारः-तथा च विरुद्धयोरप्यनयोरर्थयोस्त्वदनुवर्तनार्थं सह कार्यकारित्वमिति वस्तु व्यज्यते। पूर्वं प्राकृतभाषयोदाहरणमिदं च संस्कृतेनेत्येवोदाहरणद्वयदानस्य तात्पर्यम् ॥

मुख्यशब्दशक्तिमूलं वस्तुध्वनिं पदवाक्ययोरुदाहृत्य तन्मूलमलङ्कारध्वनिमुदाहर्तुमवतरणिकामाह-मुख्यशब्दशक्तिव्यङ्ग्योऽलङ्कारः पदे यथेति। रुधिरविसरेति-अत्र काव्यप्रकाशादिपठिते पद्ये 'नृपभीम!, इत्येकं सम्बोधनरूपेण पठ्यते, अत्र च पृथक्, एतत्पाठानुसारमेव व्याख्यायते, नृप! रुधिरस्य-शोणितस्य, विसरः-प्रसारो धारेति यावत्, तेन प्रसादितः- अलङ्कृतः, करवालः, तेन करालः-भयंकरः, रुचिरः-सुन्दरश्च, भुज एव परिघः-दुर्गकपाटाऽर्गलो यस्य तादृशः, शत्रूणां कृते करालः, मित्राणां कृते रुचिरः, किञ्च शत्रुलक्ष्मीनिरोधक्षमतया भुजे परिघत्वारोपः; किञ्च झटिति त्वरितं, भ्रुकुट्या-भ्रूभङ्गेन-विटङ्कितं-तरङ्गितं यत् ललाटं-भालं, तदेव पट्टः-फलको यस्य तथाभूतः, भीमः भयङ्करः, विभासि। अत्र कथमलङ्कारध्वनिरित्याह-भीषणीयस्येति-बाहुलकात् कर्त्तर्यनीयः, तथा च भयङ्करस्य भीमसेन उपमानम् तथा च भीमसेनवद् विभासीत्यवगतिः। एवं चोपमालङ्कारस्य व्यङ्ग्यत्वमित्यायातम् ॥

वाक्येऽलङ्कारध्वनिं शब्दशक्तिमूलमाह-उन्नतः प्रोल्लसद्धार इति। उन्नतः गगनोच्छ्रितः, प्रोल्लसद्धारः प्रोल्लसन्ती धारा यस्य सः, कालागुरुमलीमसः कालागुरुः-सुगन्धिकाष्ठविशेषः, तद्वत्, मलीमसः-श्यामः, तस्याः प्रावृषः, पयोधरभरः मेघाडम्बरः, कम् अभिलाषिणं न चक्रे, पक्षे उन्नतः यौवनवशोच्छ्रितः प्रोल्लसन्-प्रकाशमानः, हारो मुक्तामाला यत्र,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वाक्ये यथा-

"उन्नतः प्रोल्लसद्धारः कालागुरुमलीमसः।
पयोधरभरस्तस्याः कं न चक्रेऽभिलाषिणम् ॥ ६२ ॥" [ ]

अत्र वाक्यस्यासंबद्धार्थत्वं मा प्रसाङ्क्षीदित्यप्राकरणिकप्राकरणिकयोरुपमानोपमेयभावः कल्पनीय इत्यत्रोपमालङ्कारो व्यङ्ग्यः ॥

यथा वा-

"अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा।
तारकातरला श्यामा सानन्दं न करोति कम्" ॥ ६३ ॥ [ ]

अत्र शब्दशक्त्या रात्रियोषितोरुपमा व्यङ्ग्या। यद्यपि समुद्दी-

---

कालागुरुणा-तल्लेपेन, श्यामः, तस्याः तन्व्याः, पयोधरभरः स्तनोत्सेधः, कं जनम्, अभिलाषिणं न चक्रे अपि तु सर्वमेवाभिलाषिणं चक्रे इत्यर्थः। अत्र कथमलङ्कारो व्यङ्ग्य इत्याह-वाक्यस्यासम्बद्धार्थत्वमिति, अत्र वर्षावर्णनरूपप्रकरणेन मेघपक्षीयेऽर्थेऽभिधा नियम्यते, ततश्च स्तनपक्षीयोऽर्थः प्रतीयमानोऽसम्बद्धार्थो मा भूदित्यप्राकरणिक-प्राकरणिकयोर्मेघ-स्तनयोरुपमानोपमेयभावं व्यञ्जयतीत्युपमालङ्कारो व्यङ्ग्य इति भावः ॥

उदाहरणान्तरमाह-यथा वेति। अतन्द्रचन्द्राभरणेति-अतन्द्रः-मेघाद्यनावृततया स्फुरद्रूपः, चन्द्र एव आभरणं यस्याः सा, अत एव समुद्दीपितः-सम्यक् प्रबलीकृतः, मन्मथः-कामो यया सा, एवं तारकाः-नक्षत्राणि, तरलाः-अल्पा यस्यां सा, श्यामा रात्रिः, कं सानन्दं न करोति, इति वाच्यपक्षे, अन्यत्र तु अतन्द्रा-सुरतावालस्यरहिता, चन्द्रः-कर्पूरम्, आभरणं-भूषणं यस्याः, क्वचिच्चन्द्रनामालङ्कारोऽपि श्रूयते, तारकायां-नेत्रमध्यस्थकृष्णकनिकायां, तरला-चञ्चला, समुद् हर्षयुता, दीपितमन्मथा समेधितकन्दर्पा, श्यामा षोडशवार्षिकी, कं सानन्दं न करोति, अपि तु सर्वमानन्दयत्येव ॥ अत्र किं व्यङ्ग्यमित्याह-शब्दशक्त्या रात्रियोषितोरुपमेति-शब्दशक्त्योभयोरर्थयोरवगतौ सत्यामेकस्याप्राकरणिकस्वाभावायोभयोरुपमानोपमेयभाव एव पर्यवसानमित्युपमालङ्कारो व्यङ्ग्य इति भावः, अत्र तारका-तरला-श्यामाशब्दाः परिवृत्त्यसहिष्णवः पर्यायान्तरोपादाने द्वितीयार्थबोधासम्भवात्। काव्यप्रकाश-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पितेति सानन्दमिति चार्थोऽपि व्यञ्जकस्तथापि न शब्दशक्तिं विनार्थशक्तिरुन्मीलतीति शब्दशक्तिरेव व्यञ्जिका ॥ यथा वा–

"मातङ्गगामिन्यः शीलवत्यश्च गौर्यो विभवरताश्च श्यामाः पद्मरागिण्यः धवलद्विजशुचिवदनामदिरामोदश्वसनाश्च प्रमदाः" ॥६४॥

अत्र विरोधालङ्कारो व्यङ्गयः ॥

यथा वा–

"खं येऽभ्युज्ज्वलयन्ति लूनतमसो ये वा नखोद्भासिनो
ये पुष्णन्ति सरोरुहश्रियमधिक्षिप्ताब्जभासश्च ये ।

---

कृदादिभिरस्य शब्दार्थोभयशक्तिमूलकध्वनित्वेनोल्लेखात् 'समुद्दीपितमन्मथा, सानन्दम्' इत्यनयोः शब्दयोरपरिवर्तनेऽपि तदर्थयोरपि व्यञ्जकत्वेनोभयव्यञ्जकत्वस्यौचित्याच्चैकस्य शब्दमात्रस्य कथमिह व्यञ्जकत्वमुक्तमित्याशङ्कते–यद्यपीति। उत्तरयति–तथापीति–अयमाशयः–सत्यमत्रोभयोर्व्यञ्जकत्वमस्ति, किन्तु शब्दशक्तिं विनाऽर्थशक्तेरुन्मीलनाभावाच्छब्दशक्तेरेव प्राधान्यमिति प्राधान्येन व्यपदेशो मल्लग्रामादिवदिति बोध्यमिति ॥

उदाहरणान्तरमाह–मातङ्गेति–मातङ्गान्–श्वपचान्, गन्तुमुपरमयितुं शीलं यासां ताः, तथापि शीलवत्यः सदाचाररता इति विरोधः, मातङ्गवत्–गजवत्, गच्छन्तीति ता इति तत्परिहारः; गौर्यः पार्वत्यः, विभवे–शिवविरुद्धे तद्भिन्ने, रताः–आसक्ता इति विरोधः, गौर्यः गौराङ्ग्यः, विभवे–ऐश्वर्ये, रता इति तत्परिहारः; श्यामाः श्यामवर्णाः, अथ च पद्मवत् रागो यासां ता इति विरोधः, श्यामाः षोडशवार्षिक्यः, पद्मरागमणियुताश्चेति परिहारः, धवलद्विजानां–शुद्धब्राह्मणानामिव, शुचि–पवित्रं वदनं–मुखं यासां ताः, मदिरयाऽऽमोदितं श्वसनं–निःश्वासो यासां ता इति विरोधः, धवलैः–श्वेतैः, द्विजैः–दन्तैः, शुचि–शुभ्रं, वदनं यासामिति तत्परिहारः; एवंभूताः प्रमदाः, इति हर्षचरिते तृतीयाध्याये स्थाण्वीश्वरस्य वर्णनप्रसंगे तत्रत्यस्त्रीणां वर्णनमिदम् । अत्र विरोधप्रतिपादकाऽपिशब्दाभावाद् विरोधालंकारस्य व्यङ्ग्यत्वमित्याह–विरोधालङ्कारो व्यङ्ग्य इति ॥

अलङ्कारान्तरोदाहरणमप्याह–यथा वा–खं येऽभ्युज्ज्वलयन्तीति। ये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ये मूर्धस्ववभासिनः क्षितिभृतां ये चामराणां शिरां-
स्याक्रामन्त्युभयेऽपि ते दिनपतेः पादाः श्रिये सन्तु वः" ॥६५॥ [ ]

अत्र व्यतिरेकः, एवमलङ्कारान्तरेऽप्युदाहार्यम् ॥

गौणशब्दशक्तिव्यङ्ग्यं वस्तु पदे यथा—

"रविसंक्रान्तसौभाग्यस्तुषाराविलमण्डलः ।
निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते" ॥ ६६ ॥
[ रा० अ० का० स० १६. श्लो. १३ ]

---

लूनतमसः विनाशितान्धकाराः, दिनपतेः सूर्यस्य, पादाः किरणाः, खम् आकाशम्, अभ्युज्ज्वलयन्ति सर्वतः प्रकाशयन्ति, ये वा पादाः चरणाः, नखैः—नखरैः, उद्भासिनः, खस्य नोद्भासिनश्च; ये पादाः किरणाः, सरोरुहाणां—कमलानां, श्रियं—शोभामपि, पुष्णन्ति वर्धयन्ति, पुनश्च ये चरणाः क्षिप्ताः—आहृता निन्दिता वा, अब्जानां—कमलानां, भासः—कान्तयो यैस्तथा, ये पादाः किरणाः, क्षितिभृतां पर्वतानां राज्ञां वा, मूर्धसु शिखरेषु मस्तकेषु वा, अवभासिनः दीपनशीलाः सन्ति, ये पादाः चरणाः पुनः, अमराणां देवानां चामराणां वा, शिरांसि, आक्रामन्ति अधिष्ठानेन व्याप्नुवन्ति, ते उभये अपि द्विविधा अपि, दिनपतेः पादाः किरणाश्चरणाश्च, वः युष्माकं, श्रियै सम्पत्तिजननाय, सन्तु प्रभवन्त्वित्यर्थः । पादशब्दः किरण–चरणौ क्रमशः कथयन्नुभयोः प्रतिपादं विशेषणं योजयति । अत्र तमोनाशनपुरस्सराकाशभासनसरोरुहश्रीपोषणपर्वतशिखरोल्लसनादिव्यापारविशिष्टसूर्यकिरणानामुपमेयानाम्, आकाशानुद्भासन–सरोरुहशोभाहरण–पूजनीयामरशिखरारोहणादिहीनधर्मयोगिसूर्यचरणरूपोपमानापेक्षयाऽऽधिक्यं शब्दानभिधेयं प्रतीयते इति शब्दशक्तिमूलव्यतिरेकध्वनिरिति । उपमा–विरोध–व्यतिरेकेत्यलङ्कारत्रयध्वनिं शब्दशक्तिमूलमुदाहृत्याधिकालंकारान्तरोदाहरणे ग्रन्थविस्तारमभिसमीक्ष्य तदुदाहरणस्य शिष्यबुद्ध्योज्ञेयत्वमाह–एवमलङ्कारान्तरेऽप्युदाहार्यमिति–तत्र प्रस्तुतप्रशंसाध्वनिर्यथा—

"सरसं मउअसहावं विमलगुणं मित्तसंगमोल्लसिअं ।
कमलं णट्ठच्छायं कुणंत दोसायर नमो दे ॥" [ ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्रोपसंहृतदृष्टिवृत्तिरन्धशब्दो बाधितमुख्यार्थः पदार्थप्रकाशनाशकत्वं नष्टदृष्टिगतं निमित्तीकृत्यादर्शे वर्तमानोऽसाधारणविच्छायित्वानुपयोगित्वादिधर्मजातमसंख्यं प्रयोजनं व्यनक्ति ॥

---

सरसं मधुरस्वभावं विमलगुणं मित्रसंगमोल्लसितम्। कमलं नष्टच्छायं कुर्वते दोषाकर! नमस्ते ॥ इति संस्कृतम्। केनचिच्चन्द्रमुद्दिश्यान्योक्तिव्याजेनोच्यते–**सरसं** सुन्दरम्, अथ च रसयुक्तम्, मधुरस्वभावं विमलगुणयुतं **मित्रस्य** सूर्यस्य, संगमेन विकसितम्, अथ मित्राणां–सुहृदां, सङ्गमेन हर्षयुतम्–कमलं तत्त्वेनाध्यवसितं, **कमपि सुजनं, नष्टच्छायं** नष्टशोभमपगतलक्ष्मीकं च, कुर्वते, **दोषाकर!** दोषा–रात्रिस्तां करोतीति तादृश! चन्द्र! अथ दोषगणनिधे! दुर्जन! ते नमः। तथा च कमलप्रख्यस्य तत्तुल्यगुणतयोक्तस्य कस्यचन महापुरुषस्य श्रियं नाशितवन्तं कञ्चन, चन्द्रवत् श्रीयुतं प्रति अप्रस्तुतप्रशंसयोच्यते इति अप्रस्तुतप्रशंसालङ्कारो व्यङ्ग्यः, इत्येवं रीत्येति, पदव्यामवगतायां सर्वैरनायासेन गन्तुं शक्यत इति भावः ॥

क्रमप्राप्तं गौणशब्दशक्तिमूलं वस्तुध्वनिं पदविषयकमुदाहर्तुमाह–**गौणशब्दशक्तीति। रविसंक्रान्तेति**–रवौ संक्रांतं सौभाग्यं–जनप्रियत्वं यस्य हेमन्ते रवेरेवाह्लादकारित्वेन लोकप्रियत्वात्, तुषारेण–हिमेन, आविलम्–आवृतं मण्डलं यस्य तादृशश्चन्द्रमाः, निःश्वासेन–मुखमारुतेन, अन्धः–मलिनीकृतः, **आदर्शो** दर्पण इव, **न प्रकाशते** न प्रकाशं जनयति शोभते वा। अत्र किं वस्तु व्यङ्ग्यमित्याह–**अत्रोपसंहृतदृष्टिवृत्तिरिति**–"अन्धण् दृष्ट्युपसंहारे" इति धातुनिष्पन्नोऽन्धशब्द उपहतदृष्टिशक्तिं चेतनमाह, दर्पणे च दृष्टेरभावात् तदान्ध्यमपि बाधितमिति बाधितवृत्तिरूपमुख्यार्थः, ततश्च मालिन्यविशिष्टं पदार्थप्रकाशनाशकत्वं **नष्टदृष्टिमज्जीवगतं निमित्तीकृत्य** अवलम्ब्य, आदर्शे वर्त्तमानस्तदतिशयमसाधारणविच्छायत्वानुपयोगित्वादिकं धर्मसमूह**मसंख्यमि**यत्तया परिच्छेत्तुमशक्यं यावद्बुद्धिबलोदयोऽयं वस्तु प्रयोजनतया **व्यनक्ति** प्रकाशयति। अत्रैकस्यान्धशब्दस्यैव गौणीवृत्त्याऽप्रकाशरूपमर्थं प्रतिपादयतो व्यञ्जकत्वमिति गौणशब्दशक्तिमूलकत्वं स्पष्टम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वाक्ये यथा-

"या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः" ॥ ६७ ॥

[ म० भा० भीष्मपर्व० गी० अ० २. श्लो. ६९ ]

अत्र निशायां जागरितव्यमन्यत्र रात्रिवदासितव्यमिति न कश्चिदुपदेश्यं प्रत्युपदेशः सिद्ध्यतीति बाधितस्वार्थमेतद्वाक्यं संयमिनो लोकोत्तरतालक्षणेन निमित्तेन तत्त्वदृष्टाववधानं मिथ्यादृष्टौ तु पराङ्मुखत्वं ध्वनतीति ॥

---

पदगतं गौणशब्दशक्तिमूलं वस्तुध्वनिमुदाहृत्य वाक्यगतं तमुदाहर्तुमाह- **वाक्ये यथा-"या निशा सर्वभूतानामिति ।** भगवद्गीताया द्वितीयाध्याये अर्जुनं प्रति श्रीकृष्ण आह-पार्थ ! **सर्वभूतानां** सर्वेषां ब्रह्मादिस्थावरान्तानां भूतानां पाञ्चभौतिकशरीरधारिणां, **या निशा** मोहजनकतया निशातुल्या मिथ्यादृष्टिः, **तस्यां संयमी** जितेन्द्रियो **जागर्ति** कथमियं हीयेतेति सावधानस्तिष्ठति, **यस्यां** पुनर्मिथ्यादृष्टौ, **भूतानि जाग्रति** अवदधति अनुरज्यन्ति, **सा पश्यतः** तत्त्वावबोधं बिभ्रतो **मुनेः** मननशीलस्य **निशा** अनवधानविषयः, तस्यां हि नासौ प्रबुद्धः, अथवा या निशा सर्वभूतानामित्यत्र सर्वभूतानि यत्र निशावदप्रबुद्धानि तिष्ठन्ति तस्यां तत्त्वदृष्टौ, **मुनिर्जागर्ति** प्रबुद्धस्तिष्ठति, **यस्यां** मिथ्यादृष्टौ भूतानि जाग्रति सा विवेकशीलस्य तस्य मुनेः, **निशा** अनवधानविषय इति व्याख्येयम् । अत्र किं वस्तु व्यङ्ग्यमित्याह-**अत्र निशायां जागरितव्यमित्यादि**-अयमाशयः-आपाततः प्रतीयमानो वाच्योऽर्थः-निशायां जागरितव्यमन्यत्र [ दिवा ] रात्रिवद् व्यवहर्तव्यमिति न कस्मैचिदप्युपदेष्टुं योग्यमपुरुषार्थत्वात्, ततश्च वाक्यमिदं बाधितवाच्यार्थं सत् **संयमिनः** सांसारिकप्रवाहाभिमुखानीन्द्रियाणि स्ववशे कृतवतः **लोकोत्तरतालक्षणेन** साधारणजनविलक्षणेन **निमित्तेन** उद्देश्येन **तत्त्वदृष्टौ** किमिह तथ्यं ग्राह्यं किञ्चाग्राह्यमिति विवेके, **अवधानं** मनोऽवधारणं, **मिथ्यादृष्टौ** अहं-ममतामूलेऽविवेके च, **पराङ्मुखत्वं** बहिर्मुखीभावं **ध्वनतीति** । इत्थं चात्र निशा-जागरणशब्दाभ्यां क्रमेण रात्रि-निद्राक्षयरूपवाच्यार्थयोरुपस्थितिमात्रे तात्पर्यानुपपत्तौ जागरूकायां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लक्षकशब्दशक्तिव्यङ्ग्यं वस्तु पदे यथा-

"स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना,
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः ।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति ह हा हा देवि ! धीरा भव" ॥ ९८ ॥
[ ]

मिथ्यादृष्टि-तत्त्वदृष्टी बोधयित्वा मिथ्याज्ञानपराङ्मुखत्व-तत्त्वज्ञानौन्मुख्ये व्यज्येते इत्यनेकपदसापेक्षतया गौणवाक्यमूलोऽयं वस्तुध्वनिरिति ॥

एवं गौणशब्दशक्तिव्यङ्ग्यं पद-वाक्ययोरुदाहृत्य लक्षकशब्दशक्तिव्यङ्ग्यं क्रमप्राप्तं पदे लक्ष्यति-**यथा-स्निग्धश्यामले**ति-स्निग्धया-जलसम्बन्धेन सरसमसृणया, श्यामलया-द्रविडवनितोचितासितवर्णया कान्त्या चाकचिक्येन । लिप्तम्-आच्छुरितमाच्छादितं वा, वियत्-नभो यैस्ते, तथा वेल्लन्तः-जृम्भमाणास्तथा चलन्त्यः, प्रमदभरेण सविलासं स्फुरन्त्यो वा, बलाकाः-बकपङ्क्तयो येषु तादृशाः, **घनाः** मेघाः, एतेन नभसो दुरालोकत्वं व्यक्तं; दिशामपि दुःसहत्वमाह-**शीकरिणः** वृष्टिसम्पर्केण सूक्ष्मजलबिन्दुयुक्ताः, **वाताः** मन्दमन्दत्वमनेकदिगागमशालित्वं च बहुत्वेन सूच्यते; तर्हि गुहासु क्वचिन्निलीय स्थीयतां येन मेघदर्शनतादृशवातस्पर्शनाभ्यां रक्षा स्यादत आह-**पयोदानां** ये सुहृदः, अथवा पयोदाः सुहृदो येषां, तेषु सत्स्वेव शोभनहृदयत्वान्मयूराणाम्, **कलाः** अस्फुटमधुराः षड्जसंवादिन्यः, **आनन्दकेकाः** हर्षजनितास्तेषां शब्दविशेषाः, ताश्च सर्वं जलदसमयवृत्तान्तं स्मारयन्तीति; तथा स्वयमपि दुःसहाः, एवमुद्दीपनविभावोद्बोधितविप्रलम्भो रतेः परस्पराधिष्ठानत्वेन, विभावानां पूर्वोपदर्शितानां साधारण्य[ मुभयनिष्ठत्व ]मभिमन्यमान इतः प्रभृति प्रियां हृदय एव निधाय स्वात्मवृत्तान्तमाह-**कामं सन्त्वि**ति-एते यथा सन्ति ततोऽप्यधिकेन रूपेण भवन्तु, नो मनागपि बिभेमि, कुत इत्याह-**दृढम्** अत्यन्तं, कठोरं हृदयं यस्य [ रामशब्दार्थव्यङ्ग्यविशेषावकाशदायकं विशेषणमिदम् ] तादृशो **रामोऽस्मि** दाशरथिः सर्वदुःखसहनशीलोऽस्मि, अतः **सर्वं सहे** मेघादिकृतमुत्पातमवधीरयामि, **तु** किन्तु, **वैदेही कथं भविष्यति** किं करि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र प्रकरणात् तृतीयत्रिकनिर्देशाच्च रामे प्रतिपन्ने रामपदमनुपयुज्यमानं 'कठोरहृदय' इत्यनेन दर्शितावकाशं पितृमरण-सीतावियोगाद्यनेकदुःखभाजनत्वं लक्षयदसाधारणानि निर्वेद-ग्लानि-मोहादीनि व्यनक्ति ।

---

ष्यतीत्यर्थः, भवतेरिह क्रियासामान्यवाचकत्वात् । एतावदुक्त्वा तस्या असहनावस्थां सम्भाव्य हृदये स्थितां प्रत्यक्षवर्तिनीमिव मत्वा तामाह–ह हा हा देवि !, धीरा भव धैर्यं धारय, ह हा हा इति हा इत्यस्यैव दुःखावेशवशाद् विलम्बितमुच्चारणं दुःखातिरेकं व्यञ्जयति, यतस्त्वं देवी, अतो धैर्यधारणेऽपि समर्था भविष्यसीति सम्भावनाऽतो दुःखेन मा दीर्यस्व, अत्र सीताया भवनमेवासंभाव्यमिति मत्वा साधारणीकरणव्यापारेण हृदयनिहितां तां प्रति पूर्वोक्तसजलजलधराद्युद्दीपनविभावानामुभयोः साधारणत्वावधारणादिना स्मरणेन वैदेहीति सम्बोधनेन, कथं भविष्यतीति विकल्पपरम्परया च प्रत्यक्षीकृतां हृदयस्फुटनोन्मुखीं मत्वा ससम्भ्रममिदमाह–ह हा हा देवि ! धीरा भवेति व्याख्यानान्तरम् । अत्र किं व्यङ्ग्यं कस्य चेति दर्शयति–अत्र प्रकरणादित्यादिना–प्रकरणादेव वस्तुप्रतीतिः, किञ्च तृतीयस्य वैदेही तु कथं भविष्यति' इत्यस्य त्रिकस्य निर्देशाच्च वक्तरि रामे ज्ञाते रामपदोच्चारणं व्यर्थं सत् 'कठोरहृदयः' इत्यनेन दर्शितव्यङ्ग्यार्थस्यावकाशदानं यथा स्यात् तथा राज्यपरित्यागपूर्वकनिर्जनवनगमनजटावल्कलधारणपितृमरण–दयिताहरणादिजन्यदुःखसहनशीलत्वं तावतापि सम्भावितजीवितत्वं च लक्षयदसाधारणानि निर्वेदग्लानिमोहादीनि व्यनक्ति । तथा चात्र रामपदस्यैवोक्तानेकार्थान्तरलक्षकस्य व्यञ्जकत्वम् । लेपनसौहृदयोश्चेतनधर्मतया मेघे बाधाल्लिप्तसुहृत्पदयोर्व्यापनोपकारयोर्लक्षणलक्षणायां तत्तदतिशयो व्यङ्ग्यः, इतीह संसृष्टाभ्यामर्थान्तरसङ्क्रमितवाच्यध्वनिभ्यामुक्तरूपात्यन्ततिरस्कृतवाच्यध्वनेः सङ्करः । "तद्गेहं नतभित्तिमन्दिरमिदं लब्धावकाशं दिवः" [ इत्यादिपद्येऽग्रेऽध्यायान्ते व्याख्यास्यमाने ] इत्यत्र बुद्धिविषयतावच्छेदकत्वोपलक्षिततत्तद्धर्मावच्छिन्नवाचकेन तच्छब्देनैव प्रतीतिसौकर्येऽपि नतभित्तीति विशेषणवत् रामशब्दमहिम्नैव सिद्धे 'कठोरहृदय' इति विशेषणमर्थान्तरध्वनिं विकासयितुमित्युक्तपूर्वम्, तादृशविशेषणसाहाय्यमेव हि स्वानुकूलं व्यङ्ग्यमवगमयति, इतरथा रामपदं कौशल्यादशरथप्रीतिपात्रत्वजानकीलाभादिसौभाग्यरूपं विपरीतमर्था-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वाक्ये यथा—

'सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्॥ ६९॥
[ ]

इदं हि वाक्यमसंभवत्स्वार्थं सत्सादृश्यात् सुलभसमृद्धिसंभारभाजनतां लक्षयच्छूरकृतविद्यसेवकानां प्राशस्त्यं ध्वनति॥ २३॥

---

न्तरमेव कथं न व्यञ्जयेदिति विवेके प्रकटीकृतम्। अत्र च काव्यालङ्कारसारकारेण पर्यायोक्तालंकारप्रभवमेव सौन्दर्यमवधार्य ध्वनिस्तिरस्कृतः, तन्न निरवद्यम्, व्यङ्ग्यस्यात्र विच्छित्तिविशेषाधायित्वेन गुणीभावाभावात्, इत्यलं बहुना॥

लक्षकशब्दशक्तिगतं व्यङ्ग्यं वस्तु वाक्ये उदाहरति–वाक्ये यथा–सुवर्णपुष्पामिति–सुवर्णपुष्पमित्यपि क्वाचित्कः पाठः, स च चिनोतेर्द्विकर्मकत्वेन व्याख्येयः। त्रयः त्रय एव न चत्वार इत्यवधारणार्थं संख्यानिर्देशः, अन्यथा प्रदर्शितक्रमेणापि संख्याप्रतीतेः। त्रय इति शूरश्चेत्यादिपदेषु च विवक्षितेन पुंस्त्वेनैव पुरुषा इत्यर्थस्य प्रतीतौ 'पुरुषाः' इति तेषामेव पुरुषत्व [पौरुषवत्त्व]-प्रत्ययार्थम्, अन्ये त्वकार्यकरा इति भावः, त एव, सुवर्णं न तु ताम्रादि, पुष्पाणि–तरूणां पुष्पवत् प्रतिदिनं ग्राह्याणि, न तु दीनारवत् सकृत् ग्राह्याणि यस्यास्ताम्, पृथिवीं सम्पूर्णं भूमण्डलमेव, न त्वेकं नगरादिमात्रं, चिन्वन्ति उच्चिन्वन्ति, प्रत्यहं गृहीतसारां कुर्वते। के ते? इत्याह–शूरः पराक्रमेण दुर्घटकार्यकारी, कृता–अभ्यासादिना परं धाराधिरोहं नीता, विद्या–सर्वतत्त्वावबोधहेतुभूतं ज्ञानं येन, यश्च सेवितुं प्रभुमनुरञ्जयितुं, जानाति, सेवकः सेवाज्ञ इत्यनुक्त्वा यश्चेत्यादिरूपेण कथनमज्ञानत्वालौकिकत्वमनौचित्यावगणनादि च ध्वनयितुम्। शूरकृतविद्यवत् सेवाज्ञस्य निर्गुणस्यापि लाभप्राप्तिरिति त्रयश्चकाराः॥ अत्र किं व्यङ्ग्यमित्याह–इदं हि वाक्यमिति–अयमाशयः–इह पृथिव्याः सुवर्णपुष्पस्य तच्चयनस्य चाप्रसिद्धेः 'सुवर्णपुष्पाम्, चिन्वन्ति' इत्यनयोर्वाच्यार्थबाधे विपुलधनानायासोपार्जनयोर्लक्षणायां तेषां प्रकर्षः प्राधान्येन व्यज्यते, तत्र लक्षणायां च सत्सादृश्यं निमित्तम्। तथा च शूर–सूरि–सेवकाः सर्वत्र सुलभसमृद्धिसम्भारभाज इति ध्वनिः फलति। तथा चात्र पदद्वयस्य व्यञ्जकत्वेन वाक्यस्य व्यञ्जकत्वमिति॥ २३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थशक्तिमूलं व्यङ्ग्यमाह—

**वस्त्वलङ्कारयोस्तद्व्यञ्जकत्वेऽर्थशक्तिमूलः प्रबन्धेऽपि ॥ २४ ॥**

वस्तुनोऽलङ्कारस्य च प्रत्येकं वस्त्वलङ्कारव्यञ्जकत्वेऽर्थशक्तिमूलः। स च पद-वाक्ययोः प्रबन्धे च। इह चार्थः स्वतः संभवी, कविप्रौढोक्तिमात्रनिष्पन्नशरीरः, कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरो वेति भेदकथनं न न्याय्यम्, प्रौढोक्तिनिर्मितत्वमात्रेणैव साध्यसिद्धेः, प्रौढोक्तिमन्तरेण स्वतः संभविनोऽप्यकिञ्चित्करत्वात्,

---

इत्थं शब्दशक्तिमूलस्य भेदान् प्रदर्श्यार्थशक्तिमूलं व्यङ्ग्यं लक्षयितुं प्रवृत्तं सूत्रमवतारयति–**अर्थशक्तिमूलं व्यङ्ग्यमाहे**ति । वस्त्वलङ्कारयोरिति सूत्रं व्याख्याति–**वस्तुनोऽलंकारस्य** चेति–वस्तुनः–अभिधेयार्थस्य वस्तुव्यञ्जकत्वेऽलङ्कारव्यञ्जकत्वे च, तथाऽलङ्कारस्य वस्तुव्यञ्जकत्वेऽलङ्कारव्यञ्जकत्वे चेति प्रथमं चत्वारः प्रकाराः । अस्य त्रैविध्यं प्रत्येकस्येत्याह–**स च पद–वाक्ययोः प्रबन्धे चे**ति । अत्र काव्यप्रकाशादिकृद्भिः व्यञ्जकस्यार्थस्य त्रैविध्यमित्थं प्रतिपादितम्–"अर्थशक्त्युद्भवोऽप्यर्थो व्यञ्जकः संभवी स्वतः । प्रौढोक्तिमात्रात् सिद्धो वा कवेस्तेनोम्भितस्य वा ॥ वस्तु वाऽलंकृतिर्वाऽपि षड्भेदोऽसौ व्यनक्ति यत् ॥ वस्त्वलंकारमथवा तेनायं द्वादशात्मकः ॥" इति [उ० ४, का० ३९-४०] तद्वृत्तिश्च–"अर्थो द्विविधः, स्वतः संभवी, इदं प्रथमकल्पितश्च, ततः स्वतः सम्भवी न केवलं भणितिमात्रनिष्पन्नो यावद्बहिरप्यौचित्येन सम्भाव्यमानः, कविना प्रतिभामात्रेण बहिरसन्नपि निर्मितः, कविनिबद्धेन वा वक्त्रेति द्विविधोऽपर इति त्रिविधो वस्तु वाऽलंकारो वाऽसाविति षोढा व्यञ्जकः, तस्य वस्तु वाऽलंकारो वा व्यङ्ग्य इति द्वादशभेदोऽर्थशक्त्युद्भवो ध्वनिः" इति । इत्थञ्च तैर्व्यञ्जकस्यार्थस्य स्वतः संभवित्वादिना यो भेदः कृतः सोऽनावश्यक इत्याह— **इह चार्थः स्वतः संभवी**त्यादिना, स्वतः संभवीत्यादेः स्वरूपमुपरि तत्कारिकावृत्तौ स्पष्टमेव । तत्खण्डनमाह–**इति भेदकथनं न न्याय्य**मिति–अर्थस्य यदिदं भेदत्रयमुक्तं तन्न युक्तमित्यर्थः । कुत इत्याह–**प्रौढोक्तिनिर्मितत्व**-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कविप्रौढोक्तिरेव च कविनिबद्धवक्तृप्रौढोक्तिरिति किं प्रपञ्चेन ?।

---

**मात्रेणैव साध्यसिद्धेरिति**–योऽर्थः प्रौढोक्तिनिर्मितः स स्वतः सम्भवी वा भवतु, कविप्रौढोक्तिमात्रसिद्धो वा भवतु, तन्निबद्धवक्तृप्रौढोक्तिसिद्धो वा भवतु, सर्वत्र प्रौढोक्तिनिर्मितत्वमस्त्येवेति सर्वसंग्राहकमेकमेव रूपमाश्रयणीयं लाघवादिति भावः। स्वतः सम्भविन्यपि प्रौढोक्तिनिर्मितत्वस्यावश्यकत्वमित्याह–**प्रौढोक्तिमन्तरेणेति**–अचमत्कारित्वेन रूपेण निबद्धस्य स्वतः सम्भविनोऽप्यर्थस्य न चारुत्वाश्रयत्वमिति तत्राप्युक्तेः प्रौढिरपेक्षितैवेति भावः। किञ्च कविनिबद्धप्रौढोक्तिरपि कविप्रौढोक्तेर्नातिरिच्यत इत्याह–**कविप्रौढोक्तिरेव चेति**। ततश्चालं बहुभिः प्रपञ्चैः, प्रौढोक्तिनिर्मितत्वमात्रमर्थेऽव्यभिचरितमाश्रयणीयमिति। रसगङ्गाधरे पण्डितराजेनाऽप्युक्तं द्वितीयाननस्यारम्भे ध्वनिभेदगणनाप्रस्तावे–"प्रतिभानिर्मितत्वाविशेषाच्च, कवितदुम्भितवक्तृप्रौढोक्तिनिष्पन्नयोरर्थयोर्न पृथग्भावेन गणनोचिता, उम्भितोम्भितादेरपि भेदप्रयोजकतापत्तेः, न च तस्यापि कव्युम्भितत्वानपायात् तत्प्रयोज्यभेदान्तर्गतत्वमेवेति वाच्यम्, प्रथमोम्भितस्यापि लोकोत्तरवर्णनानिपुणत्वलक्षणकवित्वानपायात् पृथग्भेदप्रयोजकतानुपपत्तेरिति॥" अयमाशयः–यद्यपि नहि खलु कवेः कविनिबद्धस्येव रागाद्याविष्टता, अतः कविप्रौढोक्त्यपेक्षया तन्निबद्धवक्तृप्रौढोक्तिरधिकं सहृदयचमत्कारमावहतीति तस्य पृथग्गणना कृता। किञ्च वृद्धोक्तिविषयाच्छिशूक्तिविषय इव कव्युक्तिविषयात् तन्निबद्धोक्तिविषयश्चमत्कारकारी, ततः परं च प्रणिधानप्रतीतिकतया चमत्कारस्यस्थगनाच्च कविनिबद्धनिबद्धवक्त्रादेः पृथग्गणनमिति भेदत्रयस्य काव्यप्रकाशकृतोक्तस्य समर्थनं सम्भाव्यते, तथापि प्रौढोक्तिमात्रनिर्मितत्वेन व्यापकेन रूपेण तेषां संकलनान्न पृथग्गणना कृतेति सर्वं सुस्थम्, तत्र स्वतः संभवित्वादिना त्रिविधस्यार्थस्योदाहरणानि यथा कविप्रौढोक्तिमात्रेण स्वीकृतेन गतार्थानीति तदुदाहरणप्रदर्शनपुरःसरमुच्यते। तत्र स्वतः संभवित्वं नाम भणितिमात्रनिष्पन्नशरीरत्वाभावत्वे सति बहिरप्यौचित्येन प्रतीयमानत्वम्, तच्च यथा–"सिहिपिच्छकण्णऊरा, जाया वाहस्स गव्विरी भमई। मुत्ताहलरइअपसाहणाण मज्झे सवत्तीणं॥" [गा० स० श० २. ७३.] शिखिपिच्छकर्णपूरा जाया व्याधस्य गर्विणी भ्रमति। मुक्ताफलरचितप्रसाधनानां मध्ये सपत्नीनाम्॥" इति संस्कृतम्। शिखिनः–मयूरस्य,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पिच्छमेव कर्णपूरः–कर्णाभरणं यस्याः सा, व्याधस्य जाया, मुक्ताफलैः–मौक्तिकैः, रचितानि–विन्यस्तानि, प्रसाधनानि–अलङ्करणानि याभिस्तासां सपत्नीनां मध्ये, **गर्विणी** साभिमाना, **भ्रमति** सञ्चरति, इतस्ततो गच्छन्ती स्वकीयं गर्वं प्रकटयति । अत्र स्वतः सम्भवि गर्विव्याधवधूतादृशसपत्नीजनमध्यभ्रमणलक्षणं वस्तु, सपत्नीनां दिवसेषु पत्युः संभोगैकलग्नमनस्त्वाभावात् हस्तिनोऽपि हन्तुं क्षमतां द्वारीकृत्य, तासां संभोगव्यग्रताभावात् स्वकीयप्रसाधनविरचनमात्रपरत्वव्यञ्जनपूर्वकं तासां दौर्भाग्यातिशयं, स्वस्या वासरेषु तु साम्प्रतं तस्य निरन्तरस्मरसमरपरायणस्य क्षामतयाऽलब्धभूयोऽवकाशतया च सुहिंसान् गृहपर्यन्तचरान् वा मयूरानेव मारयितुं शक्तिरिति द्वारीकृत्य स्वसौभाग्यप्रकर्षं च वस्तु व्यञ्जयति, गर्वश्च बाल्याविवेकादिनाऽपि भवतीति नात्र स्वोक्तिसद्भावः शङ्क्यः । अत्र चास्य श्लोकस्य ध्वनिर्यथा यथा विचार्यते तथा तथा व्याधवध्वाः सौभाग्यातिशयः प्रतीयते । इत्थं स्वतःसम्भविवस्तुव्यञ्जनात्मकोऽर्थशक्त्युद्भवोऽयं ध्वनिरिति ॥

अथ कविप्रौढोक्तिमात्रनिष्पन्नशरीरस्यार्थस्य व्यञ्जकत्वं यथा–"सज्जेइ सुरहिमासो न या पणामेइ [ न दाव अप्पेइ ] जुअइजणलक्खसहे । अहिणवसहयारमुहे नवपल्लवपत्तले, अणंगस्स सरे ॥" [ ] अत्र 'न या पणामेइ' इत्यस्य स्थाने कोष्ठस्थः पाठ एव समुपलभ्यते बहुत्र, विवेकव्याख्यारीत्याऽपि स एव पाठः समुन्नीयत इति तदनुसारमेव संस्कृतमाश्रीयते, "सज्जयति सुरभिमासो न तावदर्पयति युवतिजनलक्ष्यसहान् । अभिनवसहकारमुखान् नवपल्लवपत्रलाननङ्गस्य शरान् ॥" इति संस्कृतम् । **सुरभिमासः** चैत्रमासः, युवतिजन एव लक्ष्यं–शरव्यं, तत्र सहान्–समर्थान्, 'मुहे' इति पाठे ध्वन्यालोकादिधृते च मुखानिति च्छाया, तथा च युवतिजनैर्लक्ष्यं–भयभीततया रमणीयतया वा दर्शनीयं, मुखम्–अग्रभागो येषां तानिति व्याख्या, नवपल्लवाः–किसलया एव, पत्राणि–पक्षास्तानि लान्ति–गृह्णन्तीति तान्, तथा अभिनवः–नवमुकुलितः' सहकारः–अतिसौरभाम्रः, मुखम्–आदिर्येषां तान्, **अनङ्गस्य** कामस्य, **शरान्** बाणान्, **सज्जयति** निर्माति, प्रसाधयति वा, केवलं न तावत् **अर्पयति** कामाय ददातीत्यर्थः । इहाचेतनो वसन्तोऽनङ्गस्य सखा शरनिर्माताऽनङ्गो धन्वीत्यादिवस्तुरूपोऽर्थः कविप्रौढोक्तिमात्रेण केवलं सिद्धः 'सज्जयति केवलं न तावदर्पयति, इत्येवंविधया समर्पयितव्यवस्त्वर्पणकुशलयोक्त्या, यतः सहकारोद्भेदिनी वसन्तदशा उक्ता, अतोऽनर्पितेष्वपि यद्येवं मन्मथः प्रतपति तर्हि अर्पितेषु तेषु कियद्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र वस्तुनो वस्तुव्यञ्जकत्वं पदे यथा-

"तं ताण सिरिसहोअररयणाहरणम्मि हिअयमिकरसं।
बिंबाहरे पिआणं निवेसियं कुसुमबाणेण" ॥ ७० ॥

[ विषमबाणलीला ]

---

विजृम्भिष्यत इति मन्मथोन्माथकस्यारम्भं क्रमेण गाढगाढीभविष्यन्तं वस्तुरूपं व्यनक्तीति ॥

कविनिबद्धवक्तृप्रौढोक्तिमात्रसिद्धो यथा-"शिखरिणि क नु नाम कियच्चिरं, किमभिधानमसावकरोत् तपः। तरुणि! येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः॥" [ ] हे सुमुखि!, असौ अचिन्त्यसौभाग्यमहिमा, शुकस्य शावकः-शिशुः, क नु नाम शिखरिणि कस्मिन्नज्ञातनामप्रभावे पर्वते, किमभिधानं किन्नामकमज्ञातपूर्वं सर्वैरित्यर्थः, तपः, अकरोत्, येन तव अधरवत् पाटलं-श्वेतरक्तं, बिम्बस्य-तुण्डिकेर्याः, फलं, दशति स्वादयतीत्यर्थः। इह शीघ्रसिद्धिदानि श्रीशैलादिप्रदेशदेवशरत्सहस्रसमयपञ्चाग्निप्रभृतितीव्रतपांसि विना यदा त्वदधरसदृशबिम्बफलस्याप्यास्वादो दुर्लभः, तर्हि का कथा त्वदधरस्येति व्यङ्ग्यं प्रति वाच्यार्थ उपसर्जनीभूत इति विवक्षितान्यपरवाच्यो ध्वनिः। दंशनमिह निरन्तरास्वादनमात्रं, न तूदरम्भरिव्यापारः, तावतापि तस्य तपोऽतिरेकेण परिणता रसज्ञता, शावक इति शब्दमहिम्ना तारुण्याद्युचितकाललाभोऽपि तपःप्रभावादेव। "कामिनामधरास्वादः सुरतादतिरिच्यते" इत्युक्तेश्चादुक्ताऽधरास्वादसमीहा च पुनः सूच्यते, तथा चानुरागिणः स्वाभिप्रायख्यापनवैदग्ध्यचाटुरचनात्मकभावोन्मीलनं व्यङ्ग्यम्। अत्र च कविनिबद्धस्य वक्तुः प्रौढोक्त्या सिद्धं वस्तु वस्तुव्यञ्जकमिति स्पष्टमेव ॥

अत्र चोदाहरणत्रयेऽपि प्रौढोक्तिरेव वस्तुव्यञ्जकत्वेन स्वदते, शिखिपिच्छेत्यत्र स्वभावोऽपि कविप्रौढोक्तिहेतुक एवास्वादं लभते, विवेचितं चैतज्जात्यलंकारवर्णनप्रघट्टे। काव्यस्य कविरेव कर्त्ता, स एव चान्यापदेशेन वक्ताऽपि, वक्ता च कविनैव निबद्ध इति कवेरेव तथाविधा अर्था उल्लिखिता इति स्वतः संभविस्वम्, कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नशरीरत्वं चार्थस्य न वाच्यमिति सिद्धम्।

अथ प्रकृतमनुसरामः, वस्तुनोऽलंकारस्य च प्रत्येकं वस्त्वलंकारव्यञ्जकत्वं सूत्रविषयः, तत्र वस्तुनो वस्तुव्यञ्जकत्वं पदगतमुदाहरति-"तं ताण०" इति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अत्र कुसुमबाणेनेति पदं कामदेवस्य मृदूपायसौन्दर्यं प्रकाशयति । वाक्ये यथा–**

"तत् तेषां श्रीसहोदररत्नाहरणे हृदयमेकरसम् । बिम्बाधरे प्रियाणां निवेशितं कुसुमबाणेन ॥" इति संस्कृतम् । आनन्दवर्धनाचार्यकृते विषमबाणलीलाख्ये ग्रन्थे–असुराणां पराक्रमे विजृम्भमाणे सति कामदेवस्य तद्विषयेऽपि विक्रमकौशलं वर्णितमेतेन पद्येन । श्रीसहोदररत्नस्य–कौस्तुभमणेः, आहरणे–आदाने, **एकरसम्**० एकतानं तत्परमिति यावत्, **तेषाम्**० असुराणां पातालवासिनां, यैः पुनरिन्द्रविमर्दनादि किं किं न कृतमिति भावः, **हृदयं** मनो यत् आसीत् "**तत्**; अथवा यत् तेभ्यस्तेभ्योऽतिदुष्करेभ्योऽप्यकम्पनीयव्यवसायं तदिति, **कुसुमबाणेन** कामेन, **प्रियाणां** स्वदयितानां, बिम्बफलतुल्येऽधरे, **निवेशितम्** आसञ्जितं तथा च तदवलोकन-तत्परिचुम्बन-तद्दशनमात्रकृतकृत्यताभिमानयोगि कृतमित्यर्थः । अत्र केन किं व्यङ्ग्यमिति दर्शयति–**अत्र कुसुमबाणेनेति पदमिति**–महापराक्रमैरपि देवैः स्वनिश्चयान्निवर्तयितुमशक्यानामसुराणामपि हृदयमन्याभिमुखं विदधतः कामदेवस्य मृदूपायसौन्दर्यं वस्तु 'कुसुमबाणेन' इति पदेन व्यङ्ग्यमिति भावः । ध्वन्यालोके चात्रोपमालङ्कारध्वनिरित्युक्तम्, तथाहि–द्वितीयोद्योते 'उपमाध्वनिर्यथा' इति प्रकृत्य 'धीराणां रमइ' इत्यादि परकीयपद्यमुदाहृत्य, यथा वा ममैव विषमबाणलीलायामसुरपराक्रमे कामदेवस्येति प्रकृत्येदं पद्यमुक्तम्, व्याख्यातं च टीकाकृद्भिः–'अत्र वाच्यातिशयोक्त्या कौस्तुभमणिप्रियाबिम्बाधरयोरुपमा ध्वन्यते, वस्तुतः कौस्तुभमणितुल्यो बिम्बाधर इति पार्यान्तिकप्रतीतेः, अत एव न रूपकध्वनिस्तत्रोपमानस्यारोप्यमाणत्वेनावास्तविकत्वादिति । स्वमते चोक्तरूपवस्तुध्वनेरेव चमत्कारकारितयाऽलङ्कारातिशायित्वमिति यत्कृतं चारुत्वं तदेव व्यङ्ग्यमित्याश्रित्य वस्तुध्वनिरुक्तः । किञ्च यदि 'सिरिसहोअररयणाहरणम्मि' इति पदस्य 'श्रीसहोदररत्नाभरणे' इति च्छाया समाश्रीयते तदा कौस्तुभाभरणे–हरौ मोहिनीरूपधारिणि, एकरसम्–एकतानीभूतमसुराणां हृदयं स्वस्वप्रियाबिम्बाधरे निवेशितं कामदेवेनेति तदर्थः प्रतीयते, तथा च पूर्वव्याख्यानतो वैपरीत्येन नोपमालङ्कारसम्भव इति मृदूपायसौन्दर्यमेव व्यङ्ग्यमिति सुस्थमेव । वस्तुतस्तु यस्य कवेरिदं पद्यं तेन स्वत एवालङ्कारव्यञ्जकत्वेन व्याख्यातमिति तदेव समाश्रयणीयमिति प्रतीमः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"तापी नेयं नियतमथवा तानि नैतानि नूनं
तीराण्यस्याः सविधविचलद्वीचिवाचालितानि।
अन्यो वाऽहं किमथ न हि तद्वारि वेल्लद्वलाकं
यत्तत्पल्लीपतिदुहितरि स्नातुमभ्यागतायाम्" ॥ ७१ ॥
[ ]

युज्यते चैतत्, अन्यथा 'बिम्बाधरे' इति पदस्य न किमपि प्रकृतोपयोगित्वं सम्भवति, मोहिनीरूपासक्तं चेतः स्वप्रियाऽधरासक्तं कृतमिति न सम्भवत्सम्बन्धम्, तथा च वस्तुना वस्तुध्वनेरुदाहरणान्तरमेव देयमिति प्रतीमः। तच्च यथा-"अलससिरोमणि धुत्तानामग्गिमो [धुत्ताणमग्गिमो] पुत्ति! धन[धण]-समिद्धिमओ। इअ भणितेन नतांगी [भणिएण नयंगी] प्रफुल्लविलोअना[णा] जाआ॥" [ ] "अलसशिरोमणिर्धूर्त्तानामग्रिमः पुत्रि! धनसमृद्धिमयः। इति भणितेन नताङ्गी प्रफुल्लविलोचना जाता"॥ इति संस्कृतम्। पतिंवरां गणिकां प्रति धात्र्याः प्ररोचनायोक्तिः पूर्वार्धम्, उत्तरार्धं तु कवेर्वाक्यम्। हे पुत्रि! अयं वरोऽलसानां-निरुद्योगानां शिरोमणिः-श्रेष्ठो, धूर्त्तानां चाग्रिमः-प्रथमगणनीयः, प्रचुरधनसमृद्धिश्च। इति भणिते-भाषिते, लज्जया नताङ्गी काचित् प्रफुल्ले हर्षविकसिते विलोचने नेत्रे यस्यास्तादृशी जाता, इत्यर्थः। अत्रालसत्वेनान्यत्र गन्तुमनिच्छुः, धूर्तत्वेन रतेष्वनाहतगुणः' संभोगेष्वतृप्तश्च, नताङ्गीत्वेन स्वस्या मानिनीत्वं नमस्कारद्वारा बोध्यते, धनसमृद्धिमत्तया कृपण इति निर्धाय तेनान्यासामनाकर्षणीय इति ममैवोपभोग्य इति वस्तु व्यज्यते, तद्विषयकं च कुमार्या ज्ञातं तदलसशिरोमणित्वादिश्रवणाविशिष्टेन प्रफुल्लनयनत्वेन वस्तुना स्वहेतुहर्षव्यञ्जनद्वारेण तत्कारणीभूतं सामाजिकेषु व्यज्यते। अत्र प्रफुल्ललोचनेति पदार्थेनैव, ममैवोपभोग्य इति व्यङ्ग्यमिति पदगतत्वमपि॥

वाक्यगतं वस्तुना वस्तुव्यञ्जनमाह-**तापी नेयमिति**। पल्लीपतेर्घोषरक्षकस्य दुहितरि स्नातुमभ्यागतायां सत्यां [या तापी सूर्यप्रसूतैतन्नाम्नी नदी आसीत् सा] इयं तापी न इति नियतम्, अथवाऽस्तु सैवेयं, किन्तु अस्याः, **तानि** तत्कृतसौभाग्यभाञ्जि, एतानि **तीराणि** कूलभूमयो नूनं नैव, कीदृशानि तीराणि? सविधे-समीपे, विचलद्भिः-पौनःपुन्येनोच्छलद्भिः, वीचिभिः, वाचालितानि-शब्दायितानि, अथवा तान्यपि चेत् तान्येव, तर्हि अहम् [एव] वा स्त्वन्यः,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र वाक्यार्थेन वस्तुमात्ररूपेणाभिलषणीयजनकृतमेव भावानां हृद्यत्वं न स्वत इत्येतद्वस्तु व्यज्यते।

वस्तुनोऽलङ्कारव्यञ्जकत्वं पदे यथा–

"धीराण रमइ घुसिणारुणम्मि न तहा पियाथणुच्छंगे।
दिट्ठी रिउगयकुंभत्थलम्मि जह बहलसिंदूरे" ॥ ७२ ॥
[ ]

अत्र धीराणामिति पदार्थो वस्तुमात्ररूपः कुचयोः कुम्भस्थलस्य चोपमालङ्कारं ध्वनति।

---

अथ अथवा, वेल्लन्त्यः–इतस्ततः संचरन्त्यो बलाकाः–बकपङ्क्तयो यत्र तादृशं, तत् पूर्वोक्तसमयसत्त्वसौभाग्यशालि, वारि ताप्या जलं, किं न इति संदेह इति भावः। अयमाशयः–तस्याः स्नानसमये यथा ताप्याः स्वरूपमाकर्षकमासीत्, यथा वा तदीयतीराणि मनोहराण्यासन्, यथा चाहं तत्र निरतिशयानन्द-मनुभवन्नासम्, यथा वा तदीयं वारि हृदयहारि प्रतीयते स्म, तथा साम्प्रतम-प्रतीयमानत्वात् तन्नेति निश्चिनोमीति। अत्र किं व्यङ्ग्यमित्याह–वाच्यार्थेन वस्तुमात्ररूपेणेति–वाच्याशयः पूर्वमुपदर्शितो वस्तुरूप एव, तेन चाभिल-षणीयजनसम्पर्ककृतमेव सर्वेषां भावानां हृद्यत्वमिति वस्तु व्यज्यत इति भावः॥

वस्तुनोऽलङ्कारव्यञ्जकत्वं पदे पदगतमुदाहरती–"धीराण रमइ०" इति। "धीराणां रमते घुसृणारुणे न तथा प्रियास्तनोत्सङ्गे। दृष्टी रिपुगजकुम्भस्थले यथा बहलसिन्दूरे॥" इति संस्कृतम्। अत्र ध्वन्यालोकादौ धीराणामित्यस्य स्थाने वीराणामिति पाठः, स एव च सूपयुक्तः, वीराणां दृष्टिः, घुसृणैः–कुङ्कुमैः, अरुणे–शोणे, प्रियायाः स्तनोत्सङ्गे–कुचतटे, न रमते–नानन्दमनुभवति, यथा बहलम्–अत्यर्थं सिन्दूरं यत्र तादृशे रिपोर्गजानां कुम्भस्थले रमते, वीराणां हि स्वभाव एवायं यत् शृङ्गाररसादधिकं वीररसपक्षपातित्वमिति शृङ्गारविभावाधिकं वीरविभाव एव तेषां हृदयं चमत्करोतीति, "कुङ्कुमम्। जागुडं दीपनं घस्रं सौरभं घुसृणं च तत्।" इति त्रिकाण्डशेषः। अत्र "प्रियास्तनतटाद्रिपुगज-कुम्भस्थलस्यातिशयमनोरमत्वरूपो व्यतिरेको वाच्यः, तेन च प्रियास्तनतटरिपुगज-कुम्भस्थलयोरुपमा व्यज्यत इति ध्वन्यालोककारमतं न सम्मतमिति ध्वनयन् स्वमतमाह–अत्र धीराणामिति पदार्थ इति। तथा च वस्तुनाऽलङ्कारध्वनि_

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वाक्ये यथा–

"पुत्रक्षयेन्धनघनप्रविजृम्भमाण-
स्नेहोत्थशोकविषमज्वलनाभितप्तः।
प्रालेयशीतलममंस्त स बाह्यवह्नि-
मह्नाय देहमथ संविदधे सरित्सात्" ॥ ७३ ॥ [ ]

अत्र वसिष्ठः पुत्रक्षयोपतप्तोऽग्निं प्रविष्टोऽपि न तेन दग्ध इत्ययं

रेवायमिति स्वमतं स्थापितम्, व्यतिरेकस्य च वाच्यतया न ध्वनित्वम्। न चालङ्कारेणालङ्कारध्वनिरेव कुतो न स्वीक्रियते इति वाच्यम्, प्रियास्तनतटादतिशयेन गजकुम्भस्य मनोरमत्वे तेषां धीरत्वमेव कारणमिति व्यतिरेकापेक्षया तदर्थस्यैवोपमालङ्कारव्यञ्जकत्वौचित्यात्। तत्र ध्वन्यमानोपमा प्रियाकुचकुड्मलाभ्यां सकलजनत्रासकरेष्वपि शात्रवेषु मत्सरोद्यतेषु गजकुम्भस्थलेष्विष्टा, तद्दर्शनरतिमयानामिव प्रियाकुचेषु वीराणां तत्र बहुमान इति सैव वीरता [धीरता]-ऽतिशयचमत्कारं विधत्त इत्युपमायाः प्राधान्यमिति ध्वन्यालोकटीकायाम्॥

वस्तुनोऽलङ्कारव्यञ्जकत्वं वाक्ये यथा–पुत्रक्षयेन्धनेति–पुत्राणां क्षयः प्रणाश एव, इन्धनं–काष्ठं, तेन घनम्–अत्यन्तं, प्रविजृम्भमाणः–वर्धमानो यः, स्नेहोत्थः– पुत्रगतप्रेमप्ररूढः, शोकः–प्रियनाशविषयको मन्युः, स एव विषमः–कठिनः, ज्वलनः–अग्निः, तेन अभितप्तः–पीडितः, स वशिष्ठः, बाह्यवह्निं लौकिकसाधनसम्भूतवह्निं, प्रालेयशीतलं हिमवच्छीतम्, अमंस्त मन्यते स्म, अथ अह्नाय झटिति, देहं कायं, सरित्सात् नद्यधीनं, विदधे चक्रे। वसिष्ठस्य पुत्रशतं नष्टं तच्छोकशान्तयेऽग्निप्रवेशमनादृत्य सरित्प्रवेशमेव तत्तापशान्तये स्वीचकारेत्यर्थः, अग्निप्रवेशानादरकारणं च तस्यान्तस्तापापेक्षया प्रालेयवच्छीतत्वम्। अत्र वाक्यार्थरूपेण वस्तुना व्यतिरेकालङ्कारो व्यङ्ग्यः, तदाह–अत्र वसिष्ठः पुत्रक्षयोपतप्त इति। अग्निं प्रविष्टोऽपीति बाह्यमग्निं प्रालेयशीतलममंस्तेति वाक्येन तस्याग्निप्रवेशोऽपि विज्ञायते, विना प्रवेशं तस्य प्रालेयशीतलत्वज्ञानाभावात्। व्यतिरेकालङ्कारस्य स्वरूपमाह-शोकस्य बाह्यवह्नेराधिक्यमिति। विवेके वस्तुनोऽलङ्कारध्वनिप्रदर्शनाय पदविषयमुपमारूपमलङ्कारं वृत्युक्तं समर्थ्यार्थान्तरन्यासध्वनिः पदगत इत्थमुदाहृतः–"हिअयट्ठियमन्नुं खुअ अणरुट्ठमुहं पि मं पसायंत। अवरद्धस्स वि ण हु दे बहुजाणय रूसिउं सक्कं॥ [ ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वाक्यार्थो वस्तुस्वभावः शोकस्य बाह्यवह्नेराधिक्यमिति व्यतिरेकालङ्कारं ध्वनति ।

---

इति । "हृदयस्थितमन्युमरुष्टमुखीमपि मां प्रसादयन् । अपराद्धस्यापि न खलु ते बहुज्ञ! रोषितुं शक्यम् ॥" इति संस्कृतम् । हे बहुज्ञ! नानाविधानुनयानां पराशयस्य च विज्ञ, हृदये स्थितः-गुप्तः, न तु प्रकटितः, मन्युः-क्रोधो यया ताम्, तथा अरुष्टं-रोषरहितं मुखं यस्याः, तथाविधामपि मां यतस्त्वं प्रसादयन्नसि, अथवा तथाविधामपि प्रसादयन् हे बहुज्ञेति सम्बोधनमेव, अतोऽपराद्धस्य कृतागसोऽपि ते तत्रोपरि इति शेषः, खलु निश्चयेन मया रोषितुं कोपितुं, न शक्यमिति पदार्थः । अत्र खण्डिता सती वैदग्ध्यानुनीता नायिका तं प्रत्यसूयां व्यञ्जयन्ती इत्थमाह । अत्र बहुज्ञेत्यामन्त्रणार्थः विशेषतामागतः, अनन्तरं तु तदर्थपर्यालोचनवशात् यत् सामान्यरूपं तादृशबहुज्ञोपरि क्रोधाकरणाशक्यत्वं प्रतीयमानं तदेव तस्य विशेषस्य समर्थकं सत् विशेषतश्चमत्कारकारि प्रतीयत इति यः कश्चिद् बहुज्ञो धूर्तः, स स्वापराधमेवमेवाच्छादयितुं प्रभवतीत्यमुनार्थेन त्वमात्मनि मम मानापनोदननिमित्तकं बहुमानं मा ग्रहीरित्यपि व्यज्यते, परं तु अर्थान्तरन्यासालङ्कार एव मुख्यो व्यङ्ग्यः ॥

उत्प्रेक्षाध्वनिर्यथा-"चन्दनासक्तभुजगनिःश्वासानिलमूर्च्छितः । मूर्च्छयत्येष पथिकान् मधौ मलयमारुतः ॥" चन्दने-श्रीखण्डे, आसक्तानां-संलग्नानां, भुजगानां निःश्वासानिलैः-श्वासवातैः, मूर्च्छितः-वर्धितः, एष मलयानिलः-दक्षिणपवनः, मधौ-वसन्ते, पथिकान्-अध्वगान् वियोगिनः मूर्च्छयति-सम्मोहयति, इत्यर्थः । इह वसन्ते मलयानिलस्य पथिकमूर्च्छकत्वं वस्तुतो मदनकदनविधायित्वेनैव सम्भवत् चन्दनतरुलग्नसर्पनिःश्वासवातवर्द्धितत्वेन सम्भावितम्, इवादिशब्दश्चोत्प्रेक्षावाचको नोक्त इत्यखिलवाक्यार्थव्यङ्ग्योत्प्रेक्षालङ्कारध्वनिः, विषसंसर्ग-मन्तरेण हि मलयानिलस्य मूर्च्छाजनकत्वमसंभवीति स तादृशसंसर्गवत्तेनोत्प्रेक्षितः ॥

न चैवंविधे विषये इवादिशब्दप्रयोगमन्तरेणासमाबद्धतैवेति वाच्यम्, विनाऽपीवादिप्रयोगमन्यत्राप्युत्प्रेक्षादर्शनात्, तथाहि-"ईसाकलुसस्स वि तुह मुहस्स णणु एस पुण्णिमायंदो । अज्ज सहिसत्तणं पाविऊण, अंगि च्चिअ न माइ ॥" इति [ ] "ईर्षाकलुषस्यापि तव मुखस्य नन्वेष पूर्णिमाचन्द्रः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अद्य सदृशत्वं प्राप्य अङ्के एव न माति ॥" इति संस्कृतम् । अयि मनस्विनि! एष दृश्यमानः, **पूर्णिमाचन्द्रः** राकासुधाकरः, **ईर्ष्यया**–मद्विषया, सपत्नीविषया वाऽक्षमया, **कलुषस्य**–शोणिमाविलस्यापि [का कथा प्रसन्नस्य] तव **मुखस्य, सदृशत्वं** साम्यम्, **अद्य** इदानीं **प्राप्य** लब्ध्वा, **ननु** निश्चितम्, **अङ्के** स्वावयवे, **न मात्येव,** अपि तु दश दिशः प्रकाशैः पूरयतीवेत्यर्थः। त्वन्मुखं तु ईर्षया क्षणलब्धप्रसरया चन्द्रोभवति, वस्तुतस्ततोऽधिकमिति हृद्यम्, इति मनोरथानामप्यपथमिदमित्यपिशब्दार्थः। अन्योऽप्यलभ्यं लब्ध्वाऽत्यर्थं मुदितोऽतोऽङ्के न मातीति प्रसिद्धिः। अत्र पूर्णचन्द्रेण दिशां पूरणं स्वभावसिद्धमेवमुत्प्रेक्ष्यते, अत्र दश दिशः पूरयतीवेत्युत्प्रेक्षा चेवादिशब्दाभावात् प्राधान्येन व्यज्यते ॥

नन्वत्रोत्प्रेक्षावाचको वितर्कोपस्थापको ननुशब्द एवास्तीति सा कथं व्यङ्ग्या स्यादिति चेत्? उदाहरणान्तरं गृहाण, तथाहि—

"त्रासाकुलः परिपतन् परितो निकेतान्, पुंभिर्न कैश्चिदपि धन्विभिरन्वबन्धि।
तस्थौ तथापि न मृगः क्वचिदङ्गनानामाकर्णपूर्णनयनेषुहृतेक्षणश्रीः ॥
[शि० व० स० प० श्लोक–२६]

श्रीकृष्णस्य ससैन्यस्य हस्तिनापुरयात्रायां मार्गे सेनासन्निवेशसमये रैवतकपर्वते वर्णनमिदम्—**त्रासाकुलः** बहुजनसम्मर्ददर्शनजन्यभयेन व्याकुलः, अत एव **निकेतान्** सेनासन्निवेशपटगृहान्, **परितः** सर्वतः, **परिपतन्** धावन्, **मृगः** हरिणः, यद्यपि **कैश्चिदपि धन्विभिः** धानुष्कैः, **पुंभिः** पुरुषैः, सैनिकैः **न अन्वबन्धि** नानुबद्धः, नान्वसारि वा, तथापि **अङ्गनानाम्** अवरोधजनानाम्। **आकर्णपूर्णाः**–श्रवणपर्यन्तं व्याप्ता आकृष्टो वा, **नयनान्येव, इषवः**–बाणास्तैः, **हृता**–क्षिप्ता, **ईक्षणयोः**–नेत्रयोः, **श्रीः**–शोभा सर्वस्वभूता यस्य तथाभूतः सन्, **क्वचित्** कुत्रापि, **न तस्थावि**त्यर्थः। अत्र स्वाभाविकादेव त्रास-चापलयोगादसौ न क्वचिदपि तस्थौ, तथापि तत्रोत्प्रेक्षा ध्वन्यते। अत्र चोत्प्रेक्षावाचकं किमपि नास्तीति ध्वनिरेव स्वीकार्या। जनालोकनोत्थभयहेतुकस्य मृगानवस्थानस्याङ्गनापाङ्गेषु हृतिहेतुकत्वोत्प्रेक्षणाद्धेतूत्प्रेक्षा, सा च व्यञ्जकाप्रयोगात् प्रतीयमाना हेतोश्च विशेषणगत्योक्तत्वात् काव्यलिङ्गमिति संकरः। नन्वेतदप्यसम्बन्धमस्तु, न, शब्दार्थव्यवहारे साम्प्रदायिकप्रसिद्धेरेव बलवत्त्वात्, तत्रास्योत्प्रेक्षाध्वनित्वेन प्रसिद्धत्वात् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दीपकध्वनिर्यथा-"मा भवन्तमनलः पवनो वा वारणो मदकलः परशुर्वा। वज्रमिन्द्रकरविप्रसृतं वा स्वस्ति तेऽस्तु लतया सह वृक्ष ! ॥" [ ] हे वृक्ष! भवन्तम्, अनलः-दाववह्निः, पवनः-वातः, मदकलः-मदमत्तः, वारणः-हस्ती, परशुः-कुठारो वा, किञ्च इन्द्रकरात्-शक्रहस्तात्, विप्रसृतं-निःसृतं, वज्रं वा मा वधिष्ट, लतया-स्वाश्रितया प्रियात्वेनोपचरितया सह, ते-तुभ्यं, स्वस्ति अस्तु-कल्याणभाग् भवेति पदार्थः। वधिष्टेति क्रियया सह सर्वेषां सम्बन्धात् "प्रकृताप्रकृतानां धर्मैक्ये दीपकम्" ॥ [का० शा० अ० ६, सू० ८] इति लक्षितं दीपकमलङ्कारो गोप्यमान एव प्रतीयते, तेनात्यन्तस्नेहास्पदत्वप्रतिपत्त्या चारुत्वनिष्पत्तिः॥

अप्रस्तुतप्रशंसाध्वनिर्यथा-"ढुंढुल्लंतो मरिहिसि कंटअकलिआइं केअइवणाइं। मालइकुसुमसरिच्छं भमर! भमंतो न पाविहसि ॥" [ ] "भ्राम्यन् मरिष्यसि कण्टककलितानि केतकीवनानि। मालतीकुसुमसदृशं भ्रमर! भ्राम्यन् न प्राप्यसि ॥" इति च्छाया। प्रियतमेन साकमुद्याने भ्रमन्ती पूर्वतस्तस्यात्मनि बहुमानाभावमाकलय्य गूढरीत्या स्वस्यासमसौन्दर्यादिबोधनायान्योक्त्याह-हे भ्रमर! अधिकरसलोलुप इतस्ततस्त्वं, भ्रमसि, एवं भ्राम्यन्नेव मरिष्यसीति, किन्तु मालतीकुसुमेन सदृशमपि [कुतोऽधिकमिति ध्वनिः] अन्यत् पुष्पं न प्राप्स्यसीत्यर्थः। भृङ्गस्याभिधायां प्रस्तुतत्वमेव, न च भ्रमरेति सम्बोधनेन तस्यामन्त्रणप्रतीत्याऽप्रस्तुतत्वमेवेति वाच्यम्, वैपरीत्येन आमन्त्रणेन तस्या अतिशयं मौग्ध्यमाविष्क्रियते इति प्रस्तुतत्वमेवेत्यभिधयाऽप्रस्तुतप्रशंसा नास्त्येव, विरतायां चाभिधायां वाच्यार्थसौन्दर्यबलादप्रस्तुतप्रशंसा ध्वन्यते। ध्वनिश्चायं—स्वसौभाग्य-सौन्दर्याभिमानपूर्णा सुकुमारपरिमलमालतीकुसुमसदृशी मुग्धकुलवधूर्निर्व्याजप्रेमपरतया कृतकवैदग्ध्यप्रसिद्धानि शम्भली [कुट्टिनी] कण्टकव्याप्तानि दूरामोदकेतक्यादिपुष्पान्तरवनस्थानीयानि वेश्याकुलानि, अन्यत्र चेतस्ततश्चङ्क्रूर्यमाणं स्वप्रियतममात्मसौभाग्यगोपनपूर्वमुपालभत इति ॥

अपह्नुतिध्वनिर्यथा—

"यत् कालागुरुपत्रभङ्गरचनावासैकसारायते,
गौराङ्गीकुचकुम्भभूरिसुभगाभोगे सुधाधामनि।
विच्छेदानलदीपितोत्कवनिताचेतोधिवासोद्भवं,
सन्तापं विनिनीषुरेष विततैरङ्गैर्नताङ्गि! स्मरः॥"

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूर्वमनङ्गीकृतानुनयामनुतप्तां प्रणयिविरहोत्कण्ठितां कृतप्रसाधनादिविधेयतया वल्लभागमनप्रतीक्षापरत्वेन वासकसज्जां काञ्चन नायिकां पूर्णचन्द्रोदयावसरे दूतीमुखेनानीतः प्रियतमः प्राह–हे **नताङ्गि**–मध्यक्षैण्यादवनतोत्तरकाये ! गौराङ्ग्याः कुचावेव कुम्भौ तयोर्भूरि–बहुलं सुभगे–सौभाग्यशालिनि सुन्दरे, आभोगे परिसररूपे, **सुधाधामनि** चन्द्रमसि, यत् कालागुरुणा–कृष्णागरुलेपेन, निर्मिता, पत्रभङ्गस्य–पत्राकारप्रसाधनस्य, रचनायाः, आवासः–स्थितिः, तया, एकः समानः सारो यस्य तद्वदाचरति, एषः, विच्छेदस्य–विरहस्य, अनलेन–वह्निना, दीपितं–ज्वलितं यत्, उत्कायाः–उत्कण्ठिताया वनितायाः, चेतः–हृदयं, तत्र योऽधिवासः–निवासः, तेनोद्भवति–जायते, जातो वा यः, तादृशं सन्तापं, विततैः–प्रसारितैः अङ्गैः, **विनिनीषुः**, विनेतुमिच्छुः, **स्मरः** कामदेव एवेत्यर्थः। अत्र चन्द्रमण्डलमध्यवर्तिनः कृष्णवर्णचिह्नस्य वियोगाग्निपरिचितवनिताहृदयनिवासजातदाहमलीमसच्छविमन्मथाकारतयापह्नवो ध्वन्यते ॥ अत्रान्येऽप्यलङ्कारा ध्वन्यन्ते–यथा ससन्देहः, यतश्चन्द्रवर्तिनः कलङ्कस्य नामापि न गृहीतम्, अपि तु गौरीस्तनाभोगस्थानीये चन्द्रमसि कालागरुपत्रभङ्गविच्छित्त्यास्पदत्वेन यत् सारतामुत्कृष्टतामाचरति तन्न जानीमः किमेतद्वास्त्विति संशयोक्तिरूपः ससन्देहालङ्कारो ध्वन्यते ॥ निदर्शनालङ्कारश्च यथा–'त्वदीयकुचकलशन्यस्तपत्रभङ्गरचना कुवलयदलश्यामला मन्मथोद्दीपनकारिणी तथैव चन्द्रवर्तिनीयं कान्तिरपि करोति' इतीष्टार्थसिद्धौ दृष्टान्तरूपो निदर्शनालङ्कारो ध्वन्यते । तथा "सहार्थबलाद्धर्मस्यान्वयः" इति लक्षिता सहोक्तिरपि ध्वन्यते, यथा–'त्वदीयकुचकलशशोभा मृगाङ्कशोभा च सह मदनमुद्दीपयेते' इति । एवं 'त्वत्कुचसदृशश्चन्द्रश्चन्द्रसमस्त्वत्कुचाभोगः' इति रूपेणोपमालङ्कारोऽपि ध्वन्यते । एवं विचारे कृते सति कामधेनुरूपायामस्यां महाकवेर्वाचि शक्यन्तेऽन्येऽप्यलङ्कारा उत्प्रेक्षयितुम् । उक्तं च महतां प्रयासस्याधिककार्यकारित्वमित्थं–"हेलापि कस्यचिदचिन्त्यफलप्रसूत्यै, कस्यापि नालमणवेऽपि फलाय यत्नः । दिग्दन्तिरोमचलनं धरणीं धुनोति, खात् सम्पतन्नपि लतां चलयेन्न भृङ्गः ॥" [ ] इति । कस्यचित् महासत्त्वस्य हेलापि–अनायासचेष्टाऽपि, अचिन्त्यस्य–अल्पसत्त्वैश्चिन्तयितुमप्यशक्यस्य, फलस्य, प्रसूत्यै–सम्पादनाय भवति, तथा कस्याप्यल्पसत्त्वस्य यत्नः, अणवे–स्तोकायापि, फलाय प्रयोजनाय, न भवति । तत्रार्थान्तरन्यासेन समर्थनमाह—दिग्दन्तिनः–दिग्गजानां, रोम्णः–एकस्यापि केशस्य, चलनं–स्वाभाविकं स्पन्दनमपि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अलङ्कारस्य वस्तुव्यञ्जकत्वं पदे यथा-

"चूयंकुरावयंसं छणपसरमहग्घमणहरसुरामोअं।

---

धरणीम्, अनन्तामचलां पृथ्वीं धुनोति—कम्पयति, किन्तु खात्—आकाशात्, सम्पतन्नपि—लतोपरि कृतसमुत्पातोऽपि, भृङ्गः भ्रमरः, लतां—वल्लीमपि, न चलयेत्, इत्यर्थः॥

अथ व्यतिरेकध्वनिर्यथा—"जाएज्ज वणुद्देसे खुज्जो च्चिअ पायवो सडिअवत्तो। मा माणुसम्मि लोए चाएक्करसो दरिद्दो अ॥" [गा० स० ३. ३०], इदं पद्यं ध्वन्यालोकेऽप्युदाहृतं द्वितीयोद्योते, तत्र द्वितीयचरणे 'पाअवो अघडि-अवत्तो' इति, चतुर्थचरणे च 'ताएक्करसो दरिद्दो अ' इति पाठः, मुद्रितायां गाथासप्तशत्यां च द्वितीये चरणे 'विहुणीसहो झडियपत्तो' इति, चतुर्थे च 'ताई रसिओ दरिद्दोअ' इति पाठः, विवेकधृतपाठानुसारमेव च व्याख्यायते—"जायेय वनोद्देशे कुब्जोऽपि पादपः शटितपत्रः। मा मानुषे लोके त्यागैकरसो दरिद्रश्च॥" इति संस्कृतम्। वनोद्देशे—वनस्यैकान्ते गहने स्थाने, [यत्र बहुतर-वृक्षसम्परया स्फुटं कोऽपि प्रेक्षतेऽपि नहि यदयं कुब्ज इति, तथा च रूपघटना-द्यावनुपयोगीत्यपि] शटितपत्रः विशीर्णपत्रः, शटधातो रुजाविशरणगत्यवसाद-नार्थत्वात्, एवं च पत्राभावात् छायाऽपि नास्ति कुतः पुष्पफलसंभावना, एवं-भूतो कुब्जीभूतोऽपि जायेयेति वरं, यतः कदाचिदाङ्गारिकस्याङ्गारार्थं घूकादीनां वासार्थं च ममोपयोगस्तत्रापि सम्भाव्यते, किन्तु मानुषे लोके—मर्त्यभुवने, यत्रा-र्थिजनः सुलभस्तत्रार्थिभिर्लोक्यमानस्य किमप्युपकर्तुमशक्नुवतो महद् दुःखमिति भावः, त्यागैकरसोऽतिदानशीलो दरिद्रश्च मा जनिषि। इह निर्धनस्य दान-शीलस्य जन्मनिन्दा, निष्पन्नकुब्जपादपप्रशंसा च वाच्या, तथा च न कश्चिदलङ्कारो वाच्यः। तथाविधादपि पादपात् तादृशस्य पुंसो न्यूनतां—शोच्यतायामाधिक्यं तात्पर्येण प्रकाशयतीति व्यतिरेकालङ्कारो व्यङ्ग्यः, एवमन्येऽप्यलङ्कारा यथासंभ-वमुदाहार्या ध्वन्यालोकादौ वा द्रष्टव्याः॥

अलङ्कारस्य वस्तुव्यञ्जकत्वं नामोपमादिनालंकारेण वाच्येन वस्तुव्यञ्जनमिति, तत् पदे यथा-**चूयंकुरावयंसं०** इति "चूताङ्कुरावतंसं क्षणप्रसरमहार्घमनोहर-सुरामोदम्। असमर्पितमपि गृहीतं कुसुमशरेण मधुमासलक्ष्म्या मुखम्॥" इति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अप्पणामियं पि गहियं कुसुमसरेण महुमासलच्छीए मुहं" ॥ ७४ ॥
[ हरिविजये ]

अत्रापणामियं-असमर्पितमपीति विरोधालङ्कारेण वाच्येन मधुमासप्रौढिमनि भाविनि किं भविष्यतीत्येवंभूतं वस्तु ध्वन्यते ।

---

संस्कृतम् । कुसुमशरेण कामेन, चूतस्याङ्कुरः-मञ्जर्येव, अवतंसः-कर्णपूरो यस्मिन् तादृशम्, महार्घेण-महनीयेन, क्षणस्य-वसन्तोत्सवस्य, प्रसरेण-समारोहेण, मनोहरः, सुरायाः, मनोहरसुरस्य-कामदेवस्य वा, आमोदः-सुगन्धिरानन्दो वा यत्र तादृक्, मधुमासलक्ष्म्या वसन्तश्रियाः मुखम् आननमारम्भश्च, तया चुम्बितुम्, असमर्पितमपि अदत्तमपि, बलाद् गृहीतमित्यर्थः, वसन्तारम्भो नितरां कामोद्दीपक इति भावः। अत्र केन किं व्यज्यत इत्याह-असमर्पितमपीति विरोधालङ्कारेणेति-असमर्पितस्य ग्रहणं हि विरुद्धम्, तथा चापिशब्देन तदभिधानाद् विरोधालङ्कारः, तेन च मधुमासस्य प्रारम्भ एव यद्येवमुल्लुण्ठनं तर्हि अस्य भाविनि प्रौढिमनि किं भावीति न वक्तुं शक्यत इति वस्तु व्यज्यते । अत्र नवोढाललनाया मदिरामोदि वक्त्रं बलात् कान्तेनापि गृह्यत इति प्रत्यायनात् समासोक्तिरलङ्कारोऽपीति ध्वन्यालोकटीकायामुक्तम् । अत्र प्रसरमहग्घेति महग्घ-[ महार्घ ]शब्दस्य परनिपातः प्राकृतनियमानुसारीति ज्ञेयम् ॥

वाच्यस्य रूपकालङ्कारस्य वस्तुव्यञ्जकत्वं यथा-"चमढियमाणसकञ्चणपंकयनिम्महियपरिमला जस्स । अक्खुडियदाणपसरा बहुप्फलिह च्चिय गयंदा ॥" [ ] "मर्दितमानसकाञ्चनपङ्कजनिर्मथितपरिमला यस्य । अखण्डितदानप्रसरा बाहुपरिघा एव गजेन्द्राः ॥" इति संस्कृतम् । मर्दितानां-पेषितानां म्लापितानां वा, मानसस्य-तदाख्यसरसः, काञ्चनपङ्कजानां-स्वर्णकमलानां, निर्मथितः-विजृम्भितः, परिमलः-विमर्दोत्थातिमनोहरगन्धो येषु तादृशाः, पक्षे मर्दितानि-निराशीकृतानि विहतानि वा शत्रूणां, मानसानि-हृदयान्येव काञ्चनपङ्कजानि, तैर्निर्मथितः-प्ररूढः परिमलप्रतापप्रकर्षो येषां तादृशाः, तथा न खण्डिताः-विच्छिन्नाः, दानस्य-मदजलस्य, पक्षे वितरणस्य, प्रसरः-प्रवाहः, पक्षे प्रवृत्तिर्येषु ते, यस्य-राज्ञः, बाहवो दृढत्वात् परिघा इव-लोहलगुडा इव बाहुपरिघाः, त एव गजेन्द्राः, भान्ति, शोभन्ते इत्यर्थः । अत्र बाह्वोः परिघरूपणात्मना रूपकालङ्कारेण भुजद्वयातिरिक्तं गजाश्वादिसामग्रीरूपं तस्यानुपादेयमिति वस्तु व्यज्यते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वाक्ये यथा-

"गाढालिंगणरहसुज्जयम्मि दइए लहुं समोसरइ ।
माणंसिणीणं माणो पीलणभीउव्व हियआओ" ॥ ७५ ॥
[ ]

अत्रोत्प्रेक्षया प्रत्यालिङ्गनादि तत्र जृम्भत इति वस्तु व्यज्यते ।
अलङ्कारेणालङ्कारः पदे यथा-

"तुह वल्लहस्स गोसम्मि आसि अहरो मिलाण कमलदलं ।
इय नववहुआ सोऊण कुणइ वयणं महीसमुहं" ॥ ७६ ॥
[ ]

---

उपमाया वस्तुव्यञ्जकत्वं च पूर्वप्रदर्शिते "शिखरि क नु नाम" इति पद्ये 'अधरपाटलं' इति समासोपमया अभिलाषात्मकं वस्तु व्यज्यत इति । एवमन्येऽप्यलङ्कारा वस्तुव्यञ्जकत्वे उदाहार्याः ॥

पदगतालङ्कारैर्वस्तुध्वनिमुदाहृत्य वाक्यगतालङ्कारेण वस्तुध्वनिमुदाहरति- **गाढालिंगणेति**। "गाढालिङ्गनरभसोद्यते दयिते लघु समपसरति। मनस्विनीनां मानः पीडनभीरुरिव हृदयात् ॥" इति संस्कृतम्। मानवतीं प्रति मानमङ्कायापरमानवतीवृत्तान्तं बोधयन्त्याः कस्याश्चिदुक्तिरियम्-**दयिते** प्रिये, गाढालिङ्गनाय, रभसेन-वेगेन हर्षेण वा, उद्यते सति, उद्युक्त एव न त्वाचरितवति, **मनस्विनीनां** वशीकृतमानसानामपि, **मानः** "स्त्रीणामीर्ष्याकृतः कोपो मानोऽन्यासङ्गिनि प्रिये" इत्युक्तलक्षणः कोपः, पीडनाद् भीरुरिव, हृदयात्, **लघु** शीघ्रं गुप्तं वा, **समपसरति** निःशेषतो गच्छतीत्यर्थः। एवं च तादृश्याः स्वाधीनचित्ताया अपि मानो यदि तावन्मात्रेणैव गतस्तर्हि अतादृश्यास्तव गमिष्यतीति किं वक्तव्यमित्यवश्यंभाविनि मानभङ्गे किमित्यात्मानं वञ्चयसीति भावः ॥ अत्र केन किं व्यज्यत इत्याह-**अत्रोत्प्रेक्षया प्रत्यालिङ्गनादि** इति-पीडनभीरुरिवेति भयोत्प्रेक्षारूपेणालङ्कारेणात्यन्तिकमाननिवृत्तौ सत्यां प्रत्यालिङ्गनसहासवचनादि तत्र जृम्भते-बहु भवतीति वस्तु द्योत्यते इत्यर्थः ॥ अलङ्कारेण वस्तुध्वनिं पदवाक्यगतमुदाहृत्यालङ्कारेणालङ्कारध्वनिमुदाहरति, तत्र प्रथमं पदगतालङ्कारेणालङ्कारध्वनिर्यथा-**तुह वल्लहस्सेति**। "तव वल्लभस्य प्रभाते आसीदधरो म्लानकमलदलम्। इति नववधूः श्रुत्वा करोति वदनं महीसम्मुखम् ॥" इति संस्कृतम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र मिलाणकमलदलमिति रूपकेण म्लानत्वान्यथानुपपत्तेस्त्वयाऽस्य मुहुर्मुहुः परिचुम्बनं कृतमित्यनुमानं व्यज्यते।

वाक्ये यथा–

"स वक्तुमखिलान् शक्तो हयग्रीवाश्रितान् गुणान्।
योऽम्बुकुम्भैः परिच्छेदं शक्तः कर्तुं महोदधेः" ॥ ७७ ॥
[ ]

अत्र निदर्शनेन हयग्रीवगुणानामवर्णनीयताप्रतिपादनरूपोऽसाधारणतद्विशेषप्रकाशनपर आक्षेपो व्यज्यते।

---

रात्रावतिशयचुम्बितदयिताधरां वधूं प्रति कस्याश्चिदुक्तिरियम्–तव **वल्लभस्य** दयितस्य, **प्रभाते** प्रातःकाले, **अधरः** अधरोष्ठः, म्लानं यत् कमलदलं तद्रूप आसीत्, इति सखीवचनं श्रुत्वा **नववधूः** नवोढा नायिका; **वदनं** मुखं, लज्जया, मह्याः–भूमेः, सम्मुखम्–अधोमुखं, **करोति** विधत्ते, प्रभाते आसीदित्यनेन तावत्कालं चुम्बनाविरामः सूचितः। अत्र किं केन व्यङ्ग्यमित्याह–**अत्र मिलाणकमलदलमिति**। तथा च रूपकालङ्कारेणाधरस्य चुम्बनान्यकारणान्म्लानत्वमनुपपन्नमिति मुहुर्मुहुश्चुम्बनं कृतमिति व्यक्त्याऽनुमानाख्योऽलङ्कारो व्यज्यते, "हेतोः साध्यावगमोऽनुमानम्" [अ० ६ सू० २३] अन्यथानुपपत्त्यैकलक्षणाद्धेतोः साध्यस्य–जिज्ञासितस्यार्थस्य प्रतीतिरनुमानमिति तल्लक्षणात्, **काव्यप्रकाशे** चात्र काव्यलिङ्गालङ्कार उक्तः, किन्तु स्वमते तस्यानुमान एवान्तर्भाव इति ज्ञेयम्॥

वाक्यगतालङ्कारेणालङ्कारध्वनिमुदाहरति–**स वक्तुमखिलानिति**–स हयग्रीवं तदाख्यमसुरम्, आश्रितान्, अखिलान् गुणान् वक्तुं **शक्तः** समर्थः स्यात्, यः, **अम्बुकुम्भैः** जलघटैः, महोदधेः, **परिच्छेदं कर्तुं** ज्ञातुं शक्त इत्यर्थः। यथाऽम्बुकुम्भैर्महोदधेः परिमाणं कर्तुमशक्यं तथा हयग्रीवगुणा वर्णयितुमशक्या इति वाच्येन निदर्शनालङ्कारेण हयग्रीवगुणानां कथनाशक्यत्वनिषेधादाक्षेपालङ्कारो ध्वन्यते, तदाह–**अत्र निदर्शनेनेति**। विशेषविवक्षया वक्तुमिष्टस्य प्रधानस्याशक्यवक्तव्यमतिसिद्धत्वं वा विशेषं वक्तुं निषेध इवेति तल्लक्षणं संगमयति–**असाधारणतद्विशेषप्रतिपादनपर** इति–असाधारणो यस्तद्विशेषोऽवर्णनीयतातिशयस्तत्प्रकाशनपर इत्यर्थः॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रबन्धेऽर्थशक्तिमूलो व्यङ्ग्यो यथा-गृध्रगोमायुसंवादे, तथा च

"अलं स्थित्वा श्मशानेऽस्मिन्, गृध्र-गोमायुसङ्कुले ।
न चेह जीवितः कश्चित्, कालधर्ममुपागतः" ॥ ७८ ॥
[ म० भा० शा० प० अ० १५२. श्लो०-११ ]

इति दिवा प्रभवतो गृध्रस्य पुरुषविसर्जनपरमिदं वचनम् ।

"आदित्योऽयं स्थितो मूढाः स्नेहं कुरुत साम्प्रतम् ।
बहुविघ्नो मुहूर्तोऽयं जीवेदपि कदाचन ॥ ७९ ॥

---

सूत्रे "अर्थशक्तिमूलः प्रबन्धेऽपि" इत्युक्ततया पद-वाक्यगतमुदाहृत्य क्रमप्राप्तं प्रबन्धगतं ध्वनिमुदाहर्तुमाह-**प्रबन्धेऽर्थशक्तिमूलो व्यङ्ग्यो यथे**ति । अत्र गृध्रवाक्ये श्लोकोऽधिकः काव्यप्रकाशादिषु समुपलभ्यते, तथा हि-तत्रत्यः पाठः "अलं स्थित्वा" इत्यर्धम्, ततः "कङ्कालबहुले घोरे सर्वप्राणिभयङ्करे" इति, पुनः "न चेह जीवितः" इत्यर्धस्यान्ते "प्रियो वा यदि वा द्वेष्यः, प्राणिनां गतिरीदृशी" इति, मृतं बालं सन्ध्यासमये श्मशाने समानीतं दृष्ट्वा दिवस एव मृतमांसभक्षणसमर्थस्य रात्रावन्धत्वादसमर्थस्य गृध्रस्य तद्बन्धुविसर्जनपरमिदं वाक्यम् । अस्मिन् **गृध्र-गोमायुसङ्कुले** गृध्रैर्गोमायुभिश्च व्याप्ते, कङ्कालाः-अस्थीनि, बहलाः आधिक्येन यत्रैवंभूते मृतमनुष्यास्थिपञ्जरपरिपूर्णे, अत एव **घोरे** दारुणे, अथ च सर्वप्राणिनां भयजनके-**श्मशाने** प्रेतभूमौ; स्थित्वा, अलं व्यर्थम् । ननु किञ्चित् कालं स्थित्वा परीक्ष्यते, कदाचिदयं बाल उज्जीवेदिति चेत्? अत्राह-**इह संसारे, कालधर्मं** मृत्युम्, **उपागतः** प्राप्तः, कश्चिन्न जीवितः, स च **प्रियो** मित्रं वा भवतु, **द्वेष्यः** शत्रुर्वा भवतु, न तस्योज्जीवनं संभाव्यते, कुत इति चेत्? अत्राह-**प्राणिनां गतिरीदृशी**ति-प्राणिस्वभाव एवायम्-न कश्चित् तदतिक्रमणं कर्तुं समर्थः 'स्वभावो दुरतिक्रमः' इत्युक्तेः ॥

इत्थं गृध्रवचनविश्वासात् पूर्वतोऽपि त्यागस्यैव निश्चयाच्च त्यक्त्वा गन्तुमुद्यतेषु बन्धुषु दिवा गृध्राद्युपद्रवाद् रात्रावेव स्वातन्त्र्येण शवभक्षणसमर्थो गोमायुराह-**आदित्योऽय**मित्यादि । **मूढाः** गृध्रवाक्येन प्रतारितत्वेनैवमुक्तिः अयं प्रत्यक्षं दृश्यमानः, आदित्यः स्थितः, तथा च बहूनां भवतां दिवा किं भयमिति भावः, ततश्च **साम्प्रतं** यावदादित्यस्थितिस्तावत्, **स्नेहं कुरुत** स्नेहानुरूपमस्यावेक्षणमाचरत । किमिह स्थित्वा फलमिति चेत्? अयं सान्ध्यो मुहूर्तो बहुविघ्नः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अमुं कनकवर्णाभं बालमप्राप्तयौवनम्।
गृध्रवाक्यात् कथं बालास्त्यक्ष्यध्वमविशङ्किताः ॥ ८० ॥
[ म० भा० शा० प० अ० १५२. श्लो.-११. ६५. ]

इति निशि विजृम्भमाणस्य गोमायोर्जनव्यावर्तननिष्ठं चेति प्रबन्धप्रतिपाद्येनार्थेन गृध्र-गोमाय्वोर्भक्षणाभिप्रायो व्यज्यते। एवं मधुमथनविजये पाञ्चजन्योक्तिषु विषमबाणलीलायां कामदेवस्य सह-

---

राक्षसवेलात्वाद् भूतावेशादिविघ्नबहुलः, अतश्च सन्ध्यायामनीतायां कदाचित् तदावेशाद्यपगमाज्जीवेदपीति सम्भाव्यते। पुनरपि [ जीवने संभाविते ] मोहजननायाह—अमुमिति, यूयम्, अविशङ्किताः लोकापवादशङ्कारहिताः, गृध्रवाक्यात् मांसलुब्धस्य गृध्रस्य वाक्यात्, मूढाः मोहमज्ञानमुपगताः, कनकवर्णाभं स्वर्णसमानकान्तिम्, अप्राप्तयौवनम्, अतो बालम्, अमुं कथं त्यजध्वम्। कनकवर्णाभमित्यनेन साम्प्रतमपि वर्णविकृतिर्मृत्युचिह्नं न जातम्, अप्राप्तयौवनमित्यनेन परस्त्रीसंसर्गादिपातकजन्यायुःक्षयाभावश्च सूचितः। अत्र प्रबन्धे पूर्वं श्मशाने स्थितिं निषेधतो गृध्रस्य 'विसर्जयतेमं गच्छत च यूयं येनाहं दिवसे भक्षयेयम्' इति तात्पर्यमवगम्यते, परत्र च यथाकथञ्चित् सूर्यास्तं यावदेते तिष्ठन्तु पश्चादेषु गतेषु रात्रौ सत्यां मदीयं मांसभक्षणस्वातन्त्र्यमिति गोमायोराशयः प्रबन्धेनानेन प्रतीयते। तदुक्तम्-इति दिवा प्रभवतो गृध्रस्येत्यादिना, इति निशि विजृम्भमाणस्येत्यादिना च। एवं किञ्चित् प्रबन्धविषये ध्वनिमुक्त्वाऽन्यत्रापि तदतिदिशति-मधुमथनविजये पाञ्चजन्योक्तिष्विति। तत्र यथा-"लीलादाढग्गुव्वूढसयलमहिमंडलस्स चिअ अज्ज। कीस मुणालाहरणं पि तुज गरूआइ अंगम्मि ॥" [ म० वि० ] इति "लीलादंष्ट्राग्रोद्धृतसकलमहीमण्डलस्यैवाद्य। कस्मान्मृणालाभरणमपि ते गुरूयतेऽङ्गे ॥" इति संस्कृतम्। मधुमथनविजयं नाम नाटकमद्यत्वे नोपलभ्यते, विवेकोक्तलोचनानुसारिपाठेन यथाकथञ्चिद्व्याख्यायते-रुक्मिण्या विरहेण क्षीणं वासुदेवमकथितस्वाभिप्रायं पाञ्चजन्यस्तदीयविरहवैधुर्यावस्थावर्णनेन प्रकटयति—लीलया-अनायासेन, दंष्ट्राग्रेण [ वराहावतारसमये ] उद्धृतं-पातालादानीतं, सकलं महीमण्डलं येन तस्यैव, ते तव, अद्य साम्प्रतम्, अङ्गे शरीरे, मृणालस्य-बिसस्याभरणमपि, कस्मात् अज्ञानात् हेतोः, गुरूयते भारकृद् भवति। तथा च किमपि विचित्रं कष्टं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चरसमागमेऽर्थव्यञ्जकत्वमुदाहार्यम् । एवं च वस्तुनोऽलङ्कारव्यञ्जकत्वेऽलङ्कारस्य च वस्त्वलङ्कारव्यञ्जकत्वे भेदत्रयमुत्प्रेक्ष्यम् ॥ २४ ॥

**रसादिश्च ॥ २५ ॥**

रस-भाव-तदाभास-भावशान्ति-भावोदय-भावस्थिति-भाव-

---

ते हृदये इत्याशयः, एवं च कस्याश्चिद् विरहेनेयं तवास्थेति व्यज्यते, तथा च वस्तुनो वस्तुव्यञ्जकत्वं प्रबन्धगतमिदम् । एवं विषमबाणलीलायां कामदेवस्य सहचराणां वसन्तादीनां समागमे यथा—"हुमि अहत्थिअरेहो णिरंकुसो अह विवेअरहिओ वि । सिविणे वि तुज्झ समए पत्तिअभात्तिं न पुप्फुसिमि ॥" [ वि० ली० ], "भवाम्यहास्तितरेखो निरङ्कुशोऽथ विवेकरहितोऽपि । स्वप्नेऽपि तव समते! पत्नी [ क ] भक्तिं न प्रमार्ज्मि" इति संस्कृतम् , इदमपि पद्यमप्रकरणज्ञानादनुद्भिन्नाशयमिव, ध्वन्यालोकटीकालोचनोदाहृतपद्यतः पाठभेदोऽपि, तत्रापि चेदं पद्यमव्याख्यातमेव, यौवनोक्तिरियम् , यौवनः कथयति–अहम् , अहस्तितरेखः–रेखां मर्यादामस्वीकुर्वन्नपि, अत एव निरङ्कुशोऽथ च विवेकरहितोऽपि भवामि वरम् , तथापि हे समते! तव पत्नीभाक्तिं–त्वद्विषये पत्नीभावं न प्रमार्ज्मि न त्यजामि । अनेन यौवनस्वभावरूपं वस्तु व्यज्यते । तथा चेदमपि प्रबन्धगतं वस्तुनो वस्तुव्यञ्जकत्वम् । प्रबन्धगतं वस्तुनोऽलंकारव्यञ्जकत्वम् , अलङ्कारस्य च वस्तुव्यञ्जकत्वमलङ्कारव्यञ्जकत्वं च स्वयमुत्प्रेक्ष्यमित्यतिदिशति–एवं च **वस्तुनोऽलङ्कारव्यञ्जकत्व** इत्यादिना ॥ २४ ॥

**रसादिश्चेति** सूत्रं पूर्वसूत्रसम्बद्धम् , तथा चार्थशक्तिमूलव्यङ्ग्यानां भेदप्रस्तावे पूर्वमर्थशक्तिमूलेन वस्तुनाऽलङ्कारेण च प्रत्येकं वस्त्वलङ्कारयोर्ध्वनिरुक्तः, साम्प्रतमर्थशक्तिमूलो रसादिध्वनिरनेन सूत्रेणोच्यते । रसादिरित्यत्रादिपदेन संग्राह्यान् कण्ठत आह—**रसभावतदाभासे**त्यादिना । ननु रसमात्रस्यैव काव्यजीवातुभूतत्वं श्रुतं तदन्येऽमी भावतदाभासादयः क इति चेत्? अत्रोक्तं विवेके यद्यपि रसेनैव सर्वं काव्यं जीवति, तथापि तस्य रसस्यैकघनचमत्कारात्मनोऽपि [ एकः–मुख्यो घनः–निबिडो वेद्यान्तरस्पर्शशून्यश्चमत्कारः–चित्तविस्ताररूप एवात्मा–स्वरूपं यस्य तथाभूतस्यापि ] प्रयोजकीभूतं कमप्यंशमाश्रित्यासौ चमत्कारोऽतिशयं लभते तदाऽसौ तत्प्रयोजकीभूतविशेषनिबन्धनामन्यामन्यां ख्यातिं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सन्धि-भावशबलत्वान्यर्थशक्तिमूलानि व्यङ्ग्यानि । चकारः पद-वाक्यप्रबन्धानुकर्षणार्थः । पृथग्योगो रसादयो व्यङ्ग्या एव भवन्ति

---

गच्छति, तथा हि—तत्र यदा कश्चिद् व्यभिचारिभाव उद्रिक्तावस्थां-प्राधान्येनास्वाद्यमानतां गतो वक्ष्यमाणोदयशान्तिशबलत्वादिधर्मा चमत्कारातिशयाधायको भवति, तदा तस्य भाव इति संज्ञा भवति तत्रैव च भावध्वनिः; उक्तं च मम्मटेन—"रतिर्देवादिविषया व्यभिचारी तथाञ्जितः। भावः प्रोक्तः" [ का० प्र० २. ३५ ] इति, अत्र रतिरिति स्थायिभावमात्रोपलक्षणम्, देवादिविषयेत्यस्याप्राप्तरसावस्थोपलक्षणत्वम्, आदिशब्दान्मुनि-गुरु-नृप-पुत्रादिविषया, तथा च देवादिविषया सर्वा कान्ताविषयाऽप्यपुष्टा रतिर्हासादयश्चाप्राप्तरसावस्थाः, प्राधान्येन व्यञ्जितो व्यभिचारी च भाव इति तदर्थः प्रदीपे वर्णितः। यदुक्तमभियुक्तैरपि—"रत्यादिश्चेन्निरङ्ग स्याद् देवादिविषयोऽथवा । अन्याङ्गभावभाग् वा स्यान्न तदा स्थायिशब्दभाग् ॥" इति, इत्थं भावस्य स्वरूपं संक्षेपेण प्रदर्शितं, विस्तरस्तु तद्वर्णनप्रकरणे वक्ष्यते । एवं यदा विभावाभासात्-अनौचित्यप्रयोजितात् विभावात्, रत्याभासोदयस्तदाऽनुभावोऽप्याभासस्वरूप एव भवतीति ताभ्यां विभावानुभावाभासाभ्यां जायमानश्चर्वणाभास इति कथ्यते, स एव रसाभासः, एवं भावशान्त्यादयोऽप्यग्रे निरूपयिष्यन्ते। तथा च रसध्वनेरेवामी भावध्वनिप्रभृतयो निःष्यन्दा आस्वादे प्रयोजकमंशं विभज्यैव पृथक् पृथक् व्यवस्थाप्यन्ते, यथा-संमूर्च्छितामोदे अनेकवस्तुसंभूतामोदानां सम्मर्दे, उपभुज्यमानेऽपि, तत्र ये विशेषज्ञा भवन्ति ते विवेचयन्ति-यदयं सुपरिशुद्धस्यामोदोऽयं पुष्पविशेषामोद इत्यादिना शुद्धस्य रसस्य ध्वनिस्तु यत्र मुख्यतया विभावानुभावव्यभिचारिभावसंयोजनोचितस्थायि [ भाव ] प्रतिपत्तिकस्य प्रतिपत्तुः स्थाय्यंशचर्वणाप्रयुक्त एवास्वादप्रकर्षः। रसभावादीनामुदाहरणानि तदीयप्रस्तावे प्रदर्शयिष्यन्ते । सूत्रे चकारः किमर्थ इत्याशङ्कायामाह **चकारः पद-वाक्य-प्रबन्धानुकर्षणार्थ** इति । यथा वस्त्वलङ्कारयोर्ध्वनिः पद-वाक्यप्रबन्धेषु तथा रसध्वनिरपि तेष्विति तेषामेतत्सूत्रेणापि सम्बन्धद्योतनार्थश्चकार इति । ननु सर्वथा ताभ्यां साम्ये तत्रैव सूत्रे रसादिरिति पदं कुतो न पठितमिति व्यर्थं पृथक् सूत्रमिति चेत्? अत्राह-**पृथग्योगो रसादयो व्यङ्ग्या एव भवन्तीति**, उपपादितं चैतत् पूर्वसूत्रव्याख्यायामादावेव। तथा च वस्त्वलङ्कारवद् रसादीनपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**न तु कदाचिद्वाच्यतामपि सहन्त इति रसादीनां प्राधान्यख्यापनार्थः। वस्त्वलङ्कारौ हि वाच्यावपि भवत इति।**

**तत्रार्थशक्तिमूलो व्यङ्ग्यो रसः पदे यथा–**

**"उत्कम्पिनी भयपरिस्खलितांशुकान्ता**
**ते लोचने प्रतिदिशं विधुरे क्षिपन्ती।**
**तीक्ष्णेन दारुणतया सहसैव दग्धा**
**धूमान्धितेन दहनेन न वीक्षितासि" ॥ ८१ ॥**

**[ स्व० वा० ना० ]**

**अत्र 'ते' इति पदेन स्मारितानामनुभवैकगोचराणां सातिशयभ्रमाणां शोकव्यञ्जकत्वम्।**

---

वाच्यतासहान् शिष्या न प्रतिपद्येरन्नित्यर्थं तेषां प्राधान्यद्योतकमिदं पृथक् सूत्रमिति ॥

पदगतमर्थशक्तिमूलं रसध्वनिमुदाहर्तुमवतरणमाह–**तत्रार्थशक्तिमूल** इत्यादिना। **उत्कम्पिनी**ति–स्वप्नवासवदत्ते नाटके वत्सराजो यौगन्धरायणेन मन्त्रिणा वासवदत्ता दग्धेति ख्यापिते सति कदाचिदेकान्ते तां स्मृत्वैवं विलपति अयि प्रेयसि! भावानीतामित्थं सम्बोध्यैव मध्यमपुरुषेणाभिधानं संभाव्यते। **उत्कम्पिनी**त्रासात् समुद्भूतकम्पा, भयेन परिस्खलितः–परिभ्रष्टः, अंशुकस्य–वस्त्रस्य, अन्तः–अग्रभाग उपरितनाङ्गावरणतया स्थापितो यस्याः सा तथा, एतेन चाग्निज्वालायाः साक्षादेव सम्पर्कः सम्भावितः, **ते** मदनुभवगोचरीभूततत्तद्विलासशीले कथमपि विस्मर्तुमनर्हे, **विधुरे** रक्षणोपायानुपलम्भाद् विकले कातरे वा लोचने, **प्रतिदिशं** कश्चिन्मां कुतश्चिदागत्य त्रास्यतीत्याशयात् सर्वासु दिक्षु, **क्षिपन्ती** प्रेरयन्ती, **तीक्ष्णेन** समिद्धतमेन, **दहनेन** दाहकेन वह्निना, **दारुणतया** निष्करुणत्वेन, **सहसा** अविचार्यैव, **दग्धा** भस्मीकृतासि, किन्तु, धूमान्धितेन तेन न वीक्षितासि, यतोऽसौ स्वकारणादेव समुद्भूतेन धूमेनान्धितोऽत एव तेन अवीक्ष्यैव सहसा दग्धा, नो चेत्? दृष्ट्वा तदवस्थां त्वां स क्रूरोऽपि दग्धुं न प्रवर्त्तेतेति भावः। अत्र केन पदेन कथं को रसो व्यज्यत इत्याह–**अत्र 'ते' इति पदे**नेत्यादि–अत्र 'ते' इति पदं स्फुटं रसमयत्वेनावभासते सहृदयानाम्, तथा हि–शोको नामेष्टजनविनाशप्रभव इति तदालम्बन-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूतस्य जनस्य ये भ्रूक्षेपकटाक्षप्रभृतयः पूर्वं रतिविभावतामवलम्ब्य तदुद्दीपका आसन्, त एवात्यन्तविनष्टाः सन्तः पश्चात् स्मृतिगोचरतामागता निरपेक्षत्वभावप्राणं करुणरसमुद्दीपयन्तीति वस्तुस्थितिः। तथा च 'ते लोचने' इत्यत्र तच्छदस्तल्लोचनगतस्वमात्रानुभूताव्यपदेश्यानन्तगुणगणस्मरणाकारद्योतकः शोकरसव्यञ्जनस्याधारणनिमित्ततां प्राप्तः। तथा च प्रक्रान्तपरामर्शकस्य तच्छब्दस्य कथमियान् व्यापारो यदीममर्थं द्योतयेदिति यदुक्तं केनचित्, तच्च रसाविष्टोऽत्र परामृष्ट इति रीत्या प्रत्युक्तं चान्येन, तदुभयमपि निरालम्बनमेव, यतश्च स्मरणाकारद्योतकतया तस्येह प्रयोग इति व्याख्यातम्, यत्र च यच्छब्देन वस्तुनोऽनिर्दिश्यमानधर्मान्तरसाहित्यरूपधर्मसम्बन्धित्वमभिधाय तच्छब्देन बुद्धिस्थतद्धर्मा [ अनिर्दिश्यमानधर्मा ] न्तरसाहित्यं निर्वाह्यते तत्रैव तस्य पूर्वप्रक्रान्तपरामर्शकत्वम्, इह च न तथेत्यावेदितमेव, अत्र हि निमित्तोपनत [ उद्बोधकसमवधानोद्बुद्धसंस्कारप्रसूत ] स्मरणविशेषाकारसूचकत्वं तच्छब्दस्य, यथा–'स घट' इत्यादाविति का परामर्शकथा। अत्र चोत्कम्पिनीत्यादिविशेषणानि तदीयभयानुभावोत्प्रेक्षणरूपेण मया प्रतीकारो न निर्वाहित इति रीत्या शोकावेगस्य विभावतां गतानि। 'ते' इति सातिशयविभ्रमैकायतनरूपे लोचने कान्दिशीकतया निर्लक्ष्ये क्षिपन्ती 'कस्त्राता क्वासावार्यपुत्रः' इति तयोर्लोचनयोस्तादृशावस्थास्मरणं सुतरां शोकोद्दीपनमिति तस्यैव मुख्यं व्यञ्जकत्वम् ॥

पदगतं रसव्यञ्जकत्वमुदाहरन् "तदन्तं पदम्" [ १. १. २०. ] इति सूत्रेण स्यौद्यन्त-त्याद्यन्तयोः पदसंज्ञाया विहितत्वेन पूर्वोपस्थितं स्याद्यन्तं पदं व्यञ्जकतया "उत्कम्पिनी" इति पद्ये उदाजहार। तत्र स्मरणद्योतकपदाभावेन प्रक्रान्तपरामर्शकत्वं तच्छब्दस्य न तु स्मरणोपस्थापकत्वमिति विवदमानां सन्तोषाय विवेके पद्यान्तरमप्युदाहृतम्, तथा हि–"झगिति कनकचित्रे तत्र दृष्टे कुरङ्गे, रभसविकसितास्ते दृष्टिपाताः प्रियायाः। पवनविलुलितानामुत्पलानां पलाश–प्रकरमिव किरन्तः स्मर्यमाणा दहन्ति ॥" इति रामः सीतायां हृतायां तां स्मरन्नाह–तत्र–पञ्चवट्यां, कनकचित्रे–कनकवत् चित्रे–आश्चर्यकारिणि, कनकेन–हिरण्येन चित्रे–कर्बुरे वा, कुरङ्गे–मृगे, दृष्टे–अवलोकिते सति, झगिति–शीघ्रं, रभसेन–वेगेन हर्षेण वा, विकसिताः–प्रफुल्लाः प्रसृता वा, ते अनुभूतिमात्रविषयाः,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्याद्यन्ते यथा–

"मा पंथं रुंध महं अवेहि बालय! अहो सि अहिरीओ।
अम्हे अणिरिक्काओ सुण्णहरं रक्खियव्वं णो" ॥ ८२ ॥

[स० श० ९६१]

अत्रापेहीति त्याद्यन्तम्। त्वं तावदप्रौढो लोकमध्ये यदेवं प्रकाशयसि, अस्ति तु संकेतस्थानं शून्यगृहं तत्रैवागन्तव्यमिति ध्वनति।

---

प्रियायाः–जानक्याः, दृष्टिपाताः–कटाक्षविक्षेपाः, पवनेन–वायुना, विलुलितानां–तरलितानाम्, उत्पलानां–नीलकमलानां, पलाशप्रकरं–दलसमूहं, किरन्तः–परितो विक्षिपन्त इव, स्मर्यमाणाः विरहदशायामिदानीं स्मृतिविषयतामापद्यमानाः, दहन्ति–मां तापयन्तीत्यर्थः। इहापि 'ते' इति पदमनुभूतस्मारकतया विप्रलम्भशृंगारव्यञ्जकम्॥

त्याद्यन्तं पदं व्यञ्जकमुदाहृत्य त्याद्यन्तमुदाहरति–त्याद्यन्ते यथेति। मा पंथं रुंधेति "मा पन्थानं रुन्धि अपेहि बालक! अहो असि अह्रीकः। वयं परतन्त्राः शून्यगृहं रक्षणीयमस्माकम्॥" इति संस्कृतम्, पन्थानं रुन्धन्तं कान्तं भङ्ग्या सङ्केतस्थलं सूचयन्ती कृत्रिमरोषाविष्टा काचिदाचष्टे–बालक! प्रौढिमनापन्न!, अविवेकिन्निति यावत्, अपेहि मार्गाद् दूरे व्रज, पन्थानं मद्गमनमार्गं, मा रुन्धि नावरुद्धं कुरु, अहो आश्चर्यम्, अह्रीकः जनसमाजेऽपि धार्ष्ट्यं विधानान्निर्लज्जस्त्वमसि, वयं परतन्त्राः स्मः, यतो नः अस्माकं, शून्यं साक्ष्यन्तररहितं, गृहं रक्षितव्यं चारादिभ्यः पालनीयं वर्त्तते, इत्यर्थः। अत्र परस्परसापेक्षं वाक्यपञ्चकम् 'अपेहि' इति त्याद्यन्तेन प्रधानेन सह सम्भूय। अप्रौढत्वात् तरलस्त्वमसि, यदीत्थं पथि लोकानां समक्षमेव रहस्यं प्रकाशयितुं चेष्टसे अस्त्येव निर्जनत्वात् संकेतोचितं मे गृहं, तत्रैव निभृतमागत्य स्वमनोरथं पूरय, अलमिदानीमतिप्रसङ्गेनेत्यादि सूच्यते, तत्र मुख्यं व्यञ्जकमपेहीति, तदाह–अत्रापेहीति त्याद्यन्तमिति–व्यञ्जकमिति शेषः। किं व्यञ्जयतीत्याह–त्वं तावदप्रौढ इत्यादिना। पदैकदेशस्य पदावयवस्य त्यादेरपि पदप्रयोजकत्वेन पदत्वमिति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पदैकदेशोऽपि पदं यथा-

"तालैः शिञ्जद्वलयसुभगैर्नर्तितः कान्तया मे,
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः" ॥ ८३ ॥
[ मे० दू० उ० श्लो-१६ ]

अत्र तालैरिति बहुवचनमनेकभङ्गिवैदग्ध्यं ख्यापयद्विप्रलम्भमुद्दीपयति।

"लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो
निराहाराः सख्यः सततरुदितोच्छूननयनाः।

---

तस्यार्थविशेषव्यञ्जकत्वमुदाहरति-तालैरित्यादि-मेघदूते यक्षेण स्वावासादिपरिचयदानपूर्वकं स्वगृहमध्यस्थितानामृद्धीनां वर्णनप्रसङ्गे पद्यमिदमुक्तम्, अयं चोत्तरार्धः, पूर्वार्धश्चेत्थम्-"तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टिः, मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः।" इति, तयोः-रक्ताशोक-केसरवृक्षयोः, मध्ये, अनतिप्रौढानाम्-अपक्वानां, वंशानां-वेणूनां, प्रकाशः-कान्तिरिव कान्तिर्येषां तैः, मणिभिः-मरकतरत्नैः मूलेऽधोदेशे, बद्धा-संघटिता, स्फटिकं-तन्मयं, फलकं-पीठं यस्यास्तादृशी, काञ्चनी-सुवर्णमयी, वासयष्टिः, पक्षिणां कृते निवासदण्डः अस्तीति शेषः। शिञ्जन्तः-शब्दायमाना, ये वलयाः-कङ्कणानि, तैः सुभगाः-रमणीया ये तालाः-अनेकविधकरतालवादनानि तैः, मे कान्तया [ कर्त्र्या ] नर्तितः,-नटनं कारितः, वः-युष्माकं मेघानां, सुहृद्-मित्रं, नीलकण्ठः-मयूरः, दिवसविगमे-दिनान्ते, यामध्यास्ते-यत्र यष्ट्यां निवसति सोऽपि ते परिचायक इति भावः। अत्र यच्छब्दस्योत्तरवाक्यगतत्वेन तच्छब्दापेक्षा। तालैरिति बहुवचनस्याद्यन्तं तालानामनेकविधत्वख्यापनद्वारा यक्षपत्न्यास्तद्विज्ञतया संगीतागमनैपुण्यं द्योतयद्विप्रलम्भशृङ्गारं व्यञ्जयति, तदाह-तालैरिति बहुवचनमित्यादिना॥

स्यादि-त्यादिविभक्तीनां सम्भूय व्यञ्जकत्वमुदाहरति-लिखन्नास्ते भूमिमित्यादिना, बहुदिनव्यापिमानवतीं नायिकां प्रति सख्या उक्तिरियम्-हे कठिने! निर्दये!, तव प्राणानां दयितः-प्रियः, एतेन दयितदुःखेन त्वत्प्राणा अपि दुःखिता भविष्यन्तीति ध्वन्यते, अथवा तव प्राणा इव सोऽपि दयितोऽस्माकं,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै-
स्तवावस्था चेयं विसृज कठिने! मानमधुना" ॥ ८४ ॥
[ अ० श० श्लो.-७ ]

अत्र न लिखतीति, अपि तु प्रसादपर्यन्तमास्त इति, तथा आस्त इति न त्वासित इति, भूमिमिति, न तु भूमाविति न हि बुद्धिपूर्वकं रूपकं किंचिल्लिखतीति स्यादि-त्यादिविभक्तीनां व्यञ्जकत्वम्।

"अन्नत्थ वच्च बालय! ण्हायंति कीस मं पुलोएसि।
एयं भो जायाभीरुयाण त्तहं चिय न होइ" ॥ ८५ ॥ [ ]

---

तथा तव प्राणा इव सोऽप्यस्माकं रक्षणीय इत्यर्थः, ईदृशोऽपि, अवनतः नम्रः, भूमिं न तु भूमौ, तेनाकाङ्क्षितस्य कर्मणोऽनुद्देश्यत्वं गम्यते, लिखन् शून्यहृदयतया विलिखन् न तु लिखति, तेन लिखनस्याबुद्धिपूर्वकत्वेनाप्राधान्यं ध्वन्यते, आस्ते उपविष्टोऽस्ति, न तु आसीत्, तेनैवमवस्थानस्य प्रसादपर्यन्तस्थापिता ध्वन्यते, तथा सख्यः सर्वा वयस्याः, निर्गत आहारो यासां तथाभूताः सत्यः, सततम्-अनारतं, रुदितेनोच्छूने-जातशोके, नयने-चक्षुषी यासां तथाभूताः, सन्तीति शेषः, तथा पञ्जरस्थैः शुकैः-कीरैः, हसितं पठितमन्यच्च सर्वं भोजनादि परित्यक्तम् उज्झितम्। अज्ञानामपि तव कारणादीदृश्यवस्था किमस्माकमिति भावः, तव चेयमुत्तरोत्तरवर्धमानाऽसह्यपीडाजनिका, अवस्था दशा, जातेति शेषः, अतः, अधुना वसन्तचन्द्रकादिभिरुद्दामे मन्मथविलसिते सतीत्यर्थः, मानं विसृज विशेषेण त्यजेति भावः ॥ अत्र केषां किं किं व्यञ्जकत्वमित्याह-अत्र न लिखतीति अपि तु प्रसादपर्यन्तमास्त इत्यादिना-लिखतीति कथनेन लेखनस्योद्देश्यत्वं विज्ञातं स्यादतो लिखन्निति शत्रन्तमुक्तं तेन चास्यानुद्देश्यता ध्वन्यत इत्यादि व्याख्यावसर एव वर्णितत्वेन व्याख्यातपूर्वमिति। एतावद्भिः सूचनैर्नायकस्य मोहातिशयो व्यज्यते, तथा च विप्रलम्भोत्कर्षो व्यङ्ग्य इति भावः ॥

सम्बन्धस्य तद्धितप्रत्ययस्य च व्यञ्जकत्वमुदाहरति-अन्नत्थ वच्चेति। "अन्यत्र व्रज बालक! स्नान्तीं कस्मात् मां प्रलोकसे। एतद्भो जायाभीरुकाणां तेषां [ युष्माकं ] एव न भवति ॥" इति संस्कृतम्, अत्र ध्वन्यालोके चतुर्थे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र जायातो ये भीरवस्तेषामेतत् स्नानस्थानमिति दूरापेतः संबन्ध इत्यनेन संबन्धेनैवेर्ष्यातिशयः प्रच्छन्नकामिन्याऽभिव्यक्तः। जायाभीरुकाणामित्यत्र तद्धितस्यापि व्यञ्जकत्वम्, ये ह्यरसज्ञा धर्मपत्नीषु प्रेमपरतन्त्रास्तेभ्यः कोऽन्यो जगति कुत्सितः स्यादिति कप्रत्ययोऽवज्ञातिशयद्योतकः।

---

पादे 'तुहाण संबंबन्धो बिअ ण होइ" इति पठ्यते, अत्र च 'तहं' इत्यस्य तेषामिति च्छाया कृता परिशिष्टे, परन्तु 'युष्माक'मिति युज्यतेऽर्थसम्बन्धाय, तथा च 'महं' इत्यस्येव 'तहं' इति निपातोऽत्र युष्माकमित्यर्थे इत्याकलनीयम्, तथैव च व्याख्यायते–कश्चित् पाणिगृहीत्या भीरुः पूर्वकृतप्रणयः निरन्तरमसन्निधाय स्नान्तीं प्रच्छन्नकामुकीमुपेतः, सा तमित्थं तर्जयति बालक! प्रणयतारतम्यपरिच्छेदानभिज्ञ! अदक्षिण! अन्यत्र व्रज यत्र सा ते जायाऽस्ति, यद्भयात् त्वमियन्तं कालमन्तर्धाय समागतोऽसि, तत्सविधे एव परत्र वा गच्छ, न तु मदन्तिके तिष्ठ, स्नान्तीं स्नानमाचरन्तीं मां, कस्मात् कुतः कारणात्, प्रलोकयसे प्रीतिदार्ढ्यानुबन्धनं यथा स्यात् तथा पश्यसि। नन्वहमपि स्नानायैव समागत इति चेत्? अत्राह–भोः कातर्यास्कन्दित–प्रागल्भ्य!, जायाभीरुकाणां स्वधर्मपत्नीभयास्कन्दितचेतसां, [तेषां] युष्माकं भवादृशानाम्, एतत् स्नानस्थानं न भवति, जायाभीरूणां परकीयया सह विहारादियोग्यताभावात् तेषामिह मादृशीनां स्नानस्थाने स्थानं नास्तीति भावः। अत्र व्यञ्जनं प्रदर्शयति–अत्र जायातो ये भीरवस्तेषामित्यादिना। स्नानस्थानमित्यतोऽग्रे वृत्तौ न' इति स्खलितम्, अर्थसम्बन्धानुसारं तदावश्यकत्वप्रतिपत्तेः। एतत्–स्नान, स्थानमेव जायाभीरूणां नेत्यनेन स्वसम्बन्धो दूरमपसारितः, तथा च जायाभीरुकाणामिति सम्बन्धार्थकविभक्त्या प्रच्छन्नकामिन्या ईर्षातिशयः प्रकटितः, तथा तत्रत्यतद्धित'क'प्रत्ययेनापि अवज्ञाप्रकर्षोऽथ च तत्सम्बन्धासम्भाव्यत्वं सूच्यते। जाया हि सन्ततिजननमात्रप्रयोजना भवति न तु तस्यां परकीयावत् प्रणयः सम्भाव्यते, अतश्च ये धर्मपत्नीषु प्रेमपरतन्त्रास्ते न रसज्ञाः, अरसज्ञैश्च सह सम्बन्धमाचरन्नन्योऽपि कुत्सित एव स्यात्, यतश्च ते सर्वतोऽधिकं कुत्सिता इत्यनेन प्रकारेण कप्रत्ययस्यावज्ञातिशयद्योतकत्वं स्पष्टम्॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुः सहो मे।
नववारिधरोदयादयोभिर्भवितव्यं च निरातपत्वरम्यैः" ॥ ८६ ॥
[ वि० अं० ४. श्लो-३. ]

अत्र चकारौ निपातावेवमाहतुः-गण्डस्योपरि स्फोटवद्वियोगश्च वर्षासमयश्च समुपनतमेतद् द्वयमलं प्राणहरणायेति । अत एव रम्यपदेन सुतरामुद्दीपनविभावत्वमुक्तम् ।

"प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः" ॥८७॥
[ शा० अं० १. श्लो-१३ ]

---

निपातानां व्यञ्जकत्वमुदाहरति-अयमेकपदे तया वियोग इति । गन्धमादनपर्वते राज्ञा पुरूरवसा सह विहाराय भ्रमन्त्या उर्वश्याः, उदयवत्या विद्याधरदारिकाया उपरि राज्ञः स्नेहं दृष्ट्वा कुपितायास्ततः पृथग् भूत्वा स्त्रीजनपरिहरणीयं कुमारवनं गतायाः, लतारूपेण परिणामे सति तामन्विष्यन् तद्विरहकातरो राजा वर्षागमनं सम्भाव्येदमाह-"तया उर्वश्या प्रियया सह, एकपदे अकस्मात्, अयं साक्षात्क्रियमाणः, वियोगः विरहः, मे मम, सुदुःसहः नितरामसह्यः, उपनतः समुपस्थितः, नवीनानां, वारिधराणां-मेघानाम्, उदयात् उद्गमात्, निरातपत्वेन-आतपाभावेन छाययेति यावत्, रम्यैः-रमणीयैः, अहोभिः दिवसैर्भवितव्यं चेत्यहो ! अनर्थपरम्पराभिनिपातः । अत्र निपातस्य कथं व्यञ्जकत्वमित्याह-अत्र चकारौ निपातावेवमाहतुरित्यादि गण्डस्य पिटकस्य मुखोपरिजायमानस्य स्फोटविशेषस्य, उपरि, अपरः स्फोटो यदि स्यात् तदा यादृशी दशा भवति तादृश्येवाद्य मम प्राप्ता, यतो वियोगः [ प्रियाया विरहः ], वर्षासमयः [ विरहिणामत्यन्तभयजनकः ] इति द्वावपि सममेवोपतताविति मम प्राणहरणायैवायं सन्निपातः, तस्योद्दीपनतरत्वं द्योतयितुमेव दिवसानां निरातपत्वरम्यैरिति विशेषणमपि दत्तम् । तथा च चकारद्वयेन विरहोपनमनतादृशदिवसभवनयोर्यौगपद्यं, मेघच्छायोपेतदिनानामुद्दीपनतरत्वं, तन्मलिनदिवसानां दुर्यापत्वं, विरहवेदनाया असह्यतोत्कर्षश्च सूच्यते, ततश्चात्र चकाररूपनिपातस्य व्यञ्जकता स्फुटैव ॥

निपातानां व्यञ्जकत्वप्रदर्शनप्रकरणे तदन्तर्गतोपसर्गाणां व्यञ्जकत्वमुदाहरति-प्रस्निग्धाः क्वचिदिङ्गुदीति । अभिज्ञानशाकुन्तले मृगयार्थं परिभ्रमन् राजा दुष्यन्तः समन्तादवलोक्य सूत ! अकथितोऽपि ज्ञायत एव यदयमाश्रमा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अत्र 'प्र' इत्युपसर्ग इङ्गुदीफलानां सरसत्वमाचक्षाण आश्रमस्य सौन्दर्यातिशयं ध्वनति।**

**अनेकस्य निपातस्योपसर्गस्य चैकत्र पदे यः प्रयोगः सोऽपि रसव्यक्त्यर्थः। यथा-**

**"अहो बतासि स्पृहणीयवीर्यः" ॥८८॥ [ कु० सं० ३. श्लो-२० ]**

---

भोगस्तपोवनस्येति, सूतः—कथमिव, राजा—किं न पश्यति भवान्, इह हि, इत्युपक्रम्य पद्यमिदमुवाच, अयं च श्लोकस्य द्वितीयः पादः, पूर्णश्लोकश्चायम्—

"नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः,
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा,-
स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दलेखाङ्किताः॥" इति।

अयमर्थः—शुकाः-कीराः, गर्भे-अन्तर्येषां तानि कोटराणि-तरुविवराणि, तेषां मुखेभ्यः-अग्रभागेभ्यः, भ्रष्टाः-पतिताः, नीवाराः-तृणधान्यानि, यतः सन्तीति शेषः, तथा **इङ्गुदीफलभिदः** तापसतरुफलचूर्णकाः, अत एव प्रकर्षेण स्निग्धाः-चिक्कणाः, उपलाः-प्रस्तराः, क्वचित् **सूच्यन्ते** प्रकाश्यन्त एव, किञ्च विश्वासस्य-नात्र कश्चन हनिष्यतीति विस्रम्भस्य, उपगमात्-उदयात्-अभिन्ना-अस्खलिता गतिर्येषां ते, **मृगाः** हरिणाः, शब्दं रथध्वनिं, सहन्ते, न तु ततः पलायन्ते, च पुनः, वल्कलानां-कषायीकृततरुत्वचां, शिखाभ्यः-अग्रभागेभ्यः, निष्यन्दः-जलस्रावः, तेन या लेखाः-रेखास्ताभिः; अङ्किताः-चिह्निताः; **तोयाधारपथाः** जलाशयमार्गाश्च, यतः सन्त्यतोऽयमाश्रयाभोगः स्पष्ट इति। अत्र स्वभावोक्ति-समुच्चयावलङ्कारौ। कोऽत्र किं व्यञ्जयतीत्याह-अत्र प्र इत्युपसर्ग इति-इङ्गुदीफलानां सरसत्वमिति प्रशब्द उपलानामतिस्निग्धतां बोधयन्निङ्गुदीफलानां सरसतातिशयं परम्परया शान्तरससमन्वितत्वविशिष्टसौन्दर्यातिशयं चाश्रमस्य ध्वनतीति भावः॥

प्रत्येकं निपातस्योपसर्गस्य च व्यञ्जकत्वमुदाहृत्य एकत्रानेकनिपातानामुपसर्गाणां च व्यञ्जकत्वमुदाहर्तुं भूमिकामारचयति—**अनेकस्य निपातस्य चोपसर्गस्येति**-एकत्र पदेऽनेकस्य निपातस्य तथानेकस्य चोपसर्गस्य च सन्निपातोऽपि रसव्यक्त्यर्थो भवति **यथा अहो बतासीति**-कुमारसंभवे तृतीये सर्गे इन्द्रस्य वाक्यस्य पद्यस्यांशोऽयम्, पूर्णश्लोकश्चेत्थम्—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्राहो बतेत्यनेन श्लाघातिशयो ध्वन्यते ।

"मनुष्यवृत्त्या समुपाचरन्तं स्वबुद्धिसामान्यकृतानुमानाः ।
योगीश्वरैरप्य सुबोधमीशं त्वां बोद्धुमिच्छन्त्यबुधाः स्वतर्कैः"
॥ ८९ ॥ [ ]

---

"सुराः समभ्यर्थयितार एते, कार्यं त्रयाणामपि विष्टपानाम् ।
चापेन ते कर्म न चातिहिंस्रमहो बतासि स्पृहणीयवीर्यः ॥"
[ कु० सं० स० ३ श्लो० २० ]

तपस्यन्तं शिवं पार्वतीं प्रत्युन्मुखीकर्तुं कामदेवमुत्साहयन् देवेन्द्रस्तमाह–एते त्वदग्रे दैन्येन स्थिताः, सुराः, समभ्यर्थयितारः न केवलमहमेव त्वामत्र कार्ये प्रवर्तयाम्यपि तु सर्वैः सुरैरभ्यर्थ्यते, तत्राऽपि न केवलं सर्वेषां सुराणामेव कार्यम्, अपि तु त्रयाणामपि विष्टपानां लोकानां कार्यम्, ते चापेन तव प्रसिद्धेन पौष्पेण धनुषा, कर्म तत् साध्यमिति शेषः, ननु भवतु नामोर्थं कार्यस्य महत्त्वमल्पायाससाध्यत्वं च, तथापि विनापराधं कमप्यहं कुतः कदर्थयामीति चेदत्राह–न चातिहिंस्रमिति–तत्र कर्मणि कस्यापि अतिशयिता प्राणवियोगादिजनिका हिंसा नास्तीति भावः, अन्ते प्ररोचनामाह–अहो बत महदाश्चर्यं स्पृहणीयवीर्योऽसि स्पृहणीयम्–अन्यैः प्राप्तुमभिलषणीयं वीर्यं यस्य तादृशोऽसि । अत्र व्यङ्ग्यमाह–अहो बतेत्यनेन श्लाघातिशय इति–निपातद्वयमिदं क्रमेणाश्चर्यमामन्त्रणं चाभिदधानं मदनवीर्यस्यालौकिकत्वेन श्लाघां व्यञ्जयदद्भुतरसं प्रकाशयतीति ॥

निपातसमुदायस्य व्यञ्जकत्वमुदाहृत्योपसर्गसमुदायस्य व्यञ्जकत्वमुदाहरति–मनुष्यवृत्त्या समुपाचरन्तमिति । स्वबुद्धिसामान्यकृतानुमानाः स्वमतियोग्यतया कृतानुमितयः, अबुधाः वास्तविकतत्त्वज्ञानशून्या जनाः-योगीश्वरैः योगिषु श्रेष्ठैरपि, असुबोधं सुखेनावगमन्तुमशक्यं, मनुष्यवृत्त्या मानवोचिताचारेण, समुपाचरन्तं लोककल्याणाय, सम्यग्, उपांशु–अप्रकटितैश्वर्यं यथा स्यात् तथा, समन्ताद् व्यवहरन्तम् ईशं परमेश्वरं, त्वाम्, कुतर्कैः [ स्वतर्कैः ] शास्त्रासहायैस्तर्कैः, बोद्धुमिच्छन्ति, एतदेव तेषामबुधत्वमिति वा, तथा सति ये स्वबुद्धिसामान्यकृतानुमाना एवम्भूतं त्वां कु[स्व]तर्कैर्बोद्धुमिच्छन्ति तेऽबुधा इति योजनीयम् । अत्र वृत्तौ 'योगीश्वरैरप्य सुबोधम्'

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र सम्यग्भूतमुपांशु कृत्वा आ समंताच्चरन्तमित्यनेन लोकानुजिघृक्षातिशयस्तत्तदाचरतः परमेश्वरस्य ध्वन्यते ।

"रमणीयः क्षत्रियकुमार आसीत्" ॥ ९० ॥ [महावीरचरिते] इति

अत्र शङ्करधनुर्भङ्गश्रवणात् प्रकुपितस्य भार्गवस्योक्त्या 'आसीत्' इत्यतीतकालनिर्देशाद् दाशरथेः कथाशेषत्वं व्यज्यते ।

यथा च प्रत्ययांशस्य द्योतकत्वं तथा प्रकृत्यंशस्यापि यथा-

"तद्गेहं नतभित्ति मन्दिरमिदं लब्धावकाशं दिवः
सा धेनुर्जरती नदन्ति करिणामेता घनाभा घटाः ।

---

इति पाठस्त्वसमीचीन इति 'योगीश्वरैरप्यसुबोधम्' इति पाठं ध्वन्यालोकादिटीकोद्धृतं कल्पयित्वा व्याख्यातमिदं पद्यम् । अत्रोपसर्गाणां व्यञ्जकत्वमाह-सम्यग्भूतमित्यादिना, अयमाशयः-अत्र समुपाङामुपसर्गाणां सन्निपातः सम्यगुपांशु आ समन्ताद् मानवरूपेणेशाचरणमाभिदधज्जन्तुसन्तानानुग्रहोत्कर्षं वस्तु तद्विषयकरतिभावं च व्यनक्तीति ॥

पदस्य व्यञ्जकत्वप्रसङ्गे उपसर्गनिपातादीनां व्यञ्जकत्वमुदाहृत्य पदांशस्य व्यञ्जकत्वमुदाहर्तुं तावत् पदांशस्य प्रत्ययस्य व्यञ्जकत्वमुदाहरति-रमणीयः क्षत्रियकुमार आसीदिति-महावीरचरिते द्वितीयसर्गे परशुरामोक्तिरियम्, शिवधनुर्भङ्गकुपितोऽसौ राममाकारयन् तमभिमुखमागच्छन्तं वीक्ष्य तत्रत्यान् श्रावयन्नाहेदम् । अत्र प्रत्ययांशेनातीतकालबोधकेन तस्य [ रामचन्द्रस्य ] कथाशेषत्वं बोधयता रौद्ररसः स्पष्टं व्यज्यते, मत्क्रोधकवलितस्यास्य क्षत्रियकुमारस्य रमणीयत्वमतीतं न तु वर्तमानं भविष्यद् वेति रूपेण क्षणादेनं संहरामीति प्रतीत्या क्रोधातिशयस्य व्यक्त्या रौद्ररसव्यक्तेः स्फुटावभासनात् ॥

एवं प्रत्ययांशस्य द्योतकत्वमुक्त्वा प्रकृत्यंशस्य द्योतकत्वमुदाहर्तुं भूमिकामाह-यथा च प्रत्ययांशस्येत्यादिना । तद्गेहं नतभित्तीति-ध्वन्यालोके काव्यप्रकाशे च समुदाहृतमिदं पद्यम्, दरिद्रचरस्य सुदामनाम्नः कृष्णसखस्याकस्मिकीं सम्पदमवलोक्य कश्चिदाह-नता-जीर्णतया पतनोन्मुखी भित्तिर्यस्य तादृशं, तत् स्मृतिमात्रगोचरभूतं नकुलमूषकादिमृदाकीर्णं, गेहं, आसीदिति शेषः, इदानीं तु इदं मन्दिरं राजयोग्यगृहं, दिवः स्वर्गात्, लब्धोऽवकाशो यस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स क्षुद्रो मुशलध्वनिः कलमिदं संगीतकं योषिता-
माश्चर्यं दिवसैर्द्विजोऽयमियतीं भूतिं परां प्रापितः" ॥ ९१ ॥
[ ]

अत्र दिवसार्थेनात्यन्तासंभाव्यमानताऽस्यार्थस्य ध्वन्यते, तदिति प्रकृत्यंशश्चाऽत्र नतभित्तीत्येतत्प्रकृत्यंशसहायः समस्तामङ्गलभूतां मूषिकाद्याकीर्णतां ध्वनति, एवं सा धेनुरित्यादावपि योज्यम् ।

तथा—

"रइकेलिहियनियंसणकरकिसलयरुद्धनयणजुयलस्स ।
रुद्दस्स तइयनयणं पव्वइपरिचुंबियं जयइ ॥ ९२ ॥
[ स० श० ४५५ गा० स० प० ५५ ]

तादृशम्, लब्धावगाहमिति पाठे तु दिवः आकाशस्य लब्धोऽवगाहः-आलोडनं येन तादृशं, गगनचुम्बि इत्यर्थः, अस्तीति शेषः, सा स्मर्यमाणा, जरती प्रसवाद्ययोग्या, अकर्मण्या, धेनुः गौरासीत्, इदानीं तु घनाभाः मेघनीलाः, करिणां हस्तिनाम्, एताः पुरोवर्तमानाः, लक्ष्मीलक्षणभूताः, घटाः सङ्घटितपङ्क्तयः, नदन्ति शब्दायन्ते, किञ्च स निःस्वतासूचकः, क्षुद्रः अल्पान्ने व्यापारात् तुच्छः, मुसलध्वनिः मुसलेन धान्यकुट्टनजन्मा ध्वनिरासीत्, साम्प्रतं तु इदं श्रुतिविषयीक्रियमाणं, योषिताम् अङ्गनानां, कलं मधुरं, सङ्गीतकं समृद्धजनगृहशोभि गानं, भवतीति शेषः, अयं द्विजः सुदामा, दिवसैः त्रिचतुरैरेव दिनैः, न तु पक्षैर्मासैर्वर्षैर्वा, इयतीं पूर्ववर्णितामनुपमां, पराम् उत्कृष्टां, भूतिं समृद्धिं, प्रापित इत्याश्चर्यमित्यर्थः । अल्पीयसैव कालेनैतावान् विपर्यासः सम्भावनातिगोऽद्भुतावह इति सारम्, व्यञ्जकतां प्रकटयति-अत्र दिवसार्थेनेति-दिवसैरिति पदावयव'दिवस'रूपप्रकृतिभागार्थेन मासादिव्यावर्तने कालाल्पतां द्वारीकृत्य सम्पदोऽसम्भाव्यत्वेनाश्चर्यजनकतां व्यनक्ति, एवं तदिति सर्वनामरूपप्रकृत्यंशोऽपि नतभित्तीति प्रकृत्यंशेन सह गृहस्य समस्तामङ्गलस्वरूपां मूषिकादिजन्तुतत्कृतमृत्तिकादिचयविवरशताद्याकीर्णतां प्रकटयति, सा धेनुरित्यादावपि तदिति प्रकृत्यंशस्य तथैवार्थविशेषव्यञ्जकत्वं व्याख्येयमिति वृत्त्यर्थः ॥

प्रकृत्यंशस्य व्यञ्जकत्वप्रदर्शनप्रकरणे प्रकृत्यन्तरापेक्षया प्रकृतिविशेषस्य व्यञ्जकत्वमुदाहरति-रइकेलिहियेति-रतिकेलिहृतनिवसनकरकिसलयसहनयनयुग-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र जयतीति न तु शोभत इत्यादि। समानेऽपि हि स्थगनव्यापारे लोकोत्तरेणैव रूपेणास्य पिधानमिति तदेवोत्कृष्टमिति व्यज्यते।

भावादीनां पदप्रकाशकत्वेऽधिकं न वैचित्र्यमिति न तदुदाहियते। वाक्यस्य रसादिव्यञ्जकत्वं रसादिलक्षण एवोदाहरिष्यते। प्रबन्धे च नाटकादावर्थशक्तिमूला रसव्यक्तिः प्रतीतैव, वर्णरचना-

---

लस्य। रुद्रस्य तृतीयनयनं पार्वतीपरिचुम्बितं जयति॥" इति संस्कृतम्, रुद्रस्य **तृतीयनयनं** ललाटस्थलोचनं, पार्वत्या गौर्या, परिचुम्बितं सत्, **जयति,** सर्वोत्कर्षेण वर्तते, कीदृशस्य रुद्रस्य? रतिकेलौ-सुरतक्रीडायाम्, हृतं निवसनं-पार्वतीसम्बन्धि परिधानवस्त्रं येन स चासौ करकिसलयाभ्यां-पाणिपल्लवाभ्यां, रुद्धं-पार्वत्या पिहितं, नयनयुगलं-नेत्रद्वन्द्वं यस्य तादृशश्च, तस्येति बहुव्रीहिद्वयगर्भः कर्मधारयसमासः। अत्र 'शोभते' इत्यपेक्षया 'जयति' इत्यस्य प्रकृत्यंशेन जिधातुना समाजेऽपि स्थगनव्यापारे लोकातिगेन रूपेण [ करद्वयस्य नेत्रद्वयव्यापृततया चुम्बनव्यापार-पिधानयोरेकेन मुखेनैव विहिततया हि तस्यालौकिकत्वम् ] तृतीयनेत्रस्य पिधानमिति तस्यान्यपिधानापेक्षया रागातिशय-हर्ष-लज्जादिसम्पादनमुखेनैव तस्योत्कृष्टत्वं व्यज्यत इति, तदुक्तं वृत्तौ-**अत्र जयतीति न तु शोभते इत्यादीति**। अत्र जयतीत्येव व्यञ्जकं, 'शोभते' इत्यादिपदैर्वर्ण्यमानोऽयमर्थो न तथा चमत्कारीति भावः॥

रसादिश्चेति सूत्रे यद्यप्यादिपदेन ग्राह्याणां भावादीनामप्यर्थशक्तिमूलं व्यञ्जनं पदगतमुदाहरणीयं तथापि तेषां पदप्रकाश्यत्वे चमत्काराभावान्नोदाहृतमित्याह-**भावादीनां पदप्रकाश्यत्व इति अधिकं न वैचित्र्यमिति**-अधिकम्-उत्तमकाव्यत्वप्रयोजकं, वैचित्र्यम्-अतिशयश्चमत्कारो वा न। नन्वस्तु भावादीनां पदप्रकाश्यानामनुदाहरणं समर्थितम्, रसस्य वाक्यप्रबन्धादिगतस्य प्रकाश्यत्वं [ व्यङ्ग्यत्वं ] नोदाहृतमिति न्यूनतेति चेत्? अत्राह-**वाक्यस्य रसादिव्यञ्जकत्वमिति** रसादिलक्षणनिरूपणावसरे तदीयोदाहरणानि वाच्यानेव, रसस्य च व्यङ्ग्यत्वमेवेत्युक्तं प्राक्, तथा चैकत्रैव रसोदाहरणवाक्यगतरसव्यञ्जकतोदाहरणे प्रदर्शनीये इति लाघवानुरोधेनेह न तदुपन्यास इति भावः। प्रबन्धगतामर्थशक्तिमूलां रसादिव्यक्तिमिहानुदाहृत्य तदुदाहरणसरणिं दर्शयति-**नाटका-**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**यास्तु साक्षान्माधुर्यादिगुणव्यञ्जकत्वमेव, तद्द्वारेण तु रसे उपयोग इति गुणप्रकरण एव वक्ष्येते इतीह नोक्ते ॥ २५ ॥**

इत्याचार्यश्री**हेमचन्द्र**विरचितायाम**लङ्कारचूडामणि**संज्ञस्वोपज्ञ-**काव्यानुशासन**वृत्तौ प्रथमोऽध्यायः ॥

---

द्वाविति–तथा हि–'अभिज्ञानशाकुन्तलं विक्रमोर्वशीयम्' इत्यादीनि शृङ्गारस्य, महावीरचरितम्, वेणीसंहारः' इत्यादीनि वीरस्य, 'उत्तररामचरितम्' करुणस्य-'भर्तृहरिनिर्वेदम्' शान्तस्येत्यादिरीत्योदाहरणं बोध्यमिति भावः। 'वर्णरचनायास्तु-इति पाठोऽपपाठः, वर्ण-रचनयोरित्येव प्रकरणोपयोगी, पदांशरूपवर्णस्य संघटना, रूपरचनायाश्च न साक्षाद्रसादिव्यञ्जकत्वमपि तु माधुर्यादिगुणव्यञ्जनद्वारेति तत्तद्गुणलक्षणावसर एव तदुदाहरणं वक्ष्यते इत्याह–**वर्ण-रचनयोस्त्वित्या'** दिनेति। **साक्षान्माधुर्यादिव्यञ्जकत्वमेवेति**–एवकारेण वस्त्वलङ्काररसादिव्यञ्जकत्वव्यवच्छेदः। **तद्द्वारेणेति**–गुणद्वारेणेति भावः। एवं च परम्परया रसव्यञ्जकत्वं तयोरिति। अयमाशयः–गुणानां रसैकधर्मत्वस्य "रसस्योत्कर्षापकर्षहेतू गुणदोषौ" इत्यादि प्रकृताध्यायस्थद्वादशसूत्रेण निर्णीतत्वात्, तैः साक्षादेव रसानां सम्बन्धः, वर्ण-रचनयोस्तु गुणैः सह साक्षादिति तयोर्गुणद्वारैव रसव्यञ्जकत्वमिति फलितम् ॥ २५ ॥

इति कलिकालसर्वज्ञश्रीहेमचन्द्रसूरिभगवत्प्रणीतस्य स्वोपज्ञालङ्कारचूडामणिवृत्ति-संवलितस्य काव्यानुशासनस्य प्रथमाध्याये तपोगच्छाधिपति-शासन-सम्राट्सर्वतन्त्रस्वतन्त्र-श्रीविजयनेमिसूरीश्वरपट्टालङ्कारेण व्याकरणवाचस्पति-शास्त्रविशारदकविरत्नेतिपदालङ्कृतेन विजयलावण्यसूरिणा विरचितः प्रकाशः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## सालङ्कारचूडामणिकाव्यानुशासनप्रकाशप्रथमाध्यायस्य

# शुद्धिपत्रकम् ।

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ३ | १० | [ ० ] | [ मुण्डकोपनिषत् २.२.८. |
| ,, | १९ | सम्बन्धः । | सम्बन्ध इत्युक्तम् । |
| ६ | १४ | [ मेदिनी ] | [ मेदिनी द० श्लो० १६ ] |
| ११ | ११ | शोभैव | शोभेव |
| ,, | ,, | सम्पन्नतैव | सम्पन्नतेव |
| ,, | १६ | तथादर्श° | यथा दर्श° |
| १२ | १९ | रेकर्तृत्वम् | रेककर्तृत्वम् |
| ,, | २९ | काव्यात्मकाभि° | काव्यात्मताभि° |
| १३ | ११ | कवेः कर्म | कविकर्म |
| ,, | १९ | ह्यथ महा° | ह्यर्थे महा° |
| ,, | २२ | जीववर्णने | सजीववर्णने |
| १४ | ११ | स्वादिसमुत्थ | स्वादसमुत्थ |
| १७ | १८ | कषायोषध | कषायौषध |
| १८ | ९ | सती लाञ्छन | सती-लाञ्छन |
| ११ | ११ | अस्त्यमुपदेशः | अस्त्ययमुपदेशः |
| ,, | २० | °चितारपरि° | °चिताचारपरि° |
| २५ | २ | तन्मात | तन्मत |
| २६ | ११ | संस्कारतयैव | संस्कारकतयैव |
| २७ | १० | मात्रपदं | मात्रग्रहणं |
| ,, | १५ | प्रदक्षणी° | प्रदक्षिणी |
| ,, | १९ | प्रयुक्त | प्रयुक्तः |
| २८ | २८ | विन | विना |
| ,, | २९ | वक्ष्या | वक्ष्य |
| २९ | ४ | संस्क-रणीयेति | संस्करणीयेति |
| ,, | १४ | दृश्यते | दृश्येते |

*

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २९ | १५ | यते | येते |
| ,, | २८ | त्रैकान्तिक | त्रैकालिक |
| ३१ | ५ | पादनम् | पादानम् |
| ३३ | १३ | अभिधाकोशा° | अभिधानकोशा° |
| ३४ | ३ | दत्रोर्वशीस्मित° | दत्रोर्वशी स्मित° |
| ,, | ६ | एलायाः | इलायाः |
| ३६ | ६ | एवोपनिद्धः | एवोपनिबद्धः |
| ३८ | १९ | सुखावती° | सुखावनी° |
| ३९ | ११ | °मृतैवेति | °मृतैरिति |
| ,, | २९ | विशुद्ध | विशुद्धि |
| ४० | १ | यत्र | याच |
| ,, | १८ | °न्तर्यामि, भेदेन | °न्तर्यामिभेदेन |
| ,, | ,, | प्रतिभाद्यो | प्रतिमाद्यो |
| ४१ | २० | आहतः | आर्हतः |
| ,, | २८ | यौगपद्येन खिला° | यौगपद्येनाखिला° |
| ४२ | १४ | °भिलाषा° | °भिलाष° |
| ४३ | २१ | पुरुषवच्च कार्य | पुरुषवत्त्वकार्य |
| ,, | २७ | महिम्र | महिम्नः |
| ४५ | २२ | नाट्याङ्क | नाट्याङ्ग |
| ४६ | ७ | नाठ्येऽर्थो | नाट्येऽर्थो |
| ५० | २० | °णतिः सम° | °णतिः सपदि सम° |
| ,, | २८ | °यत्र सम° | °यत्र सपदि झटिति सम° |
| ५२ | २७ | एवेति | इवेति |
| ५४ | २४ | °पतिरपि | °पतिरिमे |
| ,, | २८ | माहतवान् | माहूतवान् |
| ५५ | ३ | °पतिरपि, | °पतिरिमे |
| ,, | ९ | चित्रकर्त्तरि | चित्रकर्त्तार |
| ५६ | ११ | °वश्यकीर्ति | °वरियकेति |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ६४ | ७ | °दाहरमिति | °दाहरणमिति |
| ६७ | २ | दर्धिताः | °दर्घिताः |
| ,, | ५ | अर्धिताः | अर्घिताः |
| ,, | १६ | °तयोर्जीवनं | °तयोपजीवनं |
| ६९ | ५ | विधायि वर्ण्यं विजयि | विधायिवर्ण्यविजयि |
| ७४ | १७ | °नकारकारणात् | °नकारणात् |
| ,, | २९ | सामलिङ्गितः | समालिङ्गितः |
| ७९ | ११ | °कण्ठः श्याम° | °कण्ठश्याम° |
| ८० | १७ | प्रथक् | पृथक् |
| ,, | २० | भावना, सत्कवि | भावनासत्कवि |
| ९१ | २४ | °रोधविसरता | °रोधक्षतविसरता |
| ९८ | १९ | यथाभूतं | तथाभूतं |
| १०० | २५ | कुल्योः | कूल्योः |
| १०३ | ७ | सर्वं सम्मत° | सर्वसम्मत° |
| १०७ | १८ | निधिः–निधिः समुद्रः, | निधिः–समुद्रः |
| ११० | २१ | नितम्बः | नितम्ब– |
| ११३ | १८ | आकारेषु | आकरेषु |
| १२२ | १६ | वरी | वैरी |
| १२३ | ४ | तदेवाचा° | तदेव चा° |
| १२४ | २ | इति द्वित्वेन द्वित्वेन | इति द्वित्वेन |
| १२७ | १३ | शरीरमूषका | शरीरभूषका |
| १२८ | २४ | आस्वादे बोध° | आस्वादोद्बोध° |
| १२९ | २२ | °धकमात्रेण | °धकत्वमात्रेण |
| १३६ | १६ | कृता विमृश्य | कृताविमृश्य |
| १३७ | ५ | न ज्ञानम° | ज्ञानम° |
| ,, | २७ | इति–सूत्रे | इति । सूत्रे |
| १३८ | २ | °चारितत्व° | °चारित्व° |
| १३९ | ९ | दण्डकार– | दण्डः कार– |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १४० | १३ | °जीवानु भूत° | °जीवातु भूत° |
| १४१ | १९ | प्राप्तो शब्दाद्या | प्राप्तौ शब्दाद्या |
| १४२ | १३ | तद्भुव | तद्भुवं |
| १४४ | २ | इत्यनुभावात् | इत्यनुभवात् |
| ,, | ५ | तदा पि | तदापि |
| ,, | १२ | सिद्धान्तिमि° | सिद्धन्तितमि° |
| ,, | २८ | मद्बुह्नित्वेन | मद्बह्नित्वेन |
| ,, | २९ | गौरवाश्वावात् | गौरवाभावात् |
| १५५ | १६ | यमकोपमात्वादि | यमकत्वोपमात्वादि |
| १४७ | ६ | मूलमिति | मूल इति |
| ,, | २९ | समर्पित | समर्थित |
| १४८ | १० | गड्डरिका | गड्डुरिका |
| १५१ | ४ | त्यनेक | त्यनेनेक |
| १५३ | २९ | प्रति हताशाः | प्रतिहताशाः |
| १५५ | ८ | एवाङ्गिक | एवाधिक |
| १५७ | ८ | °सराज° | °त्सराज° |
| १५९ | २२ | °गृहीता° लता | °गृहीतां °लतां |
| १६० | १४ | वाक्यं | वाच्यं |
| १६५ | १० | रित्यादि ना | रित्यादि न |
| १६६ | ५ | निह्नुरति | निह्नुति |
| १६७ | ४ | चोरी | चौरी |
| ,, | २७ | ताड-कपाट° | ताडः—कपाट° |
| १७३ | २७ | आकाङ्क्षाप्रतीति° | आकाङ्क्षा-प्रतीति |
| १७६ | २२ | गोरित्येष | गौरित्येष |
| १७७ | १७ | तत्तत् तत्तत् | तत्तत् |
| १७८ | ५ | एतदेवं | एतदेव |
| ,, | ७ | धर्मिकस्व° | धर्मिस्व° |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १७८ | १६ | को नो गुण° | वीतोगुण° |
| ,, | २१ | प्रकारकारक | प्रकारक |
| १७९ | ५ | °दोषास्थित्य° | °दोषस्थित्य° |
| १८१ | १५ | व्यक्तावानन्त्या° | व्यत्नावानन्त्या° |
| ,, | १८ | शब्दार्थावस्य | शब्दार्थत्वस्य° |
| १८४ | २८ | गवामेदस्य | गवा भेदस्य |
| १८५ | ४ | मात्र इत्या° | भाक्त इत्या° |
| १९६ | ५ | पदार्थगता | परार्थगता |
| ,, | १२ | °माणाया | माणया |
| ,, | २८ | विशेषगतया | विशेषणतया |
| १८७ | १८ | यान्यन्यायु° | यान्यन्यान्या° |
| १८८ | ६ | °याज्ञात्वेन | याज्ञत्वेन |
| ,, | २७ | प्रयोक्तृत्वे | प्रयोक्तव्ये |
| १८९ | २१ | भवता प्रथिता | प्रथिता भवता |
| १९० | १७ | भगीरथखाना° | भगीरथरथखाता° |
| १९२ | १८ | व्याहृतः, | व्याहृत- |
| १९३ | ९ | विज्ञानात् | विज्ञातात् |
| १९४ | ८ | त्यनुमानाश्रि° | त्यनुमानमाश्रि° |
| १९६ | ३ | °भेदात्। योगार्थ | भेदात् योगार्थ |
| १९७ | १२ | हस | सह |
| १९८ | १८ | प्रतिपादनेन | प्रतिपादने, न |
| १९९ | ७ | वाऽभिधीयते | वाऽभिधीयेत |
| ,, | २४ | यस्तत्रास्मद्गृहे- | यस्तत्रास्मद्गृह- |
| २०० | २५ | सामान्यान्यथा° | सामान्यान्यन्यथा° |
| २०१ | ७ | आकाङ्क्षाऽवशेन | आकाङ्क्षावशेन |
| ,, | १७ | अभिधेयः-ऽर्थो | अभिधेयोऽर्थो |
| २०२ | २१ | वृत्ति- | वृत्तिः |
| २०३ | ८ | सामान्या- | सामान्य- |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## शुद्धिपत्रकम्

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २०३ | १२ | इत्यन्यन्योन्या° | इत्यन्योन्या° |
| ,, | २८ | प्रकृतेर्निषेधस्य | प्रकृते निषेधस्य |
| २०४ | ६ | भूतं ननु | ननु |
| २०७ | १५ | नेत्रकौमुदीत्वं चेति | नेत्रकौमुदी त्वं चेति |
| २०९ | २५ | °संघटनां | संघटनाः |
| २१० | ५ | तत्काल° | तत्कान्त° |
| ,, | ११ | उक्तश्च | उक्तश्च |
| ,, | १३ | वाचकागृहीत | वाचका गृहीत |
| ,, | २० | व्यापारविषयो | व्यापारस्य विषयो |
| ,, | २३ | कुङ्कुङ्गीना | कुङ्कुङ्गीन |
| २११ | ६ | प्रियेणोच्चितम् | प्रिये नोच्चितम् |
| २१२ | १९ | शब्दभिन्ना | शब्दभिन्न- |
| ,, | २१ | ऽनपद्रवनीय | ऽनपह्ववनीय |
| २१३ | ७ | माविधिक | माविद्यक |
| ,, | २१ | मम धम्मिअ | भम धम्मिय |
| २१४ | २ | नु मज्जइ । दियस | णिमज्जइ । दिवस |
| ,, | ३ | नु मज्जिहसि | णिमज्जिहिसि |
| ,, | ५ | शुक्तिकरत्वं | शुचिकरत्वं |
| ,, | ५४ | °ब्रह्मणा | °ब्रह्मणा |
| ,, | २३ | तेन++++प्रतीयते | ( पुनरुक्तम् ) |
| २१५ | १ | शय्याया | शय्यायां |
| ,, | ५ | हयराइं | हयराई |
| ,, | ९ | चेति तेऽपि | चेतितेऽपि |
| ,, | १३ | 'अहम्' | 'महम्' |
| ,, | १८ | हयराइं | हयराई |
| ,, | २० | हृतरात्रिः | हतरात्रिः |
|  | २९ | इत्यनात्मीयत्व° | इत्यनेनात्मीयत्व° |
| २१६ | ४ | तेत्तियण | तेत्तिएण |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २१७ | ६ | मधुकः | मधुकैः |
| ,, | ,, | किंवा | किमिव |
| ,, | २० | इत्यस्य मङ्गल° | इत्यस्यामङ्गल |
| २१८ | २८ | मप्यारूप्यं | मप्याभिरूप्यं |
| २१९ | २ | शुण्हे ? | सुहे ! |
| ,, | १६ | वाह्रिका° | वाटिका |
| २२० | ८ | ना मात्रं | नामात्रं |
| २२१ | २ | विलुत्तमो | विलुत्ततमो |
| ,, | २३ | मवधाय | मवधार्य |
| २२२ | १४ | तयाप्रेप्सित° | तवापि तया प्रेप्सित° |
| ,, | २५ | चाविद्यते | चावेद्यते |
| ,, | २६ | णमुहेति | णहमुहेति |
| २२३ | ८ | वाच्यादविभिन्न | वाच्याद् विभिन्न |
| ,, | ९ | व न होइ | व ण होइ |
| ,, | १० | पउमग्घाइरि | पउमग्घाइणि |
| २२४ | ७ | सभ्रमं | सभ्रमरं |
| ,, | २० | शब्दबलान् | शब्दबलात् |
| २२६ | ८ | तदपेक्षावाच्यो° | तदपेक्षा, वाच्यो° |
| ,, | १६ | प्रतिमा | प्रतिभा |
| ,, | २० | अभिधानान्तरं | अभिधानन्तरं |
| २२७ | ४ | तद्वर° | सत्वर |
| २२८ | ९ | अपह्नोतुं | अपह्नोतुं |
| ,, | १० | क्षपानीया° | क्षयायनीराद्या° |
| ,, | ,, | नदीकुलं | नदीकूलं |
| ,, | २७ | अंशद्वय | अंसद्वय |
| २२९ | २० | तत्कामुको भोगो | तत्कामुकोपभोगो |
| २३० | २४ | विदध्यात् | कस्मात् विदध्यात् |
| २३१ | १० | इवाम्बोधेः | इवाम्भोधेः |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २३१ | १६ | इत्यतैः | इत्येतैः |
| २३२ | २० | भक्त्या | भङ्ग्या |
| ,, | २३ | व्यङ्ग्यत | व्यज्यत |
| २३६ | ६ | इत्थेत्यादि | एत्थेत्यादि |
| २३७ | ३ | सज्झाव | सब्भाव |
| २३८ | २५ | शत्तयुत्था° | शत्तयुत्थ |
| २४२ | १६ | विरुद्धया | निरुद्धया |
| ,, | २७ | द्वितीया | द्वितीय |
| २४७ | ८ | रभिघा | रभिधा |
| २४८ | १६ | समरेन | समरे न |
| ,, | २५ | शत्रुर्वधस्वेति | शत्रुर्वर्धस्वेति |
| २५२ | १४ | विधूतन | विधूनन |
| २५८ | २४ | सन्थरमत्थि | सत्थरमत्थि |
| २६१ | २४ | तृतीयाध्याये | तृतीयोच्छ्वासे |
| २६५ | १७ | °हृदयत्वान्मयूराणाम् | °हृदयत्वात्तेषाम्मयूराणाम् |
| ,, | १८ | जनितास्तेषां शब्द,° | जानिताः शब्द° |
| २६७ | २३ | तच्चनयस्य | तच्चयनस्य |
| २६५ | १७ | °स्तेनोम्मिन्नस्य | °स्तेनोम्मितस्य |
| ,, | १९ | इदं प्रथम° | इदम्प्रथम° |
| २६९ | ५ | प्राडोक्ति | प्रौढोक्ति |
| २७२ | ३ | निवेशितुं | निवेशितं |
| २७३ | १८ | निधाय | निर्धार्य |
| ,, | १९ | ज्ञातं ।–श्रवणा | ज्ञानं श्रवण |
| ,, | २७ | स्तन्यः | अन्यः |
| २७४ | १६ | °हरती | हरति |
| ,, | १७ | प्रियासनोत्सङ्गे | प्रियास्तनोत्सङ्गे |
| ,, | २२ | विभावाधिकं | विभावादधिकं |
| २७५ | १५ | धनम् | घनम् |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २७६ | १७ | पथिकात् । मारुत | पथिकान् । मारुतः |
| ,, | २१ | लग्नसर्वनि° | लग्नसर्पनि° |
| ,, | २३ | संसर्गवत्ते | संसर्गवत्त्वे° |
| ,, | २५ | °समावद्धतै° | सम्बद्धतै° |
| ,, | २८ | ईर्षा | ईर्ष्या |
| २७७ | २ | मद्विषया | मद्विषयया |
| ,, | ३ | °विषया | °विषयया |
| ,, | ६ | ईर्षया | ईर्ष्यया |
| ,, | २१ | आकृष्टो | आकृष्टा |
| २७८ | ११ | पाविह्रसि | पाविह्रिसि |
| ,, | २२ | शम्मली | शम्भली |
| २७९ | १५ | किमेतद्वास्त्विति | किमेतद्वस्त्विति |
| ,, | १६ | पत्रमङ्गरचना | पत्रभङ्गरचना |
| २८० | २१ | निष्पन्न | निष्पत्र |
| २८१ | १८ | बहुप्फलिह | बाडप्फलिह |
| ,, | २४ | खण्डिताः विच्छिन्नाः, | खण्डितः विच्छिन्नः |
| २८२ | ७ | शिखरिक्नु | शिखरिणी क्नु |
| ,, | १२ | मानमङ्गा | मानभङ्गा |
| २८४ | २७ | स्नेह कुरुत | स्नेहं कुरुत |
| २८५ | ७ | मनीतायां | मतीतायां |
| ,, | १६ | स्वातन्त्रय | स्वातन्त्र्य |
| ,, | २८ | अज्ञानात् | अज्ञातात् |
| २८६ | ६ | विरहेनेयं तवास्थेति | विरहेणेयं तवावस्थेति |
| ,, | ११ | हास्तित | हस्तित |
| २८७ | १८ | व्यन्ते | प्यन्ते |
| २८८ | २६ | कुरोऽपि | क्रूरोऽपि |
| २८९ | ६ | यदीममर्थं | यदिममर्थं |
| ,, | २१ | मर्षकत्वं विवदमानां | मर्शकत्वं विवदमानानां |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २९० | ३ | ण्णो | णो |
| ,, | २५ | प्राढ | प्रौढ |
| २९१ | १८ | मेधानां | मेघानां |
| २९२ | ६ | त्तहं | तुहं |
| ,, | १० | स्थापिता | स्थायिता |
| ,, | १२ | जातशोके | जातशोफे |
| २९३ | ८ | त्तहं | तुहं |
| ,, | २२ | ईर्षातिशयः | ईर्ष्यातिशयः |
| २९४ | २ | दयोभि | दहोभि |
| ,, | २२ | पततावितिं | पनतावितिं |
| २९५ | २० | माश्रयाभोगः | माश्रमाभोगः |
| २९६ | १२ | नामोत्थं | नामेत्थं |
| २९८ | २७ | सहृनयन | रुद्धनयन |
| २९९ | १३ | समाजेऽपि | समानेऽपि |
| ,, | २५ | वाच्यानेव | वाच्यान्येव |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुद्रक—लक्ष्मीबाई नारायण चौधरी, निर्णयसागर प्रेस,
२६–२८ कोलभाट स्ट्रीट, मुंबई नं. २

For Private And Personal Use Only